ISSN: 2320-740X

# शारदा

## वार्षिकपत्रिका



प्रधानसम्पादकः

आचार्यः ए. पि. सच्चिदानन्दः

सम्पादकौ

डा. नवीनहोळ्ळः

डा. कोम्पेल्लि विनयकुमारः

## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा “A” श्रेण्याङ्कितः

## राजीवगान्धीपरिसरः

शृङ्गेरी - ५७७१३९

# शारदा

## वार्षिकपत्रिका

प्रधानसम्पादकः

आचार्यः ए. पि. सच्चिदानन्दः

सम्पादकौ

डा. नवीनहोळ्ळः

डा. कोम्पेल्लि विनयकुमारः

## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्याङ्कितः

## राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७१३९

# शारदा

ISSN: 2320-740X

प्रधानसम्पादकः आचार्यः ए. पि. सच्चिदानन्दः

सम्पादनसमितिः

डा. नवीनहोळ्ळः
डा. कोम्पेल्लि विनयकुमारः
श्री रवीशः एन्.
डा. कविता एस्.
डा. रेखामिश्रा
श्रीमती पावना
आयुष्मती महेश्वरी एस्.
आयुष्मान् प्रदीपभट्टः के.
आयुष्मान् नवीनः के. आर्.
आयुष्मान् नवनीतकृष्णः जे.
आयुष्मती क्षमा कामत् के.

प्रकाशनवर्षम् : 2018

© राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577139
कर्णाटकराज्यम्

प्रतिः 560

प्रकाशकः

प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी –577139
कर्णाटकराज्यम्

पृष्ठविन्यासः – रवीशः एन्., सङ्गणकप्राध्यापकः

मुद्रणम्

श्री सिरि एण्टर्प्रैसस्, शृङ्गेरी

© All rights are reserved for Publisher,
Provided that contributors are responsible for their respective writing.

## श्रीश्रीजगद्गुरुशङ्कराचार्यमहासंस्थानम्, दक्षिणाम्नायश्रीशारदापीठम्, शृङ्गेरी



जगद्गुरवः श्रीश्रीभारतीतीर्थमहास्वामिनः

श्रीदक्षिणाम्नायशृङ्गेरीशारदापीठम्, शृङ्गेरी

पवित्रक्षेत्रे शृङ्गगिरौ विद्यमानं श्रीराजीवगान्धीसंस्कृतविद्यापीठं संस्कृतप्रचारं विदधद् वरीवर्ति । विद्यापीठेऽस्मिन् परुदिव ऐषमोऽपि शारदानाम्नी पत्रिका प्रकाश्यत इति विदित्वा दक्षिणाम्नायशृङ्गगिरिशारदापीठाधीश्वराः जगद्गुरुश्रीभारतीतीर्थमहास्वामिचरणाः नितरां प्रमुदितस्वान्ता अभवन् ।

इयं च पत्रिका अत्रत्यानां छात्राणां प्रज्ञायाः प्रतिभायाश्च दर्पणायते । श्रीशारदाशशिकलावतंसयोरकम्पानुकम्पया पत्रिकेयं हृद्यैः लेखनैर्विभूषिता सहृदयानां चेतांसि रञ्जयतु , विद्यापीठमिदमुत्तरोत्तरमभिवर्धताम् । अत्रत्याः छात्राः सम्यग्विद्यामधीत्य श्रेयोभाजनानि भूयासुरिति श्रीचरणा आशासते ।

इति निवेदयिता

डा. वे. रा. गौरीशङ्करः

**प्रो. पि. एन्. शास्त्री**
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

**Prof. P. N. Shastry**
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



# शुभाशंसनम्

**"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ"** इति भगवद्गीतावचनं शास्त्राणां सार्वकालिकीम् उपादेयताम् अभिव्यनक्ति। कर्तव्याकर्तव्यविवेको हि मानवान् इतरप्राणिभ्यो व्यावर्तयति। सोऽयं विवेकः शास्त्रैकसमधिगम्यः। शास्त्राणि च संस्कृतभाषयोपनिबद्धानि महर्षिभिः। **"संस्कृतं नाम दैवी वाक्", "भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती", "संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः"** इत्येता अभियुक्तोक्तयः संस्कृतभाषायाः असाधारणमहिमानं प्रकटयन्ति। सकलभाषाललामभूता खगोलभूगोलादिसमस्तज्ञान-राशीनां सम्राज्ञी, आध्यात्मिकज्ञानामृतस्य शेवधिरियं संस्कृतभाषा कस्य न सचेतसश्चेतः आवर्जयति ।

"अर्थतः शब्दतश्चापि सर्वं भारतवाङ्मयम् ।
ओतप्रोततया व्याप्य संस्कृतं ब्रह्म राजते" इति ॥

भारतस्य सर्वाङ्गीणसमुन्नतये विकासाय च संस्कृतभाषायाः सर्वशास्त्राणां च प्रचारः प्रसारश्च नितरामनिवार्यः। तदनुरोधेनैव राष्ट्रियसंस्कृतसंस्थानान्तर्गतः शृङ्गेरीस्थराजीवगान्धीपरिसरः शैष्योपाध्यायिकयुक्तः शास्त्राध्ययनाध्यापनयोः अविश्रान्तं विनूत्नं सवेगं च अहमहमिकया पुरोजिगमिषुभावविलसितो प्रचलतीति प्रमोदावहो भावो मनसि तन्तन्यते ।

परिसरेऽत्र ऐषमोऽपि वाग्वर्धिनीपरिषत्पक्षतः शारदानाम्नी वार्षिकी पत्रिका प्रकाश्यते इति विज्ञाय भृशं सन्तोषमनुभवामि । भारतसर्वकारोऽपि विषयेऽस्मिन् सावधानो वर्तते। शास्त्रविज्ञानानां प्रसाराय प्रवर्तमानानाम् एतादृशीनां पत्रिकानामध्येतारः सहस्रशः लक्षशश्च दरीदृश्यन्ते । अतः ईदृशपत्रिकाप्रकाशनं सर्वथा सर्वदा च अनुशीलनीयम्, सम्मान्यं, विकसनीयञ्च।

कार्येऽस्मिन् प्रधानतामावहद्भ्यः परिसरप्राचार्येभ्यः तत्सहकारिभ्यः वाग्वर्धिनीपरिषदध्वदर्शिभ्यः परिषत्सदस्येभ्यश्च साधुवादान् व्याहरामि। लेखकानां कौशलम् इतोऽपि अभिवर्धतामिति भगवतीं शारदां **श्रीमज्जगद्गुरुश्रीश्रीभारतीतीर्थमहास्वामिचरणान् श्रीमज्जगद्गुरुश्रीश्रीविधुशेखरभारतीमहास्वामिचरणांश्च** सम्प्रार्थये।

हेमलम्बि-फाल्गुन-कृष्ण-षष्ठी
दिनाङ्कः – 07-03-2018

प.ना.शास्त्री
(परमेश्वरनारायणशास्त्री)
कुलपतिः

56-57, Institutional Area, Janakapuri, New Delhi -110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995, E-Mail: rskspvc@yahoo.com

प्रो. एस्. सुब्रह्मण्य शर्मा
कुलसचिव (प्र.)
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

Prof. S. Subrahmanya Sharma
The Registrar (I/c)
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



# शुभसन्देशः

**"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा"** इति आर्योक्तिः। तत्र सनातनसंस्कृतिः संस्कृताश्रिता इति विदित एव विषयः। संस्कृतसंरक्षणेन सनातनधर्ममूलस्य वेदस्य संरक्षणमभिहितमभिज्ञायते । तस्मादेव सार्थकमिदं वचनं **"वेदोऽखिलो धर्ममूलम्"** इति । तदिदं स्मारं स्मारं राष्ट्रियसंस्कृतसंस्थानं संस्कृतशास्त्रवाङ्मयस्य अध्ययनाध्यापनानुसन्धानव्यवस्थां प्रकल्पयति । तद्दिशि नितरां सार्थकं नाम आवहन् राजीवगान्धीपरिसरः अनिशं नवोत्साहेन नूत्नान् कार्यकलापान् आयोजयन् ऐषमः वार्षिकीं शारदापत्रिकां प्रकाशयतीति महतः सन्तोषस्य विषयः।

सन्दर्भेऽस्मिन् अस्मत्कुलपतिवर्यान् आचार्यान् परमेश्वरनारायणशास्त्रिणः विदितवेदितव्यान् नमामो वयम्। स्ववैदुष्येण लोके प्रथितयशसः राजीवगान्धीपरिसरप्राचार्यान् आचार्यान् अस्मन्मित्रमणीन् ए. पि. सच्चिदानन्दवर्यान् अभिनन्दामश्च ।

वाग्वर्धिनीपरिषदध्वदर्शिभ्यां नवीनहोल्लविनयकुमाराभ्यां साधुवादेन सह **"विराजतां शारदापत्रिका"** इति शुभाशिषो वितरामः । श्रीशारदाम्बायाः दिव्यानुग्रहेण जगद्गुरुश्रीचरणानामसीमानुकम्पया च संवर्धतां परिसरपरिवार इत्याशास्महे ।

हेमलम्बि-फाल्गुन-कृष्ण-षष्ठी
दिनाङ्कः – 07-03-2018

( आचार्यः एस्. सुब्रह्मण्य शर्मा )
कुलसचिवः ( प्र.)

56-57, Institutional Area, Janakapuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995, E-Mail: rskspvc@yahoo.com

**आचार्यः ए. पि. सच्चिदानन्दः**
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

**Prof. A. P. Sachidananda**
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139



## गुणगणभरिता नः शारदा शं तनोतु

"विश्वेदेवाः समनसः सकेता एकं क्रतुमभि वियन्ति साधु" गरीयस्याः श्रुतेरस्याः निर्देशः विश्वे सर्वे देवाः समानमनस्काः तेजोयुक्ताः सन्तः एकमद्वितीयं क्रतुं (सृष्ट्यादीनां कर्मणां कर्तारं परमात्मानमभिलक्ष्य) सम्यक् आभिमुख्येन विविधमुपयन्ति उपासते चेति । अतोऽवगम्यते यत् कर्मणां परमं लक्ष्यं परमात्मन आभिमुख्येन विविधमार्गेण गमनमेव निःश्रेयसे भवति इति । श्रुत्युदीरिततल्लक्ष्यावाप्तये वेदार्थज्ञानार्थं षडङ्गानि तथैव नानाशास्त्राणि च क्रान्तदर्शिभिर्महर्षिभिः निर्ममिरे । तेषां शास्त्राणामध्ययनसंरक्षणसंवर्धनादिकमस्माकं समेषामाद्यं कर्तव्यमस्तीति लोकविदितो विचारः ।

तत्कर्तव्यं मनसि निधाय भारतशासनेन राष्ट्रियसंस्कृतसंस्थानं प्रतिष्ठाप्य बहुपरिसरान्वितो मानितविश्वविद्यालयः प्रावर्त्यत । तत्र राजीवगान्धीपरिसरः सकलशास्त्राण्यविकलं परिरक्षन् विद्योतत इति समेऽपि लोकाः संविद्रते । परमपुण्यक्षेत्रे शृङ्गगिरौ शोभायमानेऽस्मिन् परिसरे नानाशास्त्रनदीष्णाः स्वाध्यायप्रवचनेषु अकुण्ठितगतयो विद्वांसोऽन्तेवसतां सर्वतोमुखविकासाय शास्त्राण्यध्यापयन्तः पाठ्येतरकार्येष्वपि प्रोत्साहयन्तः छात्रप्रतिभासंवर्धनाय दत्तावधानाः विलसन्तीत्यतो राष्ट्रे परिसरस्यास्य यशस्विता प्रथिता संभ्राजते । छात्रेषु निहितानेकप्रतिभानामाविष्करणेन तेषां समृद्धव्यक्तित्वविकासो जायत इत्यतः संस्थानस्य सङ्कल्पान् अनुसृत्य बहुविधच्छात्रोपयोगीनि कार्याण्यत्र सम्पत्स्यन्ते, येषु

सर्जनात्मकशक्तेराविष्करणाय शारदानाम्नी वार्षिकपत्रिका अतितरां महत्त्वं भजते ।

छात्राणां रचनाशक्तेरुत्कर्षाय परिसरप्राध्यापकाः वैदुष्यपूर्णान् लेखान् पत्रिकाया अस्यै प्रदाय विद्यार्थिनां प्रतिभापूर्णाः कृतीः निर्मातुं तानभिप्रेरयन्ति । सारस्वतसेवायामविरतं संलग्नानां वाङ्मये तपसि समर्पितचित्तानां श्रद्धावतामध्यापकानां छात्राणां च महद्योगदानेन सम्पादितेयं शारदानाम्नी पत्रिका नूनमपूर्वा काचित् प्रतिभासङ्गमरूपेण विभाति । बहुभाषाभिर्निबद्धेयं पत्रिका शास्त्राणां कलात्मकविचाराणां च प्रसारणायाद्भुतविद्वच्छक्तेर्निकषेव सहृदयानां जनानां चेतोहारिणी स्यादिति विश्वसिमि ।

पत्रिकामेनां परिशील्य रुचिरां शुभाशंसां प्रेषितवद्भ्यो विद्वद्धौरेयेभ्योऽस्मत्परिसरविषये सततं कृपान्वितेभ्यः कुलपतिवर्येभ्यः आचार्येभ्यः प. ना. शास्त्रिवर्येभ्यः प्रणामान् समर्पयामः । अस्याः पत्रिकायाः विषये स्वीयशुभाशयान् प्रेषितवद्भ्यः अस्माकं सर्वविधविकासे दत्तचित्तेभ्यः विद्वन्मतल्लिकाभ्यः आचार्य सुब्रह्मण्यशर्मभ्यः कार्तज्ञ्यं विनिवेदयामः । पत्रिकासम्पादने सत्रादितः कृतश्रमयोः वाग्वर्धिनीपरिषदध्वदर्शिनोः सर्वदैव छात्राणां हितचिन्तने बद्धादरयोः डा. नवीनहोळ्ळ- डा. कोम्पेल्लि विनयकुमारमहोदययोः कृते धन्यवादान् वितन्महे । अस्मत्परिसरीयच्छात्रान् बहुविधस्पर्धार्थं सज्जीकरणे अनवरतं परिश्रमं कृतवतोः स्पर्धिष्णुपरिषदध्वदर्शिनोः डा. रामचन्द्रुलबालाजि डा. प्रसादभट्टयोः कृते धन्यतामाविष्कुर्मः ।

पत्रिकाया अस्याः सम्पादने कृतभूरिपरिश्रमेभ्यो वाग्वर्धिनीपरिषदः कार्यदर्शिप्रमुखेभ्यः सम्पादनसमितिसदस्येभ्यश्च शं कामयामहे ।

अस्मत्परिसरस्य सर्वविधविकासस्य निदानभूतानां ज्ञानतपोमूर्तीनां अनन्तश्रीविभूषितानां जगद्गुरूणां श्रीश्रीभारतीतीर्थमहास्वामिनां, तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीतीर्थमहास्वामिनां चरणनलिनयोः जगन्मातुः श्रीशारदाम्बायाः पादारविन्दयोश्च सभक्तिश्रद्धं प्रणतिततीः समर्पयामः ।

इत्थम्
विद्वज्जनविधेयः
ए. पी. सच्चिदानन्दः
(आचार्यः ए. पि. सच्चिदानन्दः)

# सम्पादकीयम्

शास्त्रं हि पुरुषस्य श्रेयः तत्साधनानि च अभिधत्ते। लोके प्रत्यक्षादिभिरितरप्रमाणैः पुरुषः प्रेयः तत्साधनानि च अवगच्छति, न तु श्रेयस्तत्साधनं वा । श्रेयः प्रेयसोः विवेकदृष्टिः शास्त्राध्ययनेन निष्पद्यते ।

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः ।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते ॥ (कठोपनिषत् १.२.२)

शास्त्रं द्विविधं प्रवर्तनपरं वस्तुतत्त्वान्वाख्यानपरञ्च । सम्प्रति संस्कृतविद्यालयेषु साम्प्रदायिकेषु आधुनिकेषु च वस्तुतत्त्वान्वाख्यानपराणामेव व्याकरणन्यायप्रभृतीनां भूयान् प्रसारः, प्रवर्तनपराणां स्मृतिधर्मशास्त्रोपनिषदादीनां तु कुण्ठितः प्रसारः परिदृश्यते । मन्दश्रद्धानां मध्यमाधिकारिणां श्रद्धादार्ढ्याधायकतया वस्तुतत्त्वान्वाख्यानं यद्यपि उपयुज्यते तथापि विवेकदृष्टिलाभाय हिते प्रवर्तनाय अहितान्निवर्तनाय च नाऽलम् । अत एव हिताहितप्रवृत्तिनिवृत्तिबोधकं वाङ्मयमेव मुख्यतया शास्त्रपदाभिधेयम् आमनन्ति अभिज्ञाः । –

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥ (श्लोकवार्तिकम्)
यच्छास्ति वः क्लेशरिपून् अशेषान् सन्त्रायते दुर्गतितो भवाच्च । तच्छासनात् त्राणगुणाच्च शास्त्रम् ॥ इति ।

एतदपि शास्त्रं यद्यपि अधीतिमात्रेण न विवेकदृष्टिं प्रसूते । अपितु गुरुशुश्रूषाशमादिसाधनोपबृंहितमेव । गुरुः "अधिगततत्त्वः शिष्यहितायोद्यतः सततम्" । तत्त्वस्य अधिगमश्च साक्षात्कारात्मकः। गुरोः शुश्रूषा चतुर्धा विधीयते- कायेन धनधान्यादिना सम्माननेन सद्भावनया चेति ।

आत्मार्थमानसद्भावैः शुश्रूषा स्याच्चतुर्विधा । (कुलार्णवतन्त्रम्)

शिष्यस्तावत् भक्तिमानेव ।

विप्रः षड्गुणयुक्तश्चेद् अभक्तो न प्रशस्यते । म्लेच्छोऽपि गुणहीनोऽपि भक्तिमान् शिष्य उच्यते ॥
(कुलार्णवतन्त्रम्)

रूपरसादीनां बाह्यविषयाणाम् उपभोग एव "प्रेयः" इत्युच्यते। प्राणिमात्रेण अभिलषितत्त्वात् । तच्च प्रेयः विवेकिभिः नाद्रियते ।

ये तु संस्पर्शजा भोगा दुःखयोनय एव ते । आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ (भगवद्गीता)

श्रेयस्तावत् रूपरसादिनैकविधविषयवासनामलानां दूरीकरणेन परिशुद्धे अन्तःकरणे आत्मनः प्रकाशः ।

एषः भौतिकप्रपञ्चः तदाश्रितं प्रेयश्च प्रत्यक्षादिप्रमाणानां गोचरः । ततोऽतिरिक्तः त्रिगुणितश्च अभौतिकः आध्यात्मिकप्रपञ्चः तदाश्रितं श्रेयश्च शास्त्रमात्रगोचरः ।

"पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" (ऋग्वेदः)

प्रेयःकाङ्क्षि प्राणिमात्रम्, श्रेयःकाङ्क्षी कश्चिदेव विवेकिजनः । श्रेयःकाङ्क्षिभिः प्रेयःकाङ्क्षा अवश्यमेव वर्जनीया भवति, श्रेयः प्रेयसोः विरोधात् ।

"दूरमेते विपरीते विषूची" । (कठोपनिषत्)

यद्यपि श्रेयोव्यतिरिक्तानि नैकानि प्रेयांसि भौतिकप्रयोजनानि उद्दिश्य नैकानि शास्त्राणि प्रवृत्तानि दृश्यन्ते यथा आयुर्वेदशिल्पनाट्यशास्त्रादीनि तथापि मन्दमध्यमाधिकारिणाम् अनुग्रहाय प्रवृत्तानाम् अमीषां शास्त्राणां श्रेयःप्रतिपादक-शास्त्रैकवाक्यतया श्रेयःप्राप्तौ एव परमतात्पर्यमवसीयते ।

सम्प्रति आधुनिकविद्यायाः अध्ययनाध्यापनादिव्यवस्थामेव छायेव अनुसरन्ती शास्त्रविद्यायाः अध्ययनाध्यापनव्यवस्था शास्त्रोद्दिष्टफलप्रापणे छात्रान् नोपकरोतीति कटु तथ्यम् अतिरोहितमेव विज्ञानाम् । तस्मात् शास्त्रोद्दिष्टफलप्रेप्सुभिः छात्रैः भूयानेव कठोरश्रमः स्वातन्त्र्येण आस्थेयः विद्यते । कठिनस्थितावस्यां प्राचीनशास्त्राणाम् आधुनिकपद्धत्या अध्ययनाध्यापनाभ्यां प्रसारणाय बद्धदीक्षोऽयं राजीवगान्धीपरिसरः वार्षिकपत्रिकायाः शारदायाः २०१७-१८ वर्षीयां सञ्चिकां प्रकाशयति । पत्रिकायाः अस्याः प्रकाशनाय अनुमतिं प्रदाय शुभसन्देशं प्रेषितवद्भ्यः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिभ्यः आचार्येभ्यः प. ना. शास्त्रिवर्येभ्यः, कुलसचिवेभ्यः आचार्येभ्यः एस्. सुब्रह्मण्यशर्मभ्यः, परिसरीयप्राचार्येभ्यः आचार्येभ्यः ए. पि. सच्चिदानन्दवर्येभ्यश्च कार्तज्ञ्यं विनिवेदयावः । पत्रिकासम्पादनकर्मणि कृतोद्यमान् सङ्गणकप्राध्यापकः रवीशः एन् . महोदयः, कन्नडप्राध्यापिका डा. कविता एस् , आङ्ग्लप्राध्यापिका श्रीमती पावना, हिन्दीप्राध्यापिका श्रीमती रेखामिश्रा, इमान् सर्वान् परिसरीयप्राध्यापकान् कार्तज्ञ्यवाचा अभिनन्दावः । लेखानां सङ्ग्रहणे टङ्कणादिकर्मसु च कृतमहोद्यमाः आयुष्मती महेश्वरी, आयुष्मान् प्रदीपभट्टः, आयुष्मान् नवनीतकृष्णः जे, आयुष्मान् नवीनः के.आर्. , आयुष्मती क्षमा कामत् के., आयुष्मान् मलय माइती, आयुष्मती दुर्गा श्रीवत्सा, आयुष्मान् गिरीशभट्टः अन्ये च वाग्वर्धिनीसदस्याः छात्राः साधुवादेन अभिनन्द्यन्ते ।

विद्याधिदेवतायाः शृङ्गेरीक्षेत्राधिष्ठात्र्याः श्रीशारदाम्बायाः असीमानुकम्पया ज्ञानतपोमूर्तीनां जगद्गुरूणां श्रीश्रीभारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां श्रीश्रीविधुशेखरभारतीमहास्वामिनां च परिपूर्णानुग्रहेण च परिसरोऽयं सकलविधकीर्तिभाजनं वर्तते । अतः जगन्मातुः जगद्गुरूणाञ्च चरणनलिनेषु सभक्तिश्रद्धं प्रणमावः ।

विद्वज्जनविधेयौ

डा. नवीनहोळळः

डा. कोम्पेल्लि विनयकुमारः

हेमलम्बिफाल्गुनासितत्रयोदशी

१४.३.२०१८

# सम्पादनसमितिः


डा. नवीनहोळ्ळः


डा. कोम्पेल्लि विनयकुमारः


श्री रवीशः एन्.


डा. कविता एस्.


डा. रेखामिश्रा


श्रीमती पावना


कु. महेश्वरी


कु. प्रदीपभट्टः के.


कु. नवीनः के. आर्.


कु. नवनीतकृष्णः जे.


कु. क्षमा कामत् के.

# ज्यौतिषविभागः



**प्रो. ए. पि. सच्चिदानन्दः**
विभागाध्यक्षः



**डा. मुरलिकृष्णः टि.**
संविदध्यापकः



**डा. प्रसादभट्टः**
अतिथ्यध्यापकः



**डा. प्रदीपशर्मा**
अतिथ्यध्यापकः

# अद्वैतवेदान्तविभागः



**प्रो. महाबलेश्वर पि. भट्टः**
विभागाध्यक्षः



**डा. गणेश ईश्वर भट्टः**
सहायकाचार्यः



**डा. श्रीकरः जि. एन्.**
संविदध्यापकः



**विद्वान् निरञ्जनभट्टः**
संविदध्यापकः

# मीमांसाविभागः



**प्रो. सुब्राय वि. भट्टः**
विभागाध्यक्षः



**डा. सूर्यनारायणभट्टः**
सहायकाचार्यः



**डा. वेङ्कटेशताताचार्यः**
सहायकाचार्यः

## नव्यन्यायविभागः



**प्रो. का. इ. मधुसूदनः**
विभागाध्यक्षः



**डा. नवीनहोळ्ळः**
सहायकाचार्यः



**विद्वान् श्यामसुन्दरः ए.**
संविदध्यापकः



**डा. आर्. नवीनः**
संविदध्यापकः

## व्याकरणविभागः



**डा. सि. एस्. एस्. नरसिंहमूर्तिः**
विभागाध्यक्षः



**डा. चन्द्रशेखरभट्टः**
सहायकाचार्यः



**डा. कृष्णानन्तपद्मनाभम्**
सहायकाचार्यः



**डा. प्रमोदभट्टः**
अतिथ्यध्यापकः



**विद्वान् अरुणभट्टः**
अतिथ्यध्यापकः

# साहित्यविभागः



**डा. राघवेन्द्रभट्टः**
विभागाध्यक्षः



**डा. चन्द्रकला आर्. कोण्डी**
सहायकाचार्या



**डा. कोम्पेल्लि विनयकुमारः**
संविदध्यापकः



**डा. एम्. श्रीनिवासमूर्तिः**
अतिथ्यध्यापकः



**विद्वान् श्रीकरः वि.**
अतिथ्यध्यापकः

# शिक्षाविभागः



**डा. चन्द्रकान्तः**
विभागाध्यक्षः



**डा. रामचन्द्रुल बालाजि**
सहायकाचार्यः



**डा. हरिप्रसादः के.**
सहायकाचार्यः



**डा. गणेश ति. पण्डितः**
सहाकाचार्यः



**डा. वेङ्कटरमणभट्टः**
सहायकाचार्यः



**डा. नारायणवैद्यः**
अतिथ्यध्यापकः



**डा. अरविन्दकुमार सोमदत्तः**
अतिथ्यध्यापकः

## आधुनिकविषयविभागः



**डा. कविता एस्.**
संविदध्यापिका (कन्नडभाषा)



**डा. प्रभाकरः एम्. ए.**
संविदध्यापकः (इतिहासः)



**श्री रामचन्द्रः एच्. डी.**
अतिथ्यध्यापकः (क्रीडा)



**श्री शशिधरः के. वि.**
अतिथ्यध्यापकः (सङ्गणकम्)



**श्री रवीशः एन्.**
अतिथ्यध्यापकः (सङ्गणकम्)



**डा. रेखामिश्रा**
अतिथ्यध्यापिका (हिन्दीभाषा)



**श्रीमती पावना**
अतिथ्यध्यापिका (आङ्ग्लभाषा)

## पदविकापाठ्यप्रणाली
(Diploma Course)



**डा. सुधांशुकुमारनन्दा**
संविदध्यापकः (वास्तु)



**श्री. एन्. रमानन्दभट्टः**
संविदध्यापकः (ज्यौतिषम्)

## स्वाध्यायकेन्द्रम्



**श्री. कु. वेङ्कटेशमूर्तिः**
अध्वदर्शी



**श्री पृथ्वीराजः के.**
डि. ई. ओ. (बा. सं)



**श्री सन्दीपः**
एम्. टि. एस्. (बा. सं)

## ग्रन्थालयः



**श्री बेनुधरमोहापात्रः**
सहायकग्रन्थपालः (सं)



**श्री दिनेशः**
एम्. टि. एस्.



**श्रीमती सिद्दम्मा**
एम्. टि. एस्.



**श्रीमती श्रीगौरी**
डि. इ. ओ. (बा. सं)



**श्रीमती शुभा**
एम्. टि. एस्. (बा. सं)

## कार्यालयीयाः सदस्याः



**श्रीमती सीतालक्ष्मीः**
अनुभागाधिकारिणी



**श्री एस्. के. महापात्रः**
कार्यालयसहायकः



**श्री गुरुराजभट्टः**
यू. डि. सि.



**श्री एस्. आर्. चन्द्रशेखरः**
एल्. डि. सि.



**श्रीमती मञ्जुळा**
एल्. डि. सि.


श्रीमती सौम्या
डि. ई. ओ. (बा. सं)


श्री कुमारः
एम्. टि. एस्.


श्री शिवण्णः
एम्. टि. एस्.


श्री एम्. रफीकः
एम्. टि. एस्.


श्रीमती जयम्मा
स्वच्छताकर्मचारिणी


श्रीमती सावित्री
छात्रावासनिरीक्षिका (बा. सं)


रश्मी एस्.
छात्रावासनिरीक्षिका (बा. सं)


श्री उमेशः
छात्रावाससहायकः (बा. सं)


श्री लोकेशः
छात्रावाससहायकः (बा. सं)


श्रीमती तिम्मम्मा
स्वच्छताकर्मचारिणी (बा. सं)


श्रीमती अन्नपूर्णा
स्वच्छताकर्मचारिणी (बा. सं)


श्रीमती पार्वती
स्वच्छताकर्मचारिणी (बा. सं)


श्रीमती पद्मा
स्वच्छताकर्मचारिणी (बा. सं)


श्रीमती सुन्दरी
स्वच्छताकर्मचारिणी (बा. सं)


श्री नागेशः
उद्यानपालकः (बा. सं)


श्री एम्. बि. शङ्कर्
रक्षणकर्मचारी (बा. सं)


श्री सदाशिवः
रक्षणकर्मचारी (बा. सं)


श्री के. चन्द्रप्पः
रक्षणकर्मचारी (बा. सं)


श्री एम्. के. राजुः
रक्षणकर्मचारी (बा. सं)


श्री सि. रविः
रक्षणकर्मचारी (बा. सं)


श्री एम्. वी. महेशः
रक्षणकर्मचारी (बा. सं)


श्री अप्पय्याचारि
रक्षणकर्मचारी (बा. सं)


श्री सुब्रह्मण्यः
रक्षणकर्मचारी (बा. सं)


श्री चन्द्रशेखरः
रक्षणकर्मचारी (बा. सं)

# वाग्वर्धिनीपरिषत्



डा. नवीनहोळ्ळः
अध्वदर्शी



डा. कोम्पेल्लि विनयकुमारः
अध्वदर्शी

## परिषत्सदस्याः








| सुब्रायः एच्. जे. | योगिता दि. छत्रे | प्रमोदः जि. के. | अश्विन् जि. भट्टः | शरण्यः पि. | भवानी आर्. के. |
|---|---|---|---|---|---|
| कार्यदर्शी | कार्यदर्शिनी | स्पर्धिष्णुपरिषत्कार्यदर्शी | स्पर्धिष्णुपरिषत्कार्यदर्शी | स्पर्धिष्णुपरिषत्कार्यदर्शी | सांस्कृतिककार्यदर्शिनी |








| कार्तिकेशः के. | विद्यावती भट् | श्रीप्रद एम्. जोशि | निरञ्जनभट्टः | महेश्वरी | मलय माइति |
|---|---|---|---|---|---|
| सांस्कृतिककार्यदर्शी | क्रीडाकार्यदर्शिनी | क्रीडाकार्यदर्शी | क्रीडाकार्यदर्शी | पत्रिकाकार्यदर्शिनी | पत्रिकाकार्यदर्शी |







| प्रदीपभट्टः के. | नवीनः के. आर्. | नवनीतकृष्णः जे. | क्षमा कामत् के. | दुर्गाश्रीवत्सा |
|---|---|---|---|---|
| पत्रिकाकार्यदर्शी | पत्रिकाकार्यदर्शी | पत्रिकाकार्यदर्शी | पत्रिकाकार्यदर्शिनी | पत्रिकाकार्यदर्शिनी |

# विविधपरिषदाम् अध्वदर्शिनः




## श्रीशारदाविशिष्टव्याख्यानमाला

**डा. चन्द्रकान्तः**
शिक्षाशास्त्रविभागाध्यक्षः

**विद्वान् श्यामसुन्दरः ए.**
अध्यापकः, न्यायविभागः

## स्पर्धिष्णुपरिषत्

**डा. रामचन्द्रुल बालाजि**
सहायकाचार्यः, शिक्षाशास्त्रविभागाध्यक्षः

**डा. प्रसादभट्टः**
अध्यापकः, ज्यौतिषविभागः







## वाक्यार्थपरिषत्

**डा. एस्. वेङ्कटेशताताचार्यः**
सहायकाचार्यः, मीमांसाविभागः

**डा. प्रमोदभट्टः**
अध्यापकः, व्याकरणविभागः

## क्रीडासमितिः

**डा. चन्द्रकान्तः**
शिक्षाशास्त्रविभागाध्यक्षः

**श्री रामचन्द्रः एच्. डि.**
शारीरिकशिक्षणमार्गदर्शकः




## सांस्कृतिकसमितिः



आचार्यः महाबलेश्वर पि. भट्टः



डा. वेङ्कटरमणभट्टः



डा. सूर्यनारायणभट्टः



डा. मुरलीकृष्णः टि.

## विद्यावारिधि–उपाधिप्राप्तिः



**श्रीमान् शङ्करनागेशभट्टः**
वेदान्तशास्त्रम्
मार्गदर्शकः
**आचार्यः महाबलेश्वर पि. भट्टः**



**श्रीमती पुष्पाहेगडे**
वेदान्तशास्त्रम्
मार्गदर्शकः
**आचार्यः महाबलेश्वर पि. भट्टः**



**श्रीमान् विजयानन्द अडिगः**
ज्यैतिषशास्त्रम्
मार्गदर्शकः
**आचार्यः ए. पि. सच्चिदानन्दः**



**श्रीमान् वेङ्कटेशः**
व्याकरणशास्त्रम्
मार्गदर्शकः
**डा. सि. एस्. एस्. एन्. मूर्तिः**



**श्रीमान् जयकृष्णः**
व्याकरणशास्त्रम्
मार्गदर्शकः
**डा. चन्द्रशेखरभट्टः**



**श्रीमान् राघवेन्द्र पि. अरोळी**
न्यायशास्त्रम्
मार्गदर्शकः
**डा. नवीनहोळळः**



**श्रीमान् रजेशः एम्. डी.**
साहित्यशास्त्रम्
मार्गदर्शिका
**डा. चन्द्रकला आर्. कोण्डी**



**श्रीमान् नवनीतभट्टः**
मीमांसाशास्त्रम्
मार्गदर्शकः
**आचार्यः सुब्राय वि. भट्टः**



**श्रीमान् शङ्कर एल्. भट्टः**
व्याकरणशास्त्रम्
मार्गदर्शकः
**डा. सि. एस्. एस्. एन्. मूर्तिः**



**श्रीमान् यज्ञदत्तः**
ज्यैतिषशास्त्रम्
मार्गदर्शकः
**आचार्यः ए. पि. सच्चिदानन्दः**



**श्रीमान् श्रीपतिः**
ज्यैतिषशास्त्रम्
मार्गदर्शकः
**आचार्यः ईश्वरभट्टः**

# परिसरीयविविधशैक्षिकपुरस्कारराशिः



**श्रीमती वाणी एम्. हेगडे**
(न्यायशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्
श्रीगुरुकृपापुरस्कारः
श्रीमती कावेरम्मास्मारकपुरस्कारः



**आयुष्मान् वेङ्कटेश अनन्तहेगडे**
(ज्यौतिषशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरिपुरस्कारः
श्री बी. जी. शेषगोपालस्मारकपुरस्कारः



**आयुष्मती राजेश्वरी हेगडे**
(वेदान्तशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्
श्रीमती कावेरम्मास्मारकपुरस्कारः



**आयुष्मती अहल्या भट्**
(व्याकरणशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्



**आयुष्मान् सूर्य हेब्बारः**
(साहित्यशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्



**आयुष्मान् पद्मनाभ अडिगः टि.**
(मीमांसाशास्त्रे आचार्यस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्



**आयुष्मान् अश्विन् गणपति भट्टः**
(शिक्षाशास्त्रिस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्



**आयुष्मती सुजाता नायक्**

शिक्षाशास्त्रिस्तरे श्री वेङ्कटेश्वरपुरस्कारः



**आयुष्मान् नरसिंहसरस्वती शास्त्री**
(वेदान्तशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरिपुरस्कारः



**आयुष्मान् गणेश अनन्त भट्टः**
(न्यायशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरिपुरस्कारः
श्री बी. जी. शेषगोपालस्मारकपुरस्कारः



**आयुष्मती श्रीलता एच्. एस्.**
(साहित्यशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरिपुरस्कारः



**आयुष्मान् प्रदीपभट्टः के.**
(मीमांसाशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरिपुरस्कारः



**आयुष्मान् कपिल् नौटियालः**
(व्याकरणशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरिपुरस्कारः



**आयुष्मान् आकाश सेम्वालः**
(ज्यौतिषशास्त्रे शास्त्रिस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्
आदिशक्त्यात्मक श्री अन्नपूर्णेश्वरिपुरस्कारः



**आयुष्मती दुर्गा श्रीवत्सा**
(प्राक्शास्त्रिस्तरे अत्यधिकाङ्काः)
श्रीभारतीतीर्थस्वर्णपदकम्
श्रीमहाबलभिडेस्मारकपुरस्कारः

# प्रातिभवैभवम्



## योगिता दि. छत्रे, आचार्यद्वितीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे अनुवादस्पर्धायां प्रथमा, पद्यरचनायां प्रथमा, गद्यरचनायां प्रथमा, वार्तालेखने द्वितीया।
तिरुपतौ प्रातिभसमारोहे रसप्रश्नस्पर्धायां प्रथमा, समस्यापूर्तिस्पर्धायां प्रथमा, जानपदसमूहनृत्ये तृतीया।
अहमद्नगरे वेदान्तविद्यापीठे प्रवृत्तायां व्याकरणपरीक्षायां प्रथमश्रेणी।
शृङ्गेरी श्रीशारदापीठे प्रवृत्ते गीताज्ञानयज्ञे सम्पूर्णश्रीमद्भगवद्गीताकण्ठपाठपरीक्षायां समुत्तीर्णता पुरस्कारप्राप्तिश्च।



## कोण्डी अनिरुद्धराममूर्तिः, शास्त्रितृतीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे संस्कृतगीतगाने प्रथमः, स्फूर्तिस्पर्धायां प्रथमः, एककशास्त्रीयवादने तृतीयः।
तिरुपतौ प्रातिभसमारोहे रसप्रश्नस्पर्धायां प्रथमः, न्यायभाषणे द्वितीयः।
राष्ट्रस्तरे जैनबौद्धभाषणे द्वितीयः।
राज्यस्तरीयशास्त्रीयस्पर्धायां जैनबौद्धभाषणे प्रथमः।

# प्रातिभवैभवम्



**हरिप्रसादः एस्.,** आचार्यप्रथमवर्षम्
दशमे अन्तःपरिसरीययुवमहोत्सवे एकपात्राभिनये प्रथमः,
संस्कृतचलच्चित्रनिर्माणे तृतीयः।
तिरुपतौ प्रातिभसमारोहे पुराणेतिहासभाषणे तृतीयः,एकपात्राभिनये
प्रथमः, एकाङ्किकाभिनये प्रथमः।
कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः, श्रेष्ठाभिनये द्वितीयः।



**काव्या बि. एम्.,** शास्त्रिद्वितीयवर्षम्
दशमे अन्तःपरिसरीययुवमहोत्सवे समूहगाने प्रथमा,
समूहनृत्ये तृतीया।
तिरुपतौ प्रातिभसमारोहे एकाङ्किकाभिनये प्रथमा,
जानपदसमूहनृत्ये तृतीया।
कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमा।



**सुब्रायः एच्. जे.,**
आचार्यद्वितीयवर्षम्
तिरुपतौ प्रातिभसमारोहे एकाङ्किकाभिनये प्रथमः,
मीमांसाभाषणे द्वितीयः।
कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः।
धारवाडनगरे प्रवृत्ते नाटकमहोत्सवे प्रथमः।



**सुजना वाल्ताजे,**
शास्त्रितृतीयवर्षम्
तिरुपतौ प्रातिभसमारोहे एकाङ्किकाभिनये प्रथमा,
जानपदसमूहनृत्ये तृतीया।
कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमा।
धारवाडनगरे प्रवृत्ते नाटकमहोत्सवे प्रथमा।



**कार्तिकेशः के.,**
आचार्यप्रथमवर्षम्
तिरुपतौ प्रातिभसमारोहे एकाङ्किकाभिनये प्रथमः,
कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः।
धारवाडनगरे प्रवृत्ते नाटकमहोत्सवे प्रथमः।



**आदित्यः एच्. जि.,**
शिक्षाशास्त्रिप्रथमवर्षम्
कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः,
श्रेष्ठाभिनये प्रथमः।
धारवाडनगरे प्रवृत्ते नाटकमहोत्सवे प्रथमः।



**नवनीतकृष्णः जे.,**
शास्त्रितृतीयवर्षम्
तिरुपतौ प्रातिभसमारोहे एकाङ्किकाभिनये प्रथमः।
कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः।
धारवाडनगरे प्रवृत्ते नाटकमहोत्सवे प्रथमः।



**गोपिका एस्. के.,**
शास्त्रिद्वितीयवर्षम्
तिरुपतौ प्रातिभसमारोहे एकाङ्किकाभिनये प्रथमा,
जानपदसमूहनृत्ये तृतीया।
कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमा,
श्रेष्ठाभिनये तृतीया।



**श्रीगणेशविश्वेश्वरभट्टः,**
शास्त्रिदतृतीयवर्षम्
स्वर्णवल्ल्यां राज्यस्तरीयस्पर्धायां पुराणव्याख्याने
प्रथमः, समस्यापूर्तौ प्रथमः।
तिरुपतौ प्रातिभसमारोहे वेदभाष्यभाषणे तृतीयः।



**ग्रीष्मा बि. रै.,**
शास्त्रिद्वितीयवर्षम्
दशमे अन्तःपरिसरीययुवमहोत्सवे समूहगाने प्रथमा,
समूहनृत्ये तृतीया।
कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमा।



**मलय माइति,**
आचार्यद्वितीयवर्षम्
दशमे अन्तःपरिसरीययुवमहोत्सवे स्फूर्तिस्पर्धायां
प्रथमः।
राज्यस्तरीयशास्त्रीयस्पर्धायां स्फूर्तिस्पर्धायां प्रथमः।



**सरयूः पि.,** आचार्यद्वितीयवर्षम्
राष्ट्रस्तरे व्याकरणशलाकायां प्रथमा।
राज्यस्तरीयशास्त्रीयस्पर्धायां व्याकरणशलाकायां प्रथमा।
अहमद्नगरे वेदान्तविद्यापीठे प्रवृत्तायां व्याकरणपरीक्षायां प्रथमश्रेणी।
शृङ्गेरी श्रीशारदापीठे प्रवृत्ते गीताज्ञानयज्ञे
सम्पूर्णश्रीमद्भगवद्गीताकण्ठपाठपरीक्षायां समुत्तीर्णता पुरस्कारप्राप्तिश्च।

# प्रातिभवैभवम्



### हाराधनः झाल्
शिक्षाशास्त्रिप्रथमवर्षम्

कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः ।
धारवाडनगरे प्रवृत्ते नाटकमहोत्सवे प्रथमः ।



### प्रदीपभट्टः के.
आचार्यप्रथमवर्षम्

कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः ।
धारवाडनगरे प्रवृत्ते नाटकमहोत्सवे प्रथमः ।



### दत्तात्रेय एस्. हेगडे
शास्त्रिद्वितीयवर्षम्

तिरुपतौ प्रातिभसमारोहे एकाङ्किकाभिनये प्रथमः ।
कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः ।



### महेशभट्टः
शास्त्रिप्रथमवर्षम्

राष्ट्रस्तरे धातुकण्ठपाठस्पर्धायां प्रथमः ।
राज्यस्तरीयशास्त्रीयस्पर्धायां धातुकण्ठपाठस्पर्धायां प्रथमः ।



### अपर्णाहोळ्ळा के. ए. प्राक्शास्त्रिद्वितीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे समूहगाने प्रथमा,
एककसंस्कृतगीतगाने द्वितीया ।
राज्यस्तरीयशास्त्रीयस्पर्धायाम् अक्षरश्लोक्यां द्वितीया ,
काव्यकण्ठपाठे तृतीया, स्वर्णवल्ल्यां राज्यस्तरीयस्पर्धायां
काव्यव्याख्याने तृतीया ।



### उमामहेश्वरः एन्.
शोधच्छात्रः

राज्यस्तरीयशास्त्रीयस्पर्धायां स्फूर्तिस्पर्धायां प्रथमः ,
समस्यापूर्तौ द्वितीयः ।



### सुदर्शनभट्टः
शिक्षाशास्त्रिद्वितीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे आशुभाषणे द्वितीयः ।
Speak for India भाषणस्पर्धायां प्रथमः ।



### अमृता आर्. कोण्डी
शास्त्रिप्रथमवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे समूहगाने प्रथमा,
एककशास्त्रीयगाने द्वितीया ।



### विद्यावती भट्
आचार्यद्वितीयवर्षम्

स्वर्णवल्ल्यां राज्यस्तरीयस्पर्धायां साहित्यभाषणे
प्रथमा, अन्त्याक्षर्यां तृतीया ।
तिरुपतौ प्रातिभसमारोहे जानपदसमूहनृत्ये तृतीया ।



### त्रिदला इ. जि.
शास्त्रिद्वितीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे समूहगाने प्रथमा,
सुभाषितकण्ठपाठे तृतीया, समूहनृत्ये तृतीया ।



### कविता जि. भट्
शिक्षाशास्त्रिद्वितीयवर्षम्

धारवाडनगरे प्रवृत्ते नाटकमहोत्सवे प्रथमा ।
दशमे अन्तःपरिसरीययुवमहोत्सवे समूहनृत्ये तृतीया ।



### दीप्तेश शतपतिः
शिक्षाशास्त्रिप्रथमवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे एककशास्त्रीयनृत्ये
प्रथमः, समूहनृत्ये तृतीयः।

# प्रातिभवैभवम्



### जोशि सुमा सुब्रायः
शास्त्रिद्वितीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे समूहगाने प्रथमा, आशुचित्रे तृतीया ।



### प्रशान्त गाँव्करः
शोधच्छात्रः

धारवाडनगरे प्रवृत्ते नाटकमहोत्सवे प्रथमः ।



### भवानी आर्. के.
आचार्यद्वितीयवर्षम्

कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमा ।



### बालचन्द्रः
शिक्षाशास्त्रिद्वितीयवर्षम्

धारवाडनगरे प्रवृत्ते नाटकमहोत्सवे प्रथमः ।



### अश्विन् जि. भट्टः
आचार्यप्रथमवर्षम्

तरुणोदयराज्यस्तरीयस्पर्धायां भाषणे प्रथमः ।



### वेङ्कटेश अनन्त हेगडे
शिक्षाशास्त्रिप्रथमवर्षम्

कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः ।



### मृत्युञ्जयशास्त्री
शिक्षाशास्त्रिप्रथमवर्षम्

कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः ।



### विनयकुमार भाग्वत्
शिक्षाशास्त्रिप्रथमवर्षम्

कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः ।



### लक्ष्मीकान्त भट्टः
शिक्षाशास्त्रिप्रथमवर्षम्

कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः ।



### नागराज जोशी
शिक्षाशास्त्रिप्रथमवर्षम्

कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः ।



### दुर्गाशङ्कर पण्डा
शिक्षाशास्त्रिप्रथमवर्षम्

कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमः ।



### सौजन्या के. के.
शास्त्रितृतीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे समूहगाने प्रथमा ।

# प्रातिभवैभवम्



## क्षमा कामत् के.

शास्त्रिद्वितीयवर्षम्

राज्यस्तरीयशास्त्रीयस्पर्धायां न्यायशलाकायां प्रथमा, अहमद्नगरे वेदान्तविद्यापीठे प्रवृत्तायां न्यायपरीक्षायां द्वितीयश्रेणी ।



## श्रीनिवासः

प्राक्शास्त्रिप्रथमवर्षम्

स्वर्णवल्ल्यां राज्यस्तरीयस्पर्धायां व्याकरणभाषणे प्रथमः ।



## अम्बिका भट्ट ए.

प्राक्शास्त्रिप्रथमवर्षम्

कौमुदीमहोत्सवे सुभद्राधनञ्जयमिति नाटके प्रथमा ।



## श्रीप्रदः एम्. जोशी

आचार्यप्रथमवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे High jump द्वितीयः, Long jump द्वितीयः , 400 Mts running द्वितीयः, 100 Mts running- तृतीयः ।



## रोहित कुमारः

आचार्यप्रथमवर्षम्

स्वर्णवल्ल्यां राज्यस्तरीयस्पर्धायां व्याकरणभाषणे द्वितीयः ।
तरुणोदयराज्यतरीयस्पर्धायां द्वितीयः ।
तेनालीनगरे श्रीकाञ्चीवेदवेदान्तशास्त्रसभया प्रवर्तितायां व्याकरणशास्त्रीय-प्रथमपरीक्षायां प्रथमश्रेणी ।



## आदर्शभट्टः

शास्त्रितृतीयवर्षम्

राज्यस्तरीयशास्त्रीयस्पर्धायां मीमांसाभाषणे द्वितीयः ।
स्वर्णवल्ल्यां राज्यस्तरीयस्पर्धायां मीमांसाभाषणे द्वितीयः ।



## महेश्वरी

आचार्यद्वितीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे रङ्गवल्ल्यां द्वितीया । तिरुपतौ प्रातिभसमारोहे वेदान्तभाषणे तृतीया, धर्मशास्त्रभाषणे तृतीया , जानपदसमूहनृत्ये तृतीया ।
शृङ्गेरी श्रीशारदापीठे प्रवृत्ते गीताज्ञानयज्ञे सम्पूर्णश्रीमद्भगवद्गीता कण्ठपाठपरीक्षायां समुत्तीर्णता पुरस्कारप्राप्तिश्च ।



## सौन्दर्यलक्ष्मीः

आचार्यद्वितीयवर्षम्

राज्यस्तरीयशास्त्रीयस्पर्धायां साहित्यशलाकायां द्वितीया ।



## नरसिंहसरस्वती शास्त्री

आचार्यप्रथमवर्षम्

स्वर्णवल्ल्यां राज्यस्तरीयस्पर्धायां वेदान्तभाषणे द्वितीयः ।



## अजितः सि.

शिक्षाशास्त्रिप्रथमवर्षम्

स्वर्णवल्ल्यां राज्यस्तरीयस्पर्धायां ऋग्वेदकण्ठपाठे द्वितीयः ।



## नवीनः के. आर्.

शास्त्रितृतीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे सङ्गणकीयसंस्कृते द्वितीयः ।
अहमद्नगरे वेदान्तविद्यापीठे प्रवृत्तायां न्यायपरीक्षायां द्वितीयश्रेणी ।



## ऐश्वर्या

शास्त्रितृतीयवर्षम्

राज्यस्तरीयशास्त्रीयस्पर्धायाम् अष्टाध्यायीकण्ठपाठे द्वितीयः ।

# प्रातिभवैभवम्



## शशाङ्कभट्टः
शास्त्रिप्रथमवर्षम्

स्वर्णवल्ल्यां राज्यस्तरे न्यायभाषणस्पर्धायां द्वितीयः ।
अहमद्नगरे वेदान्तविद्यापीठे प्रवृत्तायां न्यायपरीक्षायां द्वितीयश्रेणी ।



## महेशबाघ्वरः
शास्त्रिप्रथमवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे योगासने द्वितीयः ।



## वेङ्कटरमणहेब्बारः
शास्त्रितृतीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे 1500 Mts Running तृतीयः , 800 Mts Running तृतीयः ।
राज्यस्तरीयशास्त्रीयस्पर्धायां ज्योतिषभाषणे तृतीयः ।



## गोविन्दगोपालहेगडे
शोधच्छात्रः

राज्यस्तरीयशास्त्रीयस्पर्धायां शास्त्रार्थविचारे तृतीयः ।



## प्रमोदः जि. के.
आचार्यद्वितीयवर्षम्

राज्यस्तरीयशास्त्रीयस्पर्धायां व्याकरणशलाकायां द्वितीयः ।
अहमद्नगरे वेदान्तविद्यापीठे प्रवृत्तायां व्याकरणपरीक्षायां प्रथमश्रेणी ।



## आकाशः जैन्
आचार्यप्रथमवर्षम्

राज्यस्तरीयशास्त्रीयस्पर्धायां जैनबौद्धभाषणे तृतीयः ।



## श्रीलक्ष्मीः एम्. भट्
शास्त्रितृतीयवर्षम्

दशमे अन्तःपरिसरीययुवमहोत्सवे 200 Mts Running तृतीया ।



## देवीकृष्णा
शास्त्रितृतीयवर्षम्

राज्यस्तरीयशास्त्रीयस्पर्धायां न्यायशलाकायां तृतीया ।
अहमद्नगरे वेदान्तविद्यापीठे प्रवृत्तायां न्यायपरीक्षायां तृतीयश्रेणी ।



## शरण्यः पि.
शास्त्रितृतीयवर्षम्

राज्यस्तरीयशास्त्रीयस्पर्धायां साहित्यभाषणे तृतीयः ।



## मयूरी जोशी
शास्त्रितृतीयवर्षम्

स्वर्णवल्ल्यां राज्यस्तरे साहित्यभाषणे तृतीया ।



## मयूरेशः
शास्त्रिद्वितीयवर्षम्

स्वर्णवल्ल्यां राज्यस्तरे ज्योतिषभाषणस्पर्धायां तृतीयः ।



## वीरेन्द्रभट्टः
शास्त्रिद्वितीयवर्षम्

स्वर्णवल्ल्यां राज्यस्तरे पुराणव्याख्याने तृतीयः ।

# प्रातिभवैभवम्



**दुर्गा श्रीवत्सा**
शास्त्रिप्रथमवर्षम्
राज्यस्तरीयशास्त्रीयस्पर्धायां पुराणेतिहासशलाकायां तृतीया।
अहमदनगरे वेदान्तविद्यापीठे प्रवृत्तायां न्यायपरीक्षायां द्वितीयश्रेणी।



**हरिप्रिया आर्. के.**
शास्त्रिप्रथमवर्षम्
दशमे अन्तःपरिसरीययुवमहोत्सवे 100 Mts Running तृतीया।



**अश्विनी प्रभाकर भट्**
प्राक्शास्त्रिप्रथमवर्षम्
दशमे अन्तःपरिसरीययुवमहोत्सवे समूहनृत्ये तृतीया।



**नीरज पन्त्**
शिक्षाशास्त्रिप्रथमवर्षम्
शृङ्गेरी श्रीशारदापीठे प्रवृत्ते गीताज्ञानयज्ञे सम्पूर्णश्रीमद्भगवद्गीताकण्ठपाठपरीक्षायां समुत्तीर्णता पुरस्कारप्राप्तिश्च।



**प्रशान्तः**
शिक्षाशास्त्रिप्रथमवर्षम्
शृङ्गेरी श्रीशारदापीठे प्रवृत्ते गीताज्ञानयज्ञे सम्पूर्णश्रीमद्भगवद्गीताकण्ठपाठपरीक्षायां समुत्तीर्णता पुरस्कारप्राप्तिश्च।



**महेन्द्र कुमार् जुयाल्**
शास्त्रितृतीयवर्षम्
शृङ्गेरी श्रीशारदापीठे प्रवृत्ते गीताज्ञानयज्ञे सम्पूर्णश्रीमद्भगवद्गीताकण्ठपाठपरीक्षायां समुत्तीर्णता पुरस्कारप्राप्तिश्च।



**सुखदेवभट्टः**
शोधच्छात्रः
तेनालीनगरे श्रीकाञ्चीवेदवेदान्तशास्त्रसभया प्रवर्तितायां व्याकरणशास्त्रीय-चतुर्थपरीक्षायां प्रथमश्रेणी।



**महेशः एम्. हेगडे**
शास्त्रितृतीयवर्षम्
तेनालीनगरे श्रीकाञ्चीवेदवेदान्तशास्त्रसभया प्रवर्तितायां व्याकरणशास्त्रीय-चतुर्थपरीक्षायां प्रथमश्रेणी।




योगविषये प्रवृत्तायाम् अन्ताराष्ट्रियसङ्गोष्ठ्यां कुञ्चिकाभाषणं विदधानाः
विवेकानन्दयोगविश्वविद्यालयस्य कुलपतयः आचार्याः कोटेमने रामचन्द्रभट्टवर्याः, समुपस्थिताः
कर्णाटकसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. पद्माशेखरवर्याश्च ।



अन्ताराष्ट्रिययोगसङ्गोष्ठ्याः समापनसत्रे समुपस्थिताः मूडुबिद्रे इति क्षेत्रस्थजैनमठस्य स्वामिनः
श्रीश्रीचारुकीर्तिभट्टारकपण्डिताचार्यवर्याः, विविधविद्वांसश्च ।




वाग्वर्धिनीप्रभृतीनां विविधपरिषदाम् उद्घाटनं विधाय व्याख्यानं कुर्वन्तः
उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतयः आचार्याः पीयूषकान्तदीक्षितवर्याः ।




संस्कृतोत्सवस्य समारोपसत्रे समुपस्थिताः संस्कृतभारत्याः अखिलभारतीयसङ्घटनमन्त्री
आचार्याः दिनेशकामत्वर्याः, अभ्यागताः ए. एम्. चन्द्रशेखरवर्याश्च ।




अन्ताराष्ट्रिययोगदिवसमुपलक्ष्य परिसरे प्रवृत्तायाः योगकार्यशालायाः उद्घाटनकार्यक्रमः ।




परिसरे प्रवृत्ते हिन्दीदिवसकार्यक्रमे उपस्थिताः अभ्यागताः आचार्याः सुमङ्गला शि.
मुम्मिगट्टिवर्याः ।




शिक्षकदिवसमुपलक्ष्य प्रवृत्ते कार्यक्रमे अभ्यागताः श्री हरीश के. एम्. वर्याः, श्री जयन्तभट्टवर्याश्च ।




कन्नडराज्योत्सवसमारम्भे उपस्थिताः अभ्यागताः डा. आरती वि. बि. वर्याः,
आचार्याः वेदब्रह्मश्रीवेङ्कटरमणभट्टाः ।



ज्ञानकर्मणोः पुरुषार्थसाधनत्वविमर्शः इति विषये प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां कुञ्चिकाभाषणं विदधानाः आचार्याः श्रीमणिद्राविडशास्त्रिवर्याः ।



ज्ञानकर्मणोः पुरुषार्थसाधनत्वविमर्शः इति विषये प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां विदुषां समुपस्थितौ भाषमाणाः श्रीसद्विद्यासञ्जीविनीसंस्कृतमहापाठशालाध्यक्षचराः आचार्याः एम्. ए. नागराजभट्टवर्याः ।







वार्षिकोत्सवदिने प्रातः अध्यापकैः छात्रैश्च कृतं शतश्लोकीरामायणपारायणम् ।



वार्षिकोत्सवदिने जगद्गुरुश्रीश्रीविधुशेखरभारतीस्वामिनाम् आगमनम् ।



वार्षिकोत्सवदिने जगद्गुरुश्रीश्रीविधुशेखरभारतीस्वामिभिः शारदाम्बायाः गुरुपादुकयोश्च पूजनम् ।



जगद्गुरूणां सन्निधौ श्रीभारतीतीर्थस्वर्णपदकविजेतारः छात्राः ।



वार्षिकोत्सवभाषणं कुर्वन्तः अभ्यागताः राष्ट्रियसंस्कृतसंस्थानस्य परीक्षानियन्त्रकाः आचार्याः सुकान्तकुमारसेनापतिवर्याः ।







वार्षिकोत्सवदिने जगद्गुरुश्रीचरणानां करकमलाभ्यां विविधग्रन्थानामाविष्करणम् ।



छात्रेभ्यः श्रीभारतीतीर्थस्वर्णपदकप्रदातृणां
पद्मश्री वे.रा. गौरीशङ्करवर्याणां सम्माननम् ।



वार्षिकोत्सवदिने आशीर्वचोभिः परिसरपरिवारं सकलश्रोतृवृन्दं च
अनुगृह्णन्तः जगद्गुरुश्रीचरणाः ।



सतर्कताजागरूकतासप्ताहकार्यक्रमे प्रतिज्ञास्वीकृतिः ।



साहित्यवेदान्तयोः राष्ट्रियसङ्गोष्ठ्याः समुद्घाटनसत्रे आचार्याः सुन्देशन्वर्याः, आचार्या जी. महाबलेश्वरभट्टवर्याश्च ।



साहित्यवेदान्तयोः राष्ट्रियसङ्गोष्ठ्याः समारोपसत्रे कुलपतिचराः आचार्याः वेम्पटि कुटुम्बशास्त्रिवर्याः ।



न्यायमीमांसाव्याकरणेषु प्रवृत्तायाः राष्ट्रियसङ्गोष्ठ्याः उद्घाटनसत्रे समुपस्थिताः
आचार्याः हरिदासभट्टवर्याः, का.इ. धरणीधरन्वर्याः, आचार्याः विजयलक्ष्मीवर्याश्च ।

# अनुक्रमणिका

## संस्कृतविभागः


| | | | |
|---|---|---|---|
| 1. | ब्रह्मरथोत्सवः | आचार्यः महाबलेश्वर पि. भट्टः | ०१ |
| 2. | पूर्वमीमांसायामीश्वरः | आचार्यः सुब्राय वि. भट्टः | ०४ |
| 3. | अतिदेशविचार: | डा. सी. एस्. एस्. नरसिंहमूर्ति: | ०८ |
| 4. | छात्रविकासेऽधिगमकनिष्ठस्तरः | डा. चन्द्रकान्तः | १२ |
| 5. | शाब्दबोधवैविध्यम् | डा. रामचन्द्रुलबालाजि | १६ |
| 6. | गीतायां प्रतिपादितः कर्मसन्यासः | डा. गणेश ईश्वर भट्टः | २० |
| 7. | ब्रह्मविद्यावाप्तये गुरोरावश्यकता | डा. हरिप्रसादः के. | २४ |
| 8. | वासनावासितं जगत् | डा.नवीनहोळ्ळः | २७ |
| 9. | एषैषा वाचोयुक्तिः | डा. चन्द्रशेखरभट्टः | ३२ |
| 10. | संस्कृतरूपकेषु आस्वादोपयोगितया वाचिकाभिनयस्य निर्वाहः | डा. राघवेन्द्रभट्टः | ३४ |
| 11. | काव्येषु नाटकं रम्यम् | डा. चन्द्रकला आर्. कोण्डी | ३९ |
| 12. | बाहुलकम् | डा. कृष्णानन्तपद्मनाभम् | ४५ |
| 13. | न च प्राणी निरामयः | डा. गणेश ति. पण्डितः | ४९ |
| 14. | यावज्जीवाधिकरणविवेचनम् | डा. सूर्यनारयणभट्टः | ५२ |
| 15. | जगन्नाथकाव्यलक्षणे रमणीयतापदपरिष्कारः | डा. कोम्पेल्लि विनयकुमारः | ५४ |
| 16. | दशमानपद्धतिः | डा. मुरलीकृष्णः टि. | ५७ |
| 17. | ब्रह्मणः जगत्कारणत्वम् | डा. श्रीकरः जि. एन्. | ६१ |
| 18. | व्युत्पत्तिवादे पञ्चमीविभक्त्यर्थविचारः | विद्वान् श्यामसुन्दरः ए. | ६४ |
| 19. | तत्त्वचिन्तामणौ समवायवादः | डा. आर्. नवीनः | ६७ |
| 20. | सामाजिकपरिवर्तनम् | डा. नारायणवैद्य: | ६९ |
| 21. | पुराणेतिहासयोश्श्राद्धविमर्श: | डा. प्रमोदभट्टः | ७२ |
| 22. | कालविभागः | डा. प्रसादभट्टः | ७६ |
| 23. | प्रतिभाशालिबालकानां विशेषाः | डा. अरविन्दकुमारसोमदत्तः | ७९ |

| | | |
|---|---|---|
| 24. ज्योतिषशास्त्रम् | डा. सुधांशुकुमार नन्दा | ८२ |
| 25. आयुर्दशाः | विद्वान् एन्. रमानन्दभट्टः | ७६ |
| 26. अरिस्टाटिलः | डा. एम्. श्रीनिवासमूर्तिः | ९० |
| 27. दृष्टिसृष्टिवादः | डा. गणपति वि. हेगडे | ९३ |
| 28. भारतीयज्यौतिषे यवनज्योतिषस्य प्रभावः -एकं विश्लेषणम् | डा. प्रदीपशर्मा | ९५ |
| 29. कौमुदीव्याख्यायां श्रीनीलकण्ठवाजपेयिविरचित-सुखबोधिन्यां समर्थसूत्रविचारः | विद्वान् अरुणभट्टः | ९९ |
| 30. गणेशपुराणोक्तरीत्या श्रीगणेशस्य निर्विशेषस्वरूपचिन्तनम् | विद्वान् निरञ्जनभट्टः | १०४ |
| 31. चमकाध्याये गणितचमत्कारः | श्री विनायकभट्टः | १०६ |
| 32. स्थानेऽन्तरतमः | कलाधरभट्टः | १०९ |
| 33. पाश्चात्यमते न्यायावयवस्वरूपम् | सन्दीपकानेट्करः | १११ |
| 34. महाविस्फोटसिद्धान्तः | राकेशः पि. | ११६ |
| 35. नीलकण्ठकृतसुखबोधिन्याः सुखबोधकत्वम् | नवीनभट्टः | १२५ |
| 36. सङ्गीतशास्त्रे नादस्य सप्तस्वराणाञ्चोत्पत्तिप्रक्रिया | नारायण राय्करः | १२८ |
| 37. पदार्थविभजने गुणविभजने च मतभेदः | सुनिताभट् | १३२ |
| 38. रप्रत्याहारविचारः | आनन्दपाण्ड्यः | १३६ |
| 39. स्थानिवद्सूत्रस्य बालमनोरमा - शरद्रात्रिसमीक्षा | नागकौमुदी | १३९ |
| 40. एकाचो बशो भष् इत्यत्र झलीत्यस्य अनुवृत्तौ मतभेदः | शशाङ्क ति. भट्टः | १४३ |
| 41. श्रीमद्भगवद्गीतायां कर्मयोगे प्रतिपादितं सामाजिकचिन्तनम् | प्रियाङ्का चन्द्र | १४४ |
| 42. विधित्रैविध्यम् | प्रशान्तगाँव्करः | १४८ |
| 43. अष्टमङ्गलप्रश्नपूजा | हेमन्तः पि. के. | १४९ |
| 44. सद्योवृष्टिविचारः | कृष्णकुमारद्विवेदी | १५१ |
| 45. सामुद्रिकशास्त्रोक्तनायिकायाः लक्षणम् | कुलदीपः | १५४ |
| 46. त्यदादीनि तदीयानि | उमामहेश्वरः | १५६ |
| 47. भामहपण्डितराजजगन्नाथयोः काव्यलक्षणविचारः | सौरभ दुबे | १६० |
| 48. माहेश्वरसूत्रेषु सन्ध्यभावविचारः | सुखदेवभट्टः | १६२ |
| 49. वास्तुशास्त्रम् | गणेशकृष्णभट्टः | १६५ |
| 50. लग्नानयनम् | नागपति हेगडे | १६७ |

| | | | |
|---|---|---|---|
| 51. | अधिकारः | गोविन्द गोपालकृष्ण हेगडे | १६९ |
| 52. | मल्लिनाथः | सूर्यहेब्बारः | १७० |
| 53. | तुङ्गाष्टकम् | योगिता दि. छत्रे | १७२ |
| 54. | सौन्दर्यपरिशीलनम् | पि. वीरसुब्रह्मण्यकुमारः | १७३ |
| 55. | अविस्मरणीयाः अद्वैताचार्याः | सानुकुमारपतिः | १७७ |
| 56. | श्रीगदाधरभट्टाचार्यः | रोझी बन्चोर् | १८२ |
| 57. | वैयाकरणानां काव्यतत्त्वज्ञानां च मते ध्वनिपदार्थः | मोहित जोशी | १८४ |
| 58. | पञ्चमवेदः | वेङ्कटेशः जि. | १८७ |
| 59. | शिक्षा | आदित्य एच्. जि. | १८९ |
| 60. | जातिशक्तिवादविमर्शः | नवीनः के. आर् | १९० |
| 61. | रूपविषये आधुनिकमतम् | अनिरुद्धः | १९३ |
| 62. | महर्षिः अणिमाण्डव्यः | देवीकृष्णा. एन्. | १९७ |
| 63. | देवर्षिर्नारदः | चिन्मयभट्टः | १९९ |
| 64. | वीररसः | शरण्यः पि | २०० |
| 65. | अमरकोशस्य वैशिष्ट्यम् | गिरीशभट्टः | २०२ |
| 66. | गीतायाः महत्वम् | त्रिदला ई. जि. | २०४ |
| 67. | श्रीमद्भगवद्गीतायां भक्तियोगः | हितेशभट्टः | २०६ |
| 68. | अष्टावक्रः | क्षमा कामत् के. | २०८ |
| 69. | प्रकृतिर्मरणं शरीरिणाम् | चण्डीप्रसादः | २१० |
| 70. | महर्षिवाल्मीकि: | दुर्गा श्रीवत्सा | २११ |
| 71. | वेदान्ते सृष्टिक्रमः | लोकनाथपण्डा | २१४ |
| 72. | परिभाषेन्दुशेखरे “असिद्धं बहिरङ्गमन्तरङ्गे” | महेशबाघ्वारः | २१७ |
| 73. | महर्षिः उद्दालकः | लक्ष्मीनारायणः | २२० |
| 74. | षष्ठी स्थानेयोगा | दीपक झा | २२२ |

## हिन्दीविभागः

| | | | |
|---|---|---|---|
| 1. | कालजयी कवि: तुलसी | डा. रेखा मिश्रा | २२३ |
| 2. | सफलता की कुंजी “आत्मविश्वास” | कार्तिकमिश्रा | २२७ |

| | | | |
|---|---|---|---|
| 3. | वाह रे इंसान | तिलक् राम् | २२९ |
| 4. | भाई का प्यार | ज्योतिप्रकाश साहु | २३० |
| 5. | भ्रष्टचार | अग्निहोत्र साहु | २३१ |
| 6. | स्कूल का वो अंतिम क्षण | राज किशोर झा | २३३ |
| 7. | अच्छा दोस्त | राकेश नाएक | २३४ |


## English Section


| | | | |
|---|---|---|---|
| 1. | Computer Virus | Sri Shashidhar K. V | २३७ |
| 2. | Pros And Cons Of Yoga And Pranayama | Sri Ramachandra H.D | २३९ |
| 3. | Romantic Poet John Keats | Smt. Pavana | २४२ |
| 4. | Emotional Intelligence And Teacher | Shreekhara V. | २४४ |
| 5. | Sayings in Veda | Maheshwari | २४७ |
| 6. | Neither money nor power, common sense is more important in our life. | Kishor Kumar Roy | २४९ |


## ಕನ್ನಡ ವಿಭಾಗ


| | | | |
|---|---|---|---|
| 1. | ಕನ್ನಡ ಸಾಹಿತ್ಯ ವಿಮರ್ಶೆ: ಹಿಂದಣ ಹೆಜ್ಜೆ | ಡಾ. ಕವಿತಾ ಎಸ್. | ೨೫೧ |
| 2. | ಇತಿಹಾಸ ಅರಿಯದವನು ಇತಿಹಾಸ ಸೃಷ್ಟಿಸಲಾರ | ಡಾ. ಎಮ್. ಎ. ಪ್ರಭಾಕರ | ೨೫೫ |
| 3. | ಗೆಳೆತನವೆಂಬ ಮಧುರಾನುಭೂತಿ | ರಂಜಿತಾ | ೨೫೭ |
| 4. | ಯುಗಾದಿ | ಕೀರ್ತಿ ನಾಗರಾಜ ಹೆಗಡೆ | ೨೫೮ |
| 5. | ಫೋಟೋಗ್ರಾಫಿಯೆಂಬ ಅಸಾಧಾರಣ ಜಗತ್ತು! | ಮನೋಜ ಮ. ಭಟ್ಟ, ದೇವಿಸರ | ೨೬೦ |
| 6. | ಸಂಸ್ಕೃತ ಸಾಹಿತ್ಯದಲ್ಲಿ ಸಂಗೀತ ಕಲೆ | ಗಣೇಶ.ಭಟ್ ಯಲ್ಲಾಪುರ | ೨೬೩ |
| 7. | ಗುರುವೆಂದರೆ....? | ಶ್ರೀಸ್ಕಂದ ದಿವಾಣ | ೨೬೭ |
| 8. | ಓ ಜನನಿ | ಭಾರ್ಗವಿ ಭಟ್ಟ | ೨೬೯ |

# संस्कृतविभागः

# ब्रह्मरथोत्सवः

आचार्यः महाबलेश्वर पि. भट्टः
**वेदान्तविभागाध्यक्षः**

**अन्धस्य मे हृतविवेकमहाधनस्य**
**चोरैः प्रभो बलिभिरिन्द्रियनामधेयैः ।**
**मो हान्धकूपकुहरे विनिपातितस्य**
**लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥**
**जगद्गुरो नमस्तुभ्यं शिवाय शिवदाय च ।**
**योगीन्द्राणां च योगीन्द्रं गुरूणां गुरवे नमः ॥**

प्रसिद्धोऽयं ब्रह्मरथोत्सवः । दिव्यभूमौ भारते भूरिशः प्रसिद्धक्षेत्रेषु ब्रह्मरथोत्सवः प्राचलत्, प्रचलति, प्रचलिष्यति च । महारथोत्सवः अथवा कस्यचन उत्सवस्य नाम ब्रह्मरथोत्सव इति भवितुमर्हति ।

अहमेवं चिन्तयामि मनुष्यजीवनयात्रेयं ब्रह्मरथोत्सव इति शारीरमिदं क्षेत्रमिति भगवान् श्रीकृष्णः कथयामास पार्थाय -

**इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।**
**एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ इति ॥**

क्षरणात् क्षतत्राणात् क्षेत्रवद्वा इदं शरीरं क्षेत्रमित्यभिधीयते । देहदेहिनोः विवेकमात्रं न विवक्षितो विषयः अपि तु जीवस्य देहिनः महारथोऽयं शरीरेन्द्रियसङ्घातः ब्रह्मरथ इति चिन्तयामः । "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म" इति श्रुत्या ब्रह्मणः उपलब्धिस्थानत्वात् शरीरं ब्रह्मपरमिति श्रुतिर्विवक्षति ।

**देहो देवालयः प्रोक्तो देवो जीवः सदाशिवः ।**
**त्यजेदज्ञाननिर्माल्यं सोऽहं भावेन् पूजयेत् ॥**

भारतधरणीतले मन्दिरेषु यथा प्रचलति एवं शरीरक्षेत्रे देहमन्दिरे ब्रह्मोत्सवो भोभूयते । लोके तावत् देवस्य रथयात्रा मन्दिरस्य परितः पुरतो किञ्चिद्दूरं निश्चितस्थानं यावत् ब्रह्मरथयात्रा प्रवर्तते । इयं तु जीवनरथयात्रा कदा आरब्धा कदा वा समाप्तिमेतीति देवो न जानाति कुतो मनुष्यः ? अनादिकालात् प्रवृत्ता अनन्तकालं यावत् अनुवर्तते । यदा तु ब्रह्मभावं समेति जीवः तर्हि ब्रह्मरथोत्सवः समाप्तिमेति । अतः शरीराभिधानं रथं समारुह्य रथी जीवात्मा यात्रां कुर्वन्नास्ते । तस्मात् जीवस्य ब्रह्मरथोत्सवोऽयं जीवनपद्धतिः जीवनयात्रा ।

रथयात्रां भगवती काठकश्रुतिः इत्थंकारं सुस्पष्टं कथयति –

**आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।**
**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥**
**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरात् ।**
**आत्मेन्द्रियमनो युक्तं भोक्तेत्याहुर्मनीषिणः ॥**

रथो देहः, रथी देही जीवः यात्रिकः । रथस्य चालकशक्तिः बुद्धिः । नियन्त्रणरज्जुर्मनः । चक्षुरादीनि इन्द्रियाणि अश्वाः । शब्दस्पर्शादयो विषया मार्गाः । तानन्विष्य इन्द्रियात्मानः तुरङ्गाः गच्छन्ति । एवं शरीरेन्द्रियमनोयुक्तं चेतनं जीवं कर्ता भोक्ता संसारीति प्रेक्षावन्तो मनीषिणः जितेन्द्रियाः ब्रह्मतत्त्वविदो वदन्ति । लोके भगवद्भक्ताः एकीभूय भगवतः महाविष्णोः रथं रथवीथ्यां निश्चिते समये रज्जुं स्वीकृत्य कर्षन्ति । प्रतिवर्षं प्रतिमासं शुभावसरे वा प्रचलति महोत्सवः । ब्रह्मभावं प्राप्तुं कामयमानस्य जीवस्य रथं चक्षुरादीनि इन्द्रियाणि कर्षन्ति । तेषां मार्गस्तु न समानः । शब्दस्पर्शरूपरसगन्धाख्याः पञ्चविभिन्नविषयाः विभिन्नाध्वानः । बुद्ध्यात्मना सारथिना सुनिश्चित्य मनोरूपेण प्रग्रहेण रशनया नियन्त्रणं विधाय साधुमार्गे गन्तव्यं, न तु असाधुमार्गे । साध्वसाधुमार्गनिर्णयः शास्त्रेणैव निश्चेतव्यः । शास्त्रसम्मतो धर्ममार्गः ब्रह्मलोकं यावत् दीर्घोऽयं मार्गः श्रेयसे भूयसे स्यात् । असम्मतस्तु स्थावरन्ताधोगतिहेतुः स्यात् । धर्माधर्मनिर्णयो न सुकरः । देशकालव्यक्तिविषयभेदेन क्वचित् धर्मः अधर्मो न भवेत् । अधर्मोऽपि धर्मः इति “धर्मस्य तत्त्वं निहितं गुहायाम्” इति प्राज्ञाः प्राहुः । “गहना कर्मणो गतिः” इत्यपि । अत एव -

**उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत ।**
**क्षुरस्य धारा निशिता दुरत्यया**
**दुर्गं पथस्तत्कवयो वदन्ति ॥** इत्युपनिषत् प्रबोधयति ।

लोकेऽपि सारथिः बुद्धिमान् देशकालमार्गाभिज्ञश्चित् सुखेन गन्तव्यं स्थानं शीघ्रं प्राप्नोति रथिकः यात्रिकः । विपरीतश्चेत् गन्तव्यस्थानम् आस्तां जीवनमेव दुष्करं भवेत् । अपायपरम्परापरिवृतो भवेत् । तथा च – अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे इति आभाणकम् । अतः विज्ञानिना सारथिना भाव्यम् । दुष्टाश्वानाम् इन्द्रियाणां निग्रहः न सुलभसाध्यः । “बलवान् इन्द्रियग्रामः विद्वांसमपि कर्षति” इति खलु आर्योक्तिः इमम् अभिसन्धिम् अभिवदति श्रौती वाक् – यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।

**तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥**
**यस्त्वविज्ञानवान् भवत्यमनस्कसदाशुचिः |**
**न स तत्पदमाप्नोति संसारं चाधिगच्छति ॥**
**यस्तु विज्ञानवान् भवति समनस्कस्सदाशुचिः ।**
**स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ।**


ISSN: 2320-740X

**विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः ।**

**सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥**

ब्रह्मप्राप्तिमार्गः बहु दुष्करः । मनुष्यैः मनीषिभिर्भाव्यं शास्त्रविहितेन धर्ममार्गेण अर्थकामावनुभूय परमपुरुषार्थमोक्षः प्राप्तव्यः इति । नास्माकं पुरातना ऋषयः विरक्ता आसन्, ते कुटुम्बिनः सन्तः मनीषिणो स्वायत्तीकृतेन्द्रियग्रामाः समभूवन् । उच्चावचं नामरूपात्मकं प्रपञ्चं पश्यन्तोऽपि सर्वात्मानं परमेश्वरं साक्षात् ददृशुः । निग्रहानुग्रहशक्तिभाजः विरेजुः । अत आर्षपरम्पराम् अनुरुन्धानान् अस्मान् श्रुतिः सदृष्टान्तं रथदृष्टान्तेन करतलामलकवत् प्रतिपादयति ।

**सुविवेकी सारथिश्चेत् यात्रा सुखकरी लक्ष्यप्राप्तिश्च सुलभा ।**

**अविवेकी चेतद्दुःखकरी यात्रा स्वप्नतुल्या मोक्षप्राप्तिः ॥**

अतः शास्त्राणामधीतिबोधाचरणप्रचारणैः सदसद्व्यक्तिशक्तिं सम्पाद्य मनोनिग्रहेण इन्द्रियाणि स्वायत्तीकृत्य धर्ममार्गे जीवनरथयात्रा प्रवर्तनीया । **"धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ"** इति भगवद्वाणी धर्माविरुद्धम् अर्थकामसम्पादनं शास्त्राविरुद्धम् अभिप्रैति । अतः लौकिकं स्रक्चन्दनवनितादिसुखम् अपरित्यज्य हितं मितं मेध्यं यथा भवति तथा अनुभूय नरजन्मसार्थक्याय यतनीयम् । सार्थक्यं तु ब्रह्मानुभवेनेति वेदान्तिनां घण्टाघोषः । जीवस्य ब्रह्मरथोत्सवयात्रा ब्रह्मानुभवे समाप्तिमेति निरतिशयब्रह्मानन्दसागरे अवभृतमभिषेचनं चिनोति ।

विशिष्टबौद्धिकसामर्थ्यसम्पन्नेऽस्मिन् मानवजन्मनि आत्मानमुद्धर्तुं नक्तंदिवं प्रयत्नो विधेयः । तथा चोक्तं गीतायाम् -

**उद्धरेदात्मनात्मानं नात्मानमवसादयेत् । आत्मैव ह्यात्मनो बन्धुः आत्मैव रिपुरात्मनः ॥**

**बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः । अनात्मनस्तुशत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥**

विचार्यमाणे लोके मित्रं शत्रुः वा स्वात्मभिन्नः कोऽपि न विद्यते । मनसा विकल्पितं सर्वं मनोनिग्रहे आत्मैव मित्रम् । अन्यथा मन एव शत्रुः । आत्मशब्दोऽमनोवचनः जितेन्द्रियस्य मित्रम् इन्द्रियग्रामः अजितेन्द्रियस्य शत्रुस्स एव ।

इतोऽपि सुस्पष्टं सक्रमविनाशं माता गीता गायति उद्बोधयति च –

**"सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ।**

**क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।**

**स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥"** इति ।

अतः ब्रह्मपुरेऽस्मिन् शरीरक्षेत्रे जीवस्य ब्रह्मरथोत्सवः जीवनयात्रारूपः प्रचलति अनादिकालात् प्रभृति अनन्तकालं यावत् । तस्य समारोपसमारोहः मानवजन्मनि ब्रह्मानन्दसागरपुरे निमज्जनावभृथस्नानेन समापनीय इति उपनिषत्सन्देशः-

**आत्मानं चेत् विजानीयात् अयम् अस्मि इति पूरुषः ।**

**किम् इच्छन् कस्य कामाय शरीरम् अनिसंज्चरेत् ॥**

**********

# पूर्वमीमांसायामीश्वरः

आचार्यः सुब्राय वि. भट्टः
**मीमांसाविभागाध्यक्षः**

"धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम्", इत्यादिवेदवाक्यैः धर्मस्य पापनाशकत्वं जगदुत्पत्तिस्थितिकारणत्वं च प्रतिपादितम् ।

तादृशधर्मविवेचनार्थं प्रवृत्तमिदं "मीमांसाशास्त्रम्" । मीमांसासूत्रकारः भगवान् जैमिनिरपि पूर्वमीमांसाशास्त्रारम्भे "अथातो धर्मजिज्ञासा" इत्यनेन धर्मजिज्ञासां प्रतिज्ञाय द्वितीयेन सूत्रेण धर्मलक्षणमाह – **"चोदनालक्षणोऽर्थो धर्मः"** इति। एवञ्च वेदबोधितश्रेयस्साधनताको धर्मः इति धर्मलक्षणं परिष्कृत्य तल्लक्ष्यत्वेन यागादिरेव धर्मः इत्याह।

बहूनां क्वचित् चिन्तनं भवति यत् मीमांसकाः ईश्वरं नाङ्गीकुर्वन्ति इमे भगवद्विद्वेषिणः इति । स चाभिप्रायः न प्रामाणिकः। यतो हि – ईश्वरोऽपि कश्चन देवताविशेषः इत्यत्र न कस्यापि विप्रतिपत्तिः। किन्तु मीमांसाशास्त्रे ईश्वरस्य ईश्वरत्वेन वा जगत्कर्तृत्वेन वा करचरणादिविशिष्टशरीरित्वेन वा अङ्गीकारः नोपलभ्यते । अथवा अन्यैः अनुमानप्रमाणादिना यः ईश्वरः अङ्गीकृतः तादृशः नाङ्गीकृतः। स च सर्वज्ञः सर्वशक्तः स एव जगतः कर्ता इत्यादिविषये विप्रतिपत्तिरस्ति ।

मानमेयोदये –अनुमानप्रमाणसिद्धः ईश्वरः निराकृतः । "नापि ईश्वरारब्धं जगत्, वेदव्यतिरेकेण ईश्वरसद्भावे प्रमाणाभावात् । अस्तु वेदादेव ईश्वरसिद्धिरिति चेन्न, वेदानामपि ईश्वरकर्तृकत्वं साधयतां वेदप्रामाण्यादीश्वरसिद्धिः ईश्वरप्रमाण्याच्च वेदसिद्धिः इति अन्योन्याश्रयचक्रकयोः प्रसङ्गात्" इत्युक्तम् । एवमत्र अनुमानप्रमाणासिद्धमीश्वरं निराचक्रुः । अनन्तरञ्च – इत्थं निरस्ते परमते स्वपक्षस्थापनार्थमनुमानमुच्यते – क्षित्यादयः कर्तृशून्याः शरीरिजन्यत्वाभावात्, आत्मवत्" इत्यादिना स्वपक्षे प्रमाणानि प्रतिपादितानि ।

"अपि च सिद्धेऽपीश्वरे कर्तरि कथं भवन्मते सकलकालदेशेषु तुल्यतया प्रवृत्तयोर्विद्वेषादिकारण-रहितयोरीश्वरेच्छाप्रयत्नयोः कदाचित्कार्योत्पत्तिविघटनहेतुतया तत्कारणानां परस्परोपसर्पणहेतुत्वम् ? तत्तद्भोगाधिकृत-तत्तच्चेतनगततत्तददृष्टपरिपाकवशादिति चेत् , तर्हि तेनैव कारणानां परस्परोपसर्पणादिसिद्धेः किमीश्वरपरिकल्पनाव्यसनेनेति सिद्धस्तार्किकेश्वरनिरासः । वैदिकेश्वरः परमकारुणिकः पुनरस्माकमनुगुण एव" इत्युपसंहृतम् । अत्र तु वैदिकेश्वरः परमकारुणिकः इति कथितोऽपि सः कः इति न निर्दिष्टः। किन्तु तत्तद्भोगाधिकृततत्तच्चेतनगततत्तददृष्टपरिपाकवशात् कारणानां परस्परोपसर्पणादिसिद्धेः" इति कथनेन यागादिकर्मजन्यतत्तदात्मनिष्ठ अपूर्वस्यैव फलजनकत्वमथवा कार्यजनकत्वमिति गम्यते ।

 ISSN: 2320-740X

तेन ईश्वरस्य फलजनकत्वं वा जगत्कर्तृकत्वं वा असिद्धं भवति । कर्मणामेव फलजनकत्वम् । तत्र अङ्गत्वमस्त्येव । देवतायाः कर्मशेषत्वात् । एवमेव सर्वज्ञवादोऽपि मीमांसकानां न सम्मतः।

श्लोकवार्तिके सर्वज्ञनिराकरणम् एवं दृश्यते । "अशक्यं हि तत् पुरुषेण ज्ञातुमृते वचनात्" इत्यस्य भाष्यवाक्यस्य विवरणावसरे अयमंशः विमृष्टः ।

**"यदि षड्भिः प्रमाणैः स्यात् सर्वज्ञः केन वार्यते" ।**

यो हि षड्भिः प्रमाणैः सर्वं जानाति सः धर्माधर्मावपि वेदेन जानन् न चोदनैवेत्यवधारणं विरुणद्धीति न निराकर्तव्य इति । यस्तु एकेनैव सर्वं जानातीति कैश्चित्कल्पितः सोऽतितुच्छत्वादेव न निराकार्यः इत्याह -

**एकेन तु प्रमाणेन सर्वज्ञो येन कल्प्यते ।**
**नूनं स चक्षुषा सर्वान् रसादीन् प्रतिपद्यते ॥** इति ॥

यो हि एवंविधं सर्वज्ञं कल्पयति स स्वयं तावच्चक्षुषा रसादीन् जानाति । इतरथा कथं स्वभावनियमं जानन् अविषये सर्वार्थे प्रत्यक्षस्य अन्यस्य वा प्रवृत्तिमध्यवस्येदिति । ततः - यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम् ।

**भवेदिदानीं लोकस्य तथा कालान्तरेऽप्यभूत् ॥ इति ।**

अद्यत्ववदेव कालान्तरेऽपि प्रमाणस्वभावो नान्यादृशः इति ।

**"सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः"** इति सर्वज्ञनिराकरणं कृतम् ।

यदि आगमेन सर्वज्ञः सिद्ध्यति इति कथ्यते येनैव आगमेन सर्वज्ञत्वं प्रतिपाद्यं तेन धर्म एव प्रतिपाद्यतां, किमन्तर्गडुना सर्वज्ञेन इति सर्वज्ञनिराकरणं कृतम् ।

मीमांसकमते - धर्म एव जगदुत्पत्तिस्थित्यादिरूपेण सर्वस्यापि कारणं भवति । "धर्मे सर्वं प्रतिष्ठितम्" इत्यादिश्रुत्या सूचितम् । स च धर्मः मीमांसकमते यागादिरेव । देवतोद्देशेन द्रव्यत्यागो यागः । तत्र देवतायाः यागस्वरूपनिरूपकत्वेन यागाङ्गत्वम् । तदुक्तं – यागस्य द्वे रूपे – द्रव्यं देवता चेति । एवञ्च ईश्वरस्य देवतारूपत्वेन कर्मशेषत्वं सिद्ध्यति । कर्मणः स्वर्गादिफलजनकत्वम् । कर्मणः क्षणिकत्वात् कथं कालान्तरभाविफलजनकत्वमित्युक्तौ तदन्यथानुपपत्त्या अवान्तरव्यापारत्वेन अपूर्वं परिकल्प्य निर्वाहः कृतः । कथं तर्हि कर्मणः फलजनकत्वं , जडत्वात् कर्मणः इति चेत् – वचनबलात् अङ्गीक्रियते । यथा – "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिवेदवाक्यैः यागस्वर्गयोः साध्यसाधनभावः श्रुतः । तेन यागदिकर्मण एव स्वर्गादिफलकारणत्वं गम्यते । " तृप्त एव एनमिन्द्रः प्रजया पशुभिश्च तर्पयति " इत्याद्यर्थवादबलात् यागाराधिता देवता फलं प्रयच्छति । ईश्वर एव कर्माध्यक्षः , फलदाता इति चेत् – अयमर्थवादः ऐन्द्रदधियागसन्निधौ श्रूयमाणः । अर्थवादानां स्वार्थे प्रामण्यं नास्ति । विधेयप्राशस्त्यादिबोधकत्वेन प्रामण्यमिति निर्णीतम् । अतः इदं प्रमाणभूतं न भवति ।

यदि यागाराधिता देवता अथवा ईश्वरपदवाच्यः शक्तिविशेषः फलदाता इत्यङ्गीकारे कलञ्जभक्षणब्राह्मणहननादौ कर्मणामेव निषेधः श्रूयते । न कलञ्ज्वं भक्षयेत्, ब्राह्मणो न हन्तव्यः इत्यादिना । तत्र तादृशनिषिद्धकर्मणामेव नरकजनकत्वं श्रूयते । तत्र च देवतासम्बन्धः अङ्गतयाऽपि नास्ति । यदि स्वर्गादीनाम् इष्टफलदाता ईश्वरः स्यात्, तथैव नरकाद्यनिष्टफलदातृत्वमपि तस्यैव वक्तव्यम् । तच्चानिष्टम् । यागादौ तु शेषतया देवतासम्बन्धः श्रूयते चेदपि निषिद्धे कर्मणि देवतासम्बन्धः नास्त्येव । साक्षात्कर्मणः एव फलजनकत्वम् ।

तत्र च श्रुतिवचनमेव प्रमाणम् । स च वैदिकः शब्दः चेतनः एवम् अन्यत्र ईश्वरशब्देन व्यवह्रियमाणेन परमात्मना अधिष्ठितः ।

अयं विचारः भट्टपादैः तन्त्रवार्तिके – ग्रहैकत्वाधिकरणे प्रासङ्गिकरूपेण विमृष्टः। तथाहि - ग्रहं सम्मार्ष्टीत्यत्र एकत्वं विवक्षितं न वा इति प्रश्ने - कस्य विवक्षा ? पुरुषस्य उत वेदस्य ? इति चेत् वेदस्य इति वक्तव्यम् । शब्दरूपस्य वेदस्य विवक्षा इति कथं सङ्गच्छते इति विचारसन्दर्भे - भट्टपादैः अभिहितम् –

**ऋग्वेदादिसमूहेषु क्षेत्रज्ञा ये प्रतिष्ठिताः ।**
**तेषां वाऽयमभिप्रायः स्याद्विवक्षाऽविवक्षयोः ॥**
**महाभौतिकदेहस्था यथात्मानः सचेतनाः ।**
**कञ्चिदर्थं विवक्षन्ति न विवक्षन्ति चापरम् ॥**
**तेषामन्तर्गतापीच्छा तद्वाक्यार्थविचारिभिः ।**
**ज्ञायते शब्दशक्त्यैव स्फुरन्तीव बहिः स्थिता ॥**
**देहभेदप्रकारश्च कर्मशक्तिवशानुगाः ।**
**प्रकृत्यारम्भवैचित्र्यात् दृश्यन्ते परमात्मनाम् ॥**
**तथा व्योमशरीरोऽपि परमात्मा श्रुतौ श्रुतः ।**
**इज्यते वारिणा नित्यं यः खं ब्रह्मेति चोदितः ॥**
**रूपस्पर्शादयो येऽपि महाभूतगणाः स्थिताः ।**
**प्रत्येकमात्मनां तेऽपि देहाः सम्भोगहेतवः ॥**
**शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते ।**
**तदप्यधिष्ठितं सर्वमेकेन परमात्मना ॥**
**तथाग्वेदादयो देहाः प्रोक्ता येऽपि पृथक् पृथक् ।**
**भोग्यत्वेनात्मनां तेऽपि चैतन्यानुगताः सदा ॥**
**तेषां चान्तर्गतेच्छानां वाक्यार्थप्रतिपादने ।**

 ISSN: 2320-740X

**विवक्षा वाऽविवक्षा वा ज्ञायते शब्दशक्तितः ॥**
**विधिशक्त्या गृहीतं यत्तत्सर्वं हि विवक्षितम् ।**
**तथैव तु परित्यक्तं व्याख्येयमविवक्षितम् ॥**
**शब्दब्रह्मात्मनोऽप्येवं सर्ववेदानुसारिणः ।**
**विवक्षा वाऽविवक्षा वा वक्तव्या विधिशक्तितः ॥**
**अनादिनिधनेऽप्येवं वेदे वेदार्थगोचरे ॥**

इत्यादिना ईश्वरस्य अथवा भगवदस्थित्वस्य प्रकारान्तरेणाङ्गीकारः दृश्यते ।

अर्थवादाधिकरणे तु – वार्तिके

"माभूत्तन्महावाक्यम्" इति आक्षिप्य उक्तम् – "सत्यं विनापि तेनेति । यो नाम वेदस्य कर्ता स्यात्स एवं पर्यनुयुज्येत लघुनोपायेन सिद्धे किं महावाक्यमाश्रयसीति । तदभावान्न पर्यनुयोगः" इत्युक्तम् । तेन ईश्वरकर्तृकः वेदः इति मीमांसकानाम् असम्मत इति सूचितं भवति ।

नवमाध्याये देवताधिकरणे देवतायाः विग्रहवत्वं निराकृत्य आनुपूर्वीविशिष्टशब्दरूपा देवता इति सिद्धान्तितम् ।

तथा च मीमांसकमते ईश्वरः इति अतिरिक्तः नास्ति । ईश्वरस्थानीयः यज्ञ एव । ईश्वरकार्यकारित्वात् । श्रौतस्मार्ताद्यनुष्ठानेऽपि पठ्यते –

**"काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।**
**स्वर्गापवर्गदात्रे च यज्ञेशाय नमो नमः" ॥**

इति तेन यज्ञाख्यः ईश्वरः एव सम्मत इति प्रतीयते ।

जडत्वात् कर्मणां कथं फलसाधनत्वमिति न चिन्तनीयम् । परमात्माधिष्टितवेदबोधितत्वात् तत्रापि कश्चन शक्तिविशेषः वर्तते । कर्मजन्येन शक्तिरूपापूर्वेण कालान्तरभावि फलं प्रति यागः कारणं भवतीति वेदप्रामाण्यवशात् अङ्गीकर्तव्यम् । यथा – अनेन औषधपानेन अयं ज्वराख्यरोगविशेषः नश्यति इति आयुर्वेदवचनानुसारेण तस्य औषधपानेन तस्य निर्दिष्टस्य रोगस्य नाशे प्रत्यक्षानुभूते सति तस्मिन् औषधविशेषे कश्चन शक्तिविशेषः वर्तते इति निर्णीयते । तत्र औषधस्य चेतनत्वं वा जडत्वं वा इति विचारो नास्ति । तस्मिन् शक्तिर्नास्ति इति वक्तुं न शक्यते , अनुभवविरोधात् । तद्वत् वेदबोधितकर्मणामपि फलजनकत्वशक्तिः वर्तते इति अङ्गीकर्तव्यम् । ततश्च सृष्टिस्थित्यादिकर्तृत्वेन सकलप्रपञ्चस्य अध्यक्षः ईश्वररूपी यज्ञ एव इति न मीमांसकमते पूर्वापरविरोधः । एवं शब्दमात्रेण भेद इति शास्त्रान्तराविरोधश्च ।

**********

# अतिदेशविचारः

डा. सी. एस्. एस्. नरसिंहमूर्तिः
व्याकरणविभागाध्यक्षः

पदसाधुत्वबोधकं व्याकरणमिति सर्वे अङ्गीकुर्वन्ति। तत्र पदानां साधुत्वबोधने प्रकारद्वयं विद्यते - १) साक्षात् २) परम्परया च। यथा - रामाभ्याम् इत्यत्र राम+भ्याम् इत्यवस्थायां सुपि च(७-३-१०२) इत्यनेन अदन्तप्रातिपदिकात् परत्वेन यञादिसुपः सत्त्वेन साक्षात् दीर्घः प्रवर्तते। रामाय इत्यत्र राम+य इति स्थिते यकारस्य यञादित्वेऽपि सुप्त्वाभावान्न प्राप्नोति दीर्घः । तदा **स्थानिवदादेशोऽनल्विधौ** (१-१-५६) इत्यनेन आदेशः स्थानिवत् भवतीति बोधनेन ङे इत्यस्य स्थानेऽयं यादेशः कृतः, अतस्स्थानिवद्भावेन सुब्भवतीति दीर्घो भवति। इत्थं बहुत्र शास्त्रेषु कार्याणि साधयन्ति शास्त्रज्ञाः। तादृशानि सूत्राणि आतिदेशिकानि भवन्ति। अतस्मिन्स्तद्बुद्धिः अतिदेशः । शास्त्रबोधितत्त्वेनास्यापि प्रामाण्यं सर्वैरङ्गीक्रियते । अतिदेशेन साधितं कार्यमपि मुख्यकार्येण तुल्यं भवतीत्यत्र नास्ति सन्देहः। अत एव षड्विधसूत्रेषु अस्यापि गणना विद्यते। यथा च -

**संज्ञा च परिभाषा च विधिर्नियम एव च ।**
**अधिकारोऽतिदेशश्च षड्विधं सूत्रसम्मतम् ॥**

असावतिदेशः षोढा परिगण्यते –

ते यथा - १) निमित्तातिदेशः २) व्यपदेशातिदेशः ३) तादात्म्यातिदेशः
४) शास्त्रातिदेशः ५) कार्यातिदेशः ६) रूपातिदेशः इति ।

तत्र प्रत्येकम् उदाहरणानि यथा -

**१) निमित्तातिदेशः - पूर्ववत्सनः(१-३-६२)**

सिद्धान्तकौमुद्यां तिङन्ते आत्मनेपदप्रकरणे विद्यत इदं सूत्रम् । सनः पूर्वो यो धातुः तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यादिति सूत्रार्थः । एदिधिषते, शिशयिषते, निविविक्षते इत्युदाहरणानि। अत्र सन्प्रकृतिभूतधातूनाम् आत्मनेपदित्वेन सन्नन्तादपि आत्मनेपदं प्रवर्तते । अत्र प्रकृतिगतं निमित्तं ङित्वम्, अनुदात्तेत्वं वा न सन्नन्तेऽतिदिश्यते। सर्वदा स च धर्मः प्रकृतिगतमेव भवति, तच्च धर्मः सना व्यवधानेऽपि आत्मनेपदं प्रवर्तयतीत्येतावन्मात्रमतिदिश्यते । एतावतैव च निमित्तातिदेशोऽयमिति व्यवहारः । वस्तुतो निमित्तमतिदेष्टुमशक्यम् । ब्राह्मणस्याग्रभोजनादौ निमित्तभूतं ब्राह्मण्यं वचनशतेनापि क्षत्रियेऽतिदेष्टुं न शक्यते ।

**२) व्यपदेशातिदेशः - आद्यन्तवदेकस्मिन्(१-१-२१)**

सिद्धान्तकौमुद्यां हलन्तपुंलिङ्गप्रकरणे वर्तते सूत्रमेतत् । एकस्मिन् क्रियमाणं कार्यम् आदाविवान्त इव

स्यादित्यर्थ: । आभ्याम् इत्युदाहरणम्। इदम्+भ्याम् इति स्थिते त्यदादीनाम: (७-२-१०२) इत्यनेन मकारस्यात्वे इद अ+भ्याम् इति जाते अतो गुणे (६-१-९६) इति पररूपे इद+भ्याम् इत्यवस्थायां हलि लोप: (७-२-११३) हलादौ विभक्तौ परे इदम: इद: लोपे अ+भ्याम् इति स्थिते सुपि च (७-३-१०२) इत्यनेन दीर्घ: कर्तव्य: । तेनादन्तस्याङ्गस्य यञादौ सुपि परे दीर्घ: कथित: । प्रकृते अकार एवास्ति, न त्वदन्तमङ्गम्, अतो दीर्घ: कथमिति चिन्तनसमये अनेन सूत्रेण एकस्मिन्नकारेऽपि अकारान्तत्वव्यपदेशात् सुपि चेत्यनेन दीर्घे आभ्याम् इति रूपं सिद्ध्यति । प्राञ्च आहु: - आद्यन्तवद्व्यपदेशो निमित्तं पूर्ववत्सन: । इति ॥

**३) तादात्म्यातिदेश: - सुबामन्त्रिते पराङ्गवत्स्वरे(२-१-२)**

सुबन्तमामन्त्रिते परे परस्याङ्ग(परैकदेश)वत् स्यात्स्वरे कर्तव्ये इति सूत्रार्थ: । तादात्म्यम्= तत्स्वभावत्वम् इत्यर्थ: । सामन्त्रितम् (२-३-४८) इत्यनेन सम्बोधनप्रथमाया: आमन्त्रितसंज्ञा विहिता । कुण्डे नाटन्, परशुना वृश्चन्, मद्राणां राजन् अत्र सर्वत्र आमन्त्रितस्य च (६-१-१९५) इत्यनेन आमन्त्रितस्यादिरुदात्तो भवतीति बोधित आद्युदात्त: ससुप्कस्यापि प्रवर्तते । इत्थमेव **"यत्तो दिवो दुहितर्मर्त्तभाजनम्"** इत्यत्र आमन्त्रितस्य च (८-१-१९) इति सूत्रेण पदात्परस्यामन्त्रितस्य विधीयमानो निघातस्वर: "दिवो दुहितर्" इति समुदाये प्रवर्तते ।

**४) शास्त्रातिदेश: - कर्मवत्कर्मणा तुल्यक्रिय:(३-१-८७)**

कर्मस्थया क्रियया तुल्यक्रिय: कर्ता कर्मवत् स्यादिति सूत्रार्थ: । तुल्या क्रिया यस्य स: = तुल्यक्रिय: इति बहुव्रीहि: । अन्यपदार्थ: कर्ता भवति । पच्यते ओदन:, भिद्यते काष्ठम्, इत्युदाहरणे भवत: । कर्मकारकस्था क्रिया कर्मणेत्यनेन विवक्षिता । क्रियाया: कर्मकारकेण तुल्यत्वं तत्स्थक्रियामादायैव वक्तव्यम् । अत: कर्मण: कर्तृत्वेन विवक्षायां कर्ता कर्मवद् भवति । तेन पच्-भिद् इत्यादीनाम् अकर्मकव्यवहाराभावान्न भावे लकार: । कर्मण: कर्तृत्वविवक्षायां कर्तरि लकारे सति तदादेशतिङा कर्तुरभिहितत्वात् प्रथमा भवति - यथा – “पच्यते ओदन:” इति । अत्र कर्मण: कर्तृत्वेऽपि कर्मत्वातिदेशाद् यक् प्रवर्तते । यद्यपि कार्यातिदेशशास्त्रातिदेशयो: न फलभेद: । तथापि शास्त्रातिदेशस्यापि कार्यार्थत्वात् कार्यातिदेश एवाश्रयणीय: इत्याशयं मनसि निधाय सिद्धान्तकौमुद्यां कार्यातिदेश इत्युक्तम् ।

**५) कार्यातिदेश: - गोतो णित्(७-१-९०)**

गोशब्दात्परं सर्वनामस्थानं णिद्वत् स्यादिति सूत्रार्थ: । अत्र णिद्वदित्यस्य णित्कार्यभाक् भवतीत्यर्थ: । तेन गोशब्दस्य प्रथमाविभक्त्येकवचने गो+स् इति स्थिते अनेन सूत्रेण सुप्रत्ययस्य णिद्वद्भावे, तस्मिन् परे अचो ञ्णिति(७-२-११५) इत्यनेन ओकारस्य वृद्धौ गौ: इति रूपं सिद्ध्यति। एवमेव गावौ, गाव: इत्यत्रापि वृद्धि: प्रवर्तते ।

**६) रूपातिदेश: - तृज्वत्क्रोष्टु:(७-१-९५)**

क्रोष्टुशब्द: तृजन्तवद्रूपं लभते असम्बुद्धौ सर्वनामस्थाने परे इति सूत्रार्थ: । अत्र रूपातिदेश: । अत: क्रोष्टुशब्दस्य स्थाने तृजन्तस्य तस्य यादृशं रूपं भवति तद्रूपं प्रयोक्तव्यमित्यर्थ: । तेन क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्द एव प्रयोक्तव्य:, नान्य:

कश्चित्तृजन्त: पक्तृ इत्यादय: । तेन क्रोष्टुशब्दस्य सर्वनामस्थानेषु ऋकारान्तशब्दरूपाणि भवन्ति । इत्थमेव रूपातिदेश: द्विर्वचनेऽचि(१-१-५९) इत्यत्रापि । अतो द्वित्वनिमित्तेऽचि परेऽजादेश: स्थानिवद्रूपं लभत इति सूत्रार्थ: ।

प्राय: वत्पदघटितानि सूत्राण्यतिदेशसूत्राणि भवन्ति । क्वचित्तदभावेऽपि अतिदेशो विद्यते, यथा – सार्वधातुकमपित् (१-२-१), असंयोग्गाल्लिट् कित् (१-२-५) इत्यादय: ।

१) स्थानिवदादेशोऽनल्विधौ (१-१-५६) -------- कार्यातिदेश: (१)

२) द्विर्वचनेऽचि (१-१-५९) - - - - - रूपातिदेश: (१)

३) लुपि युक्तवद्व्यक्तिवचने (१-२-५१) - - - - रूपातिदेश: (२)

४) स्त्री पुंवच्च (१-२-६६) - - - - - रूपातिदेश: (३) (स्त्र्यर्थ: पुमर्थवद् भवतीत्यर्थातिदेश:)

५) अणावकर्मकाच्चित्तवत्कर्तृकात् (१-३-८८) - - - - - रूपातिदेश: (४)

६) पूर्ववदश्ववडवौ (२-४-२७) - - - - - - (रूपातिदेश:) (५) अर्थातिदेश:

७) भीह्रीभृहुवां श्लुवच्च (३-१-३९) - - - - - कार्यातिदेश: (२)

८) लोटो लङ्वत् (३-४-८५) - - - - - - कार्यातिदेश: (३)

९) कालेभ्यो भववत् (४-२-३४) - - - - - कार्यातिदेश: (४)

१०) गोत्रादङ्कवत् (४-३-८०) - - - - - - कार्यातिदेश: (५)

११) जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने (४-३-१००) - कार्यातिदेश: (६)

१२) क्रीतवत्परिमाणात् (४-४-१५६) - - - - कार्यातिदेश: । (७)

१३) तत्र च दीयते कार्यं भववत् (५-१-९६) - - - - - कार्यातिदेश: । (८)

१४) समूहवच्च बहुषु (५-४-२२) - - - - कार्यातिदेश: । (९)

१५) अन्तादिवच्च (६-१-८५) - - - - - कार्यातिदेश: । (१०)

१६) अप्लुतवदुपस्थिते (६-१-१२९) - - - - - कार्यातिदेश: । (११)

१७) पुंवत्कर्मधारयजातीयदेशीयेषु (६-३-४२) - - - कार्यातिदेश: । (१२)

१८) इच एकाचोऽम्प्रत्ययवच्च (६-३-६८) - - - - कार्यातिदेश: । (१३)

१९) असिद्धवदत्राभात् (६-४-२२) - - - - शास्त्रातिदेश: ।

२०) एकं बहुव्रीहिवत् (८-१-९) - - - - - कार्यातिदेश: । (१४)

२१) कर्मधारयवदुत्तरेषु (८-१-११) - - - - - - कार्यातिदेश: । (१५)

यद्यपि सर्वेऽतिदेशा: कार्यार्था: । अत: कार्यातिदेश एव प्रधानभूत: । तथापि तत्तदतिदेशेषु विद्यमानं किञ्चिद्वैलक्षण्यमादाय षोढा इति शास्त्रज्ञानां व्यवहार इति ज्ञेयम् ।

 ISSN: 2320-740X




**********

## शास्त्रकोषः

**-ः वाग्वर्धिनीपरिषद् ः-**

**कर्माणि ह्यविनाशीनि बीजवत् प्रभवन्ति च । तानि योगाग्निदग्धानि न प्ररोहन्ति वै पुनः ॥**
**एतस्मात् कारणात् ध्यानं धारणां प्राणसंयमम् । कुर्याद् यत्नेन योगज्ञः कर्मसन्याससचिन्तनम् ॥**

ಹೇಗೆ ಬೀಜವು ಅಂಕುರಿಸಿ ಬೆಳೆದು ಫಲವನ್ನಿತ್ತ ಬಳಿಕವೂ ನಶಿಸದೆ ಮತ್ತೆ ಬೀಜರೂಪದಲ್ಲಿ ಇರುವುದೋ ಹಾಗೆಯೇ ಕರ್ಮಗಳು ಫಲವನ್ನಿತ್ತಬಳಿಕವೂ ನಶಿಸದೆ ಮತ್ತೆ ವಾಸನಾರೂಪದಲ್ಲಿದ್ದು ಬೆಳೆಯುವವು. ಯೋಗಾಗ್ನಿಯಿಂದ ಸುಡಲ್ಪಟ್ಟಾಗ ಮಾತ್ರ ಕರ್ಮವಾಸನೆಗಳು ಮತ್ತೆ ಬೆಳೆಯಲಾರವು. ಆದ್ದರಿಂದ ಯೋಗವನ್ನರಿತವನಾಗಿ ಪ್ರಾಣನಿಗ್ರಹ, ಧಾರಣಾ, ಧ್ಯಾನಗಳನ್ನು ಪ್ರಯತ್ನಪೂರ್ವಕವಾಗಿ ಆಚರಿಸಬೇಕು.

जैसे बीज अंकुरित होते हुए बडकर, फल देने के बाद भी नष्ट न होते हुए फिर से बीजरूप को प्राप्त होता है, वैसे ही, हमारे कर्म फल देने के बाद नष्ट न होते हुए फिरसे वासनारूप में वर्धित होते हैं । योगाग्नि में जलने पर ही कर्मवासना फिर से उत्पन्न नही होती । इसलिए योग को जानकर प्राणनिग्रह, धारणा, ध्यान इनका प्रयत्नपूर्वक आचरण करना चाहिए ।

A seed gets sprouted and after yielding fruits gets back again to its form of seed. In the same way, our actions get back to their own form again, after yielding the respective fruits. Only after burning those KarmaVasanas in Yogagni, they don't grow. Therefore after learning Yoga one should practice taking charge over Pranas, Dharana and meditation.

(बृहद्योगियाज्ञवल्क्यस्मृतिः 9.33)

# छात्रविकासेऽधिगमकनिष्ठस्तरः

डा. चन्द्रकान्तः

**शिक्षाविभागाध्यक्षः**

वयं सर्वेऽपि स्वभावतः शिक्षार्थिनः वर्तामहे । अस्माकमस्तित्वं भौतिकेन, सामाजिकेन च प्रपञ्चेन सह क्रियमाणप्रतिस्पन्दमाधारितं सक्रियात्मकप्रपञ्चस्य निर्माणाधारितञ्च वर्तते । प्राथमिकानुभवेन किञ्चित् ज्ञानं प्राप्य तज्जन्यानुभवेनाधिगमं सम्पाद्य, पुनः नूतनानुभवेन नूतनज्ञानमिति वयं निरन्तरं ज्ञानं सम्पादयामः । एवमधिगमानुभवौ चक्ररूपेण मानवस्य सम्पूर्णे जीवने प्रचलतः । अतः डेविड्. ए. कोल्डमहोदयेनोक्तं सत्यमस्ति यत् अनुभवाधिगमौ विकासस्य मूलभूतौ वर्तेत इति ।

क्रमशः यथाधिगमो जायते तथैव व्यक्तेः नैजविकासः प्रभवति । अत्र व्यक्तेः विकासः समुचितरीत्या भवितुं केचन विशिष्टाः बिन्दवः अनिवार्येणानुसर्तव्याः वर्तन्ते ।

तद्यथा –

1. विमर्शानां स्वीकृतिः ।
2. स्वावगतिः ।
3. आत्मविश्वासः ।
4. दैहिकसामर्थ्यस्य परिज्ञानम् ।
5. मूलभूतजीवनशैली ।
6. सामाजिकरीतिभिः सह सामञ्जस्यम्
7. निम्नविचाराणां त्यागश्चेति

**♦ विमर्शानां स्वीकृतिः**

स्वविमर्शाणां स्वीकरणं स्वविकासस्य कश्चन प्रधानभागः वर्तते । आन्तरिकविमर्शान् यदि दूरीकरोति तर्हि आत्मविश्वासः उपयोगाय न कल्पते । स्वविमर्शस्वीकारः स्वावगतिं प्राप्तुं विद्यमानः कश्चन क्रमः येन स्वन्यूनताः परिज्ञाने समायान्ति । यावत्पर्यन्तं वयं स्वन्यूनताः नावगच्छामः तावत्पर्यन्तं स्वविकासमपि प्राप्तुं न शक्नुमः ।

**♦ स्वावगतिः**

स्वावगतिं विना स्वविकासः असम्भवः । अन्यैः सह व्यवहारसमयेऽहं कीदृश इति परिज्ञानमपेक्षते । अन्येषां दृष्ट्या अस्माकं बलविशेषतायाः न्यूनतायाश्च ज्ञानमपेक्षते । यतो हि सर्वेषामपि प्रधानन्यूनताः नाम स्वन्यूनतानामनवगतिः । स्वन्यूनतानां ज्ञानं


ISSN: 2320-740X

यस्य न भवति, अन्ये तस्य तासां न्यूनतानां दुरुपयोगेन लाभान्विताः भवेयुः ।

♦ **आत्मविश्वासः**

मानवानां कृते आत्मविश्वासः अत्यन्तप्रधानो विद्यते, परन्तु विनम्रताभावविहीनः आत्मविश्वासः दुरहङ्कारार्थमवसरं प्रकल्पयति । स्वाभाविकात्मविश्वासः नम्रतापूर्णः प्रसन्नतापूर्णः सम्पद्यते । यः स्वभावतः आत्मविश्वासी न भवति सः दीनभावयुक्तो भवति । आत्मविश्वासेनैव दीनभावः निरोद्धुं शक्यो वर्तते । यादृशं कार्यमस्मास्वात्मविश्वासमुत्पादयति तादृशं कार्यं कर्तव्यम् । विनयं विना आत्मविश्वासः दूषितो कलुषितो वा जायते । तस्मात् दृढव्यक्तित्वसम्पादनार्थं मानवीयमौल्ययुक्तोऽनुभूतिपूर्णः आत्मविश्वासयुक्तश्च भवेत् ।

♦ **दैहिकसामर्थ्यस्य परिज्ञानम्**

देहे स्वास्थ्यं यदि न भवति तर्हि मानसिकरूपेणापि स्वस्थः भवितुं कश्चिन्न शक्नोति । **"स्वस्थे शरीरे स्वस्थं मनः"** इति खलु विदुषां वचनम् । मानसिकस्वास्थ्यं सर्वदा दैहिकस्वास्थ्यमाधारीकृत्य वर्तते । देहमनसोः परस्परमविनाभावसम्बन्धः चैतन्यस्तरे वर्तत एव । धनात्मकचिन्तनं देहस्य दार्ढ्यं चैतन्यञ्च वर्धयति । एतत् वैद्यशास्त्रेण प्रमाणीकृतमपि विद्यते । खिन्नभावयुक्तः पुरुषः असकृदस्वस्थः जायते । देहमनसोः सामर्थ्यं स्वविकासे धनात्मकचिन्तनार्थं प्रेरयति । यदि यस्मिन् कस्मिन् अपि पुरुषे दैहिकदृढता धनात्मकचिन्तनञ्च परिलक्ष्यते तर्हि तस्मिन् धनात्मको विकासः अधिको विद्यत इत्यभिप्रायः ।

♦ **मूलभूतजीवनशैली**

मानवः अत्याशया सर्वविधसुखप्राप्तेः मानसिकतां यदा प्राप्नोति तदा आनन्दानुभूत्यपेक्षया सौलभ्यसंरक्षणस्य चिन्तैव वर्धते । तादृशचिन्तया सुखानुभूत्यर्थं समय एव न प्राप्येत । अतः उत्तमजीवनं यापयितुं कनिष्ठमूलभूतसौविध्यं पर्याप्तं भवति । साम्प्रतिके काले मानवः सामर्थ्ये, बुद्धिशक्तौ, मानसिकतायाञ्च नियन्त्रणहीनस्सन् चिन्तया विमुक्त्यर्थं मदजनकानामौषधद्रव्याणां दासः जायमानोऽवलोक्यते । एतादृशमदजनकद्रव्याणि सुखसन्तोषविहीनं, जीवनस्य सामान्यानुभवहीनञ्च जनं सम्पादयन्ति वर्तन्ते । तेन सामाजिकस्वास्थ्यमपि नष्टं जायमानं दृश्यते । मानवः मदजनकद्रव्याणां रासायनिकद्रव्याणामभावेऽपि शारीरिकं मानसिकञ्च दार्ढ्यं संरक्षितुं शक्नोत्येव । तदर्थं क्रमबद्धा,स्वानुशासनपूर्णा, उत्तमजीवनशैली अपेक्षत एव ।

♦ **सामाजिकरीतिभिः सह सामञ्जस्यम्**

यं कमपि समाजं पश्यन्तु तत्र तदीयाः काश्चन रीतयः नीतयः सम्प्रदायिकाः भवन्त्येव । एतादृशविषयेषु कोऽपि प्रष्टुं वक्तुं वा न शक्नोति । कुत इति चेत् तत्तस्य समाजस्य विश्वासो वा अन्धविश्वासः भवति । क्रमशः क्रमशः सामाजिकेषु वैज्ञानिकभावः सम्प्रदायावगतिश्च सम्पादयितुं शक्यते । अतः तादृशैः सम्प्रदायैः, रीतिभिः, नीतिभिः, अन्धविश्वासैश्च सह सामञ्जस्यसम्पादनं नैजविकासेऽनिवार्यं वर्तते ।

♦ **निम्नविचाराणां त्यागः**

बहवः बहुषु सन्दर्भेषु स्वासन्तोषार्थं स्वयं कारणीभूताः भवन्ति । तत्ते ज्ञातुमपि न शक्नुवन्ति । एतादृशगणे उत्तममध्यमाधमास्सर्वेऽपि जनाः अन्तर्भूताः वर्तन्ते । वस्तुतः सर्वेष्वपि तेषां स्वकीयेच्छाभिरुच्यादयः भवन्त्येव । परन्तु लघुविचारार्थं निम्नस्तरीयविचारार्थञ्चास्माभिः अन्ये पीडिताः न भवेयुः । ते अस्मान् दूरे यथा न स्थापयेयुः तथा जीवनीयं भवति । महति कष्टे कालेऽपि धनात्मकभावेन जीवनं यापयेत् । अन्ततो गत्वा उपरितनविषयेषु निर्लिप्तस्सन् जीवति चेत् जीवने सुखं प्राप्तुं शक्नोति कश्चित् । सुखं नाम दुराशं विना प्रलोभनेन विना च साहसपूर्णं जीवनं यापयन् सन्तुष्टेः दर्शनं वर्तते । एतदर्थं प्रश्नकरणस्य, चिन्तनस्य क्रियात्मकानुमानस्य, तर्कणस्य च गुणाः स्वात्मनि वर्धनीयाः वर्तन्ते ।

**अधिगमस्य कनिष्ठस्तरः** ( Minimum Level of Learning )

अधिगमस्य कनिष्ठस्तरस्य परिकल्पना त्रीनंशान् समाहृत्य वर्तते , यथा – अधिगमः कनिष्ठः, स्तरश्चेति । अधिगमः अधिगन्तुः ज्ञाने ,ग्रहणे,मनोवृत्तौ, कौशलेषु चापेक्षितं दीर्घकालिकं परिवर्तनं सम्पादयति । विद्यार्थिनः विद्यालयजीवने अधिगमप्रक्रियेयं विद्यालयस्यान्तः, बहिश्च प्राप्यमाणानुभवैः सह प्रचलति ।

स्तरो नाम कार्यनिर्वहणस्यौन्नत्यविशेषबोधकस्थितिविशेषः । प्रत्येकस्मिन् वर्गे वा कक्ष्यायां प्रत्येकोऽपि छात्रः तदपेक्षितं निर्दिष्टञ्च सामर्थ्यं प्राप्नुयादेव । न्यूनातिन्यूनं यत् सामर्थ्यं छात्रेणानिवार्यतया प्राप्तव्यमस्ति तत् सामर्थ्यमेवाधिगमस्य कनिष्ठस्तरं प्रबोधयति । स च स्तर एवाधिगमस्य कनिष्ठस्तर इति प्रोच्यते । कनिष्ठ इति पदं निश्चितसमयमितौ प्रत्येकं छात्रेणार्जनीयसामर्थ्यस्य परिमाणद्योतकमिति समन्वयः। कनिष्ठस्तरं सर्वे छात्राः प्राप्नुयुरिति उद्देशोऽस्ति, परन्तु केचन तीक्ष्णमतय तदपेक्ष्याधिकमपि स्तरमधिगच्छेयुः । शिक्षकः तान् परिचिनुयात् ।

**कनिष्ठस्तर इत्यस्य ऐतिहासिकपृष्ठभूमिः**

१९८६ नवशिक्षानीतिः विद्यालयशिक्षणस्य प्रत्येकस्मिन् सोपानेऽप्यधिगमस्य कनिष्ठस्तरः प्रतिपादनीय इति प्रास्तौत् । अपि च शिक्षणस्य प्रत्येकस्मिन् वर्गे वा सोपाने सर्वेऽपि कनिष्ठस्तरं यथा प्राप्नुयुः तथा शिक्षणव्यवस्था भवेदिति समसूचयत् ।

( **POA-1992** ) परिष्कृतनीतिसमितिद्वारा समेषामपि छात्राणामधिगमकनिष्ठस्तरस्य प्राप्तेः आवश्यकताः साग्रहं प्रस्तुताः । १९८६ राष्ट्रियशिक्षानीतिनिर्देशनानुसारं १९९० तमे वर्षे केन्द्रसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य शिक्षाविभागः प्राथमिकस्तरे अधिगमकनिष्ठस्तरं निरूपयितुं समितिमेकामारचयत् । १९९१ तमे वर्षे सा च समितिः “प्राथमिकस्तरेऽधिगमकनिष्ठस्तराः” इति शीर्षकान्वितं प्रतिवेदनं सर्वकाराय समार्पयत् । अस्मिन् प्रतिवेदने पञ्चमकक्ष्यापर्यन्तं भषागणितपरिसरादिविषयेषु बालैः प्राप्यमाणाधिगमकनिष्ठस्तरः कीदृश इति समुल्लिखितम् आसीत् । समानतया सह गुणवत्तायुक्तस्य चिन्तनस्य प्राथमिकस्तरेऽधिगमकनिष्ठस्तरनिर्णये आधारत्वमनुमतम् । एतदर्थं शिक्षाविभागः संशोधनस्याभिवृद्धेश्च कार्यमारभत । प्रत्येकस्मिन् राज्येऽपि भाषादिविषयाणामध्ययने बोधनीयं मूलं सामर्थ्यं किमिति ज्ञात्वा


ISSN: 2320-740X

समुल्लेखनमेवास्य संशोधनस्य उद्देश्यमासीत् ।

**कनिष्ठस्तरस्य महत्त्वम्**

1. अस्याधारेण २००१ तमे वर्षे प्राथमिकशिक्षणं सार्वजनीनं कर्तुं “सर्वशिक्षाभियानमिति विशिष्टः कार्यक्रमः समनुष्ठितः ।
2. अध्ययनेन जायमानस्य सामर्थ्यस्य स्पष्टीकरणे महत्त्वपूर्णं योगदानं प्रायच्छत् ।
3. शिक्षकेभ्यः बोधनोद्देशान् छात्राणामावश्यकतानुसारं स्पष्टरूपेण प्रतिपादयितुं सहायकमभूत् ।
4. बोधनोपायान् चेतुं सहायमकरोत् ।
5. बोधनपद्धतिचयने, विषयांशस्य चयने स्पष्टतां प्रायच्छत् ।
6. छात्रोपलब्धेः मूल्याङ्कने समुचितविधानमनुसर्तुं सहायमकरोत् ।

अधिगमस्य कनिष्ठस्तरः शिक्षायाः स्वरूपमेव पर्यवर्तयत् । सामर्थ्यस्य प्रभुत्वपूर्णविकासोऽस्य प्रतिफलितं वर्तते । एतस्य कारणतः सामर्थ्याधारितबोधनक्रमः समागतः । एवमेव (comprehensive and continuous evaluation) निरन्तरं व्यापकञ्च मूल्याङ्कनमपि अस्यैव फलरूपेण साम्प्रतं सर्वत्र शिक्षाक्षेत्रे समनुष्ठीयते ।

**सन्दर्भग्रन्थसूची –**


1. शिक्षणशास्त्रविश्वकोशः -२०१२- कर्णाटमुक्तविश्वविद्यालयः, शिक्षाविभागः मैसूरु - कर्णाटकम्।
2. शैक्षणिकतन्त्रज्ञानम् – २००९ सि.वि.म्यागेरि – विद्यानिधिप्रकाशन – गदग कर्णाटकम् ।
3. Education Policy and Planning -2010 .
   S. K. Holeyannanavar
   Vidyanidhi Prakaashana
   Gadaga. Karnataka
4. Secondary Education and Teachers Functions-2009
   Dr. S. Shivayya
   Pooja Prakaashana – Daavanagere. Karnataka


**********

# शाब्दबोधवैविध्यम्

डा. रामचन्द्रलबालाजि
**सहायकाचार्यः, शिक्षाविभागः**

### ❖ नैयायिकमते शाब्दबोधप्रकारः

'चैत्रः ग्रामं गच्छती'त्यत्र द्वितीयार्थः आधेयत्वम्, गमिधात्वर्थः उत्तरदेशसंयोगानुकूलव्यापारः । आख्यातार्थः कृतिः, वर्तमानत्वम् , एकत्वञ्च । ग्रामस्य द्वितीयार्थधेयतायां निरूपितत्वसम्बन्धेन अन्वयः । आधेयत्वस्य धात्वर्थतावच्छेदके उत्तरदेशसंयोगे स्वरूपसम्बन्धेन अन्वयः । धात्वर्थस्य व्यापारस्य आख्यातार्थकृतौ अनुकूलत्वसम्बन्धेन अन्वयः । कृतेः प्रथमान्तार्थे चैत्रे आश्रयतासम्बन्धेन अन्वयः । एवञ्च ग्रामनिरूपिताधेयतावत् उत्तरदेशसंयोगानुकूलव्यापारानुकूलकृत्याश्रयः चैत्रः इत्याकारकः प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधो जायते ।

अत्रैव प्राचीनानां मते, द्वितीयार्थः कर्मत्वं, धात्वर्थे गमने निरूपकतासम्बन्धेन अन्वेति । गमनम् आख्यातार्थे कर्तृत्वे निरूपितत्वसम्बन्धेन अन्वेति । कर्तृत्वं चैत्रे आश्रयतासम्बन्धेन अन्वेति । ग्रामः कर्मत्वे आधेयतासम्बन्धेन अन्वेति । इत्थञ्च ग्रामनिष्ठकर्मतानिरूपकगमननिरूपितकर्तृत्वाश्रयः चैत्रः इत्याकारकः शाब्दबोधः भवति ।

'चैत्रेण गम्यते ग्रामः' इत्यादि कर्मणिप्रयोगे तु चैत्रः तृतीयार्थे कर्तृत्वे आधेयतासम्बन्धेन अन्वेति । तृतीयार्थः कर्तृत्वं धात्वर्थे गमने निरूपकतासम्बन्धेन अन्वेति । गमनम् आख्यातार्थे कर्मत्वे निरूपितत्वसम्बन्धेन अन्वेति । इत्थञ्च चैत्रनिष्ठकर्तृत्वनिरूपकगमननिरूपितकर्मत्वाश्रयः ग्रामः इत्याकारकः बोधः भवति ।

अत्र निष्कर्षस्तु –

तृतीयार्थकृतौ चैत्रः आधेयतासम्बन्धेन अन्वेति । कृतिः धात्वर्थे व्यापारे जन्यतासम्बन्धेन अन्वेति । धात्वर्थः उत्तरदेशसंयोगावच्छिन्नव्यापारः आख्यातार्थे उत्तरदेशसंयोगे जन्यतासम्बन्धेन अन्वेति । उत्तरदेशसंयोगश्च प्रथमान्तार्थे ग्रामे आश्रयतासम्बन्धेन अन्वेति । एवञ्च चैत्रनिष्ठकृतिजन्य-उत्तरदेशसंयोगावच्छिन्नव्यापारजन्य-उत्तरदेशसंयोगाश्रयः ग्रामः इत्याकारको बोधः ।

'चैत्रः काष्ठेन पचति' इत्यादौ तृतीयार्थकरणत्वे प्रकृत्यर्थः काष्ठम् आधेयतासम्बन्धेन अन्वेति । करणत्वञ्च धात्वर्थे पाके निरूपकतासम्बन्धेन अन्वेति । पाकः आख्यातार्थे कर्तृत्वे निरूपितत्वसम्बन्धेन अन्वेति । इत्थञ्च काष्ठनिष्ठकरणतानिरूपकपाकनिरूपितकर्तृत्वाश्रयः चैत्रः इति बोधः ।


ISSN: 2320-740X

'चैत्रेण काष्ठेन पच्यते ओदनम्' इत्यत्र तृतीयार्थे कर्तृत्वे चैत्रस्य आधेयतासम्बन्धेन अन्वयः । अपरतृतीयार्थे करणत्वे काष्ठस्यापि आधेयतासम्बन्धेन अन्वयः । कर्तृत्वकरणत्वयोः धात्वर्थे पाके निरूपकत्वसम्बन्धेन अन्वयः । पाकस्य आख्यातार्थे कर्मत्वे निरूपकत्वसम्बन्धेन अन्वयः । कर्मत्वस्य प्रथमान्तार्थे ओदने आश्रयतासम्बन्धेन अन्वयः । एवञ्च चैत्रनिष्ठकर्तृतानिरूपककाष्ठनिष्ठकरणतानिरूपकपाकनिरूपित कर्मत्वाश्रयः ओदनः इति बोधः ।

'ब्राह्मणाय गां ददाति राजा' इत्यादिचतुर्थत्वे सम्प्रदानत्वे ब्राह्मणस्य आधेयतासम्बन्धेन अन्वयः । द्वितीयार्थकर्मत्वे 'गोः' आधेयतासम्बन्धेन अन्वयः । कर्मत्वसम्प्रदानत्वयोः धात्वर्थे दाने निरूपकतासम्बन्धेन अन्वयः । दानस्य आख्यातार्थे कर्तृत्वे निरूपितत्वसम्बन्धेन अन्वयः । कर्तृत्वस्य प्रथमान्तार्थे आश्रयतासम्बन्धेन अन्वयः । एवञ्च ब्राह्मणनिष्ठसम्प्रदानतानिरूपकगोनिष्ठकर्मतानिरूपक- दाननिरूपितकर्तृत्वाश्रयः राजा इति शाब्दबोधः ।

'वृक्षात् पर्णं भूमौ पतति' इत्यादिषु एवं शाब्दबोधः भवति – अत्र पञ्चम्यर्थे अपादानत्वे वृक्षः आधेयतासम्बन्धेन अन्वेति । सप्तम्यर्थे अधिकरणत्वे भूमिः आधेयतासम्बन्धेन अन्वेति । अपादानत्वाधिकरणत्वयोः धात्वर्थे पतने निरूपकतासम्बन्धेन अन्वयः । पतनस्य आख्यातार्थे कर्तृत्वे निरूपितत्वसम्बन्धेन अन्वयः । कर्तृत्वस्य प्रथमान्तार्थे पर्णे आश्रयतासम्बन्धेन अन्वयः । एवञ्च वृक्षनिष्ठ-अपादानतानिरूपकभूमिनिष्ठाधिकरणतानिरूपकपतननिरूपितकर्तृत्वाश्रयं पर्णम् इति बोधः ।

'राज्ञः पुरुषः' इत्यादौ तु षष्ठ्यर्थे स्वत्वे राजा निरूपितत्वसम्बन्धेन अन्वेति । स्वत्वञ्च प्रथमान्तार्थे पुरुषे आश्रयतासम्बन्धेन अन्वेति । एवञ्च राजनिरूपितस्वत्वाश्रयः पुरुषः इति बोधः भवति ।

'नीलो घटः' इत्यत्र नीलपदार्थः नीलरूपवत्वं घटपदार्थे घटे अभेदसम्बन्धेन अन्वेति । एवञ्च नीलरूपवदभिन्नो घटः इति बोधः भवति ।

❖ **मीमांसकमते शाब्दबोधप्रकारः**

'चैत्रः ग्रामं गच्छति' इत्यत्र प्रथमान्तार्थचैत्रस्य आख्यातार्थभावनायाम् (कृतौ) आधेयतासम्बन्धेन अन्वयः । ग्रामपदार्थस्य द्वितीयार्थकर्मत्वे आधेयत्वेन अन्वयः । द्वितीयार्थस्य निरूपकतासम्बन्धेन भावनयाम् अन्वयः । धात्वर्थस्य संयोगानुकूलव्यापारस्य स्वकरणकत्वसम्बन्धेन आख्यातार्थभावनायाम् अन्वयः । तथा च चैत्रवृत्तिः ग्रामनिष्ठकर्मत्वनिरूपिका संयोगानुकूलव्यापारकरणिका भावना इति वाक्यार्थः । (अत्र धात्वर्थस्य करणत्वं न असाधारणकारणत्वरूपम्, किन्तु भावनाभाव्यनिर्वर्त-कत्वरूपम् ) ।

'चैत्रेण गम्यते ग्रामः' इत्यत्र कर्माख्यातस्य लक्षणया कर्मत्वमपि अर्थः । शक्यार्थः भावना तावत् विशेष्यभूता । प्रथमान्तार्थस्य ग्रामस्य आधेयत्वसम्बन्धेन आख्यातलक्ष्ये कर्मत्वे अन्वयः । कर्मत्वस्य निरूपकत्वेन भावनायाम् अन्वयः । चैत्रेण इति तृतीयायाः कर्तृत्वमर्थः । तत्र चैत्रस्य आधेयत्वेन अन्वयः । कर्तृत्वस्य निरूपकत्वेन भावनायाम् अन्वयः । तथा च चैत्रनिष्ठकर्तृत्वनिरूपिका ग्रामनिष्ठकर्मत्वनिरूपिका संयोगानुकूलव्यपारकरणिका भावना इति बोधः भवति ।

'चैत्रेण काष्ठेन पच्यते ओदनः' इत्यत्र चैत्रस्य तृतीयार्थकर्तृत्वे आधेयत्वेन अन्वयः । कर्तृत्वस्य निरूपकतासम्बन्धेन भावनायाम् अन्वयः । काष्ठस्य तृतीयार्थकरणत्वे आधेयत्वेन अन्वयः । करणत्वस्य निरूपकतासम्बन्धेन भावनायाम् अन्वयः । प्रथमान्तर्थस्य ओदनस्य आख्यातलक्ष्ये कर्मत्वे अन्वयः । कर्मत्वस्य निरूपकत्वेन भावनायाम् अन्वयः । तथा च चैत्रनिष्ठकर्तृत्वनिरूपिका काष्ठनिष्ठकरणत्वनिरूपिका ओदननिष्ठकर्मत्वनिरूपिका विक्लृत्त्यनुकूलव्यापारकरणिका भावना इति बोधः भवति । वैयाकरणाः धात्वर्थातिरिक्तक्रियां न स्वीकुर्वन्ति । **कृतिसहिता सर्वापि क्रिया धातुवाच्या एव** इति वदन्ति । अतः धात्वर्थक्रियायाः एव शाब्दबोधे मुख्यविशेष्यत्वं तन्मते । मीमांसकास्तु **कृतिभिन्नक्रियायाः एव** धात्वर्थत्वं स्वीकुर्वन्ति । कृतेस्तु आख्यातार्थत्वम्, सा एव भावना इत्युच्यते । तस्याः एव शाब्दबोधे मुख्यविशेष्यत्वं स्वीकुर्वन्ति । धात्वर्थव्यापारस्य तु अत्र विशेषणत्वम् ।

'चैत्रः काष्ठेन पचति' इत्यत्र तु काष्ठस्य तृतीयार्थकरणत्वे अन्वयः । करणत्वस्य निरूपकतासम्बन्धेन भावनायाम् अन्वयः । धात्वर्थस्य व्यापारस्य भाव्यत्वेन भावनायाम् अन्वयः । एवञ्च चैत्रवृत्तिः काष्ठनिष्ठकरणत्वनिरूपिका विक्लृत्त्यनुकूलव्यापारभाविका भावना इति बोधः ।

'ब्राह्मणाय गां ददाति राजा' इत्यत्र चतुर्थ्याः सम्प्रदानत्वम् अर्थः । तत्र ब्राह्मणस्य आधेयत्वसम्बन्धेन अन्वयः । सम्प्रदानत्वस्य दानानुकूलकृतौ निरूपकतासम्बन्धेन अन्वयः । राज्ञः आधेयत्वेन कृतौ अन्वयः । गाम् इति द्वितीयायाः करणत्वे लक्षणा । एवञ्च ब्राह्मणनिष्ठसम्प्रदानत्वनिरूपिका गोकरणिका राजनिष्ठा दानानुकूलकृतिः इति बोधः ।

'वृक्षात् पर्णं भूमौ पतति' इत्यत्र पञ्चम्याः अपादानत्वमर्थः । अपादानत्वे वृक्षस्य आधेयतासम्बन्धेन अन्वयः । सप्तम्यर्थाधिकरणत्वे भूमेः आधेयत्वसम्बन्धेन अन्वयः । अत्र पर्णस्य अचेतनत्वेन तत्र कृतिरूपभावनायाः असम्भवात् आख्यातस्य आश्रयत्वे लक्षणा । एवञ्च वृक्षनिष्ठ-अपादानत्वनिरूपकभूमिनिष्ठाधिकरणत्वनिरूपकपर्णवृत्ति-अधोदेशसंयोगानुकूलव्यापाराश्रयत्वम् ।

'राज्ञः पुरुषः' इत्यादिस्थले अस्तीति पदम् अध्याह्रियते । 'अस्' धातोः सत्ता अर्थः, आख्यातस्य आश्रयत्वे लक्षणा । षष्ठ्याः स्वस्वामिभावसम्बन्धः अर्थः । एवञ्च स्वस्वामिभावसम्बन्धेन राजविशिष्टपुरुष-वृत्तिसत्ताश्रयत्वम्, इदं प्राचीनमतानुसारेण भवति । खण्डदेवाचार्याणां मते तु षष्ठ्यर्थसम्बन्धस्यापि स्वाश्रयपुरुषवृत्तित्वरूपपरम्परासम्बन्धेन आख्यातार्थे एव अन्वयः । तथा च पुरुषवृत्त्युक्तपरम्परासम्बन्धेन राजसम्बन्धविशिष्टसत्ताश्रयत्वमिति बोधः ।

'नीलो घटः' इत्यादि स्थले तु अस्तीति अध्याहार्यम् । आख्यातस्य आश्रयत्वे लक्षणा, नीलपदार्थस्य घटपदार्थस्य उभयोरपि आख्यातार्थाश्रयत्वे आधेयत्वेन अन्वयः । तथा च नीलवृत्तिघटवृत्तिसत्ताश्रयत्वमिति बोधः । पार्ष्टिकबोधे नीलाभिन्नो घटः इति भासते ।

 ISSN: 2320-740X

❖ **व्याकरणमते शाब्दबोधप्रकारः**

'चैत्रः ग्रामं गच्छति' इत्यत्र गम् धातोः संयोगानुकूलव्यापारः अर्थः । कर्त्राख्यातस्य (ति) कर्ता, सङ्ख्या, कालश्च अर्थः । आख्यातार्थकर्तुः धात्वर्थव्यापारे अन्वयः । आख्यातार्थकर्तृप्रकारकबोधं प्रति धात्वर्थव्यापारोपस्थितिः विशेष्यतया हेतुः । आख्यातार्थसङ्ख्यायाः कर्तृप्रत्ययसमभिव्याहारे आख्यातार्थकर्तरि अन्वयः । आख्यातार्थसङ्ख्याप्रकारकबोधं प्रति कर्तृप्रत्ययसमभिव्याहारे आख्यातार्थकर्त्रुपस्थितिः विशेष्यतया हेतुः । आख्यातार्थकालस्य धात्वर्थव्यापारे अन्वयः । तथा च कार्यकारणभावः आख्यातार्थकालप्रकारक -शाब्दबुद्धित्वावच्छिन्नं प्रति धात्वर्थव्यापारोपस्थितिः विशेष्यतया हेतुः । धात्वर्थफलप्रकारकबोधं प्रति धात्वर्थव्यापारोपस्थितिः विशेष्यतया हेतुः । आख्यातार्थकर्तरि चैत्रादिप्रथमान्तार्थवाच्यस्य अभेदेन अन्वयः । एवञ्च ग्रामवृत्तिसंयोगानुकूलः चैत्राभिन्नैककर्तृकः वर्तमानकालावच्छिन्नव्यापारः । 'तण्डुलं पचती'त्यत्र तण्डुलवृत्तिविक्लृत्यनुकूलः चैत्राभिन्नैककर्तृकः वर्तमानकालावच्छिन्नव्यापारः ।

एकाश्रयिका या विक्लित्तिः तदनुकूलः यः चैत्राभिन्नैककर्तृकः वर्तमानकालावच्छिन्नः व्यापारः इति दीक्षितमतानुसारेण । अत्र प्रयोगे नागेशमतेऽपि एवमेव । नागेशादिमते चैत्रभिन्नैककर्तृकवर्तमानकालिकव्यापार-जन्यविक्लित्तिः इति फलविशेष्यक बोधः ।

"तण्डुलः पच्यते" इति कर्मणि प्रयोगेऽपि सैव बोधः दीक्षितमते । नागेशमते कर्मणिप्रयोगे चैत्राभिन्नैककर्तृकवर्तमानकालिकव्यापारजन्यविक्लित्तिः इति फलविशेष्यकबोध एव न तु व्यापारविशेष्यकबोधः ।

'चैत्रः काष्ठेन पचती'त्यत्र चैत्राभिन्नैककर्तृकः काष्ठकरणकः वर्तमानकालिकः विक्लित्त्यनुकूलव्यापारः ।

'ब्राह्मणाय गां ददाति राजा' इत्यत्र ब्राह्मणसम्प्रदानकं गोकर्मकं दानम् । दानं नाम स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनम् । एवञ्च ब्राह्मणसम्प्रदानकः गोकर्मकः स्वस्वत्वनिवृत्तिपूर्वक परस्वत्वापादनदानानुकूलवर्तमानकालिकः व्यापारः ।

'वृक्षात् पर्णं भूमौ पतती'त्यत्र वृक्षः अपादानकः पर्णकर्तृकः पतनानुकूलव्यापारः इति बोधः ।

'चैत्रः कटे आस्ते' इत्यत्र कटाधिकरणकचैत्रकर्तृकसत्ता ।

'राज्ञः पुरुषः' इत्यत्र षष्ठी सम्बन्धार्थिका । अस्य अभेदेन पुरुषे अन्वयः । अतः राजसम्बन्ध्यभिन्नः पुरुषः इति बोधः भवति ।

**********

# गीतायां प्रतिपादितः कर्मसन्यासः

डा. गणेश ईश्वर भट्टः
**सहायकाचार्यः, वेदान्तविभागः**

समस्तवेदार्थसारसङ्ग्रहभूता भगवद्गीता वेदानां तात्पर्यविषयं सारल्येन बोधयति । किन्तु गीतायाः विभिन्नेषु अध्यायेषु विभिन्नानां विषयाणां वर्णनात् गीता तात्पर्येण किं बोधयति इत्यवगमनं न सुलभम् । श्रीशङ्करभगवत्पादाः सूक्ष्मेक्षिकया गीतायाः पौर्वापर्यं विमृश्य, तत्त्वज्ञानमेव समूलस्य शोकमोहजातस्य निवर्तकम् इति योऽर्थः उपनिषत्सु सिद्धान्तितः, तत्रैव गीतायाः तात्पर्यम् इति स्फुटं प्रत्यपीपदन् । तत्साधनतया कर्मसन्यासम् अपि गीता बोधयति इत्यपि तैः संसाधितम् । इमं विषयं सम्प्रति अवलोकयामः ।

एवमत्र शङ्का स्यात् – युद्धे स्वजनानां विनाशभिया यदा अर्जुनः न योत्स्ये इति तूष्णीं बभूव, तदा तस्य खलु बोधनाय भगवान् प्रववृते । युद्धम् अवश्यं कर्तव्यम् इति द्वितीयात् अध्यायात् आरभ्य बहुषु अध्यायेषु अर्जुनं भगवान् युद्धे प्रैरयत् । न केवलं युद्धम्, अपि तु अन्यदपि कर्म यत् तत्तज्जनस्य स्वधर्मतया प्राप्तम्, तत् सर्वैरपि अवश्यं करणीयम्, एषैव प्राचीना परम्परा इति भगवान् तत्र तत्र उपादिशत् । यथा **"कर्मणैव हि संसिद्धिमास्थिता जनकादयः" "कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम्" "न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः" "शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः"** इत्येवम् । कर्मत्यागं निषिद्ध्य भगवता कर्मत्यागे दोषोऽप्यभिहितः **"ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि" "सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्" "यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्"** इति । कर्मत्यागस्य श्रेयोहेतुत्वे, युद्धकर्म त्यजन्तम् अर्जुनं भगवान् अभिनन्दनपुरस्सरं प्रशंसाम् अकरिष्यत् । किन्तु सः पौनःपुन्येन अर्जुनं युद्धे नियोजयति । अर्जुनोऽपि तस्य वचनं तथैव अङ्गयकार्षीत् **करिष्ये वचनं तव** इति । कर्माणि विदधानः कर्मसन्यासस्य अकिञ्चित्करत्वम् अप्याह भगवान्-

**न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।**
**न च सन्यसनादेव सिद्धिं समधिगच्छति ॥** इति ।

तस्मात् कर्मैव गीतायाः प्रतिपाद्यः विषयः, न तु कर्मसन्यासः इति ।

अत्रोच्यते- न हि वयं कर्मणः दोषवत्त्वं अनुपादेयत्वं वा भगवदभिप्रेतमिति ब्रूमः । किं तर्हि? कर्मणि प्रयोजनमपश्यतः विवेकिनः कर्मसन्यास एवाधिकारः इति भगवदाशयं विशदीकुर्मः ।

तथा हि स्वस्वसंस्कारानुसारेण प्रवर्तमानाः मनुष्याः सर्वे न समानाः । असमानानाम् अधिकारिणां साधनान्यपि असमानान्येव भवन्ति । इममर्थं विशदीकर्तुं गीताशास्त्रमेव अनुसृत्य मनुष्याणां पञ्चधा विभागं कुर्मः। यथा-


ISSN: 2320-740X

१- नास्ति देहाद्यतिरिक्तः आत्मा इति मन्यमानाः पारलौकिकफलं तत्साधनं कर्म च परित्यज्य स्वेच्छया प्रवर्तमानाः, यान् भगवान् आसुरस्वभावाः इति निनिन्द-

**असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।**
**अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ॥** इति ।

२- अपरे अस्ति देहाद्यतिरिक्तः आत्मा कर्मफलसम्बन्धी इति ज्ञात्वा पारलौकिकफलं कर्म कुर्वाणाः, य एते आत्मा कर्तृत्वादिधर्मविशिष्टः संसारी एवेति मन्यन्ते, ये च भगवता

**यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।**
**वेदवादरता नित्यं नान्यदस्तीति वादिनः ॥**

इत्यादिभिः श्लोकैः दूषिताः । एते **धूमो रात्रिः...** इत्यादिना उक्तं धूममार्गेण स्वर्गलोकं गत्वा क्षीणे पुण्ये पुनः मर्त्यलोकं विशन्ति ।

३- अन्ये तु, कर्मणा सह तत्तद्देवतोपासनम् अपि अनुष्ठाय ब्रह्मलोकादिप्राप्तिरूपं फलं लभन्ते, ये भगवता

**अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।**
**तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥**

इति गमनसाध्यम् अनावृत्तिनियमरहितं फलं प्राप्नुवन्तीति सङ्कीर्तिताः ।

४- अपरे इहामुत्रार्थफलभोगे विरक्ताः स्वात्मभूतब्रह्मानुभवेन नित्यतृप्ताः विदितवेदितव्यतया कृतकृत्याः । एते पुनर्द्विविधाः विद्वांसः विविदिषवश्चेति । तत्र ४-(अ)- **''न जायते न म्रियते...'' ''अनादिमत्परं ब्रह्म...''** इत्यादिभिः श्लोकैः निरूपितः, क्षेत्रशब्दितशरीरादिसङ्घाते क्षेत्रज्ञरूपेण विद्यमानः, सर्वभूतानां हृद्देशे तिष्ठन् परमेश्वरः एव प्रत्यक्स्वरूपमिति अपरोक्षतया बुद्ध्वा बुद्धिमन्तः कृतकृत्याश्च अभूवन् । भगवान् इमां हि ब्राह्मीं स्थितिं तात्पर्येण प्रतिपिपादयिषति । अत एव सः अस्य ब्रह्मभावस्य साधनभूतम् आत्मज्ञानं निरुपममिति स्तौति **''न हि ज्ञानेन सदृशम्''** इति । अनेन ज्ञानेनैव कृतकृत्यताऽवाप्तिमप्याह **''एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत''** इति । तस्यापि ज्ञानिनः प्राप्तव्यः कोऽपि अर्थः स्यादिति शङ्कामपि सः अपाकरोत्-

**नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।**
**न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥** इति ।

एवमपि लोकसङ्ग्रहार्थं कर्म विदुषा कर्तव्यमिति शङ्का स्यात् । तत्रोच्यते- लोकसङ्ग्रहः तेन अवश्यं कर्तव्यः इति नास्ति नियमः । यदि सः इच्छति करोति । तथा कृतमपि कर्म तस्य विदुषः सन्यासिनः फलं न जनयति । यदाह भगवान्-

**अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।**

**भवत्यत्यागिनां प्रेत्य न तु सन्यासिनः क्वचित्** ॥ इति ।

अपि च **क्षेत्रज्ञं चापि मां विद्धि** इति वाक्यानुसारम्, जीवो ब्रह्मैव नापरः । ब्रह्मणः कर्तृत्वादिसर्वसंसारधर्मवर्जितत्वात् तदभिन्नस्य जीवस्यापि तदेव वास्तवं रूपम् । इदं तत्त्वं करतलगतबिल्वफलम् इव येषां निपुणमतीनाम् अपरोक्षतया भासते, ते साङ्ख्याः । गीतायां नैकत्र इदं निर्विशेषम् आत्मतत्त्वं भगवता उपदिष्टम् । यः आत्मानं कर्तारं भोक्तारं च मन्यते, सः कर्मफलप्रेप्सया कर्मणि प्रवर्तते । विद्वान् आत्मानम् अकर्तृब्रह्मात्मना पश्यन् कथं कर्ता स्यात् । अत एव युद्ध्यस्व इति वदन्नपि भगवान् आत्मनः हननक्रियायां कर्तृत्वं प्रयोजककर्तृत्वं च निषेधति-

**वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।**

**कथं स पुरुषः पार्थ कं घातयति हन्ति कम्** ॥ इति ।

अत्र हन्तृत्वनिषेधः सर्वक्रियाकर्तृत्वनिषेधस्य उपलक्षणम् । आत्मज्ञानिनः आत्मभूतस्य न किञ्चित् कर्म सम्भवति इति भगवदाशयः । निरूपितं चैतत् भाष्ये विस्तरेण । सोऽयं शास्त्रेषु विद्वत्सन्यासनाम्ना प्रसिद्धः ।

४-(आ)- अन्ये तु स्वर्गाद्यनित्यं कर्मफलम् अकामयमानाः परं वैराग्यमाप्ताः । एतैः अपरोक्षतया ब्रह्म यद्यपि न साक्षात्कृतम् । तथापि कर्मयोगाद्युपायैः सत्त्वशुद्धिम् आस्थिताः प्रदीप्तशिराः जलराशिमिव मोक्षसाधनभूतं तत्त्वज्ञानमेकमेव सिषाधयिषन्ति । अयं विविदिषासन्यासः । अयं च भगवता **योगारूढस्य तस्यैव शमः कारणमुच्यते** इत्यभिहितः । पूर्वम् **आरुरुक्षोः मुनेर्योगं कर्म कारणमुच्यते** इत्यभिहितत्वात् अत्र शमो नाम कर्मसन्यासः । अनेन, योग्यस्य अधिकारिणः विविदिषायां सत्यां सन्यास एवाधिकारः इति ज्ञायते । स्फुटीकृतं चैतद्भाष्यकारैः गीताभाष्येऽपि **"अविक्रियात्मदर्शिनः विदुषः मुमुक्षोश्च सर्वकर्मसन्यास एवाधिकारः"** इति वदद्भिः ।

५- अपरे पुनः बन्धनिवृत्तिं कामयमाना अपि सत्त्वशुद्धेरभावात् ज्ञानोत्पत्तियोग्यताम् अनाप्ताः कर्मसन्यासे नाधिक्रियन्ते । तेषां कर्मयोग एव ज्ञानोत्पत्तौ उपायः । फलेच्छां कर्तृत्वाभिमानं च हित्वा ईश्वरार्पणबुद्ध्या क्रियमाणं कर्म कर्मयोग इत्युच्यते । अयं गीतायां बाहुल्येन उपदिष्टः । एवंविधाः खलु जनाः प्रागुक्तानाम् अपेक्षया अधिकाः । कर्मण्येव अधिकृताः एते नैव कर्मसन्यासम् अर्हन्ति । अर्जुनोऽपि एतादृशः । एतेषां कर्मसन्यासः भगवता निषिद्धः । एतेषां कर्मत्यागं निवारयितुं भगवान् सन्यासापेक्षया इमं कर्मयोगमेव प्रशशंस । अस्मिन्नर्थे कर्मसन्यासात् कर्मयोगो विशिष्यते न त्याज्यं कार्यमेव तत् इत्यादीनि वचनानि प्रवृत्तानि । न हि विहितं धर्मम् अननुष्ठाय कश्चित् श्रेयः प्राप्स्यति इति । जनैः कर्म तु करणीयमेव । क्रियमाणं कर्म कर्मयोगात्मना यदि क्रियते, तदा तत्कर्म बन्धजनकत्वरूपं स्वस्वभावं हित्वा बन्धनिवृत्तिहेतुतां भजते । अत एव युद्ध्यस्व इति भगवद्वचनं तु न विधिः किन्तु अनुवादः । युद्धाख्यं कर्म अर्जुनस्य स्वधर्मतया प्राप्तमेव । स्वधर्मानुष्ठानं जानन्नपि अर्जुनः मोहवशात् स्वधर्मं जिहासति इति भगवान् तस्य मोहमात्रम् अपनयति । तत्र अर्जुनमेव भगवान्


ISSN: 2320-740X

नोपदिशति, किन्तु अर्जुनं निमित्तीकृत्य शोकमोहाभिभूतं सर्वलोकम् अनुगृह्णाति । कर्मिणः अपि अन्ते सत्त्वशुद्धिमास्थाय सर्वधर्मान् परित्यज्य ज्ञानं लब्ध्वा परां शान्तिम् अचिरेण अधिगच्छन्ति ।

शास्त्रीयेण वर्त्मना वर्तमानाः इमे चत्वारः सङ्क्षेपतः द्वैविद्ध्येन भगवता विभक्ताः -

**लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ।**
**ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥** इति ।

एवं सर्वलोकानुजिघृक्षुः भगवान् अधिकारिभेदेन बहून् उपायान् उपादिशत् । लोके कर्मिणां बाहुल्यात् अर्जुनस्य च कर्मसन्यासे अनधिकारात् गीतायां कर्मप्रतिपादकानि वाक्यानि आधिक्येन दृश्यन्ते । कर्मसन्यासः गीताशास्त्रस्य नैव अनभिप्रेतः । प्रत्युत, सः अन्यैरुपायैः साध्यः, आत्मनः स्वस्वरूपे अवस्थानस्य उपकारकः मुमुक्षुभिः समादरणीयः इति भगवान् औपनिषदमेवार्थं स्फुटीचाकर ।

**********

## शास्त्रकोषः

**-: वाग्वर्धिनीपरिषद् :-**

**योगस्तपो दमो दानं सत्यं शौचं दया श्रुतम् । विद्या विज्ञानमास्तिक्यम् एतद् ब्राह्मणलक्षणम् ॥**

ಯೋಗ, ತಪಸ್ಸು, ಇಂದ್ರಿಯನಿಗ್ರಹ, ದಾನ, ಸತ್ಯಪರತೆ, ಶುದ್ಧತೆ, ದಯೆ, ವೇದಾಧ್ಯಯನ, ಶಾಸ್ತ್ರವಿದ್ಯೆ, ಅತೀಂದ್ರಿಯ ಅನುಭವ, ಪರಮಾರ್ಥದಲ್ಲಿ ದೃಢನಿಷ್ಠೆ – ಇವಿಷ್ಟು ಬ್ರಾಹ್ಮಣನ ಲಕ್ಷಣಗಳು.

योग, तप, इन्द्रियनिग्रह, दान, सत्यपरता, शुद्धता, दया, वेदाध्ययन, शास्त्रविद्या, इन्द्रियों से पर अनुभव, परमार्थ में दृढ निष्ठा, यह सारे ब्राह्मण के लक्षण है।

The characteristics of a Brahmin are – Performing Yoga, penance, having control over the sense organs, truthfulness, purity, mercy, studying of Vedas, huge knowledge of Shastras, experience of the world beyond the sense organs, and trust over Paramartha.

**दीर्घवैरमसूया च असत्यं ब्रह्मदूषणम् । पैशुन्यं निर्दयत्वञ्च जानीयात् शूद्रलक्षणम् ॥**

ದೀರ್ಘದ್ವೇಷ, ಅಸೂಯೆ, ಸುಳ್ಳುನುಡಿಯುವ ಸ್ವಭಾವ, ಸಾಧುಗಳನ್ನು ನಿಂದಿಸುವುದು, ಚಾಡಿಹೇಳುವುದು, ದುಷ್ಟತನ, ನಿಷ್ಕಾರುಣ್ಯ – ಇವಿಷ್ಟು ಶೂದ್ರನ ಲಕ್ಷಣಗಳು.

बहुत काल तक का द्वेष, असूया, असत्य कहने का स्वभाव, साधुजनों की निंदा करना, पिशुनता, करुणा का अभाव यह शूद्रके लक्षण है।

The characteristics of a Shudra are – prolonged hatred, envy, untruthful nature, blaming the good people, gossiping, and lack of empathy.

(वसिष्ठस्मृतिः 6.20, 6.23)

# ब्रह्मविद्यावाप्तये गुरोरावश्यकता

डा. हरिप्रसादः के.
**सहायकाचार्यः, शिक्षाविभागः**

ब्रह्मविद्या गुरुमुखादेव अध्येतव्या । कस्यामपि उत्तीर्णता साधनीया चेत् एतावता एव तदुत्तीर्णवतां मार्गदर्शानम् अवश्यं भवेदेव इति विदितमेव । वैद्यो वा न्यायवादी वा वर्णिक् वा सर्वेऽपि एतं क्रमम् अनुवर्तन्त एव । एवं स्थिते मोक्षशास्त्रे किम् अन्यत् वक्तव्यम् ? तथा विचार्यते चेत् सुकरतया अध्येयां लौकिकविद्यामेकां बालाः क्लेशकरीं वदन्ति चेत् तान् ज्येष्ठाः "सा किं ब्रह्मविद्या ?" इति तर्जयन्ति । अन्येभ्यः सर्वेभ्यः ब्रह्मविद्या क्लिष्टा इति अनया रीत्या सर्वविदितम् ।

**मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।**
**यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥** (गीता ७.३)

सहस्रेषु मनुष्येषु कश्चिद् सिद्धये यतते । एवं यतमानेषु कश्चित् मां तत्त्वतः वेत्ति इति भगवद्वाणी । स्वयम् आत्मनः ज्ञानम् एव ब्रह्मविद्या । अत एव एषा एतावती क्लिष्टा । अज्ञानेन स्वयम् आत्मानं येन स्वरूपेण जानाति तस्य, वास्तविकात्मस्वरूपस्य च मध्ये अनूह्यं वैलक्षण्यम् अस्ति । स्वस्वरूपज्ञानं लौकिकप्रमाणैः न प्राप्यते । एतादृश्याः ब्रह्मविद्यायाः गुरुः, तस्य कृपाशीर्वादौ च अवश्यं भवेयुः एव इत्यत्र किमाश्चर्यम् अस्ति ? किन्तु केचन आधुनिकविद्वन्मूर्खाः एतत् अपलपन्ति । एतेषां वचनम् अबद्धम्/अयुक्तम् । कश्चन कियानपि बुद्धिमान् भवतु, स्वतन्त्रतया वेदान्तग्रन्थान् अधीत्य तत्त्वम् अनुभवे अधिगन्तुं तु न शक्नोति । अतः शास्त्रज्ञः अपि स्वतन्त्रतया ब्रह्मज्ञानं न अन्विष्येत् । आचार्यसन्निधिमेव गच्छेत् । **शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यात्** (मु. १.२.१२) **"आचार्याद्ध्यैव विद्या विदिता साधिष्ठं प्रापत्"** आचार्यात् एव अधीता विद्या साफल्यं भजते । (छा. ४.१.३) **"आचार्यवान् पुरुषो वेद"** आचार्ययुक्तः पुरुषः एतत् जानाति (छा. ६.१४.२) । अयमेव आचार्यः गुरुः । गु = अज्ञानरूपं तमः, रुः = निवारयति ।

### ३.२ गुरुलक्षणम्

गुरोः किं लक्षणम् अनुलक्ष्य मोक्षविद्याम् अध्येतुं तन्निकटे शिष्यः गच्छेत् ? एतस्य उत्तरं श्रुतिरेव ददाति । **"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्"** तत् विज्ञातुं सः समित्पाणिः सन् श्रोत्रियं ब्रह्मनिष्ठं गुरुमेव अभिगच्छेत् । (मुं १.२.१२) । साम्प्रदायिकतया श्रुत्यध्ययनं विधाय तस्याः तात्पर्यम् आचरणे समन्वयेन सम्पादितवानेव श्रोत्रियः इत्युच्यते । ब्रह्मणि एव सदा मनः लगयति स एव ब्रह्मनिष्ठः । एषः श्रुत्यर्थं साम्प्रदायिकतया जानाति इति हेतोः श्रुत्यर्थं स्वेच्छानुसारं न व्याख्याति । श्रुत्यर्थः एकरूप एव इति कारणात् एतादृशस्य व्याख्याने विरोधाभासो वा निष्ठुरता वा न भवति । शिष्येण स्वयं पृष्टाः, प्रष्टुमपि अविज्ञाय मनसि एव अवशिष्टाश्च सन्देहाः एतस्य व्याख्यानेन परिह्रियन्ते। श्रोत्रियश्चेदपि ब्रह्मनिष्ठत्वाभावे शुकपाठवद् भवति । विविधानां संस्काराणाम् अवलम्बनेन पृष्टानां शिष्यस्य विविधसन्देहानां


ISSN: 2320-740X

समाधानम् अनुभवमूलात् आगच्छेत्, न तु पुस्तकात् । अत एव **"उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः"** (गीता ४.३४) तत्त्वदर्शिनः ज्ञानिनः ते उपदेक्ष्यन्ति इति भगवान् गीतायां वदति । अत्र ज्ञानिनः नाम शास्त्राध्ययने कृतेऽपि स्वसंस्कारानुगुण्येन पक्षपातदृष्ट्या एवात्र शास्त्रार्थविज्ञातारः । तत्त्वदर्शिनः नाम तत्त्वस्य यथास्थिततया गृहीतारः । एतादृशानां तत्त्वदर्शिनाम् उपदेशः कार्यकारी भवति न तु इतरः । एतादृशः कृतार्थः अस्ति इति कारणात् प्रसन्नेन्द्रियः, हसन्मुखः, निश्चिन्तश्चापि तिष्ठति । कृतार्थम् एतादृशस्य सत्यकामस्य दर्शनमात्रेणैव तस्य गुरुः हारिद्रुमतः **"ब्रह्मविदिव वै सोम्य भसि सोम्य ब्रह्मज्ञानी इव भासि इति वदति"** (छा. ४.१२)। सोम्यः इत्युक्ते सोमः (चन्द्रः) इव शान्तः । एतादृशः समदर्शनः । अहङ्कारममकाररहितः, शीतोष्णसुखदुःखलाभनष्टमानापमानादिद्वन्द्वेभ्यः अतीतः, न किञ्चिदपेक्षी, न कस्यापि स्वीकर्ता, शुचिः, कार्यदक्षः, करुणामृतसागरः, डम्भाडम्बररहितः, अगूढरूपेण विद्यायाः उपदेशकश्च । एतादृशेन परिहर्तुम् अशक्याः आध्यात्मसन्देहा एव न विद्यन्ते । अत एव सर्वज्ञकविः एतादृशम् अभिलक्ष्य, **"ಸುರತರುವು ಮರವಲ್ಲ, ಸುರಭಿಪೊಂದಾವಲ್ಲ, ಪರುಷಪಾಷಾಣದೊಳಗಲ್ಲ, ಗುರುರಾಯ ನರರೊಳಗಲ್ಲ ಸರ್ವಜ್ಞ"** इत्युक्ते सुरतरुः न विटपी । सुरभिर्न गोषु । स्पर्शमणिर्न पाषाणेषु । गुरुराजो न नरेषु सर्वज्ञ इत्यवदत् सर्वज्ञकविः । विष्णुस्वरूपज्ञः अयं गुरुः, विष्णुस्वरूप एव । एतस्य वाक्ये श्रद्धानिधानम् एतेनैव कारणेन । एवमेव साधनसम्पत्तियुतस्य सम्प्रदायानुगुणं प्राप्तस्य शिष्यस्य संसारसमुद्रतारणम् एतादृशस्य आचार्यस्य नियमः (मु. १.२१३) । न्यायतः उपगताय योग्याय शिष्याय ज्ञानिना विद्या उपदेष्टव्या । **"न्यायत उपसन्नाय योग्याय जानता विद्या वक्तव्यैव"** । (प्र. ६.१) । किन्तु यथा स्वर्णकारेण तापच्छेदनिघर्षणैः सुवर्णं शुद्धं विधीयते तथा शिष्याः शीलगुणादिभिः परीक्षिता उपदिश्यन्ते आचार्येण । **"यथा हि कनकं शुद्धं नापच्छेदनिघर्षणैः परीक्षेत तथा शिष्यान् ईक्षेत् शीलगुणादिभिः"** (शान्तिपर्व ३२१)

### ३.३ सद्गुरोः प्राप्तिः कथम् ?

एवंविधस्य गुरोः अप्राप्तौ सामान्यतया अज्ञानद्वयं कारणम् - मोक्षप्राप्त्यै शास्त्रीयमार्गात् सुकरो वा भिन्नो वा अन्यः मार्ग एव नास्तीति अनवगमनम् एकम् । **"नान्यः पन्था विद्यतेऽयनाय"** (श्वे. ३.८); एतस्य लक्ष्यस्य प्राप्त्यै अन्यः मार्ग एव नास्ति । मोक्षप्राप्त्यै साधनसम्पत्तियुक्त्या स्वयमेव यतेत इत्यनवगमनम् अन्यत् । **"उद्धरेदात्मनात्मानम्"** (गीता. ६.५) । स्वयमेव स्वस्य उद्धारं साधयेत् । एतदतिरिच्य एतदज्ञानरहितस्य अधिकारिणः सद्गुरुप्राप्तिः ईश्वरकृपया एव भवति । अतः पूर्वोक्तम् अज्ञानद्वयं निवार्य ईश्वरकृपासम्पादनेन केवलं सद्गुरुः प्राप्येत ।

### ३.४ गुरुसेवा

सद्गुरुप्राप्तौ कथं तत्सन्निधिं शिष्यः गच्छेत् इति श्रुतिरेव प्रतिपादयति । समिधः समर्प्य नमेत् । समित् = कर्मोपकारकद्रव्यम् । कर्मबन्धनात् मुक्तः भवितुं प्रवृत्तः मोक्षार्थी एतानि किमर्थं नयतीत्युक्ते कर्म कृत्वा किमपि प्राप्तव्यं नास्तीति । समिधा सङ्केतितं सर्वमपि स्वकर्म गुरुभिः प्रदत्तज्ञानाग्निना दग्धं भवेत् इति निवेद्य शरणागतिरेव । अत एव –

**यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन ।**
**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥** गीता (४.३७)

सुष्ठु दीप्ताग्निः यथा इन्धनानि भस्मसात्करोति तथा ज्ञानाग्निः कर्माणि भस्मसात्करोति इति भगवता उच्यते । अन्यच्च गुरौ विधेयतया कथं भयभक्तिभ्यां व्यवहर्तव्यम् इति वेदपुराणेतिहासेषु शतशः दृष्टान्ता निगादिताः । एवं च **"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया"** (गीता ४.३४) । तत् साष्टाङ्गप्रणामेन शङ्कापरिहाराय एव नम्रतया प्रश्नेन, सेवया च जानीहि इति स्मृतिः । प्रणिपातः (प्रणामः) सम्पूर्णशरणागतिं, परिप्रश्नश्च नम्रतां द्योतयति । किन्तु एतावता नालम् । गुरुणा उपदिष्टविद्यां स्वात्मगतां कर्तुं गुरुशुश्रूषा अत्यावश्यकी । असन्यासी शिष्यः यथाशक्ति दक्षिणाम् अर्पयेत् (तै. १.११) ।

### ३.५ किञ्चित् प्रबोधनम्

अन्यच्चेदं ज्ञेयम् । केनचित् मुग्धेन मुमुक्षुना प्रमादवशात् अयोग्यः कश्चन गुरुः स्वीकृतः । स तु शास्त्रविदपि साधनसम्पत्तिरहितः शास्त्रार्थव्याख्याने, आचारे च अननुष्ठितसम्प्रदायः इति कालक्रमेण ज्ञातश्चेत् तत्क्षणमेव निर्भीकतया सः परित्याज्यः । अन्यथा कालक्रमेण महाविपत्तेः आस्पदं स्यात् । असम्प्रदायवित् सर्वशास्त्रविदपि मूर्खवदेव उपेक्षणीयः (गीता, १३.२) । एतदेव भगवता व्यासेन दुरहङ्कारी कार्याकार्यविवेकरहिततया कार्यप्रवृत्तः दुर्मार्गी च गुरुश्चेदपि तस्य परित्यागः सुविहितः इति सुस्पष्टम् एवं प्रतिपादितम् -

**गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उतथप्रतिपन्नस्य परित्यागो विधीयते ॥** ( शान्तिपर्व ५७७ ) इति ।

**********

## शास्त्रकोषः

**-ः वाग्वर्धिनीपरिषद् ः-**

**त्रयो रोगाः इति निजागन्तुमानसाः । तत्र निजः शारीरदोषसमुत्थः , आगन्तुर्भूतविषवाय्वग्निसम्प्रहारादिसमुत्थः, मानसः पुनरिष्टस्य लाभात् लाभाच्चानिष्टस्योपजायते ।**

ಮಾನವರಿಗೆ ಉಂಟಾಗುವ ರೋಗಗಳು ೩ ವಿಧವಾಗಿವೆ, ನಿಜ – ಆಗಂತು ಹಾಗೂ ಮಾನಸ. ಶರೀರದಲ್ಲಿ ವಾತಪಿತ್ತಕಫಗಳ ವೈಷಮ್ಯದಿಂದುಂಟಾಗುವ ರೋಗಗಳು ನಿಜರೋಗಗಳು. ಪಿಶಾಚ, ವಿಷ, ವಾಯು, ಅಗ್ನಿ ಮೊದಲಾದ ಕಾರಣದಿಂದುಂಟಾಗುವ ರೋಗ ಆಗಂತು. ಅಭೀಷ್ಟವಸ್ತು/ವ್ಯಕ್ತಿಯ ಪ್ರಾಪ್ತಿಯಿಂದ, ಅನಿಷ್ಟವಸ್ತುವಿನ/ವ್ಯಕ್ತಿಯ ಪ್ರಾಪ್ತಿ/ಸಂಸರ್ಗದಿಂದ ಉಂಟಾಗುವುದು ಮಾನಸರೋಗ.

मानव को तीन प्रकार के रोग संभव होते हैं – निज, आगन्तुक और मानसिक । शरीर में वात पित्त और कफ यह तीन गुण विषम होनेपर निजरोग उत्पन्न होते हैं । पिशाच, वायु, अग्नि, विष इत्यादि कारणों से आगन्तुक रोग होते हैं । इच्छित वस्तु/व्यक्ति की प्राप्ति से और अनिष्टवस्तु/व्यक्ति के प्राप्ति से मानसिकरोग होते हैं ।

The illness which may happen to man has 3 types called Nija, Agantu and Manasik. Illness which is created by the variations of Vata, Pitta, Kapha in the human body is called as Nija. Illness which is created by demons, poison, air, fire is called as Agantu. And the illness caused by connection with dear ones/things and nasty people/things is called as Manasik.

(चरकसंहिता सूत्रस्थानं 11.45)


ISSN: 2320-740X

# वासनावासितं जगत्

डा.नवीनहोळ्ळः

**सहायकाचार्यः, न्यायविभागः**

मानवानां तदितरप्राणिनाञ्च चेष्टाः शारीरवाचिकमानसभेदेन त्रिविधाः प्रारब्धायत्ताः इत्युत्सर्गः । क्वचित्तु पौरुषप्रयत्नेन ईश्वरानुग्रहेण च प्रारब्धं न्यक्कृत्य प्रवर्तन्ते ।

प्रारब्धं तावत् विद्याकर्मपूर्ववासनाभेदेन क्वचित् त्रेधा विभज्यते[1] । तत्र विद्या आत्मज्ञानातिरिक्तं ज्ञानम् , कर्म शरीरवाङ्मनोभिः क्रियमाणम्, पूर्वप्रज्ञा कर्मणः निरुक्तज्ञानाच्च उत्पद्यमानः संस्कारः । पूर्वप्रज्ञैव वासनापदेनाभिधीयते । तदुक्तम् -

**इतो जिगमिषुं विद्याकर्मणी ये पुरार्जिते ।**
**तं समन्वारभेते ते या चाभूत् पूर्ववासना ॥**
**विज्ञानं संशयज्ञानं मिथ्याज्ञानमथापि वा ।**
**प्रमाणतोऽप्रमाणाद्वा सर्वं विद्येति भण्यते ॥**
**संसारकारणध्वंसि यत्तु ज्ञानं परात्मगम् ।**
**तदत्र न परिग्राह्यं सर्वापत्कारणापनुत् ॥**
**वाङ्मनःकायसाध्यं यच्छास्त्रतो यदि वान्यतः ।**
**दृष्टादृष्टार्थरूपं यत्तच्च कर्मेति गृह्यते ॥**
**कर्मणः क्रियमाणस्य संस्कारो यो हृदि श्रितः ।**
**तत्फलस्य प्रभुक्तस्य पूर्वप्रज्ञेति सोच्यते ॥**

मृतस्य हि विद्याकर्मणी न स्वरूपेण स्थातुमर्हतः अपि तु वासनात्मनैव । किञ्च विद्याकर्मभ्याम् उत्पद्यमाना वासना विद्याकर्मणी जनयति । अतो विद्याकर्मभ्यां वासनायाः प्राधान्यम् । तदुक्तम् -

**षण्मासशेषप्रोद्भूता वासना यास्य देहिनः ।**
**मरिष्यतोऽन्यदेहार्थं पूर्वप्रज्ञेति तां विदुः ॥**
**समर्था सैव ते यस्माद् उद्बोद्धुं ज्ञानकर्मणी ।**
**नरस्यातः प्रधानत्वात् पृथक् तस्मात् ग्रहः कृतः ॥**

[1] “तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च” (बृहदारण्यकोपनिषत् षष्ठाध्यायः)

ISSN: 2320-740X

**पूर्वप्रज्ञात उद्भूतिर्विद्यायाः कर्मणो यतः ।**
**ताभ्याञ्च भावनोद्भूतिर्निर्दिशोऽतो यथोदितः ॥**

वासना द्विविधा शुद्धा मलिना चेति । तत्र शुद्धा वासना न संसारमापादयति, प्रत्युत जन्मविनाशिन्येव देहार्थमेव ध्रियते ।

**वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा ।**
**मलिना जन्महेतुः स्यात् शुद्धा जन्मविनाशिनी ॥**
**पुनर्जन्माङ्कुरं त्यक्त्वा स्थिता संभृष्टबीजवत् ।**
**देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते ॥**

शुद्धवासना ज्ञेयविषयिणी । ज्ञेयस्वरूपं च उक्तं –

**ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।**
**अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥** इत्यादिना ।

यद्यपि निरुक्तज्ञेयस्य ज्ञानं विचाराधीनमतः ज्ञेयविषयिणी शुद्धवासनापि विचाराधीनेति त्यक्तपूर्वापरविचारत्वरूपं वासनासामान्यलक्षणं[1] तत्र अव्याप्तं तथापि यथा बहुषु जन्मसु दृढम् अभ्यस्तत्वेन अस्मिन् जन्मनि परोपदेशं विनैव अहङ्कारममकारकामक्रोधादिमलिनवासना उत्पद्यते तथा अतीते जन्मान्तरे प्राथमिकतया ज्ञेयविषयकस्य बोधस्य वासनायाश्च विचाराधीनत्वेऽपि पश्चाद् दीर्घकालनैरन्तर्यसत्कारैः दृढम् अभ्यस्ते ज्ञेयतत्त्वे वाक्ययुक्तिपरामर्शानन्तरेणैव पुरोवर्तिघटादिवत् ज्ञेयविषयकः बोधः उदयते, शुद्धवासना प्रवर्तते ।

इत्थञ्च दृढभावनापूर्वकत्यक्तपूर्वापरविचारत्वरूपं लक्षणं तत्र समन्वेति । यथा भृष्टानि व्रीह्यादिबीजानि कुसूलपूरणमात्रोपयुक्तानि न तु रुचिरान्नाय , नापि सस्यनिष्पत्तये तथा शुद्धवासना देहयात्रामात्रायोपयुज्यते, न तु दम्भदर्पाद्यासुरसम्पदुत्पादनाय, नापि जन्मान्तरहेतुभूतधर्माधर्मोत्पादनाय ।

मलिना वासना तावत् जन्ममृत्युकरी आसुरीसम्पत्तिमत्सु भवति ।

**अज्ञानसुघनाकारा घनाहङ्कारशालिनी ।**
**जन्ममृत्युकरी प्रोक्ता मलिना वासना बुधैः ॥**

यथा क्षीरं तक्रमेलनेन घनीभूतं भवति, यथा वा विलीनं घृतं शीतलप्रदेशे चिरमवस्थापितं सुघनीभवति तथा देहादीनां चिदात्मनश्च भेदावरकेन अज्ञानेन मलिनवासना भ्रान्तिपरम्परारूपं घनीभावमवाप्नोति ।

[1] दृढभावनया त्यक्तपूर्वापरविचारणम् ।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता ॥


ISSN: 2320-740X

सेयं मलिना वासना त्रिधा – लोकवासना, शास्त्रवासना, देहवासना चेति । सर्वे जनाः यथा मां न निन्दन्ति, यथा वा स्तुवन्ति , तथैव सर्वदा आचरिष्यामि इत्यभिनिवेशो लोकवासना । सर्वजनपरितोषस्य सम्पादयितुम् अशक्यत्वात् अस्याः लोकवासनायाः मलिनत्वम् । एतदेवाभिप्रेत्योक्तम् –

**शुचिः पिशाचो विचलो विचक्षणः**
**क्षमोऽप्यशक्तो बलवांश्च दुष्टः ।**
**निश्चितचोरः सुभगोऽपि कामी ।**
**को लोकमाराधयितुं समर्थः ॥ इति ।**
**विद्यते न खलु कश्चिदुपायः सर्वलोकपरितोषकरो यः ।**
**सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्पः ॥ इति च ।**

लोकवासनायाः मलिनत्वमभिप्रेत्यैव योगिनां तुल्यनिन्दास्तुतित्वं मोक्षशास्त्रेषु वर्णितम् । शास्त्रवासना त्रिविधा – पाठव्यसनं बहुशास्त्रव्यसनं अनुष्ठानव्यसनञ्च । तत्र पाठव्यसनं यथा – भारद्वाजः पुरुषायुषत्रयेण बहून्वेदानधीत्य इन्द्रेण चतुर्थायुषि प्रलोभितः तत्रापि परिशिष्टवेदाध्ययनाय उद्यमं चकार । ततश्च सकलवेदाध्ययनाशक्तिं प्रतिबोध्य इन्द्रः तं पाठान्निवर्त्य ततोऽत्यधिकपुरुषार्थाय सगुणब्रह्मविद्यामुपदिदेश[1] । एवं दुर्वासाः मुनिः बहुविधशास्त्रपुस्तकभारैः सह महादेवं नमस्कर्तुमागतः तत्सभायां मुनिना नारदेन भारवाहिगर्दभसाम्यम् आपादितः कोपात् पुस्तकानि लवणार्णवे परित्यज्य महादेवेन आत्मविद्यायां प्रवर्तितः इति । आत्मविद्या च न वेदशास्त्राध्ययनमात्रेणोत्पद्यते । तदुक्तम् –

**नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।**
**बहुशास्त्रकथाकन्थारोमन्थेन वृथैव किम् ।**
**अन्वेष्टव्यं प्रयत्नेन तत्त्वज्ञैर्ज्योतिरान्तरम् ॥**
**अधीत्य चतुरो वेदान् धर्मशास्त्राण्यनेकशः ।**
**ब्रह्मतत्त्वं न जानाति दर्वी पाकरसं यथा ॥**

नारदः चतुषष्टिकलाविद्याकुशलोऽपि अनात्मवित्त्वेन अनुतप्तः सनत्कुमारम् उपससाद इति च श्रूयते[2] । अनुष्ठानव्यसनं निदाघस्य दाशूरस्य च श्रूयते[3] । निदाघो हि ऋभुणा पुनः पुनः प्रबोध्यमानोऽपि कर्मश्रद्धाजाड्यं चिरं न जहौ । दाशूरश्च अत्यन्तश्रद्धाजाड्येन अनुष्ठानाय शुद्धप्रदेशं भूमौ न क्वाप्युपलेभे ।

अस्याः वासनायाः पुनर्जन्महेतुत्वेन मलिनत्वम् ।

---

[1] तैत्तिरीयब्राह्मणम्

[2] छान्दोग्ये

[3] विष्णुपुराणे

**इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्तेऽप्रमूढाः ।**
**नाकस्य पृष्ठे ते सुकृतेऽनुभूत्येमं लोकं हीनतरं वा विशन्ति ॥**

दर्पहेतुत्वाच्च शास्त्रवासनायाः मलिनत्वम् । श्रूयते च, श्वेतकेतुः अल्पेनैव कालेन बहून् वेदानधीत्य दर्पेण पितुरपि पुरतो विनयं न चकारेति[1] । एवं बालाकिः कानिचिद् उपासनानि अवगत्य दृप्तः उशीनरादिषु बहुषु देशेषु दिग्विजयेन बहून् विप्रान् अवज्ञाय काश्याम् अज्ञातशत्रुं ब्रह्मविच्छिरोमणिम् अनुशासितुं धाष्ट्र्यं चकारेति[2] ।

देहवासना च आत्मत्वगुणाधानदोषापनयनभेदात् द्विधा । तत्र आत्मत्वगुणाधानं पुनर्द्विविधं लौकिकं शास्त्रीयमिति । आद्यं समीचीनशब्दादिसम्पादनम् । लोकाः कोमलध्वनिना गातुमध्येतुञ्च तैलपानमरीचभक्षणादिना प्रयतन्ते । मृदुस्पर्शाय पुष्टिकरौ औषधाहारौ उपयुञ्जते । लावण्याय अभ्यङ्गोद्वर्तनदुकूलालङ्कारान् उपसेवन्ते । सौगन्ध्याय स्रगालेपने धारयन्ति । द्वितीयं शास्त्रीयं गुणाधानं यथा – लोकाः गङ्गास्नानशालग्रामतीर्थादिसम्पादनेन शास्त्रीयं गुणमादधते । दोषापनयनमपि लौकिकशास्त्रीयभेदेन द्वेधा । तत्राद्यं मुखादिप्रक्षालनेन चिकित्सकोक्तैः औषधैश्च । द्वितीयं शौचाचमनादिना । देहवासनायाः अस्याः भ्रान्तिमूलकत्वात् अशेषदुःखहेतुत्वाच्च मलिनत्वम् । कृतेऽपि प्रयत्ने बहुभिः ध्वनिसौष्ठवस्य अलाभात् । एवं मृदुस्पर्शस्य अङ्गपुष्टेश्च । लावण्यं सौगन्ध्यं च दुकूलस्रगादिनिष्ठं, न तु देहनिष्ठम् । प्रसिद्धमेवैतत् । तदुक्तं यथा –

**त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसङ्कुलम् ।**
**पूर्णं मूत्रपुरीषाभ्यां स्थूलं निन्द्यमिदं वपुः ॥** इति ॥
**स्वदेहाशुचिगन्धेन न विरज्येत यः पुमान् ।**
**वैराग्यकारणं तस्य किमन्यदुपदिश्यते ॥**
**नवच्छिद्रयुताद्देहात् स्रवन्ति घटिका इव ।**
**बाह्यशौचैर्न शुद्ध्यन्ति चान्तः शौचं न विद्यते ॥**

देहवासनायाः बन्धहेतुत्वञ्च उक्तं योगवासष्ठे -

**आपादमस्तकमहं मातापितृविनिर्मितः ।**
**इत्येको निश्चयो राम बन्धायासद्विलोकनात् ॥**
**सा कालसूत्रपदवी सा महावीचिवागुरा ।**
**साऽसिपत्रवनश्रेणी या देहोऽहमिति स्थितिः ॥**
**सा त्याज्या सर्वयत्नेन सर्वनाशेऽप्युपस्थिते ।**

---

1 छान्दोग्ये

2 कौषीतक्यां त्वाजसनेय्यां च


ISSN: 2320-740X

**स्प्रष्टव्या सा न भव्येन स श्वमांसेव पुल्कसी ॥**

तदेतत् लोकशास्त्रदेहवासनात्रयम् उपादेयत्वेन लोके प्रतिभासते अविवेकिनाम् । विवेकिनां तु ज्ञानोत्पत्तिविरोधित्वात् ज्ञानप्रतिष्ठाविरोधित्वाच्च वासनात्रयमपि हेयमेव । स्मर्यते च –

**लोकवासनया जन्तोः शास्त्रवासनयापि च**

**देहवासनया ज्ञानं यथावन्नैव जायते ॥** इति ॥

चतुर्थीवासना या दम्भदर्पाद्यासुरसम्पद्रूपा तस्याः नरकहेतुत्वात् मालिन्यमतिप्रसिद्धम् अतः सा नात्र परिगणिता । तस्मात् केनाप्युपायेन अशुभवासनाचतुष्टयस्य क्षयः सम्पादनीयः ।

**शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासनासरित् ।**

**पौरुषेण प्रयत्नेन योजनीया शुभे पथि ॥**

यद्यपि मूर्तिशून्यानां वासनानां संमार्जनीसमूहितधूलितृणवद् हस्तेन उद्धृत्य बहिस्त्यागः न घटते तथापि उपवासजागरणवत् वासनापरित्यागः उपपद्यते । यथा स्वाभावाप्तयोः भुजिक्रियानिद्रयोः अमूर्तत्वेऽपि तत्परित्यागरूपे उपवासजागरणे सर्वैः अनुष्ठीयेते तथा अत्रापि सम्भवति । शाकसूपौदनादिसंनिधित्यागरूपः उपवासश्चेत्, अत्र स्रक्चन्दनादिपरित्यागरूपः वासनात्यागः । तत्र यथा बुभुक्षानिद्रालस्यनिवर्तकैः पुराणश्रवणदेवपूजानृत्यगीतवादित्रादिभिः चित्तमुपलाल्यते, तथा अत्रापि मैत्र्यादिभिः तदुपलालनीयम् । तदुक्तम्- "मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् (पातञ्जलयोगसूत्रम्) इति । मैत्रीप्रभृतिचतुष्टयमिव **'अभयं सत्त्वसंशुद्धिः'** इत्यादिना भगवदुक्ता दैवीसम्पत् 'अमानित्वम् अदम्भित्वम्' इत्यादिना दर्शितं ज्ञानसाधनमपि शुभवासनारूपत्वेन मलिनवासनां निवर्तयति । यद्यपि सन्त्यनेकाः शुभवासनाः । न च ताः सर्वाः एकेन अभ्यसितुं शक्यन्ते । न ह्यायुर्वेदोक्तानि सर्वाण्यौषधानि एकेन सेवितुं शक्यन्ते तथापि स्वचित्तं प्रथमतः परीक्ष्य तत्र यदा यावत्यो मलिनवासनाः तदा तावतीः शुभवासनाः विरोधिनीः अभ्यसेत् । यथा पुत्रमित्रकलत्रादिभिः पीड्यमानः ततो विरक्तः तन्निवर्तकं पारिव्रज्यं गृह्णाति, तथा विद्यामद-धनमद-कुलाचारमदादिमलिनवासनाभिः पीड्यमानः तद्विरोधिनं विवेकमभ्यसेत् । दर्शितश्चायं विवेकः-

**अद्य ये महतां मूर्ध्नि ते दिनैर्निपतन्त्यधः ।**

**हन्त चित्त महत्तायां क्वैषा विश्वस्तता तव ॥**

**क्व धनानि महीपानां ब्रह्मणः क्व जगन्ति वा ।**

**प्राक्तनानि प्रयातानि क्वेयं विश्वस्तता तव ॥**

**कोटयो ब्रह्मणां याता गताः स्वर्गपरम्पराः ।**

**प्रयाताः प्रांसुवद्भूयाः का धृतिर्मम जीविते । इति ॥**

**********

# एषैषा वाचोयुक्तिः

डा. चन्द्रशेखरभट्टः

**सहायकाचार्यः, व्याकरणविभागः**

प्रथन्ते लोके भाषाः परस्सहस्राः । प्रथन्तेतमां च तत्तद्भाषाणां प्रयोक्तारः पारेपरार्धम् । महच्चित्रमेतद्यदमूषु भाषासु लोकसिद्धासु सर्वास्वप्यविद्यमानं किमपि लोकोत्तरं तेजः प्रतितिष्ठति भरतवर्षस्य सर्वस्वभूतायां संस्कृतायां वाचि । जायन्ते, वर्धन्ते, अपक्षीयन्ते, लुप्यन्ते, म्रियन्ते च संस्कृतेतरभाषाः । सकृज्जातेयं संस्कृता तु वाङ्नापक्षीयते, न विकुरुते, न लुप्यते, न म्रियते, स्थास्यति च शाश्वतीः समा अमरा लोके । अत एवेयं मुकुटमणीयते विश्वभाषाणाम् ।

यथैवेयं तथैवेदं व्याकरणमपि मुकुटायते विश्वभाषाव्याकरणानाम् । नास्त्येतादृग्व्याकरणम् येन बद्धा तिष्ठति कापि भाषा सहस्रधिकानि वर्षाणि मन्त्रस्तम्भितेव । तदिदं सङ्कल्पबलं भगवतः पाणिनेः, तपोबलं भगवतः पतञ्जलेश्च ।

भावाभिव्यक्तये शब्दप्रयोग इति सत्यम्, तथापि केषाञ्चिद्भावानां साक्षात् प्रकाशने विशिष्टः परिणामो न स्यात् अथवा व्यतिरिक्त एव परिणामो जायेत । यथा - आम्रान् पृष्टः कोविदारानाचष्टे इति । केनचित् कञ्चित् पृष्टः कश्चित् विषयान्तरं यदि ब्रवीति तदैषः प्रयोगः । अस्य स्थाने अन्यत्पृष्टोऽन्यद्वदति इति कथ्यमाने सरसता न भवति। पृष्टास्तु आम्राः, कथितास्तु कोविदाराः (कुद्दालाः) इत्यर्थः । एवं त्वं मूर्ख इति साक्षात् कथनमरुन्तुदं भवति । स एवार्थः देवानाम्प्रिय इति शब्देन यद्युच्यते तर्हि न तावद्विरुद्धं परिणामं जनयति यावन्मूर्खशब्दप्रयोगे, परम् अर्थस्तु स एवेति विशेषः । एतदभिलक्ष्यैव प्राचीनानां प्रयोगेषु शक्ति-लक्षणा-व्यञ्जनाख्या वृत्तयो दृश्यन्ते । कुशलाः प्रयोक्तारः ईदृशीमेव भाषामाश्रयन्ते उद्दिष्टार्थं बोधयितुम् । इमान्येव आङ्ग्लभाषायाम् Idioms इत्युच्यन्ते । संस्कृतभाषायाम् वाचोयुक्तिः, वचोविच्छित्तिः इत्यादिनाम्ना व्यवह्रियन्ते । विलक्षणार्थप्रतिपादकः, चमत्कारजनकः शब्दविशेषः इति तल्लक्षणं वक्तुं शक्यम्।अर्थगतं वैशिष्ट्यं, शब्दगतञ्च वैशिष्ट्यं सहृदयहृदयसंवेद्यमित्यत्र न कोऽपि संशयलेशः । कानिचनोदाहरणान्यत्र प्रस्तूयन्ते ।

**'शय्योत्थायं धावति'** । शय्याया उत्थाय धावति । प्रभाते शय्याया उत्थाय दन्तधावनादिस्वशरीरकर्माण्यादौ कुर्वीत । यस्तु तदकुर्वन्नेव कार्यान्तरे प्रवर्तते तस्मिन्नेवं प्रयुज्यत इति आपाततःप्रतीयते । परम् इत्थं नाम त्वरते अवश्यकर्तव्यमप्यनपेक्ष्य कार्यान्तरे अभिनिविशते इति विवक्षितोऽर्थः । असमीक्ष्यकारी, पौर्वापर्यविवेचनं विना सहसा(त्वरया)प्रवर्तते, अतिशयितं त्वरते इति यावत् । अपादाने परीप्सायाम् इति णमुल्प्रत्ययोऽत्र विधीयते । परीप्सा नाम त्वरा।अपादाने उपपदे धातोः णमुल् स्यात् परीप्सायां गम्यमानायामिति तदर्थः । अस्मिन्नेव तात्पर्ये रमणीयाविमावपि प्रयोगौ-रन्ध्रापकर्षं पयः पिबति, भ्राष्ट्रापकर्षमपूपान् भक्षयति इति । एवं नाम त्वरते यत् पात्रमपि नापेक्षते, स्तनरन्ध्रादेवापकृष्य मुखेन पयः पिबतीत्यर्थः । एवं नाम त्वरते यत पात्रमपि दीयमानं नापेक्षते भ्राष्ट्रादाकृष्य हस्तेन खादतीत्यर्थः।

**सतृणमत्ति** – इह तृणेन सह भुङ्क्ते इति नार्थः, किन्तु तृणमपि अविहाय भुङ्क्ते इत्यर्थः । अपरिवर्जनेऽर्थेऽत्र सहशब्दः न तु

 ISSN: 2320-740X

तृणसहभावेऽपि । अयञ्च वाच्योऽर्थः । विवक्षितस्त्वर्थः साकल्येन भुङ्क्ते इति । तृणभक्षणे तु तात्पर्यं नास्ति तस्य अप्रसक्तत्वात् । पात्रे परिविष्टं सर्वमपि भक्षयतीति तात्पर्यम् । साकल्ये अव्ययीभावसमासोऽयम् । सहेत्यव्ययस्य तृणशब्देन समासे सहस्य सभावः।

**खट्वारूढः** – खट्वामारूढ इति वाच्यार्थः । अधीत्य स्नात्वा गुरुणा अभ्यनुज्ञातेन खट्वाऽरोढव्या । यस्त्वेवमकृत्वा खट्वामारोहति स एवमुच्यते । विवक्षितार्थस्तु जाल्म इति । विरुद्धमार्गं प्रस्थितः इत्यर्थः खट्वामारूढ इत्यर्थे तु तात्पर्यं नास्ति । सर्व एवाविनीतः असमीक्ष्यकारी वा खट्वारूढ इत्युच्यते । निन्दायां गम्यमानायां खट्वा क्षेपे इति सूत्रेण तत्पुरुषसमासः । खट्वामारूढ इति तु उक्तार्थे न प्रयुज्यते, वाक्येन संज्ञाया अनवगमात्।एवं खट्वाप्लुत इति शब्देऽपि ज्ञेयम् ।

**देवानाम्प्रियः** – शब्दश्रवणमात्रेण ज्ञायमानोऽर्थः वाच्यो न विवक्षितः । मूर्ख इत्यर्थे शब्दोऽयं प्रयुक्तः शिष्टैः । मूर्खोऽज्ञः । नन्वस्माच्छब्दात्कथमयमर्थो गम्यते? उच्यते, अत्र देवा इत्युक्ते न देवताः किन्तु क्रीडासक्ताः, दिवु क्रीडायामिति स्मरणात् । तेषां प्रियोऽपि मूर्ख एव इति केचित् । अन्ये तु ब्रह्मज्ञानरहितत्वात् संसारिणो मूर्खाः, ते तु यागादिकर्माण्यनुतिष्ठन्तः पुरोडाशादिप्रदानद्वारा देवानामत्यन्तं प्रीतिं जनयन्ति । ब्रह्मज्ञानिनस्तु न तथा, तेषां तु यागाद्यनुष्ठानाभावात्। अतो गवादिस्थानापन्नत्वात् ते मूर्खाः, देवपशवः।देवानाम्प्रिय इति समासे षष्ठ्या अलुक् । मूर्खे एवेदम् । अन्यत्र तु लुकि सति देवप्रिय इतीष्यते ।

**एकापूपीं करोति** - किमिदमेकापूपीति ? न तावदेकापूपवानिति । एकस्यापूपस्य समाहार इत्यर्थः । ननु च समाहारो हि समूहः । न ह्येकस्य समूहः सम्भवति । सत्यम्, यत्तद्दानं सम्भ्रमो वा । कश्चित् अपूपदानं कुर्वन् दाने श्रद्धातिशयेन बहुष्विव एकस्मिन्नपूपे श्रद्दधाति । अथवा कश्चित् कृपणः अपूपं दातुमिच्छन् एकमेवापूपं बहु मन्यते । प्रतिग्रहं कुर्वाणो वा बहुषु अपूपेष्विव एकस्मिन् सम्भ्रमं प्राप्नोति।तदायं प्रयोगः । एवं च एकस्मिन्नेव आरोपितबहुत्वमादाय समाहारो भाष्ये दर्शितः । दातुः प्रतिग्रहीतुर्वा कार्पण्यप्रतिपादनेच्छायां शब्दोऽयं प्रयुज्यते ।

**सर्पिषोऽपि स्यात्** – अत्र सर्पिष इत्यवयवषष्ठ्या बिन्दुरित्यध्याह्रियते । सर्पिषो बिन्दुरपि स्यात् इति आपाततः प्रतीयमानोऽर्थः । वस्तुतो यत्र सर्पिषो बिन्दुरपि नास्ति तत्रायं प्रयोगः । श्रूयते च भोजनप्रकरणे किञ्चिद्विनोदवचनम् ‘क्वचिद्धारा क्वचिद्बिन्दुः क्वचित्कटकटध्वनिः’ इति । अस् धातोः सम्भावनायां लिङत्र । धातोश्च भवनमर्थः । कर्ता च प्रत्ययार्थः । स च प्रकरणात्, औचित्यात्, सर्पिष इत्यवयवषष्ठीबलाच्च बिन्दुरिति गम्यते।स च बिन्दुः सम्भावनाविषयभूते भवने स्वदौर्लभ्यं पुरस्कृत्य अन्वेति । सम्भावनाविषयत्वबोधे दौर्लभ्यस्यापि सम्भावनाविषयत्वमनुभवसिद्धम् । उक्तप्रयोगे कर्तृविशेषं बिन्दुं तद्दौर्लभ्यं च अपिशब्दो द्योतयति । तस्य च कर्मप्रवचनीयसंज्ञा अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु इति सूत्रेन विधीयते ।

एतादृशानि बहूनि उदाहरणानि व्याकरणसूत्रेभ्यः प्राप्तुं शक्यन्ते । एतत्तुल्याश्च असङ्ख्याः प्रयोगाः काव्येषु, रूपकादिषु च उपलभ्यन्ते। इदमनेन प्रतीयते यत् संस्कृतभाषा नूनं व्यवहारभाषाऽसीदिति । अस्मदीयेष्वपि व्यवहारेषु एता वाचोयुक्तयः उपयुज्यन्ते तर्हि अत्यर्थं सुन्दरमस्मद्भाषितं भवति ।

# संस्कृतरूपकेषु आस्वादोपयोगितया वाचिकाभिनयस्य निर्वाहः

डा. राघवेन्द्रभट्टः
**साहित्यविभागाध्यक्षः**

**काव्येषु नाटकं रम्यमि**ति काव्यतत्त्ववेत्तृभिराघुष्यते। तस्य नाटकस्य रम्यता कविनिर्माणसापेक्षा सामाजिकस्य आस्वाद्यत्वे निदानं भवति । तत्र दृश्यत्वं प्रधानं तत्त्वं भवति। श्रव्यकाव्यस्य श्रव्यत्वमपि सचेतसामन्तरङ्गे दृश्यत्वेन पर्यवस्यतीति सदभिप्रायो वर्तते। तद् दृश्यत्वं काव्यस्य वैशिष्ट्यापादकं भवति। दृश्यत्वं दृश्यधर्मः । दृश्यम् अभिनेयम् । अभिनेतुं योग्यमित्यर्थः । 'दृश्यं तत्राभिनेयम्' इति तल्लक्षणात् । अभिनेतव्ये अपेक्ष्यते अर्थविशेषः । स च रामसीतादुष्यन्तादिः यश्च अनुकार्य इत्युच्यते । तर्हि रामः अभिनेयः इत्यर्थ आयाति । रामस्याभिनेयत्वं तदवस्थायाः अभिनेयत्वार्थकम् । एवञ्च रामस्य अवस्थाया अभिनयः इति सिद्ध्यति । सावस्था केनाभिनेया? नटेन अतः स अभिनेता इत्युच्यते । अभिनेत्रा रामावस्था वास्तविकतया रामगता अभिनीयते । अभिनीयमाना सा न वास्तविकी । अतः अवस्थानुकारः अभिनयः इत्युक्तम् । प्रापणार्थकणीञ् धातुना निष्पन्नस्य अभिनयस्य विशिष्टोऽर्थः वर्तते । रामस्य अवस्थायाः सर्वात्मना अनुकरणद्वारा सामाजिकपर्यन्तप्रापणम् अभिनयो भवति । एवञ्च रामावस्था "अभिनयः" सामाजिकः त्रिकोणात्मिकायामस्यां प्रक्रियायाम् अभिनयः रामावस्थासामाजिकास्वादयोः सेतुर्भवति । सामाजिकस्य आस्वादोपयोगित्वे एव अभिनयः अभिनयो भवति । अभि इत्युपसर्गस्य अवस्थायाः सर्वात्मना प्रकटनमभिप्रेतम् । तस्मात् आङ्गिकवाचिकाहार्यसात्त्विकाभिधानेन चतुर्धा भिन्नः सः चातुर्विध्येन तेन पूर्णो भवति ।

**तत्र वाचिकाभिनयः**

वाचिकाभिनयः अभिनयस्य प्रथमो विधिः, यस्य निर्वाहेण विना इतरः अभिनयः रामाद्यवस्थायाः सामाजिकपर्यन्तनयने विकलो भवति । ततः आङ्गिकः । तद्द्वारीकृत्य वाचिकस्य दृश्यत्वं सम्पाद्यते अभिनेत्रा । तृतीयः आहार्याभिनयः प्रदर्शननियतापादकः बाह्य इत्युच्यते । गुणापादकः सूक्ष्मो मुख्यः सात्त्विकाभिनयश्चतुर्थः । अस्य बीजं वाचिकम् । एवं चतुर्विधस्य अभिनयस्य अर्थपरिशीलनेन वाचिकस्य वैशिष्ट्यमवगम्यते ।
नाट्याचार्यः ब्रवीति –

**वाचि यत्नस्तु कर्तव्यो नाट्यस्येयं तनुः स्मृता ।**
**अङ्गनेपथ्यसत्त्वानि वाक्यार्थं व्यञ्जयन्ति हि ॥** इति ॥ (ना. शा. १४.२)

नाट्यस्य शरीरं भवति वाक् । अतः वाचि यत्नः कर्तव्यः । अत्र वाक् एव अभिनयः वाचिकाभिनयः इति कर्मधारयाश्रयेण अर्थगाम्भीर्यं स्फुटतयावगम्यते । अभिनयरूपा वाग् इति तदर्थः सिद्ध्यति । वाचः अभिनयः इति तत्पुरुषाश्रयेण तु न तथा। अभिनवभारत्यत्यामाचार्यः अभिनवगुप्त आह – वागेवाभिनयः वाचिकाभिनयः इति । तस्मिन् वागभिनये प्रयत्नो विधेयः ।


ISSN: 2320-740X

केन? इति चेत् रूपककर्त्रा कविना तद्रचनावसरे, अभिनेत्रा अभिनयावसरे च । 'वाचि यत्नस्तु कर्तव्य इति कविना निर्माणकाले नटेन प्रयोगकाले' इति स आह । इयं वाग् नाट्यस्य सकलप्रयोगभित्तिभूतत्वेन आतोद्यगीताभिनयानुग्राहकत्वात् स्वयमभिनीयरूपत्वाच्च इति वदता तेन अभिनवगुप्तपादेन अभिनयस्यास्य वैशिष्ट्यं निरूपितम् ।

सर्वोऽपि लोकव्यवहारः वाङ्मूलकतयैव प्रवर्तते । यथा-

**वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ।**
**इदमन्धतमः कृत्स्नं जायते भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं दीप्यते ॥**

इति आचार्यस्य दण्डिनो वचनं लोकव्यवहारस्य प्रवृत्त्युपस्कारकतया वाचां महत्त्वं ख्यापयति। शब्दाभावे भुवनं कृत्स्नमन्धतमसाविष्टं स्यादिति । वाग् ज्योतीरूपा अर्थं दर्शयति। तस्मादभिनयप्रपञ्चेऽपि रामाद्यवस्थां प्रकटयन्तीयं सामाजिकेषु रसं दर्शयति ।

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥**
**सा सर्वविद्या शिल्पानां कलानां चोपबन्धिनी।**
**तद्वशादभिनिष्पन्नं सर्वं वस्तु विभज्यते ॥**

इति भगवान् भर्तृहरिराह। लोकसीमातिक्रान्तदर्शिनः कवयो वीरचरितानि काव्यानि शब्दैरेव निबबन्धुः। रामाद्यवस्थायाः सहृदयान्तःप्रापणे शाब्दं साधनं स्वीचक्रुः। मुनिभिः शब्दद्वारैव प्रपञ्चितः शास्त्रप्रपञ्चः। स शब्दः स्खलद्गतिश्चेत् वक्त्रभिप्रेतार्थो नैव प्रकाशते श्रोता च शब्दस्यार्थमगृहीत्वा अनर्थं वा गृहीत्वा प्रवर्तते चेन्महाननर्थ एव स्यात् ।

नाट्याचार्यः मुनिः –

**वाङ्मयानीह शास्त्राणि वाङ्निष्ठानि तथैव च ।**
**तस्माद्वाचः परं नास्ति वाग् हि सर्वस्य कारणम् ॥** (ना शा. १४.३)

इत्याह । तत्र अभिनवभारतीकारः 'वागेवावभासिका' इत्यभिप्रैति। इत्थं सर्वविधो लोकः वाङ्मुखतया प्रवर्तते। एवं लोकवृत्तानुकीर्तने नाट्ये वाचोऽस्ति अभिनयकलासौन्दर्यवर्धनपरता। संस्कृतरूपकाणां सामाजिकेषु रसाभिव्यञ्जनस्य तात्पर्यात् विभावादीनां सुष्ठु अभिनयः कर्तव्यः । विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः खलु ।

**वाचिकाभिनये अवधेया विषयाः**

वाचिकाभिनयस्य ६३ लक्षणानि मुनिना भरतेन उक्तानि । तत्र

**आगमनामाख्यातनिपातोपसर्गसमासतद्धितैर्युक्तः ।**
**सन्धिवचनविभक्त्युपग्रहनियुक्तो वाचिकाभिनयः ॥** (ना. शा. १४.४)

अत्र मुनिना सूत्ररूपेण कृतं चिन्तनम् आचार्येणाभिनवगुप्तपादेन सुव्यक्तं कृतम्। तत्र नाम यथा 'मदनरिपुः' इति। इदं भगवतः पर्यायत्वेन तदीयशृङ्गारवर्णनप्रसङ्गे न प्रयोज्यम्। एवमाख्यातादिनिरूपणं वाचिकस्य दार्ढ्यसम्पादनाय प्रामुख्यमावहति। एनमंशमादाय **'सुप्तिङ्विभक्तिसम्बन्धैस्तथा कारकशक्तिभिः। कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्'॥** (ध्वन्या३.१६) इत्यानन्दवर्धनो ध्वन्यालोके व्यञ्जकमुखेन ध्वनिभेदनिरूपणावसरे ब्रवीति। अभिप्रेतस्य भावस्य सुप्रकाशने अस्त्येतेषां सुचिन्तनप्रयोगस्यावश्यकता। वर्णाः, स्थानप्रयत्नविचारा नाट्यशास्त्रे वाचिकाभिनयप्रस्तावे उक्ताः। यद्यपि काव्यकर्तुरेतेषां विषयाणां ज्ञानमपेक्ष्यते, अथापि प्रयोगतत्पराणां कुशीलवानामपि तद्भवति चेन्नाट्यप्रस्तुतौ उच्चारणे स्फुटतासम्पादनाय सारल्यं भवति। गानानुकूलतया स्वराघातानुकूलतया च छन्दसां ज्ञानं प्राप्नुयादभिनेता। तदत्र प्रसङ्गे मुनिवचनं यथा-

**व्यञ्जनानि स्वराश्चैव सन्धयोऽथ विभक्तयः ।**
**नामाख्यातोपसर्गाश्च निपातास्तद्धितास्तथा ॥**
**एतैरङ्गैः समासैश्च नाना धातुसमाश्रयम् ।**
**विज्ञेयं संस्कृतं पाठ्यं प्रयोगञ्च निबोधत ॥ (ना. शा. १४.६-७)**
**छन्दोहीनो न शब्दोऽस्ति न च्छन्दः शब्दवर्जितम् ।**
**तस्मात्तूभयसंयोगो नाट्यस्योद्योतकः स्मृतः ॥ (ना.शा.१४.४७)**

प्रयोगदृष्ट्या रसाभिव्यञ्जने नामाख्यातादीनां पृथक् व्यञ्जकत्वमस्ति । अतः तेषां परिज्ञानमुक्तम् । छन्दसां प्रयोगः, अलङ्कारयोजना, काकुस्वरविधिश्च वाचिकाभिनयस्य सौष्ठवसम्पादनाय अभिनेत्रा ज्ञातव्यः । किञ्च भारतीवृत्तिवाचिकाभिनययोः सम्बन्धः वर्तते । भारती, कैशिकी, सात्त्वती, आरभटी चेति चतस्रो नाट्यवृत्तयः । रसविशेषस्याभिव्यञ्जने एताः निर्देष्टव्याः । तत्र 'वृत्तिः सर्वत्र भारती' इति भारतीवृत्तिः सर्वरसाभिव्यञ्जने उपादीयते । भारतीवृत्तिर्हि 'भारतीसंस्कृतप्रायो वाग्व्यापारो नटाश्रयः' इति लक्षिता । नाट्ये अभिनेतृभिः परस्परं क्रियमाणः संस्कृतवाग्व्यवहारः सा। अतः वाचिकाभिनयः संस्कृतरूपकेषु रसाभिव्यञ्जनविषये भारतीवृत्त्या सम्बध्नाति ।

स्वराघातपुरस्सरं वाचः आरोहावरोहक्रमः वाचिके नैपुणीमाददाति । तेन नेपथ्यवचनम् आङ्गिकाद्यभिनयं विना श्रूयमाणं सहृदये भावमभिव्यञ्जयितुं क्षमं भवति । पात्रस्य (भूमिकायाः) मुखमुद्रा, भावः, आकाङ्क्षा च श्रूयमाणेनैव वाचिकेन ज्ञायते । यथा लङ्कामागते शत्रुसैन्ये रावणः नेपथ्ये

**धिग् धिङ्मानुषमार्गमार्गणगणान् धिग्वानरान् तान् गणान्**
**सेनां कः कुरुतेऽद्य विशिथिलां लङ्केश्वरे जीवति ।**
**रे रे तापस तिष्ठ बाणधनुषी मास्म ग्रहीर्मे पुरः**
**विंशत्या बलिभिर्भुजैस्तृणसमानुत्पाटयिष्याम्यहम् ॥**

अत्र रावणस्य भूमिकामभिनेतुः वचनमात्रं शृण्वन्तः सामाजिका आत्मनि सुव्यक्तोत्साहाः रसं स्वदन्ते।

 ISSN: 2320-740X

**प्रयोगविषये अन्यथाज्ञानम्**

संस्कृतरूपकाणां प्रयोगविषये साम्प्रतं काश्चन विप्रतिपत्तयः सन्ति । ताः इमाः। संस्कृतरूपकाणि प्रयोज्यमानान्यपि तद्दर्शनोन्मुखा जना न सन्ति । संस्कृतभाषया तानि प्रस्तूयमानानि तद्भाषानभिज्ञैर्नावगम्यन्ते। नाटकानि केवलं रसाभिव्यञ्जकतया मनोरञ्जकानि भवन्ति चेत् समाजे तेन प्रयोजनं न सिद्ध्यति । प्रायेण संस्कृतरूपकाणां लघुभागः कुत्रचिदेव शालासु पाठ्यक्रमे पठनार्थं वर्तते न तु प्रयोगार्थम्। कुत्रचित् प्रवर्तमानाः प्रयोगा अपि नाट्यशास्त्रीयनियमानुरोधेन न प्रवर्तन्ते इत्याद्याः।

एतासां विप्रतिपत्तीनां विषये समाधानमुच्यते । साम्प्रतं भारतस्य केरलकर्णाटकतमिलुनाडु-महाराष्ट्रमध्यप्रदेशोत्तरप्रदेशपश्चिमबङ्गालादिशु राज्येषु संस्कृतरूपकाणां प्रयोगपराणि नाट्यदलानि वर्तन्ते। तानि काले काले विशिष्टान् प्रयोगान् कुर्वन्ति। नानाराज्येषु संस्कृतरूपकाणां प्रयोगप्रतियोगिताः भवन्ति। विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च वार्षिकोत्सवादौ एतेषां प्रयोगाः भवन्ति। राष्ट्रियसंस्कृतसंस्थानद्वारा प्रतिवर्षं कौमुदीमहोत्सवः आयोज्यते यत्र विशिष्टाः प्रस्तुतयः मञ्चे प्रदर्श्यन्ते। सहृदयाः सभ्याः अमितसङ्ख्याकाः कुत्रचित् अल्पसङ्ख्याका अपि दृश्यन्ते। तत्र संस्कृतज्ञा इव संस्कृतानभिज्ञा अपि बहवः रूपकाणि पश्यन्ति। **'नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्'** इति कालिदासोक्तिरत्र स्मर्तव्या। संस्कृतरूपकाणि रसप्रधानतया रचितानि। लोकवृत्तानुकीर्तनानि तानि समाजमपि चित्रयन्ति। पुनः विद्यालयादिषु अध्ययनार्थं वर्तन्ते इति विचारः अस्ति। सत्यम्। किन्तु यत्र प्रयोगस्य अवसरो न्यूनः तत्र तेषां रूपकाणामध्ययनं वा भवति। आदौ पठित्वा ततः प्रयोगेऽपि कुशीलवाः प्रवर्तेरन्। साम्प्रतं नाट्यशास्त्रीयनियमानुरोधेन प्रयोगा न भवन्ति इत्यत्र नाट्यविद्भिः संस्कृतजीविभिश्चिन्तनीयम्। संस्कृतरूपकाणां प्रयोगपरम्परा ह्रासतां गता वर्तते। अतः नाट्यनियमानुशीलनपूर्वकं प्रयोगः पौनःपुन्येन भवेत्। क्रमशः एतत्परम्परावृद्धिः कर्तव्या स्यात्। एतावता पूर्वमुक्तानां विप्रतिपत्तीनां समाधानम् उक्तम् ।

**प्रयोगानुकूलो मार्गः**

- अभिनेता रूपकाणि दशकृत्वः पठेत्। स भूमिकायाः भावमवगच्छेत्। स्फुटभावाभिव्यक्त्यनुकूलम् आरोहावरोहक्रमपूर्वकं वाचिकस्याभिये यत्नवांश्च भवेत्।

- वाचिकाभिनये अभिनेतुः भाषा स्फुटा स्यात्। भाषासौष्ठवप्राप्तये अभिनेता उच्चारणनियमान् जानीयात् । मुखमुद्घाट्य मन्द्रमध्यमतारकस्तरे क्रमेण वाचिकाभ्यासं कुर्यात्। यथा श्रोता अभिनेतुर्वाचिकम् श्रुण्वन् रसास्वादं कर्तुं शक्नुयात् । यथा **रेडियो** नाटकानि वाचिकमात्राभिनेयानि भावाभिव्यञ्जनसमर्थकानि भवन्ति ।

- प्रादेशिकभाषाणां मातृभाषाणामभिनेयकलाः सूक्ष्मेक्षिकया अवलोकनीयाः । संस्कृतरूपकाणां प्रयोगार्थमपेक्षितवाचिकादिनैपुणी सम्पादनीया चेत् अन्यभाषासु प्रवर्त्यमानाः प्रयोगा देशीयकलाः (कूडियाट्टम्,यक्षगानम्, ओडिस्सी, कथक्, रामलीला,नौटङ्की,भाँड, स्वांग इत्याद्याः) समवलोकनीयाः।

- संस्कृतरूपकाणां संवीक्षणम् – भारते संस्कृतनाटकानि विरलतया अभिनीयन्ते । अथापि नाट्यदलानि वृत्तिपराणि दशाधिकानि सन्ति । तानि संस्कृतरूपकाणां मूलभाषायामेव साधुप्रयोगान् कुर्वन्ति । राष्ट्रियसंस्कृतसंस्थानद्वारा प्रतिवर्षं प्रचाल्यमाने नाट्योत्सवे छात्रकुशीलवैः प्रवृत्तितया दशाधिकप्रस्तुतयो विधीयन्ते । एतेषां साक्षात् सान्द्रमुद्रिकाद्वारा वा वीक्षणं विधेयम् ।

- आतोद्यादीनामुपकरणानां वाचिकस्यानुकूलतया योजनम् । वाद्यस्य गीतस्य वा ध्वनिः वाचिकाभिनयस्य अवरोधं न कुर्यात् ।

- रसानुकूलतया वाक् । मन्द्रमध्यमतारकादिस्वरनिर्वाहः अभिव्यञ्जनीयं रसं भावं वा मनसि निधाय अभिनेत्रा कर्तव्यः।

- मातृभाषायां प्रकृतपाठ्यांशस्यानुसन्धानम् ।

- विद्यालयेषु संस्कृतरूपकाणां पाठनावसरे अध्यापकः वाचिकाभिनयं कुर्यात् येन छात्रः रूपकेषु रुचिमान् भवेत् ।

एवञ्च संस्कृतरूपकाणां प्रयोगपरता मुख्या भवति । रसदृष्टिश्च प्रधाना भवति । कवेराशयः तदाश्रितभाषाद्वारा प्रकाशनीयः। अतः नाट्यप्रयोगे यत्नशीलैर्जनैः पूर्वोक्ता विचारा आकलनीयाः भवन्ति।

**सहायकग्रन्थाः**


१. रङ्गमञ्च का सौन्दर्यशास्त्र – देवेन्द्रराज अङ्कुर्

२. दूसरे नाट्यशास्त्र की खोज - देवेन्द्रराज अङ्कुर्

३. काव्यप्रकाश आफ् मम्मटाचार्य ज्योतिष्मती टीका – रामस्वामी

४. रङ्गप्रक्रिया के विविध आयाम – प्रेमसिंह / सुषमा आर्या

५. भारतीय एवं काव्यशास्त्र की रूपरेखा – रामचन्द्रतिवारी

६. नाट्यशास्त्रम्-भरतमुनिः

७. अभिनवदर्पणः – नन्दिकेश्वरः

८. भावप्रकाशः – शारदातनयः

९. ध्वन्यालोकः- आनन्दवर्धनः


**********

 ISSN: 2320-740X

# काव्येषु नाटकं रम्यम्

डा. चन्द्रकला आर्. कोण्डी
**सहायकाचार्या, साहित्यविभागः**

**काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।**
**तत्रापि च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ॥**

इत्ययं श्लोकः कस्य वा सहृदयस्यापरिचितः? यद्यपि श्लोकोऽयम् अभिज्ञानशाकुन्तलस्य औन्नत्यं प्रतिपादयितुकामेन केनचित् निबद्धः, तथापि अत्र न केवलं शाकुन्तलस्य, परन्तु समस्तस्य नाट्यजगतः महत्त्वमपि दिग्दर्शितमस्ति । शाकुन्तलस्य इयं प्रशस्तिः तस्य नाटकत्वाधीनेत्यत्र न काऽपि संशीतिः । यदीदं नाटकत्वं विहाय महाकाव्यत्वेन खण्डकाव्यत्वेन प्रकरणत्वेन भाणत्वेन वाऽरचयिष्यत् तर्हि तस्येतादृशी प्रशस्तिर्नालभिष्यत ।

काव्यं द्विविधं भवति - श्रव्यं दृश्यं चेति । श्रव्यकाव्येषु रघुवंश-कुमारसम्भव-कादम्बर्यादीनां पद्यगद्यनिबद्धानां काव्यानां परिगणनं भवति । दृश्यकाव्यं तावत् रूपकाणि उपरूपकाणि च । तत्रैतानि दशरूपकाणि इति परिगणितानि-

**नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।**
**व्यायोगसमवकारौ वीथ्यङ्केहामृगा दश ॥** [1]

उपरूपकाणि-

**नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।**
**प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥**
**संलापकं श्रीगदितं शिल्पकं च विलासिका ।**
**दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥** [2]

यद्यपि एतानि सर्वाण्यपि मनोहराण्येव तथापि एतेषु नाटकं विशिष्यते । अत एव सर्वाण्यपि रूपकाणि नाटकशब्देनैव व्यवह्रियमाणानि दृश्यन्ते लोके । 'काव्येषु नाटकं रम्यमि'त्यनेन यद्यपि श्रव्यकाव्यापेक्षया दृश्यकाव्यं रम्यमित्यर्थः लभ्यते, तथापि रूपकेष्वपि नाटकं रम्यमित्यर्थो नासाधु । यतः दृश्यकाव्येष्वपि नाटकस्य रमणीयता सर्वोपरि वरीवर्ति । तर्हि नाटकस्य किं वा वैशिष्ट्यं स्यात् इति जिज्ञासा सहजतयैव उदेति । महाकविना कालिदासेन नाट्यप्रधानतया

[1] साहित्यदर्पणम्-६ परिच्छेदः, श्लोकः-३

[2] साहित्यदर्पणम्-६ परिच्छेदः, श्लोकाः-४,५.

विरचिते मालविकाग्निमित्रनाटके नाट्यस्य वैशिष्ट्यमेवमभिहितम्-

**देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं**
**रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।**
**त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते**
**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ॥** [1] इति ।

नाटकस्य श्रव्यकाव्यापेक्षया श्रेष्ठत्वप्राप्तौ के अंशा हेतुभूता इति पश्यामस्तावत् ।

❖ **सर्वजनमनोरञ्जकम्**

नाट्यं नाम सार्ववर्णिकं क्रीडनकं यत् सर्वजनहिताय सर्वजनसुखाय च विरचितम् । यतो हि देवानां समाजहितचिन्तनेच्छां मनसि निधायैव ब्रह्मा नाट्यमेतत् सृष्टवान्-

**क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत् ।**
**तस्मात् सृजापरं वेदं पञ्चमं सार्ववर्णिकम् ॥**

चतुर्वेदैः वर्णत्रयाणामेव हितसाधनं भवति, परन्तु अनेन सार्ववर्णिकेन पञ्चमवेदेन नाट्येन सर्वेषां मनोरञ्जनं भवति । नाट्यस्य पञ्चमवेदत्वं राजशेखरेणापि समर्थितम् –

**'वेदोपवेदात्मा सार्ववर्णिकः पञ्चमो नाट्यवेदः इति द्रौहिणिः'** [2]

इति । यद्यपि नाट्यं दृश्यकाव्यमिति परिगणितं तथापि तत्र श्रव्यत्वमप्यस्तीत्येतत् नाटकस्य वैशिष्ट्यम् । दृश्यत्वात् हृद्यं, श्रव्यत्वाच्च व्युत्पत्तिप्रदम् । अभिनवगुप्तेन एवमुक्तम्-

**'दृश्यं हृद्यं व्युत्पत्तिप्रदमिति प्रीतिव्युत्पत्तिप्रदम्'**

इति । श्रव्यकाव्ये सहृदयेन स्वकल्पनया तत्सम्बन्धिनं समस्तं बिम्बं प्रकल्प्यं भवति । तत्र वर्णरूपाः शब्दा एव तन्मानसे सान्दर्भिकं चित्रमुपस्थापयन्ति । तेन काचिदनुभूतिर्जायते सहृदयस्य स्वान्ते । किन्तु साऽनुभूतिः तादृशीं तीव्रतां मनोहरतां च न प्राप्नोति यादृशीं सहृदयः वाञ्छति । परन्तु दृश्यकाव्येषु अभिनेतृभिः क्रियमाणैः चतुर्विधाभिनयैः वर्ण्यस्य साक्षात् बिम्बं सहृदयस्य मनसि तिष्ठति । अतः सहृदयेन वर्ण्यं बलात् कल्पनीयं न भवति । श्रव्यकाव्यमाध्यमेन केवलं सुशिक्षिताः सामाजिका एव रसानुभूतिं प्राप्तुं पारयन्ति, न तु सर्वे । किन्तु नाट्यद्वारा सर्वसाधारणानन्दानुभूतिः जायते । अत एव भरतेन नाट्यं सार्वजनिकमनोरञ्जनसाधनमिति कथितम् । कालिदासोऽपि मालविकाग्निमित्रनाटके नाट्यस्य सार्वजनीनत्वं प्रतिपादितवान्-**नाट्यं भिन्नरुचेर्जनस्य बहुधाऽप्येकं समाराधनम्** [3] इति ।

---

[1] मालविकाग्निमित्रम्-१/४

[2] काव्यमीमांसा-प्रथमाधिकरणे द्वितीयाध्याये (शास्त्रनिर्देशे) ।

[3] मालविकाग्निमित्रम्-प्रथमाङ्कः, चतुर्थश्लोकस्य अन्तिपपादः ।


ISSN: 2320-740X

### ❖ व्यापकता सर्वाङ्गीणता च

स्वविषयपरिधावेव नाट्यं समस्तस्यापि त्रैलोक्यस्य चराचरानपि विनिबध्नाति । समस्तत्रैलोक्यस्यापि भावानामनुकीर्तनमत्र दृश्यते । संसारे तादृशं ज्ञानं, शिल्पं, विद्या, कला, योगः कर्म च नास्ति यन्नाट्ये न विद्यते-

**त्रैलोक्यस्यापि धर्मस्य नाट्यं भावानुकीर्तनम् ।**
**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।**
**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते ॥**

नाट्यं तु प्राणिमात्रस्य भावानामवस्थानाञ्च चित्रणेन युक्तं भवति । लोकवृत्तस्यानुकरणेन संवलितः काव्यप्रकारोऽयं यः शोकार्तानां समेषामपि विश्रान्तिजनकः हितकारकः उपदेशप्रदश्च वर्तते ।

### ❖ सत्यम्-शिवम्-सुन्दरम्

'त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते' इत्युक्तदिशा कालिदासेन । लोकवृत्तमेव नानारसैः समन्वितं सत् काव्ये दृश्यते । यतः यत् सर्वथाऽसम्भवं तन्नाङ्गीकरोति सहृदयस्य स्वान्तम् । अतः कविः लोकवृत्तमेव उपमोत्प्रेक्षातिशयोक्तिभिः सुन्दरं कृत्वा उपस्थापयति । उत्तम-मध्यम-अधमानां सर्वेषामपि वर्णनमत्र भवति । अभिज्ञानशाकुन्तले मुनीनाम् अप्रतिमं सामर्थ्यं दुष्यन्तेन एवं वर्णितम्-

**शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः ।**
**स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजोभिभवाद्वमन्ति ॥** [1]

कामिनां मनःस्थितिः एवं वर्णिता तेन - **सर्वं तत्किल मत्परायणमहो कामी स्वतां पश्यति** इति । तथैव **'रम्याणि वीक्ष्य ----'** [2] इत्यादिपद्येषु वर्तमानं **'भावस्थिराणि जननान्तरसौहृदानि'** इत्यादिवाक्यानि लोकानुभवप्रमाणितानि । अतः सत्यभूतानीत्यत्र न कापि विमतिः । एवं सत्यं भवति नाटकम् । हितोपदेशद्वारा मङ्गलकारकं भवतीति शिवम् । विश्रान्तिजनकत्वात् विनोदजनकक्रीडनकत्वाच्च सुन्दरम् । एवं नाट्ये सत्य-शिव-सौन्दर्याणाम् अनुपमं मेलनं वर्तते ।

### ❖ रसानुभूतेः सुगमता

काव्यस्य परममुद्देश्यमेव सहृदयहृदये रसानुभूतिजननम् । अत एव मम्मटाचार्यैः काव्यस्य अनेकेषु प्रयोजनेषु सत्स्वपि **'सद्यः परनिर्वृतिः'** [3] परमप्रयोजनत्वेन प्रतिपादितम् । तस्य चानन्दस्य स्वरूपं वृत्तौ एवं प्रपञ्चितम्- **"सकलप्रयोजनमौलिभूतं रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्"** इति । तादृशरसानुभूतेः मूलकारणं भवति विभावानुभावव्यभिचारिभावानां संयोगः । तदेवोक्तं भरतमुनिना **"विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः" इति** ।

---

[1] अभिज्ञानशाकुन्तलम्-२/७

[2] अभिज्ञानशाकुन्तलम्-५/२

[3] काव्यप्रकाशः-प्रथमोल्लासे द्वितीयकारिकायाम्- काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

यद्यपि एतत् श्रव्य-दृश्यसाधारणं तथापि पूर्वोक्तरीत्या श्रव्यकाव्येषु तादृशीं तीव्रतां न भजते । किन्तु दृश्यकाव्ये रङ्गमञ्चे उपस्थितानां पात्राणां वेष-भूषण-भावभङ्गी-संवादिभिः सजीव-मनोहर-हृदयग्राहिबिम्बं तिष्ठति सहृदयस्य मनसि, येन सहृदयस्य रसानुभूतेर्मार्गः निर्बाधः सुगमश्च भवति । एवं वस्तुतः काव्यस्य चरमलक्ष्यं नाट्येनैव सिद्ध्यति । अत एवोच्यते **'नाटकान्तं कवित्वम्'** इति ।

अपि च दृश्यकाव्ये दर्शक-नाट्यपात्रयोर्मध्ये साक्षात्सम्बन्धः भवति । अत एव रसानुभूतिः सुगमतया भवति । श्रव्यकाव्ये तु सहृदयस्य कल्पनं काव्य-पाठकयोर्मध्ये तिष्ठतीति तत्र किञ्चिदिव न्यूनता भवत्येव ।

### ❖ सङ्गीतादीनां सहायता

नाट्यस्य सङ्गीतवाद्यादिभिः सह घनिष्ठः सम्बन्धः । तैर्विना दृश्यकाव्यं श्रव्यकाव्यात् कथमपि न विशिष्यते । यतः दृश्यकाव्ये सङ्गीत-वाद्य-दृश्यविधानादीनि काव्यात्मकप्रभाववृद्धौ विशिष्टतया सहायकानि भवन्ति । सङ्गीतवाद्यादीनां वादनेन तैर्निःसृतानां सकारात्मकतरङ्गाणां प्रभावात् सहृदये रजस्तमोगुणयोः अभिभवः सत्त्वगुणस्य चोद्रेकः भवति, यः रसास्वादस्य अनिवार्योंऽशः । तत्र संवादद्वारा वस्तु अग्रे याति । तेन वर्ण्यवस्तुनि सहृदयस्य मनः संलग्नं भवति । परन्तु श्रव्यकाव्ये वर्णनद्वारा वस्तुनः गमनं भवति येन सहृदयस्य मनसि कौतूहलं न जागर्ति, य आनन्दस्य प्रमुखोंऽशः भवति ।

नाट्ये गीतवाद्ययोः समायोगान्न कदापि तस्य विनाशो भवतीति नाट्याचार्यस्याभिप्रायः । नाटकस्य शश्वत् प्रतिष्ठायै तत्र गीतवाद्ययोः समन्वयोऽनिवार्यः । वाद्यं तु नाट्यस्य शय्येति तेन उद्घोषितम् । तदनुसारेणैव नाटकस्था नर्तक्यः चतुरा नाट्यकुशला ऊहापोहविचक्षणाः रूपयौवनसम्पन्नाश्च भवन्ति स्म । नेत्रकर्णयोर्युगपत् प्रियत्वात् हृदयावर्जकत्वाच्च नाटकस्य रमणीयता सर्वस्वीकृताऽस्ति । नाट्यं स्वकीयरमणीयताभूयिष्ठगुणेन भिन्नरुचेर्जनस्य युगपदेव समाराधनाय समर्थमिति 'नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधन'मितीयं कालिदासोक्तिः सर्वैरप्यङ्गीकरणीया भवति ।

भारतीयकलाचिन्तनशास्त्रे नृत्यकलाया अन्तर्भूतस्य अभिनयस्य नाट्यस्य वा सातिशयगर्भं विश्लेषणम् उपलभ्यते । नृत्यवाद्यसङ्गीताभिनयसंवलितत्वमेव नाटकस्य रमणीयः पक्षः ।

### ❖ चाक्षुषत्वम्

यद्यपि दृश्यकाव्यं नेत्र-श्रवणयोरुभयोरपि विषयस्तथापि प्राधान्येन सः चक्षुरिन्द्रियस्यैव विषयः भवति । प्रत्यक्षं दृष्टं वस्तु श्रवणगोचरवस्त्वपेक्षया अधिकं प्रभावोत्पादकं रमणीयञ्च भवति । अत एव नाटकं कालिदासेन चाक्षुषं यज्ञमित्युक्तम्-

**देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम्** [1] इति ।

### ❖ त्रिवर्गसाधनम्

नाटकात् प्राप्यमाणं फलमपि तस्य रम्यतायाः कारणीभूतं भवति । तत्र तस्य त्रिवर्गसाधनत्वम् अन्यतमम् । धर्मार्थकामाः = त्रिवर्गः । तत्साधनमास्तिकानां कृते वेद एव । अतः त्रिवर्गसाधको वेद एवेति तादृश वेद एव

---

[1] मालविकाग्निमित्रम्-प्रथमाङ्कस्य चतुर्थपद्यस्य प्रथमपादः ।

 ISSN: 2320-740X

नाट्यस्यापि मूलमिति नाट्यमपि त्रिवर्गसाधनं भवति । नाट्यस्य वेदमूलत्वप्रतिपादकं पद्यं नाट्यशास्त्रे एवं दृश्यते-

**जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च ।**

**यजुर्वेदादभिनयं रसानाथर्वणादपि ॥** इति ॥

ब्रह्मा हि ऋग्वेदात् पाठ्यमथवा संवादं सामवेदात् सङ्गीतं यजुर्वेदादभिनयम् अथर्ववेदाच्च रसतत्त्वं समाकृष्य पञ्चमं नाट्यवेदं निर्मितवान् । ऋग्वेदे हि एतादृशानि सूक्तानि उर्वशी-पुरूरवसूक्तम्, यम-यमीसूक्तमित्यादीनि समुपलभ्यन्ते, येषु संवादः कथोपकथनञ्च वर्तते । एतानि संवादसूक्तानि सर्वाधिकप्राचीनरचनापद्धत्या रचितानीति बहुप्रचलितं मतम् । अत एवैतानि सूक्तानि परवर्तिनाट्यकृतीनामाधारभूतानि । अग्निपुराणे नाटकनिरूपणप्रकरणे नाटकस्य भेदोपभेदाः दर्शिताः । विश्वनाथेन विरचितस्य साहित्यदर्पणस्य षष्ठे परिच्छेदे नाटकविषयकं विवेचनं यद्दृश्यते तत्तु बहुलांशतः अग्निपुराणस्यैव नाटकनिरूपणप्रकरणमाधृत्य कृतमस्ति । अग्निदेवेन नाटकं धर्मार्थकामभूतस्य त्रिवर्गस्य साधनरूपेणाङ्गीकृतम् **त्रिवर्गसाधनं नाट्यम्** इति ।

### ❖ जुगुप्सादिराहित्यम्

काव्यदोषेषु अश्लीलदोष इत्यस्ति कश्चन दोषः । यत्र सहृदयानां लज्जा, जुगुप्सादयः जायन्ते तत्रायं दोष अङ्गीक्रियते । तादृशदोषनिवारणार्थं प्राचीनभारतीयनाटकेषु केषाञ्चन सन्दर्भाणां रङ्गे प्रदर्शनं निषिद्धमस्ति । विश्वनाथकविराजेन साहित्यदर्पणस्य षष्ठे परिच्छेदे अङ्कनिरूपणावसरे निषिद्धानां पट्टिका एवं दत्ता वर्तते-

**दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः ।**

**विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा ॥**

**दन्तच्छेद्यं नखच्छेद्यमन्यद्व्रीडाकरं च यत् ।**

**शयनाधरपानादि नगराद्यवरोधनम् ॥**

**स्नानानुलेपने चैभिः वर्जितो नातिविस्तरः ।** इति ।

एतत्तु सर्वत्र दृश्यकाव्येष्वन्वेति ।

### ❖ सुखान्त्यत्वात् आह्लादजनकम्

भारतीयनाटकानि सुखान्त्यान्येव भवन्ति । दुःखान्तनाटकं संस्कृतभाषायां विरलम् । केवलं भासमहाकविविरचितम् ऊरुभङ्गमेव तत्र दृश्यते दुःखान्तनाटकत्वेन । नाटकं दृष्ट्वा यदि दुःखमनुभूय गच्छति सहृदयः तर्हि पुनस्तस्य नाटकदर्शने मनः न भवेत् । अतः शोकमूलकाः करुणादिरसा अपि यथा सुखदायका एव भवेयुस्तथैव नैपुण्येन नाटकं निबध्नाति कविः । श्रव्यकाव्यादीनां दुःखान्तत्वं तादृशरूपेण सहृदयस्य मनसि न तिष्ठति किन्तु प्रत्यक्षतया दृष्टत्वात् दृश्यकाव्यस्य दुःखान्तत्वं विस्मर्तुमशक्नुवन् सहृदयः क्लेशमनुभवेत् । अतस्तन्नाद्रियते नाट्यलोके।

एवमनेकेंऽशाः श्रव्यकाव्ये वर्तमाना अपि दृशकाव्ये अतिशयिताः सन्तः दृश्यकाव्यस्य रमणीयतां वर्धयन्ति । प्रसिद्धरसवादिनाम् अभिनवगुप्तपादानां मते रसनिष्पत्तेः चतस्रः स्थितयो विद्यन्ते । तत्र-

**प्रथमा स्थितिः**-नाटके रङ्गमञ्चोपरि दर्शकः व्यक्तिविशेषं पश्यति । स्थितिरियं स्थूला प्रत्यक्षीभूता च ।

**द्वितीया स्थितिः**-दर्शकस्य कृते व्यक्तिविशेषबोधस्य समाप्तिर्जायते, परं द्वैतत्वं तिष्ठत्येव ।

**तृतीया स्थितिः**-विभावादेर्विशेषत्वलोपेन सहैव सहृदयहृदये वासनारूपेण स्थितस्य स्थायिभावस्य साधारण्येन समुद्बोधनं जायते ।

**चतुर्थी स्थितिः**-विगतविघ्नाः सहृदयाः तत्स्थायिभावं रसरूपेणास्वादयन्ति ।

अभिनवगुप्तपादाः प्रक्रियामिमां नाटकं लक्ष्यीकृत्यैव प्रतिपादितवन्तः । अनेन विश्लेषणेन नाटकस्य भृशम् आपातरमणीयता संसूच्यते ।

एवं नाट्यवेदः विनोदाय, हितोपदेशाय, दुःखशोकविशिष्टानां प्राणिनां विश्रामाय च भवति । भारतीयनाटके मङ्गलभावनाया बाहुल्यं वर्णितमस्ति । सत्त्वोद्रेक एव भारतीयनाटकानामुद्देश्यभूतः । तस्मात् समुत्पन्नस्य चरमाह्लादस्य रसनीयत्वं कदापि अशिवं न स्यात् । यतो हि रसभावाः सर्वदैव माङ्गलिका इति हेतोः नाटकस्य वर्ण्यविषयोऽपि माङ्गलिक एव भवेत् । नाटके समुपस्थापितानामुदारचरित्राणां अभिनयमाध्यमेन अभिव्यक्तं जीवनदर्शनम्, तेषां नाटकीयं गीतिमयञ्च माधुर्यम्, प्रकृतेर्विशाला पृष्टभूमिः, रसपेषलभाषायाञ्च प्रवाहमयी सप्राणा व्यञ्जनाशक्तिः इत्यादयः नाटकस्य रमणीयत्वं भूरिशः विवर्द्धयन्ति ।

एतेंऽशाः श्रव्यकाव्यापेक्षया दृश्यकाव्यभूतस्य नाटकस्य अतिशयसाधकाः । किन्तु 'काव्येषु नाटकं रम्यमि'त्यस्य अन्यरूपकोपरूपकेभ्योऽपि अतिशयः नाटकस्य इत्यर्थोऽङ्गीक्रियते । तदपि समीचीनमेवेति पूर्वमुक्तम् । तत्कथमिति चेत्, नाटकस्य परिपूर्णता अन्येषां न भवतीति । उदाहरणार्थं 'प्रकरणम्' शृङ्गारप्रधानमेव भवति, न तत्रान्यरसानाम् अङ्गित्वम् । किन्तु नाटके शृङ्गार-वीरयोः द्वयोरन्यतरस्य अङ्गित्वमुक्तमस्ति । तथैव अङ्कस्य एक एवाङ्कः भवति, [1] यत्र अल्प एव विषयः उपन्यस्यते कविना । एवमेव अन्येष्वपि रूपकोपरूपकेषु नाटकमिव विषय-रसाद्यनुरोधेन परिपूर्णता नैव दृश्यत इत्येव वक्तव्यं भवति । एवं दृश्यकाव्येष्वपि नाटकस्यैव प्रधानता दरीदृश्यते ।

संस्कृतनाटके तु भारतीयाचारस्य सञ्जीविनी सञ्चरति । तस्मिन् हि धर्माध्यात्मयोः विनिवेशोऽस्ति, नैतिकतायाः आशावादितायाश्च सन्देशो विद्यते । किं बहुना, तस्मिन्नन्तर्हिता विजयोद्घोषस्य स्वरवैखरी निरन्तरं मुखरिता भूत्वा सहृदयहृदयानि समुल्लासयति लोकजीवनञ्च प्रसादयति । संस्कृते रमणीयनाटकरचनाया दीर्घतमा परम्परा वरीवर्ति । नाटककारेषु भास-कालिदास-भवभूति-शूद्रक-विशाखदत्त-मुरारि-जयदेव-राजशेखरादयो मौलिभूताः सन्ति । एते सर्वेऽपि सौन्दर्यरसिकाः नाट्यशास्त्रिणश्चासन् । लोकजीवनस्य रम्यतापादकत्वादेव संस्कृतनाटकानां रमणीयत्वम् । अत एव **'काव्येषु नाटकं रम्य**मि'त्येतत् सर्वथा सङ्गच्छत एवेति शम् ।

**********

[1] कर्णभारादिषु ।

 ISSN: 2320-740X

# बाहुलकम्

डा. कृष्णानन्तपद्मनाभम्
सहायकाचार्यः, व्याकरणविभागः

व्याकरणशास्त्रस्य अष्टाध्यायीरूपस्य वार्तिकभाष्याभ्यामुपबृंहितस्य व्याकरणस्य वेदाङ्गत्वम्, तस्य प्राधान्यं महाभाष्यकारैः पतञ्जल्यृषिभिः स्पष्टमभ्यधायि "निष्कारणो धर्मषडङ्गो वेदोऽध्येयो ज्ञेयश्च, षट्स्वङ्गेषु प्रधानं व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवति" इत्यादिभिर्वचनैः । पूर्वतनव्याकरणापेक्षया बहुतमलक्ष्यसङ्ग्राहकत्वानुरोधेनाद्यत्वे चास्य पाणिनीयव्याकरणस्य वेदाङ्गता सुष्ठूपपद्यत इति नातिरोहितं वचः । तत्र व्याकरणे "व्यत्ययो बहुलम्" (३-१-८५), "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः" (७-१-३९) इति सूत्रयोरर्थो विव्रियते । "व्यत्ययो बहुलम्" (३-१-८५) इति सूत्रे भाष्ये योगविभागः कृतः। 'व्यत्ययः' इत्येको योगः, 'बहुलम्' इत्यपरः। तेन सर्वे विधयश्छन्दसि विकल्पेन भवन्तीति साधितम् । बहूनर्थान् लाति आदत्त इति बहुलम्, तस्य भावो बाहुलकम् । मनोज्ञादित्वेन भावे वुञ् प्रत्ययः ।

"व्यत्ययः" इति प्रथमयोगेन स्यतासिप्रभृतीनां व्यत्ययो भवतीति कैयटेनोक्तम् । तत्रादिपदेनेतरे विकरणा ग्राह्याः। स्यादीनां शबपवादत्वेन तु सिद्धान्तकौमुद्यां शबादिविकरणानां बहुलं व्यत्ययः स्याच्छन्दसीत्युक्तम् । शप् प्रत्ययश्च कर्त्रर्थे सार्वधातुके परे भवति ।

योगविभागेन प्रथमयोगेन "व्यत्ययः" इत्यनेन "आण्डा शुष्णस्य भेदति" इत्यत्र भिनत्तीति प्राप्ते शप् । "भिदिर् विदारणे" इति हि रौधादिको धातुः । अतस्तस्मात् "रुधादिभ्यः श्नम्" (३-१-७८) इति सूत्रेण श्नमि प्राप्ते तं बाधित्वा शब्भवत्यनेन सूत्रेण । श्नमो मित्त्वेन "मिदचोन्त्यात्परः" (१-१-४७) इति सूत्रेण भकारादिकारात् परो भवति । एवं च भिनत्तीति प्राप्नोति । अनेन सूत्रेण व्यत्ययेन शपि सति तस्य च मित्त्वाभावेन धातोः पर एव भवति । "पुगन्तलघूपधस्य च" (७-३-८६) इति सूत्रेण लघूपधगुणे भेदतीति रूपम् ।

"जरसा मरते पतिः" इत्यत्र म्रियत इति प्राप्ते शप् । अयं च "मृङ् प्राणवियोगे" इति धातुस्तौदादिकः । "तुदादिभ्यश्शः" (३-१-८७) शप्रत्यये रिङादेशे च म्रियते इति रूपम्। शप्रत्ययस्य अपित्सार्वधातुकत्वेन ङित्त्वात् "क्क्ङिति च" (१-१-५) इति सूत्रेण गुणनिषेधः । तथा च म्रियत इति रूपम् । प्रकृते मरत इत्यत्र तु व्यत्ययेन शप् कृतः । शपः पित्सार्वधातुकत्वेन गुणनिषेधाभावेन "सार्वधातुकार्धधातुकयोः" (७-३-८४) इति सूत्रेण गुणः। इदञ्चोदाहरणं कौमुद्यां दत्तम् । महाभाष्ये तु स च न मरति इत्युदाहृतम् । प्रक्रियोभयत्र तुल्या परस्मैपदं विना ।

बहुलमिति विभक्तेन सूत्रेण साध्यानाम् उदाहरणानां सङ्ग्रहात्मिका कारिका भाष्ये पठिता

**सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङाम् ।**

**व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्ध्यति बाहुलकेन ॥** इति ।

सुब्व्यत्ययो यथा – 'युक्ता मातासीद्धुरि दक्षिणायाः' इति । दक्षिणायाम् इति प्राप्नोतीत्युक्तं भाष्ये । अत्र दक्षिणायाम् इति भाष्यकारीयप्रयोगे दक्षिणस्याम् इति भवेद् दक्षिणाशब्दस्य सर्वनामगणपठितत्वेन सर्वनामसंज्ञानिमित्तकः स्याट् प्राप्तः, सोऽपि बहुलग्रहणादेव नेति तु वक्तुं न शक्यते, तस्य च्छान्दसत्वाभावात् । इत एव कौमुद्यां दक्षिणस्याम् इति प्राप्ते इत्येवोक्तम् । तत्र व्याख्याने नागेशस्तु स्याडभावस्तु छान्दसत्वादिति व्याचख्यौ । सुब्व्यत्ययस्य विवक्षितत्वेन तन्मात्रव्यत्ययकथन एव भाष्यकृत्तात्पर्यं समस्ति, न तु तदागमाभावकथन इति वा मन्तव्यम् ।

तिङ्व्यत्ययो यथा – 'चषालं ये अश्वयूपाय तक्षति' इति । तक्षन्तीति प्राप्त एकवचनम् व्यतीयाय । बहुवचने हि झोन्तादेशो भवति । वर्णव्यत्ययो यथा - त्रिष्टुभौजः शुभितमुग्रग्रीवम् इति । शुधितमिति प्राप्ते धकारस्य भकारो वर्णव्यत्ययेन । लिङ्गव्यत्ययो यथा- मधोस्तृप्ता इवासते इति । मधुन इति प्राप्ते व्यत्ययेन पुंस्त्वम् । अमृतक्षीरवाचकस्य मधुशब्दस्य क्लीबवाचकतया नपुंसकत्वमत्र यथाप्राप्तम् इति शेखरव्याख्याने, अमृतक्षीरवाचि नित्यनपुंसकाभिप्रायमिदमिति चोद्योते नागेशः ।

पुरुषव्यत्ययो यथा - अधा स वीरैर्दशभिर्वियूयाः । वियूयादिति प्राप्ते व्यत्ययेन मध्यमपुरुषः। यु मिश्रणामिश्रणयोरिति धातोः विपूर्वकाद् आशीर्लिङि रूपम् । कालव्यत्ययो यथा- श्वोग्नीनाधास्यमानेन , श्वः सोमेन यक्ष्यमाणेन इति । आधाता यष्टा इति प्राप्नोति इति भाष्यम् । व्यत्ययेन लुटो विषये लृट् । तथा च लृटः सद्वा (३-३-१४) शानच्, स्यादयश्च भवन्ति । लुट् हि अनद्यने भविष्यति भवति । अनद्यतनशब्दस्य श्वोरूपोर्थः। उक्तं च कैयटेन अनद्यतन इति स्वस्तनस्य संज्ञेति । अत्रैव यष्टेति भाष्योदाहरणं च पूर्ववदेव लुड्विषयकम् ।

आत्मनेपदव्यत्ययो यथा - ब्रह्मचारिणमिच्छत इति, इच्छतीति प्राप्त आत्मनेपदं व्यत्ययेन । इषेर्ह्यात्मनेपदनिमित्तता नास्ति । अनुदात्तेत्त्वादेरभावात् । परस्मैपदव्यत्ययो यथा – "प्रतीपमन्य ऊर्मिर्युध्यति" इति । युध्यत इति प्राप्त आत्मनेपदं व्यत्ययेन । युधेर्हि अनुदात्तेत्त्वेनात्मनेपदं प्राप्तमिति भावः। कारिकायाम् उपग्रहपदेन लादेशव्यङ्ग्यं स्वार्थत्वादि ग्राह्यम् इतरत्र । अत्र तु तत्प्रतीतिनिमित्तभूतपरस्मैपद-आत्मनेपदे लक्षणया ग्राह्ये । अत एवात्र भाष्य इच्छति, युद्ध्यत इत्यत्रोपग्रहार्थभूतस्वार्थत्वादि, उत प्रेरणा आहोस्वित् सम्भारादिकं च न विचारितम् ।

एवमेव छान्दसानि रूपाण्यत्र शास्त्रे प्रायेण बहुत्र वरीवृत्यन्ते, तत्र बहूदाहरणसङ्ग्राहकतयात्र सुपां सुलुगिति सूत्रार्थोऽत्र विचार्यते । "सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः" (७-१-३९) इति सूत्रम् । सुपां स्थाने सु - लुक् - पूर्वसवर्ण - आ - आत् - शे - या - डा - ड्या - याच् - आल् इत्येतयादेशा भवन्ति । 'ऋजवः सन्तु पन्थाः' इति । अत्र पन्थानः इति प्राप्नोति । अत्र सुप्प्रत्ययस्य जसः स्थाने सुर्भवति । तथा च पथिन् सु इत्यत्र "पथिमथ्यृभुक्षामात्" ( ७-१-८५) इति सूत्रेणात्वे "थो न्थः" ( ७-१-८७) इति न्थाऽऽदेशे पन्था इति रूपम् । ननु जसः सुरादेशः क्रियतेऽत्र, सावुकारश्चेत्संज्ञकः। तथा


ISSN: 2320-740X

च सोरनेकाल्त्वाभावेन "अलोन्त्यस्य" (१-१-५२) इति सूत्रेणान्तादेशेन भाव्यम् । तथा च पन्थाः इति रूपं न सिद्ध्यतीति चेदत्राहुः, छान्दसत्वात् सर्वादेशः । उकारोच्चारणसामर्थ्येन भौतपूर्विकानेकाल्त्वेन वेति। व्यत्ययो बहुलमित्यस्यैवायं प्रपञ्चः । सुपां व्यत्यय इत्यस्यान्यविभक्तिसंज्ञकतया दृष्टानाम् अन्यस्यां विभक्तौ विपरिणामे सत्येव व्यत्यय इत्यस्य सूत्रतो वाच्यवृत्त्या अलाभात् । सुप्संज्ञा चैकैकवचननिष्ठा । अतोऽत्र बहुवचनस्य स्थाने सोरादेशे यद्रूपं तद् व्यत्ययो बहुलमित्यनेनापि सिद्ध्यति । न्यायव्युत्पादनार्थाय प्रपञ्चार्थं वा प्रकृतसूत्रम् ।

एवमेव द्वितीयमुदाहरणमुक्तं 'परमे व्योमन्' इति । अत्र व्योमन् इति प्रातिपदिकात् सप्तम्येकवचने ङिप्रत्यये तस्य स्थाने अनेन लुग्विधीयते । व्योमनीति व्योम्नीति वा प्राप्नोति । 'धीती मती सुष्टुती' इति पूर्वसवर्णदीर्घस्योदाहरणम् । अत्र धीत्या, मत्या, सुष्टुत्या इति प्राप्नोति । आङो नास्त्रियाम् (७-३-१२०) इति नाभावोत्र न भवति । स्त्रियां क्तिन्निति क्तिन्नन्ते अस्त्रीत्वस्याभावात् । एवं च धीति टा, मति टा, सुष्टुति टा इति स्थिते प्रकृतसूत्रेण पूर्वसवर्णदीर्घे पूर्वोक्तं रूपत्रयं सिद्ध्यति । आ इत्यस्योदाहरणं यथा- 'या सुरथा रथीतमोभा देवा दिविस्पृशा' । अश्विना इति । अत्र यौ सुरथौ दिविस्पृशावित्यादौ प्राप्ते आकारो विधीयते । अयं चाकारः प्रत्ययस्य स्थाने भवति । तथा च औकारस्य द्विवचनसंज्ञकस्य आकारादेशे सवर्णदीर्घे च कृते पूर्वोक्तरूपाणि सिद्ध्यन्ति । इमान्येवोदाहरणानि प्रकृतसूत्र आकारस्य प्रश्लेषे मानम् ।

एवमेव 'या देव विद्म ता त्वा' इत्यत्र यं तम् इति प्राप्नोति । यत्तद्भ्याम् द्वितीयैकवचने अम्प्रत्यये अमः स्थाने आकार आदेशः । अमो मकारस्य "न विभक्तौ तुस्माः" (१-३-४) इत्यनेन इत्संज्ञानिषेधेन तस्यानेकाल्त्वेन अन्तादेशेन भाव्यम्, आकाररूपस्यादेशस्य अनेकाल्त्वाभावाद् इति चेन्न, तत्राकारान्तरस्यापि प्रश्लेषेण तस्यानेकाल्त्वात् । अन्यथा अन्तादेश एव स्यात् । अन्तादेशे चेष्टं रूपं न सिद्ध्यति । आत् इत्यस्योदाहरणं यथा - अत्र तकरो विवक्षितः, न तु उच्चारणार्थः। 'नताद् ब्राह्मणम्' इति। अत्र नतमिति प्राप्ते आत् विधीयते । नत अम् इति स्थिते अमः स्थाने आत् इत्यादेशः। तकारस्य इत्संज्ञायाः अभावेन तस्यानेकाल्त्वेन सर्वादेशः। ननु "न विभक्तौ तुस्माः" (१-३-४) इति सूत्रेण विधीयमानो निषेधो विभक्तिसंज्ञकस्य । प्रकृते च आत् इत्यादेशे च कृते तस्य स्थानिवद्भावेन विभक्तिसंज्ञा भवितुमर्हीति । तदादेशतः पूर्वं कथम् आत् इति तकारस्य विभक्तित्वम्, कथं च न विभक्ताविति निषेध इति चेन्न, तत्र भाविसंज्ञाया आश्रयणान्न निषेधस्याव्याप्तिः।

शे इत्यस्योदाहरणं यथा – 'न युष्मे वाजबन्धवः' 'अस्मे इन्द्राबृहस्पती' इति । युष्मासु अस्मभ्यम् इति प्राप्ते शे इत्यादेशः। अत्र शे इत्यादेशे शकारस्य लशक्वतद्धिते इति सूत्रेणेत्संज्ञा, तथा च शेषे लोपे च रूपे । या इत्यस्योदाहरणं यथा – 'उरुया धृष्णुया' उरुणा धृष्णुना इति प्राप्ते या इत्यादेशः। अत्र "आङो नास्त्रियाम्" (७-३-१२०) इति सूत्रेण नाभावे प्राप्ते या इत्यादेशः। डा इत्यस्योदाहरणं यथा - "नाभा पृथिव्याः" इति। नाभाविति प्राप्ते डा आदेशः । ननु डो डित्त्वेन आकारस्यैव शेषेण अनेकाल्त्वाभावेन कथं सर्वादेश इति चेद् अत्रापि आकारान्तरं प्रश्लेषणीयम् ।

ड्य उदाहरणं यथा – 'ता अनुष्ठयोच्यावयतात्' इति । अनुपूर्वात् स्थाधातोः भावाङन्तात् तृतीयैकवचने टाप्रत्यये, तस्य स्थाने ड्यादेशे डित्त्वाट्टिलोपे च अनुष्ठया इति रूपम् । अनुपूर्वात् स्थाधातोः भावे अङ् कथं भवति ? "आतश्चोपसर्गे" (३-

१-१३६) इत्यङं बाधित्वा "स्थागापापचो भावे" (३-३-२५) इति सूत्रेण क्तिना भाव्यमिति चेदत्राहुः व्यवस्थावदङ् इति । "पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्" (१-१-३४) इति सूत्रे 'व्यवस्थायाम्' इति निर्देशेन सिद्ध्यतीति भावः। नन्वेवमपि व्यवपूर्वात्तित्सिद्धावपि अनुपूर्वात्तथासिद्धौ किं मानमिति चेत् तत्सामान्यज्ञापकमिति । याच उदाहरणं यथा - साधुया इति । साध्विति प्राप्ते याच् विधीयते । साधु इत्यस्य अव्ययत्वेन ततस्सौ तस्य "अव्ययादाप् सुपः"(२-४-८२) इति सूत्रेण लुकि प्राप्ते अनेन याच् आदेशः अत्र चकारस्य इत्त्वम् । तेन चितः सप्रकृतिकस्य अन्त उदात्तता फलं सिद्ध्यति । आल उदाहरणम् 'वसन्ता यजेत' इति । वसन्ते इति प्राप्ते आल् विधीयते । वसन्त इति प्रातिपदिकात् सप्तम्येकवचने ङिप्रत्यये तस्य स्थाने आल् आदेशः। यद्यत्र पूर्वसवर्णः स्यात् तर्हीकारदीर्घः स्यात् ।

**********

## शास्त्रकोषः

**-: वाग्वर्धिनीपरिषद् :-**

**ये भूतविषवाय्वग्निसंप्रहारादिसम्भवाः । नृणामागन्तवो रोगाः प्रज्ञा तेष्वपराध्यति ॥**

ಮಾನವನಿಗೆ ಉಂಟಾಗುವ ರೋಗಗಳಲ್ಲಿ ಆಗಂತುರೋಗಕ್ಕೆ ಪ್ರಜ್ಞಾಪರಾಧವು ಕಾರಣವಾಗಿರುತ್ತದೆ. ಪಿಶಾಚಾದಿಗಳಿಂದ, ವಿಷ – ವಾಯು – ಅಗ್ನಿ – ಇವುಗಳಿಂದ ಉಂಟಾಗುವ ರೋಗವು ಆಗಂತು ರೋಗವು. ಅಜ್ಞಾನ ಹಾಗೂ ತಪ್ಪು ತಿಳುವಳಿಕೆಯೆಪ್ರಜ್ಞಾಪರಾಧ.

मानव को होनेवाला रोगों में आगन्तु रोग का कारण बुद्धि से किए जानेवाले अपराध हैं। पिशाच आदि से, विष, वायु, और अग्नि इनसे होनेवाला रोग आगन्तुक रोग है। अज्ञान और अयथार्थज्ञान ही बुद्धि से किए जानेवाले अपराध हैं।

An illness called Agantu is caused by Prajnaparadha. And the Agantu is basically created by demons, poison, air and fire. Ignorance and misconception is Prajnaparadha.

**त्यागः प्रज्ञापराधानम् इन्द्रियोपशमः स्मृतिः । देशकालात्यविज्ञानं सद्वृत्तस्यानुवर्तनम् । आगन्तूनाम् अनुत्पत्तौ एष मार्गो निदर्शितः ॥**

ಇಂದ್ರಿಯಗಳ ವಿಷಯಲಂಪಟತನವನ್ನು ನಿಗ್ರಹಿಸುವುದರಿಂದ ಹಾಗೂ ಪುತ್ರಮಿತ್ರಾದಿ ಸಂಬಂಧಗಳ ನಶ್ವರತೆಯನ್ನು ಆಗಾಗ ಅನುಸಂಧಾನಗೈಯುವುದರಿಂದ ಅಸೂಯೆ, ಶೋಕ ಮೊದಲಾದ ಮನೋರೋಗಗಳನ್ನು ಶಮನಗೊಳಿಸಬೇಕು. ಭೂತ – ವಿಷ – ವಾಯು ಮೊದಲಾದವುಗಳಿಂದ ಸಂಭವಿಸಬಹುದಾದ ಆಗಂತುರೋಗಗಳನ್ನು ದೇಶ ? ಕಾಲ ಹಾಗೂ ಆತ್ಮಸಾಮರ್ಥ್ಯದ ಪರಿಜ್ಞಾನದಿಂದ ಪರಿಹರಿಸಬೇಕು.

इन्द्रियों की विषयवासना का निग्रहकरने से और पुत्रमित्र इत्यादि संबंधों की नश्वरता का अनुसंधान करने से असूया शोक इत्यादि मनोरोगों का शमन होता है। भूत, विष, वायु इत्यादियों से होनेवाले आगन्तुक रोगों को देशकाल और आत्मज्ञान का सामर्थ्य जानकर मिटा सकते हैं।

By controlling the sense organs from worldly desires and thinking about the impermanency of our relationship with the dear ones we should soothe the illness of mind. The illness which comes from ghosts, poison and air should be solved by the knowledge of self.

( चरकसंहिता सूत्रस्थानम् , 7.51, 53-54)


ISSN: 2320-740X

# न च प्राणी निरामयः

डा. गणेश ति. पण्डितः
**सहायकाचार्यः, शिक्षाविभागः**

**"सर्वे सन्तु निरामयाः"** इत्याशाभावः भारतीयानाम् । परं यत्ने कृतेऽपि न कश्चित् आजीवनं निरामयः भवितुं शक्नोति । देशकालपरिस्थितीनां प्रभावेण अवश्यमेव मानवः जीवने जीवितान्ते वा शारीरैः मानसैर्वा आमयैः ग्रस्तः त्रस्तश्च भविष्यत्येव । अतः एवोक्तं रसरत्नसमुच्चये – **"न प्राणिरहितो देशो न च प्राणी निरामयः"** इति । एवं मानवः अनिच्छन्नपि आमयग्रस्तः भविष्यति इति तु सिद्धमेव ।

सामान्यतः आमयोपशमनाय तन्नामरोगनिवृत्तये सर्वे वैद्यमुपसर्पन्ति । तत्र हि रोगः आधिव्याधिभेदेन द्वैविध्यम् ऋच्छति । एतदनु चिकित्सकाः अपि द्विविधाः। शरीरसम्बध्दः व्याधिः, मनसः सम्बद्धः आधिः इति लोकव्यवहारः । तदुक्तं सौन्दरानन्दे-

**द्विविधा समुदेति वेदना नियतं चेतसि देह एव च ।**
**श्रुतिविध्युपचारकोविदा द्विविधा एव तयोश्चिकित्सकाः॥**

अनेन श्लोकेन ज्ञायते यत् पुरा न केवलं व्याधिज्ञाः अपि तु आधिज्ञाः तन्नाममनोरोगविदः आसन् एव इति ।

अस्मत्पूर्वजैः आयुर्विद्याविद्भिः विविधव्याधीनाम् आधीनाञ्च वारणोपायाः विस्तरेणैव व्याख्याताः सन्ति । एवं सति आधुनिककाले नूतनाः अश्रुतपूर्वाश्च ये रोगविशेषाः श्रूयन्ते दृश्यन्ते वा, ते प्रायः वृथैव सृष्टाः कल्पिताः वा वर्तन्ते । एते नव्याः आधिक्येन सृष्टाश्च रोगविशेषाः भिषजां भाग्यहेतवः सन्तीत्यत्र नास्ति सन्देहः ।

अद्यत्वे सामान्यज्वरग्रस्तोऽपि ज्वरभिया वैद्यालयं गच्छति चेत्तर्हि प्रत्यागमनावसरे विविधरक्तपरीक्षाः समुत्तीर्य नवज्वरबिरुदाङ्कितः सन् प्रत्यागच्छति । कलियुगे सहस्राधिकाः केवलं ज्वरविशेषाः एव प्रादुर्भूताः सन्ति । परन्तु ज्वरहेतवः के? इति वयमपि न जानीमः इति वैद्याः सभ्रूभङ्गम् अङ्गीकुर्वन्ति । कारणेन विना अत्र कार्योत्पत्तिः जायेत । किन्तु अमृतवल्लर्याः काषायसेवनेन पर्पटिकापत्रचूर्णितरसलेह्यसेवनेन वा भयङ्कराः अपि ज्वरविशेषाः समूलं विनश्यन्ति इति अस्माकं वयोवृद्धाः बन्धवः असकृत् वदन्ति ।

केचन व्यापारबुद्धयः वैद्याः अपि रहस्यमिदं जानन्त्येव । परं भाषणावसरे असंस्कृतम् औषधम् असेव्यम् इति चीत्कुर्वन्ति । किन्तु मर्कटाः शुनकादयो इतरे प्राणिनः रहस्यमिदं जानन्तीत्यतः ते सर्वे स्वयमेव रोगसम्बद्धानि वनौषधानि भुक्त्वा स्वयमेव उपचारव्यवस्थां कुर्वन्ति सर्वदा । एते न कदापि ज्वरविशेषज्ञमवलम्बन्ते प्रतीक्षन्ते वा । रोगहेतुमविज्ञाय

रोगनिरोधकगुलिकादानेन सेवनेन वा कथञ्चित् रोगनिवृत्तिः ज्वरोपशमनं वा जायते इत्यतः वैद्याः रुग्णाश्च तात्कालिकपीडातः मुक्तिं विन्देयुः । परं तस्य विपरिणामः कालान्तरे अवश्यं दृश्यते । साम्प्रतिके काले विविधौषधनिर्मातृसंस्थाभिः निर्मीयमाणानि अधिकाधिकानि चित्ताकर्षकाणि औषधानि रोगप्रतिरोधकान्येव । अज्ञातचरस्य रोगस्य वारणाय गत्यन्तराभावात् अनुचितान्यपि रोगप्रतिरोधकौषधानि अद्यत्वे दीयन्ते । अन्यान्यगतिकाः रुग्णाः अपि ज्ञात्वा अज्ञात्वा वा एतादृशानि औषधानि सेवन्तेतमाम् । 'चिकून् गुन्या' 'डेङ्ग्यू' प्रभृतयः ज्वरविशेषाः एतादृशैरेव औषधैः निवार्यन्ते । परन्तु एकस्य रोगस्य निवृत्तये दत्तानि औषधानि स्वतः एव रोगान्तराणि सृजन्ति सन्ति इति तु कठोरसत्यमेव। विशिष्य हृदयान्त्रमूत्रपिण्डानामुपरि रोगप्रतिरोधकानां तीक्ष्णौषधानां परिणामः अवश्यं जायते । एवं शरीरस्य विभिन्नावयवानां क्रमशः क्षये एतादृशानि विषोपमानि औषधान्येव कारणानि इति निश्चप्रचम् ।

एतादृशौषधानि भुक्तवतः रोगिणः विषमावस्थायां वैद्यगणः सम्भूय एव चिकित्सां करोतीत्यतः कस्य हस्तलाघवेन (करकौशलेन) रोगी मृतः इति वैद्योऽपि विज्ञातुं न शक्नोति । एतादृशः एकः वैद्यः स्वगतं ब्रूते यत् नाहम् अस्य रोगिणः चिकित्सामकरवं न वा मन्मित्रेण, तथापि एषः कथं मृतः ! इति । उक्तञ्च सुभाषितावल्याम् –

**चितां प्रज्वलितां दृष्ट्वा वैद्यो विस्मयमागतः ।**
**नाहं गतो न मे भ्राता कस्येदं हस्तलाघवम् ॥** इति ।

आधुनिकयुगे तु प्राणभक्षकाः रोगस्रष्टारश्च वैद्याः एव अधिकाः संवृत्ताः । पुरा चरकमहर्षिणा अग्निवेशोपदेशसन्दर्भे विचारोऽयं सूपपादितः एव । तद्यथा –

**द्विविधा खलु भिषजो भवन्त्यग्निवेश ! प्राणानामेकेऽभिसराः ।**
**हन्तारो रोगाणां रोगाणामेकेऽभिसरा हन्तारः प्राणानाम् ॥**

किञ्च रोगाभिसराः (वैद्याः) राक्षसीं चिकित्सामेव आधिक्येन कुर्वन्तः सन्ति । राक्षसी चिकित्सा इति शस्त्रचिकित्सायाः एव नामान्तरम् । पुरा वेदनामयीं शस्त्रचिकित्सां राक्षसी चिकित्सा इत्येव सम्बोधयन्ति स्म । धन्वन्तरिरपि अनिवार्यपरिस्थितावेव शस्त्रचिकित्सां करोति स्म न तु आधुनिकवैद्यवत् सर्वदा । तदा शस्त्रचिकित्सायै निम्नमेव स्थानं दत्तमासीत् । गत्यन्तराभावे राक्षसी चिकित्सा कर्तव्या इत्येव उल्लिखितमस्ति । मानुषी दैवी चेति चिकित्सापद्धतिद्वयं प्रशस्तमिति अस्माकं पूर्वजानां मतम् । तदुक्तं भैषज्यरत्नावल्याम् –

**राक्षसी मानुषी दैवी चिकित्सा त्रिविधा मता ।**
**शस्त्रैः कषायैर्लोहाद्यैः क्रमेणान्त्याःसुपूजिताः ॥ इति ।**

आधुनिकयुगे तु यः शस्त्रचिकित्सां सुचारुरूपेण सम्पादयति सः एव वैद्यः उत्कृष्टवैद्यः इति लोकः परिभावयति । तमेव सर्वदा आश्रयति पूजयति च । उदाहरणार्थम् - पूर्वं गर्भिण्यः स्त्रियः सुखेन प्रसुवते स्म । परम् अद्यत्वे सुखप्रसवः क्लेशाय कल्पेत इति वैद्याः गर्भिणीः भाययन्ति । अधिकाधिकाः वैद्याः शस्त्रचिकित्सामुखेनैव शिशुमुदरात् निष्कासयन्ति । गर्भिणीभ्यः प्रथममासादेव गुलिकास्वीकरणाय वैद्याः सूचयन्तीत्यतः नवमासे गते सत्यपि प्रसववेदनायाः अनुभवः एव न


ISSN: 2320-740X

भवति बह्वीनाम् । प्रसववेदनायाः अभावे नवमासपूर्णायै गर्भिण्यै शस्त्रचिकित्सा कर्तव्या एव खलु ! पुनः शस्त्रचिकित्सासन्दर्भे वेदनाविस्मरणार्थम् औषधं सूचिकामुखेन यच्छन्तीत्यतः वेदनायाः अनुभवः एव न भवति । परन्तु प्रसवित्र्या कालान्तरे अस्य औषधस्य दुष्परिणामः अनुभोक्तव्यः एव । एवं व्यापारबुद्धिभिः आधुनिकवैद्यैः वित्तापहरणाय सुमहान् परिश्रमः क्रियते । अत्र प्रामाणिकाः वैद्याः सन्त्येव । परं तेषां सङ्ख्या विरला इति तु त्रैकालिकं सत्यमेव ।

एतत्सर्वं दर्शं दर्शं वैराग्यभावमापन्नाः केचन आधुनिकाः पारम्परिकचिकित्सापद्धतिरेव श्रेष्ठा इति परिभावयन्ति तामेव आश्रयन्ति च । परं पारम्परिकचिकित्सापद्धतौ अपि अप्रशिक्षितानाम् असंस्कृतज्ञानां वैद्यानाम् अभावो नास्ति ।

चरकसुश्रुतवाग्भटमाधवादिभिः सर्वैरपि आयुर्विद्यापारङ्गतैः चिकित्साग्रन्थाः संस्कृतभाषायामेव विरचिताः सन्ति । अधुनिकायुर्वेदविदः संस्कृतपदभूयिष्ठवैद्यकीयपारिभाषिकशब्दानाम् वास्तविकम् अर्थम् अविज्ञाय यस्य कस्यापि तरोर्मूलं स्वीकृत्य यस्मै कस्मै वा प्रदाय स्वीयं पिचण्डभाण्डं (उदरम् ) परिपूरयन्तः सन्ति । एतदपि उक्तं लटकमेलके –

**यस्य कस्य तरोर्मूलं येन केनापि घर्षितम् ।**
**यस्मै कस्मै प्रदातव्यं यद्वा तद्वा भविष्यति ॥**

प्रतिदिनं पत्रिकासु दूरदर्शनेषु च प्रसार्यमाणानि चित्ताकर्षकाणि वनौषधोपेतविज्ञापनान्येव एतेषाम् उदरमूलानि सन्ति । एवं वैद्यकीयक्षेत्रस्य अन्तः प्रविशामः चेत्तर्हि प्रत्यागमनं क्लेशाय इति शिवम् ।

**परिशीलितग्रन्थसूची**


1. सर्वलक्षणसङ्ग्रहः - चौखम्बा संस्कृत संस्थान वाराणसी
2. वैद्यकीयसुभाषितसाहित्यम् - चौखम्बा संस्कृत संस्थान वाराणसी
3. भारतीयदर्शन – उ.प्र. हिन्दी संस्थान लखनऊ


**********

**शास्त्रकोषः**

-: वाग्वर्धिनीपरिषद् :-

दिव्यभावप्रदानाच्च क्षालनात् कल्मषस्य च । दीक्षेति कथिता सद्भिः भवबन्धविमोचनात् ॥ (कुलार्णवतन्त्रम् 9.51)

ಗುರುವು ಶಕ್ತಿಪಾತದ ಮೂಲಕ ಶಿಷ್ಯನ ಮೋಕ್ಷಮಾರ್ಗದಲ್ಲಿರುವ ಅಡೆತಡೆಗಳನ್ನು ಕಿತ್ತೆಸೆದು, ಪಶುಪ್ರವೃತ್ತಿಗಳನ್ನು ನಿವಾರಿಸಿ ದಿವ್ಯಸ್ವರೂಪವನ್ನು ಅನುಗ್ರಹಿಸುವನು. ಇದನ್ನು 'ದೀಕ್ಷೆ' ಎನ್ನುವರು.

गुरु विशिष्ट शक्ति प्रदान करके, मोक्षके मार्ग में स्थित, संभावित बाधाओं का नाश करके, मन में रहनेवाली दुष्ट भावनाओं का विनाश करके एक दिव्य स्वरूप का बोध कराते हैं। इसीको दीक्षा कहते है।

The Guru gives an unique energy to his disciple by destroying the barriers of Moksha and also diminishes the evil thoughts in the mind to make his disciple, experience a divine thing/picture. This is called as Deeksha.

# यावज्जीवाधिकरणविवेचनम्

डा. सूर्यनारयणभट्टः
**सहायकाचार्यः, मिमांसाविभागः**

भगवज्जैमिनिमहर्षिप्रणीतायां द्वादशलक्षण्यां द्वितीयाध्यायः कर्मभेदाध्याय इति प्रसिद्धः। शब्दान्तरादिभिः षड्भिः प्रमाणैः कर्मभेदः प्रतिपादितः त्रिभिः पादैः। चतुर्थपादे तु द्वाभ्यामधिकरणभ्यां कर्मभेदापवादः प्रस्तुतः। तत्र प्रथममधिकरणं किञ्चित् निरूप्यते।

"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति वाक्यं श्रूयते तथैव यावज्जीवं दर्शपूर्णमासाभ्यां यजेत इत्यपि च श्रूयते। तत्र प्रथमश्रुतेन वाक्येन स्वर्गरूपफलोद्देशेन दर्शपूर्णमासयागस्य विधानमिति स्पष्टम् । तर्हि यावज्जीवं दर्शपूर्णमासाभ्यां यजेत इत्यनेन तत्रैव कालविधानं भवति वा उत तस्यैव कर्मणः स्वर्गरूपं फलमनपेक्ष्य जीवेन निमित्ते नैमित्तिकतया विधानं वेति संशयः। नात्र नैमित्तिकपदेन नित्यस्य भङ्गः चिन्तनीयः। नियतनिमित्तकं नित्यम् अनियतनिमित्तकं नैमित्तिकमिति व्यवहारः। तयोर्मध्ये फले वा नास्ति भेदः।

**आक्षेपः**

"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति स्वर्गोद्देशेन योऽयं यागः विहितः तमनूद्यैव यावज्जीवं दर्शपूर्णमासाभ्यां यजेत इत्यनेन यावज्जीवमिति पदार्थः विधीयते। यद्यपि यावज्जीवशब्दः जीवनपरः। यावज्जीवमिति "जीव प्राणधारणे" इति धातोः णमुलन्तस्य रूपम् । तेन जीवनपर्यन्तमित्यर्थो भवति । स इदानीं जीवनपर्यन्तकाललक्ष्यः । सः कालः स्वर्गोद्देशेनैव विहितस्य कर्मणः विधीयते।

ननु तस्य कर्मणः अमावस्यायाम् "अमावस्यया यजेत, पौर्णमास्यां पौर्णमास्या यजेत" इति वाक्याभ्यां कालान्तरं विहितं पुनः कथं जीवनकालपर्यन्तं कालविधानमिति चेत् व्याप्यव्यापकभावेन उपपादयितुं शक्यते । अमावस्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति श्रूयते । पिण्डपितृयज्ञस्य कालः अमावस्यायामपराह्णकालः। अमावस्येति व्यापककालः अपराह्णे इति व्याप्यकालः । एवं च अमावस्यायामपराह्णे इति व्याप्यव्यापकभावेन कालद्वयस्य सन्निवेशो भवति तद्वत् जीवनकाले पौर्णमास्याम् अमावस्यायां च अनुष्ठानं सम्भवति। एवं च जीवनकाले अमावस्यायां पौर्णमास्यां दर्शपूर्णमासौ अनुष्ठेयौ इत्यर्थः पर्यवस्यति । अपि च यदा यदा जीवनकाले दर्शपूर्णमासौ लभ्येते तदा तदा अयं यागः अनुष्ठेयः इति आवृत्तिरपि कल्प्यते । एवं सति प्रतिपूर्णमासं प्रतिदर्शं च प्रयोगावृत्तिः भविष्यति। अतः यावन्तः दर्शपूर्णमासकालाः तावन्तः यागाः अनुष्ठीयन्ते। एते सर्वे प्रयोगाः व्याप्यप्रयोगाः।

एतेषां व्यापकः एकः प्रयोगः यावज्जीवमित्यनेन विधीयते । सः व्यापकप्रयोगः स्वर्गार्थदर्शपूर्णमासोद्देशः विधीयते ।


ISSN: 2320-740X

अर्थात् एवं फलितं यावज्जीवपर्यन्तं पौर्णमास्यमावास्याकाले दर्शपूर्णमासौ अनुष्ठीयेते चेदेव स्वर्गार्थदर्शपूर्णमासः सिद्ध्यति । स्वर्गफलं भविष्यति नान्यथा इति प्राप्ते – यावज्जीवमिति पदं न कालविधानपरम् । जीवनं तस्य शक्यम् । अत्र णमुल्प्रत्ययेन जीवनस्य यागस्य च सम्बन्धः अवगम्यते । कीदृशसम्बन्धः स्यादिति प्रश्ने जीवनस्य यागस्य च निमित्तनैमित्तिकभावसम्बन्धः आश्रीयते लाघवात् । तदा आवृत्तिः नैव कल्पनीया भवति । निमित्ते सति नैमित्तिकं विधीयते । निमित्तं जीवनं तत् प्रधानमिति कृत्वा आवृत्तिः स्वयमेव सिद्ध्यति । अतो यावच्छब्दार्थः अनुवादः न विधेयः । तदा तु यदा यदा निमित्तं तदा तदा नैमित्तिकानुष्ठानमिति कृत्वा स्वयमेवानुष्ठानं जायते इति लाघवम् ।

एतस्मिन्निमित्ते सति नैमित्तिकमवश्यं कर्तव्यमिति बोध्यते । निमित्ताभावे न कर्तव्यमिति विधिः निषेधो वा नापेक्षते । अर्थादेव सिद्ध्यति । यथा राहूपरागे स्नानम् , तदभावे तन्निमित्तकस्नानानुष्ठानम् । अतः निमित्ते सति नैमित्तिकं नानुष्ठीयते चेत् प्रत्यवायः अवश्यमनुमेयो भवति । अनुष्ठानाभावः विधेः नैव सह्यो भवति। करणे किं फलमिति जिज्ञासायां पापक्षय एव फलमिति स्वीक्रियते । किन्तु पापक्षयार्थमेव इदं कर्म अनुष्ठेयमिति न, तदिच्छा अस्तु मा वा कर्तव्यमेव। नित्ये नैमित्तिके वा प्रत्यवायभिया प्रवृत्तिः इष्टा । न तु पापक्षयाफलोद्देशेन प्रवृत्तिः। अतः आनुषङ्गिकं फलम् । प्रयोगान्तरविधिः इति प्राचीनाः । खण्डदेवाचार्यस्तु - पापक्षयरूपफलोद्देशेन विनियोगान्तरविधिरित्याहुः ।

अतः नात्र कर्मभेदः । तद्धेतूनां शब्दान्तरादीनामभावात्। न वात्र अभ्यासः, निमित्तविशेषसद्भावेनाविशेषपुनःश्रुतेरभावात् । अतः प्रयोगभेदः । जीवनस्यात्र निमित्तत्वात् । सति निमित्ते नैमित्तिकस्य त्यागायोगात् नित्यत्वम् अर्थात्सिद्धम् । जीवननिमित्तनैरन्तर्येण न प्रयोगनैरन्तर्यापत्तिः । सायं जुहोति, प्रातर्जुहोति इत्यादिवाक्यैः कालविधानात् । तस्मात् जीवनस्य पुरुषधर्मत्वात् नित्यकाम्यप्रयोगौ भिन्नौ । प्रयोजनमपि सौर्यादौ यावज्जीविकोऽभ्यासः पूर्वपक्षे सिद्धान्ते तु न अभ्यासः इति स्पष्टम् ॥

**आधारग्रन्थाः**

भाट्टदीपिका ।

जैमिनीयन्यायमालाविस्तरः

मीमांसाकौस्तुभः।

**********

**शास्त्रकोषः**

**-ः वाग्वर्धिनीपरिषद् ः-**

**एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥** (ऋग्वेदः १० मण्डलं, १६४ सूक्तं, ४६ ऋक्)

ಮುನಿಗಳು ಒಂದೇ ಅಸ್ತಿತ್ವವನ್ನು ಅನೇಕ ರೀತಿಯಲ್ಲಿ ವರ್ಣಿಸಿರುವರು. ಆ ಒಂದೇ ಸತ್ಯ ವಸ್ತುವನ್ನು ಅಗ್ನಿ, ಯಮ,ಮಾತರಿಶ್ವಾ ಎಂಬುದಾಗಿ ಕರೆಯುವರು.

**परमसत्यतत्व तो एक हि है जिसे ऋषियों ने अग्नि, यम और मातरिश्वा जैसे अभिधान दिये हैं।**

Sages have explained one ultimate existance in many ways. The same ultimate truth is called as Yama, Agni, Matarishwa etc.

# जगन्नाथकाव्यलक्षणे रमणीयतापदपरिष्कारः

डा. कोम्पेल्लि विनयकुमारः
**प्राध्यापकः, साहित्यविभागः**

चिरं परम्परावाहिनिकाव्यसंसारे "लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्" इति काव्यस्य सामान्यस्वरूपं जानानैरपि आलङ्कारिकैः तस्य विविधानि विशिष्टानि लक्षणानि कथितानि । तत्र भामह-वामन-रुद्रट-आनन्दवर्धन-अभिनवगुप्त-कुन्तक-वाग्भट-हेमचन्द्र-मम्मट-विद्यानाथ-विद्याधर-प्रभृतिभिराचार्यैः निर्दुष्टं गुणालङ्कारसन्वितं च शब्दर्थयुगलं काव्यमिति प्रतिपादयाञ्चक्रे। दण्डि-जयदेव-विश्वनाथ-जगन्नाथप्रभृतिभिराचार्यैः इष्टार्थप्रतिपदकस्य शब्दस्यैव काव्यत्वमङ्गीचक्रे। संस्कृतसाहित्याकाशस्य देदीप्यमाननक्षत्रेण पण्डितराजजगन्नाथेन स्वकीये 'रसगङ्गाधरे' "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति काव्यलक्षणं प्रतीपादयामासे । एतच्च लक्षणं व्याचक्षाणेन तेन जगन्नाथेन तत्रैव "रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता । लोकोत्तरत्वं च आह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः" इत्युक्तम् । एवं च चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वं फलितम् ।

अत्र जगन्नाथोक्तकाव्यलक्षणे अर्थस्य विशेषणत्वेन रमणीयता निवेशिता । सामान्यभाषाशब्दैः प्रतिपाद्यस्य अर्थस्य अपेक्षया काव्यप्रतिपाद्यार्थो भिन्न एवेति तदर्थः। स एव काव्यप्रतिपाद्यरमणीयार्थः इति ध्वनिकारेण आनन्दवर्धनेनापि सहृदयशाघ्यार्थरूपेण वक्रोक्तिरूपेण च स्वस्पन्दसुन्दररूपेण दृष्टः।

सामान्यभाषायाम् अन्यशास्त्रेषु वा शब्दाः केवलमर्थमात्रं प्रतिपादयन्ति, काव्ये तु शब्दा रमणीयमर्थं प्रतिपादयितुं प्रभवन्ति। अयं रमणीयार्थः एकप्रकारकः चमत्काराह्लादात्मक एव। शब्दमाध्यमेनैव तादृशरमणीयार्थपर्यन्तं सहृदयः गच्छति । तर्हि का इयं काव्यस्य काव्यत्वोपपादिका रमणीयता ? इति चेत् - सामान्यतः रमणीयता लोकरुचिरूपा इत्येव वक्तव्यं भवति । यतः यद्यस्मै रोचते तत्तस्य कृते रमणीयम्। तदर्थमेवोक्तं महाकविना कालिदासेन - **भिन्नरुचिर्हि लोकः**[1] इति । महाकविना माघेनापि **क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः**[2] इति रमणीयतास्वरूपमुक्तम् । किन्तु जगन्नाथोक्तकाव्य-लक्षणस्थार्थनिष्ठा रमणीयता यदि तथा कालिदासोक्तरीत्या स्वीक्रियते तर्हि रमणीयता अव्यवस्थिता भवति, लोकस्य भिन्नरुचित्वात् एकस्मिन्नेवार्थ एकस्य रुचिः अरपरस्य चारुचिः । किन्तु सर्वस्मै अपि यथा रोचते तथा

[1] रघु. - 6.30

[2] शिशु.4.17


ISSN: 2320-740X

भवेदर्थगता रमणीयता । अतः काव्यलक्षणगता रमणीयता ज्ञानमन्तर्भाव्यैवं परिष्कारपूर्वकं निरूपिता जगन्नाथेन - **रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता**[1] इति।

अनेन सौन्दर्यादिलक्षणा वस्तुगतैव रमणीयता न विवक्षिता इति ज्ञायते । लोकोत्तराह्लादजनकं यज्ज्ञानं तत्तु काव्यत्वेन अभिमतशब्दप्रतिपाद्यार्थज्ञानम् । तद्विषयतारूपैव रमणीयता, न तु सौन्दर्यादिलक्षणा वस्तुगतैव रमणीयता अत्र विवक्षिता । 'घटमानय' इत्यादिवाक्यवारणाय काव्यलक्षणे रमणीयपदं निवेशितम् । तथा निवेशेऽपि तस्याः रमणीयतायाः लोकोत्तराह्लादजनकज्ञानगोचरतारूपेण परिष्कारो यदि न क्रियते, तर्हि रमणीयतानुगमकस्य धर्मस्य अभावात् 'घटमानय' इत्यादिवाक्ये अतिव्याप्तिस्तथैव तिष्ठति । 'दश दाडिमानि', 'षडपूपाः' इत्यादिनिराकाङ्क्षार्थशालिवाक्यार्थापेक्षया 'वह्निना सिञ्चति' इत्यत्र अर्थाबाधरूपयोग्या नास्ति चेदपि बाधितस्यापि संसर्गस्य सद्भावात् तस्मिन् वाक्यार्थे रमणीयता अस्ति । तथा सति तदपेक्षया अर्थाबाधरूपयोग्यताशालिनि 'घटमानय' इत्यादिवाक्यार्थे किं रमणीयता न भवति ? अवश्यमेव 'वह्निना सिञ्चति' इति वाक्यापेक्षया अधिकैव रमणीयता वर्तते । अतः 'घटमानय' इत्यत्रापि रमणीयार्थप्रतिपादकशब्दस्य सत्त्वात् तत्रातिप्रसङ्गः । किन्तु घटादिगतकेवलसौन्दर्यरूपा रमणीयता एव काव्यलक्षणं निष्पादयितुमलं न भवति । किन्तु काव्यलक्षणविषयीभूता भावनासमर्थितसौन्दर्यस्वरूपा रमणीयता एव काव्यलक्षणनिष्पादिका भवितुमर्हति । अत एव वस्तुगतां रमणीयतां परित्यज्य लोकोत्तराह्लादजनकज्ञानगोचरत्वपर्यन्तमनुधावितं जगन्नाथेन ।

यस्य अर्थस्य ज्ञानेन लोकोत्तरान्दस्य उपलब्धिर्भवति सोऽर्थः रमणीयार्थः। लोकोत्तरत्वम् आह्लादगतः कश्चन जातिविशेषः । स च सहृदयानुभवसाक्षिक एव। 'चमत्कारः' इति तस्य नामान्तरम्। पुनःपुनरनुसन्धानात्मा भावनाविशेषः तादृशं चमत्कारं जनयति। अतः काव्ये अर्थस्य रमणीयता सहृदयानां पुनः पुनरनुसन्धानात्मकभावनया एव साधिता ।

तथा चेत् अर्थे रमणीयतैव न भवति, सहृदयानां भावनया सा जायते भावनाऽभावे सा न जायते इत्यभिप्रायो भवति। तदा चमत्कारजनकसामग्रीरहिते लौकिकवाक्येऽपि सहृदयानां भावनया रमणीयता जायते इति वक्तव्यं भवति, काव्यत्वं च अङ्गीकरणीयं भवति। अतः रमणीयतायाः भावनासाधितत्वमिव वस्तुनिष्ठत्वमपि वक्तव्यमेव । अभिज्ञानशाकुन्तले -

**सरसिजमनुविद्धं शैवलेनापि रम्यं**
**मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।**
**इयमधिकमनोज्ञा वल्कलेनापि तन्वी**
**किमिव हि मधुराणां मण्डनं नाकृतीनाम्** [2]॥

[1] र.गं.पृ.4

[2] अभि.शा.1.20

 

इत्यस्मिन् श्लोके महाकविना कालिदासेन वर्णितौ कमल-चन्द्रमसौ निसर्गत एव रमणीयौ। न तयोः रमणीयता भावनासाधिता। तत्र चमत्कारोऽनुभूयत एव सहृदयैः। तर्हि भावनां विनाऽपि चमत्कारो भवति इत्यङ्गीकरणीयं खलु ? इति सन्देह उदेति । तत्र इदमेवोत्तरं यत् - चमत्कारः भावनाविशेषजन्य एव इत्येतद्वचोऽव्यभिचारि । सरसिजम्, कामिनी, चन्द्रमा- इत्यादिषु निसर्गतः रमणीयवस्तुष्वपि भावना वर्तत एव । यतो हि केवलं तेषां निसर्गरमणीयानां वस्तूनां नामोच्चारणमात्रेण कोऽपि चमत्कारो न जायते । किन्तु तादृशवस्तूनां वर्णनेन तद्विषयकभावनया च सहृदयानां मनसि चमत्कारो जायते, नान्यथा । तदाऽर्थः रमणीयो भवति। यदा सरसिजमनुविद्धमित्यादौ पद्येऽपि, सौन्दर्यस्य बाधकेन वल्कलेन परिवृताया अपि शकुन्तलायाः निसर्गरमणीयता सहृदयैः भाव्यते, तदैव कविवर्णितस्य शैवलेनानुवद्धस्यापि कमलस्य, कलङ्कितस्यापि च चन्द्रमसः रमणीयतावर्णनं चमत्कारं जनयति । अतः वस्तुनिष्ठाया अपि रमणीयतायाः काव्यत्वोपपादकत्वं भावनासहकारेण एव इति सिद्धम् ।

अत एव धनञ्जयोऽपि कथयति यत् –

**रम्यं जुगुप्सितमुदारमथापि नीच-**
**मुग्रं प्रसादि गहनं विकृतं च वस्तु ।**
**यद्वाऽप्यवस्तु कविभावकभाव्यमानं**
**तन्नास्ति यन्न रसभावमुपैति लोके**[1] ॥ इति ॥

न हि "कामिनी, चन्द्रमाः, पद्मम्" इत्यादिरम्यवस्तुपट्टिकादानमात्रेण कोऽपि चमत्कारमनुभवति । तस्मात्सिद्धमेतत् स्वतो रमणीयस्यापि वस्तुनः काव्योपयोगिरमणीयतासम्पादिका भावनैव ।

एवं वस्तुनिष्पन्न-भावनासमुन्मिषितयोः रमणीयतयोः पण्डितराजेन प्राधान्येन आद्रियते भावनासमुन्मिषितैव रमणीयता । तादृशं प्राधान्यं दृष्ट्वैव **लोकोत्तराह्लादजनकज्ञानगोचरता** इति रमणीयता तेन परिष्कृता । अत्र ज्ञानपदं ज्ञानप्रवाहरूपभावनापरम् । एतेन अर्थे रमणीयत्वसम्पादकसामग्र्यः सर्वा अपि रमणीयतापदेन सङ्गृह्यन्ते । अत एव गुणालङ्कार-रस-वस्तुव्यङ्ग्य-अलङ्कारव्यङ्ग्यादिषु सार्वत्रिकाभिनिवेशो न प्रकटितः जगन्नथेन । यत्र यस्याः सामग्र्याः चमत्कृत्याधायकत्वं तत्र तस्या एव सामग्र्या रमणीयता इति पण्डितराजस्य तात्पर्यम् ।

**आधारग्रन्थाः -**


1. रसगङ्गाधरः
2. रसगङ्गाधरनिबन्धनिचयः
3. जगन्नाथसिद्धान्तपरिशीलनम्
4. रघुवंशम्
5. शिशुपालवधम्
6. अभिज्ञानशाकुन्तलम्
7. दशरूपकम्


********

[1] द.श.4.85,पृ.292

 ISSN: 2320-740X

# दशमानपद्धतिः

डा. मुरलीकृष्णः ठि.
**प्राध्यापकः, ज्यौतिषविभागः**

गणितक्षेत्रे भारतीयानां योगदानम् अनितरसाधारणमिति सर्वे विदन्त्येव । साम्प्रतमस्मिन् लेखे दशमानपद्धतेश्चिन्तनं विधीयते । दशमानपद्धत्याः चिन्तकेषु भारतीयाः, ग्रीक्देशीयाः, ईजिप्ट्देशीयाश्च प्रमुखाः । ग्रीक्देशीयानां गणनाक्रमे **मिराइड्** ($10^4$) इत्याख्या सङ्ख्या बृहत्तमा आसीत् ।

*** वेदेषु -** भारतीयदशमानपद्धत्याम् अङ्कानां मूल्यं वामतः दक्षिणं यावद्दशमघातरूपेण वर्धते । यथा - एकम्, दश, शतम्, सहस्रम्, दशसहस्रमित्येवं वामतः दक्षिणं यावद्गणना अस्माभिः क्रियते खलु ? यजुर्वेदसंहितायां (क्रि.पू. 2500) सङ्ख्यानां विषये उक्तं यथा–

**एकं च दशं च शतं च सहस्रं च अयुतं च नियुतं च प्रयुतं च अर्बुदं च न्यर्बुदं च समुद्रं च मध्यं च अन्त्यश्च परार्धश्च ......**[1]

अस्य स्पष्टप्रतिपत्त्यर्थम् अधः प्रदत्तः कोष्ठकः परिशीलनीयः -

| स्थानम् | सङ्ख्या | घातः |
|---|---|---|
| एकम् | 1 | $10^0$ |
| दशम् | 10 | $10^1$ |
| शतम् | 100 | $10^2$ |
| सहस्रम् | 1,000 | $10^3$ |
| अयुतम् | 10,000 | $10^4$ |
| नियुतम् | 1,00,000 | $10^5$ |
| प्रयुतम् | 10,00,000 | $10^6$ |
| अर्बुदम् | 1,00,00,000 | $10^7$ |
| न्यर्बुदम् | 10,00,00,000 | $10^8$ |
| समुद्रम् | 1,00,00,00,000 | $10^9$ |
| मध्यम् | 10,00,00,00,000 | $10^{10}$ |

[1] यजुर्वेदसंहिता, चमकप्रश्नः ।

| | | |
|---|---|---|
| अन्तम् | 1,00,00,00,00,000 | $10^{11}$ |
| परार्धम् | 10,00,00,00,00,000 | $10^{12}$ |

- **आर्यभटीये** – आर्यभटः (क्रि.श 499) स्वग्रन्थे आर्यभटीये एकम् इत्यतः वृन्दम् ($10^9$) यावत्सङ्ख्या गणिता । अत्र श्लोकस्तु यथा -

**एकं च दशं च शतं च सहस्रमयुतनियुते तथा प्रयुतम् ।**

**कोट्यर्बुदं च वृन्दं स्थानात् स्थानं दशगुणं स्यात् ॥**[1]

स्पष्टावबोधाय अधः प्रदत्तः कोष्ठकः परिशीलनीयः -

| स्थानम् | सङ्ख्या | घातः |
|---|---|---|
| एकम् | 1 | $10^0$ |
| दशम् | 10 | $10^1$ |
| शतम् | 100 | $10^2$ |
| सहस्रम् | 1,000 | $10^3$ |
| अयुतम् | 10,000 | $10^4$ |
| नियुतम् | 1,00,000 | $10^5$ |
| प्रयुतम् | 10,00,000 | $10^6$ |
| कोटिः | 1,00,00,000 | $10^7$ |
| अर्बुदम् | 10,00,00,000 | $10^8$ |
| वृन्दम् | 1,00,00,00,000 | $10^9$ |

* **गणितसारसङ्ग्रहे -** महावीराचार्यस्य गणितसारसङ्ग्रहाख्यः गणितग्रन्थः सुप्रसिद्धः । अत्र महाक्षोभम् ($10^{23}$) यावत् सङ्ख्यायाः गणनाक्रमः प्रदर्शितः । यथा –

**एकं तु प्रथमस्थानं द्वितीयं दश संज्ञितम् ।**

**तृतीयं शतमित्याहुः चतुर्थं तु सहस्रकम् ॥**

**पञ्चमं दशसाहस्रं षष्ठं स्याल्लक्षमेव च ।**

**सप्तमं दशलक्षं तु अष्टमं कोटिरुच्यते ॥**

**नवमं दशकोटिस्तु दशमं शतकोटयः ।**

**अर्बुदं रुद्रसंयुक्तं न्यर्बुदं द्वादशं भवेत् ॥**

---

[1] गणितपादः


ISSN: 2320-740X

**खर्वं त्रयोदशस्थानं महाखर्वं चतुर्दशम् ।**
**पद्मं पञ्चदशं चैव महापद्मं तु षोडशम् ॥**
**क्षोणी सप्तदशं चैव महाक्षोणी दशाष्टकम् ।**
**शङ्खं नवदशं स्थानं महाशङ्खं तु विंशकम् ॥**
**क्षित्यैकविंशतिस्थानं महाक्षित्या द्वाविंशकम् ।**
**त्रिविंशिकमथ क्षोभं महाक्षोभं चतुर्नयम् ॥**[1]

अधः प्रदत्तः कोष्ठकः द्रष्टव्यः -

| **स्थानम्** | **सङ्ख्या** | **घातः** |
|---|---|---|
| एकम् | 1 | $10^{0}$ |
| दशमम् | 10 | $10^{1}$ |
| शतम् | 100 | $10^{2}$ |
| सहस्रकम् | 1,000 | $10^{3}$ |
| दशसहस्रकम् | 10,000 | $10^{4}$ |
| लक्षम् | 1,00,000 | $10^{5}$ |
| दशलक्षम् | 10,00,000 | $10^{6}$ |
| कोटिः | 1,00,00,000 | $10^{7}$ |
| दशकोटिः | 10,00,00,000 | $10^{8}$ |
| शतकोटिः | 1,00,00,00,000 | $10^{9}$ |
| अर्बुदम् | 10,00,00,00,000 | $10^{10}$ |
| न्यर्बुदम् | 1,00,00,00,00,000 | $10^{11}$ |
| खर्वम् | 10,00,00,00,00,000 | $10^{12}$ |
| महाखर्वम् | 1,00,00,00,00,00,000 | $10^{13}$ |
| पद्मम् | 10,00,00,00,00,00,000 | $10^{14}$ |
| महापद्मम् | 1,00,00,00,00,00,00,000 | $10^{15}$ |
| क्षोणी | 10,00,00,00,00,00,00,000 | $10^{16}$ |
| महाक्षोणी | 1,00,00,00,00,00,00,00,000 | $10^{17}$ |

[1] गणितसारसङ्ग्रहः – 1-63-68

| | | |
|---|---|---|
| शङ्खम् | 10,00,00,00,00,00,00,00,000 | $10^{18}$ |
| महाशङ्खम् | 1,00,00,00,00,00,00,00,00,000 | $10^{19}$ |
| क्षितिः | 10,00,00,00,00,00,00,00,00,000 | $10^{20}$ |
| महाक्षितिः | 1,00,00,00,00,00,00,00,00,00,000 | $10^{21}$ |
| क्षोभम् | 10,00,00,00,00,00,00,00,00,00,000 | $10^{22}$ |
| महाक्षोभम् | 1,00,00,00,00,00,00,00,00,00,00,000 | $10^{23}$ |

एतादृशविचाराणां चिन्तनं मननञ्च अस्मान् विस्मितान्तःकरणान् करोति । यतो हि अस्मत्पूर्वजानां ज्ञानराशिः येन केनापि वा अन्येन अतुलनीयः वर्वर्ति ।

**********

## शास्त्रकोषः

**-ः वाग्वर्धिनीपरिषद् ः-**

**यथा पक्षी स्वपक्षाभ्यां शिशून् संवर्धयेच्छनैः। स्पर्शदीक्षोपदेशश्च तादृशः कथितः प्रिये ॥**
**स्वापत्यानि यथा मत्स्यो वीक्षणेनैव पोषयेत्। दृग्भ्यां दीक्षोपदेशश्च तादृशः परमेश्वरि ॥**
**यथा कूर्मः स्वतनयान् ध्यानमात्रेण पोषयेत्। वेधदीक्षोपदेशश्च मानसः स्यात् तथाविधः ॥**

ದೀಕ್ಷೆಯು ಹಲವು ವಿಧವಾಗಿದೆ. ಹಕ್ಕಿಯು ತನ್ನ ಶಿಶುವನ್ನು ರೆಕ್ಕೆಗಳ ಮೂಲಕ ಪೋಷಿಸುವಂತೆ ಗುರುವು ಶಿಷ್ಯನಿಗೆ ಸ್ಪರ್ಶದಮೂಲಕ ದೀಕ್ಷೆಯನ್ನು ಅನುಗ್ರಹಿಸುವನು. ಇದು ಸ್ಪರ್ಶದೀಕ್ಷೆ. ಮೀನು ತನ್ನ ಮರಿಗಳನ್ನು ವೀಕ್ಷಿಸುತ್ತಲೇ ಪೋಷಿಸುವಂತೆ ಗುರುವು ತನ್ನ ದೃಷ್ಟಿಯಿಂದಲೇ ಶಿಷ್ಯನಿಗೆ ದೀಕ್ಷೆಯನ್ನು ಅನುಗ್ರಹಿಸುವನು. ಇದನ್ನು ದೃಗ್ದೀಕ್ಷೆ ಎನ್ನುವರು. ಆಮೆಯು ತನ್ನ ಶಿಶುಗಳನ್ನು ಚಿಂತನಮಾತ್ರದಿಂದಲೇ ಪೋಷಿಸುವಂತೆ ಗುರುವು ಧ್ಯಾನದಿಂದಲೇ ಶಿಷ್ಯನಿಗೆ ದೀಕ್ಷೆಯನ್ನು ಅನುಗ್ರಹಿಸುವನು ಇದನ್ನು ವೇಧದೀಕ್ಷೆ ಎನ್ನುವರು.

विविध प्रकार की दीक्षाएं रहती है। जैसे पक्षी अपने बच्चों की रक्षा अपने परों से करते हैं वैसे गुरु शिष्य को स्पर्श के द्वारा दीक्षा देकर अनुग्रह करते हैं। यह स्पर्श दीक्षा है। जैसे मछली अपने बच्चों की देखभाल उनको देखते देखते ही करती है वैसे गुरु अपनी दृष्टि से ही शिष्य को दीक्षा देकर अनुगृहीत करते हैं। यह दृगदीक्षा है। जैसे कछुआ माँ अपने बच्चों की देखभाल विचारों से ही करती है वैसे गुरु ध्यान के द्वारा ही शिष्य को दीक्षा देते है। यह वेध दीक्षा है।

There are different types of initiation. As a bird protects its chicks by its wings, in the same way a guru preaches the initiation to his disciple by touching him. This is called as Sparsha initiation. As a fish looks after its fries by its vision only, The Guru offers the initiation to his disciple by his vision too. This is called as visual initiation. The way a tortoise looks after its hatchlings by its thoughts only, the Guru offers the initiation to his disciple through meditation. This is called as the Vedha initiation.

(कुलार्णवतन्त्रम् 14.35,36,37)


ISSN: 2320-740X

# ब्रह्मणः जगत्कारणत्वम्

डा. श्रीकरः जि. एन्.
**प्राध्यापकः, वेदान्तविभागः**

ब्रह्ममीमांसाशास्त्रे **"ब्रह्मविदाप्नोति परम्"** (तै.उ. २\१) इति श्रुतिं मनसि निधाय साधनचतुष्टयसम्पन्नैः मुमुक्षुभिः अद्वितीयं ब्रह्म विचारणीयमिति प्रथमेन सूत्रेण निर्णीतम् – **"अथातो ब्रह्मजिज्ञासा"** (ब्र.सू. १\१\१) इति । अत्र जिज्ञास्यत्वेन विवक्षितस्य अद्वितीयब्रह्मणः साक्षाल्लक्षणकथनमसम्भवमिति अध्यारोपापवादन्यायेन सगुणब्रह्मलक्षणं निर्गुणब्रह्मबोधने उपकारकं भवतीति जगत्कारणत्वं ब्रह्मलक्षणं द्वितीयेन सूत्रेण निरूपितम् । तत्र कार्यनियतपूर्ववृत्तिः कारणम् । तच्च द्विविधम् उपादानकारणं निमित्तकारणं चेति । स्वाभिन्नकार्यजनकत्वम् अथवा स्वस्मिन् कार्यजनिहेतुत्वम् उपादानत्वम् । तच्चोपादानं पुनर्द्विविधं विवर्तोपादानं परिणाम्युपादानं चेति । वेदान्तमतानुसारेण जगतः परिणाम्युपादानं माया, विवर्तोपादानञ्च ब्रह्म । उभयत्रापि उपादानलक्षणं लगति । उपादानसमसत्ताकोऽन्यथा भावः परिणामः, उपादानविषमसत्ताकोऽन्यथा भावः विवर्त इति विवर्तपरिणामयोर्भेदः शास्त्रे प्रसिद्धः । यस्मादुत्पद्यते यस्मिन् लीयते तत् तदुपादानकारणमेव भवति यथा घटस्य मृत् । एवं जगतः उपादानकारणं ब्रह्म । तथा च बादरायणप्रणीतं सूत्रं **"जन्माद्यस्य यतः"** (ब्र.सू. १\१\२) इति । जन्मादि अस्य यत इति पदच्छेदः । आदिपदेन स्थितिप्रलयौ ग्राह्यौ ।**'अस्य'** इति पदेन प्रत्यक्षगोचरः प्रपञ्चः विवक्षितः । **'यतः'** इति कारणनिर्देशः । जगज्जन्मस्थितिलयकारणं ब्रह्म इति सूत्रार्थः । अस्य च सूत्रस्य मूलं श्रुतिवाक्यं **"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म"** (तै.उ ३\१) इति । जन्मादिषु त्रिषु अन्यतरस्य लक्षणस्वीकारेऽपि यद्यपि अतिव्याप्त्यादिकं न भवति तथापि जन्मकारणमात्रोक्तौ स्थितिकारणमन्यत् लयकारणमन्यदिति वस्तुपरिच्छेदः स्यादिति जिज्ञासितम् अद्वैतं ब्रह्म न सिद्ध्यति । अतः त्रिविधं मिलित्वा ब्रह्मलक्षणं विवक्षितम् । अपि च यच्चेतनं तन्निमित्तकारणं यथा कुलाल इति न्यायेन ब्रह्मणः निमित्तकारणत्वमपि सिद्ध्यति । निमित्तकारणत्वं नाम तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् । तच्च ब्रह्मणि सम्भवति श्रुतिदर्शनात् । तथा च ब्रह्मणः उपादानगोचरापरोक्षज्ञानसद्भावे **"यः सर्वज्ञः सर्ववित्"** (मु.उ.१-१-९) इत्यादिश्रुतिर्मानम् । **"सोऽकामयत बहुस्यां प्रजायेयेति"** (तै.उ.२-६) इत्यादिश्रुत्या तादृशचिकीर्षासद्भावः । तादृशकृतौ **"तन्मनोऽकुरुत"** इत्यादिश्रुतिवाक्यं मानम् । सर्वत्र वेदान्तेषु ईक्षापूर्वकस्रष्टृत्वश्रवणात् निमित्तकारणमपि ब्रह्म । निमित्तोपादानकारणयोरन्यतरकारणग्रहणे वस्तुपरिच्छेदः स्यादतः ब्रह्मणः उभयविधकारणत्वं विवक्षितम् । अत एव सूत्रकारः प्रथमाध्यायस्य उपान्ताधिकरणे **"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्"** (ब्र.सू. १\४\२३) इत्यादिसूत्रैः उभयविधकारणं ब्रह्मेऽति ब्रह्मकारणवादं स्पष्टीचकार । जन्माद्यधिकरणे कारणमात्रमुक्त्वा मध्ये उपनिषद्वाक्यानां सयुक्तिकं ब्रह्मणि समन्वयं प्रदर्श्य अन्ते उभयविधकारणप्रदर्शनेन जिज्ञासूनां स्पष्टप्रतिपत्तिर्भवति, उत्तरोत्तरम् अविरोधाध्यायस्य विषयः सपिण्डितः भवतीति सूत्रकृदाशयः । इदं सूत्रकृन्मतं मनसि विचार्य भाष्यकारैः अभिन्ननिमित्तोपादानत्वं ब्रह्मणः लक्षणमस्मिन् जन्माद्यधिकरणे उपपादितम् ।

ननु **"अथातो ब्रह्मजिज्ञासा"** (ब्र.सू. १\१\१) इति जिज्ञासाधिकरणे प्रतिज्ञातस्य निर्गुणब्रह्मणः जागत्कारणत्वं लक्षणं कथं सङ्गच्छत इति चेत् अत्रोच्यते – असाधारणधर्मः लक्षणम् । असाधारणधर्मत्वञ्च लक्ष्येतरावृत्तित्वे सति लक्ष्यमात्रवृत्तित्वम् ।तच्च लक्षणं द्विविधम् – स्वरूपलक्षणं तटस्थलक्षणं चेति । स्वरूपमेव लक्षणं स्वरूपलक्षणम् । यथा प्रकृष्टप्रकाशः चन्द्र इति । **"सत्यं ज्ञानमनन्तं ब्रह्म"** इति ब्रह्मणः स्वरूपलक्षणम् । यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्तकं तत् तटस्थलक्षणम् । यथा गन्धवत्त्वं पृथिव्याः । जगज्जन्मस्थितिलयकारणत्वं ब्रह्मणः तटस्थलक्षणम् । जगत् व्यावहारिकम्, ब्रह्म च पारमार्थिकं त्रिकालाबाध्यम् । कालत्रयेऽपि अविद्यमानं सत् व्यवहारकाले ब्रह्म लक्षयति अतः इदं तटस्थलक्षणम् । जगदुत्पत्तेः पूर्वं ब्रह्मसाक्षात्कारानन्तरं च लक्षणस्य असम्भवात् । जन्मादिसूत्रे 'यतः' इत्यनेन यथा उपादाननिमित्तयोः ग्रहणं तथा तटस्थस्वरूपलक्षणयोरपि ग्रहणं विवक्षितम् । "यतो वा इमानि भूतानि" इत्यादिश्रुत्या उपादानलक्षणमुक्त्वा अन्ते "आनन्दाद्धेव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ति" (तै.उ.३\६) इति आनन्दस्वरूपं ब्रह्मलक्षणं विवृतम् ।

ननु मुमुक्षुभिः साक्षात्कारार्थं ब्रह्मस्वरूपमात्रं विवक्षितं किं तटस्थलक्षणेनेति न च वाच्यम् – प्रकृष्टप्रकाशः चन्द्र इति स्वरूपमात्रकथने इदं स्वरूपं गगनमण्डले कुत्रेति चित्तविक्षेपक्लेशपरिहाराय शाखायां चन्द्र इति तटस्थलक्षणमपेक्षितम् । एवम् आनन्दं ब्रह्मेति स्वरूपमात्रकथने तद्ब्रह्म कुत्रेति जिज्ञासा स्यात् अतः तादृशबुद्धिक्लेशपरिहाराय तटस्थलक्षणमनिवार्यम् । अपि च जिज्ञास्यत्वेन प्रतिज्ञातस्य निर्गुणब्रह्मणः साक्षात् स्वरूपकथनासम्भवात् इदं तटस्थलक्षणम् उपलक्षणतया निर्गुणब्रह्मबोधकमिति न तस्य निष्प्रयोजकत्वम् ।

'क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात्' इति सकर्तृकत्वानुमानेन श्रुतिनिरपेक्षेण ईश्वरं साधयितुं शक्यते इति वैशेषिकादयः मन्यन्ते । तन्मतं निराकर्तुम् अथवा अनुमानमेव सूत्रस्य मूलमिति भ्रान्तिं निवारयितुं श्रुत्यनुसार्यनुमानं श्रुत्यर्थदाढर्याय सहकारिकारणं भवतीति स्वमतं दर्शयितुं भाष्यवचनं प्रवृत्तं यथा – "एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्ते ईश्वरकारणवादिनः" इत्यादि । अस्य वाक्यस्य तात्पर्यं रत्नप्रभायाम् आनन्दगिरिव्याख्याने च इत्थं स्पष्टीकृतम् । तद्यथा – रत्नप्रभायां तु अभिप्रायत्रयं प्रदर्शितम् – एतदेवानुमानं श्रुतिनिरपेक्षण ईश्वरकारणत्वे प्रमाणम् । अथवा श्रुत्यनुग्राहकम् एतदनुमानं स्वतन्त्रं प्रमाणम् । यद्वा अनेन सूत्रेण व्याप्तिज्ञानं सूच्यत इति । यत्र यत्र कार्यत्वं तत्र तत्र सकर्तृकत्वमिति व्याप्तिज्ञानात् जगत्कर्तुः अस्तित्वसिद्धिः, सः कर्ता सर्वज्ञः सर्वकर्तृत्वात् व्यतिरेकेण कुलालवदिति ईश्वरस्य सर्वज्ञत्वादिसिद्धिः इति । अत्र भाष्ये 'मन्यन्ते' इत्यनेन श्रुतिनिरपेक्षेश्वरकारणवादस्य आभासत्वं प्रदर्शितम् । तथा च अङ्कुरादीनां कर्ता जीवो वा तदन्यो वा । नाद्यः, अननुभवात् । नापि द्वितीयः, जीवातिरिक्तस्य सर्वस्य अचेतनत्वात् । अचेतनस्य स्वतः प्रवृत्त्यभावात् । नित्यज्ञानवान् ईश्वरः जगतः कर्ता सूचितः इत्यपि वक्तुं न शक्यते । यतः यः कर्ता सः सशरीरः इति व्याप्त्या ईश्वरस्य शरीराभावात् कर्तृत्वासिद्धिः । किञ्च ज्ञानं मनोजन्यम् । ईश्वरस्य शरीराभावादेव अन्तःकरणस्याप्यभावः । तदभावे च ज्ञानाभावः । ज्ञानाभावे कर्तृत्वं दूरापास्तम् । अतः श्रुतिनिरपेक्षेण केवलेनानुमानेन जगतः ईश्वरकर्तृत्वं न सिद्ध्यति । अतः अतीन्द्रियविषये श्रुतिरेव प्रमाणम् ।


ISSN: 2320-740X

आनन्दगिर्याम् अस्य वाक्यस्य तात्पर्यं त्रिधा प्रकटीकृतम् । यद्यपि ब्रह्मलक्षणपरमिदं सूत्रं सयुक्तिकम् । यतः अत्र अन्वयव्यतिरेकाभ्यां ब्रह्मलक्षणं सिद्ध्यति । तद्यथा – ब्रह्म जगज्जन्मादिकरणम्, यत् जगज्जन्मादिकारणं न भवति तद्ब्रह्म न भवति इति । एवं सिद्धेऽपि ब्रह्मणः स्वप्रकाशचैतन्यस्वरूपत्वम् अनुमानादिना न सिद्ध्यति । किञ्च कार्यलिङ्गकानुमानेन कारणास्तित्वे सिद्धेऽपि तत्स्वरूपावगमार्थं श्रुतिरेव शरणीकरणीया ।

क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् घटवत् इत्यनुमानेन कर्तृसिद्धिर्भवति । किन्तु स च कर्ता एको वा अनेको वा इति निर्णयस्तु अनुमानादिना न भवति । कर्त्रा कर्तृभिर्वा सहितं सकर्तृकम् । लोके एककर्तृकं घटादिकार्यं बहुकर्तृकं प्रासादादिकञ्च दृश्यते । अनुमानं तु सकर्तृकत्वं प्रसाध्य एकत्वानेकत्वविषये न प्रवर्तते । तत्र लाघवानुगृहीतेन तर्केण एककर्तृकत्वे सिद्धे ईश्वरस्य सर्वज्ञत्वादिकं प्रसरति इतरथा न । अपि च अनेन सूत्रेण यदि अनुमानप्रमाणं विवक्षितं चेत् प्रमाणपरमुत्तराधिकरणं व्यर्थं भवेत् । तत्र च ब्रह्म शास्त्रैकप्रमाणगम्यमिति प्रतिपाद्य अनेन सूत्रेण उपक्षिप्तं ब्रह्मणः सर्वज्ञत्वं शास्त्रयोनित्वादिना दृढीक्रियते । अपि च उत्तरेषु अधिकरणेषु वेदान्तवाक्यानामेव तात्पर्यनिर्णयः परिलक्ष्यते । तस्मात् श्रुतिनिरपेक्षणमनुमानम् ईश्वरसाधकमिति तार्किकाणाम् अभिनिवेशमात्रम् ।

**********

## शास्त्रकोषः

**-ः वाग्वर्धिनीपरिषद् ः-**

**घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी । कुलं शीलं तथा जातिरष्टौ पाशाः प्रकीर्तिताः ॥**
**पाशबद्धः पशुर्ज्ञेयः पाशमुक्तो महेश्वरः । तस्मात् पाशहरो यस्तु स गुरुः परमो मतः ॥**

ಎಂಟು ವಿಧವಾದ ಪಾಶಗಳಿಂದ ಬಂಧನಕ್ಕೊಳಗಾಗಿರುವ ಜೀವನೇ ಪಶು. ಯಾವುದೇ ಪಾಶಕ್ಕೆ ಒಳಗಾಗದಿರುವವನೇ ಈಶ್ವರನು. ಜೀವನನ್ನು ಪಾಶದಿಂದ ಬಿಡುಗಡೆಗೊಳಿಸಬಲ್ಲವನೇ ಗುರು. ಕರುಣೆ, ಸಂಶಯ, ಭಯ, ಲಜ್ಜೆ, ಅಸಹ್ಯ, ಕುಲ, ಶೀಲ ಹಾಗೂ ಜಾತಿ ? ಇವು ೮ ವಿಧವಾದ ಪಾಶಗಳು.

आठ प्रकार के पाशों से (बन्धनों से) बद्ध हुआ हीव ही पशु कहा जाता है । किसी भी बन्धन में न गिरनेवाला ईश्वर है । जीव को बन्धों से मुक्त करानेवाला ही गुरु है । करुणा, संशय, भय, शरम, कुल, शील, तथा जाति यह आठ प्रकार के पाश हैं ।

The one who is arrested by 8 types of snares is called as Jeeva. Who is free from all types of snares is called as Ishwara. One who releases us from snares is called as a Guru. Mercy, doubt, fear, shame, ugh, clan, virtue and cast these are the 8 types of snares.

(कुलार्णवतन्त्रम् 13.90, 91)

# व्युत्पत्तिवादे पञ्चमीविभक्त्यर्थविचारः

विद्वान् श्यामसुन्दरः ए.
**प्राध्यापकः, न्यायविभागः**

"वृक्षात् पर्णं पतति" इत्यादौ विश्लेषावधिभूतस्य वृक्षादेः "ध्रुवमपायेऽपादानम्" (पा.सू १.४.२४) इति सूत्रेण अपादानसंज्ञायां तद्वाचकवृक्षपदोत्तरम् "अपादाने पञ्चमी" इति सूत्रेण पञ्चमी विहितास्ति । तत्र पत्रादिनिष्ठपतनक्रियां प्रति वृक्षादेरपादानत्वम् । अपादानत्वं च स्वनिष्ठभेदप्रतियोगितावच्छेदकीभूतक्रियाजन्यविभागाश्रयत्वरूपम् । तत्र यदवधिका पतनक्रिया सः स्वपदग्राह्यः । तथा च स्वं वृक्षः, तन्निष्ठभेदः 'पतनक्रियावान् न' इति प्रतीतिसाक्षिकः पतनक्रियावद्भेदः , तत्प्रतियोगितावच्छेदकीभूता क्रिया पर्णादिनिष्ठा तज्जन्यविभागाश्रयत्वं वृक्षस्यास्तीति तस्यापादानत्वम् उपपद्यते । अत्र अपादानत्वशरीरे क्रियायां स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वविशेषणानुपादाने, पतनाश्रयस्यापि पर्णादेः अवधित्वापत्तिः, विभागस्य द्विनिष्ठत्वेन स्वगतपतनजन्यवृक्षविभागाश्रत्वस्य स्वस्मिन्नबाधात् । तादृशविशेषणे तु स्वनिष्ठपतने स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वविरहान्न दोषः । वृक्षात् पर्णं पतति इत्यादौ वृक्षपदोत्तरपञ्चम्याः भेदप्रतियोगितावच्छेदकत्वं विभागश्चार्थः, तत्र भेदे विभागे च प्रकृत्यर्थस्य वृक्षादेः आधेयतासम्बन्धेनान्वयः, तादृशभेदप्रतियोगितावच्छेदकत्वस्य आश्रयतासम्बन्धेन, विभागस्य च जनकतासम्बन्धेन च धात्वर्थपतनक्रियायामन्वयः धात्वर्थस्य आख्यातार्थाश्रयत्वे निरूपितत्वसम्बन्धेन, आख्यातार्थस्य स्वरूपसम्बन्धेन प्रथमान्तार्थे पर्णेऽन्वयः इति 'वृक्षनिष्ठभेदप्रतियोगितावच्छेदकत्वे सति वृक्षनिष्ठविभागजनिका या पतनक्रिया तदाश्रयः पर्णम्' इत्याकारकः शाब्दबोधः तादृशवाक्याज्जायते ।

ननु यद्यत्र नञसमभिव्याहारस्थले पञ्चम्यर्थविभागस्य जनकतासम्बन्धेन पतनक्रियायामन्वयः, तर्हि नञ् समभिव्याहारस्थले 'वृक्षात् पर्णं पतति न स्वस्मात्' इत्यत्र जनकतासम्बन्धावच्छिन्नप्रतियोगिताकः स्व(पर्ण)निष्ठविभागाभावः नञा बोधनीयः समानयोगक्षेमन्यायेन, किन्तु स चाप्रसिद्धः । जनकत्वस्य वृत्त्यनियामकत्वेन वृत्त्यनियामकसम्बन्धस्य अभावप्रतियोगितावच्छेदकत्वाभावात् , जनकतासम्बन्धावच्छिन्नप्रतियोगितायाः अप्रसिद्धेरिति चेत् , भवतु तर्हि विभागजनकत्वस्यैव पञ्चम्यर्थत्वम्, तस्य आश्रयतासम्बन्धेन क्रियायामन्वयः तस्य च वृत्तिनियामकत्वेनादोषात् ।

नन्वत्र पञ्चम्याः भेदप्रतियोगितावच्छेदकत्वविभागजनकत्वोभयार्थकत्वे "वृक्षात् पर्णं पतति न स्वस्मात्" इत्यादि नञ् समभिव्याहारस्थले नञा पञ्चम्यर्थयोः तादृशयोः द्वयोरभावद्वयमुपस्थाप्यते आहोस्वित् यथासम्भवमेकतरस्याभावो वा । न ह्यत्र पक्षद्वयमपि साधीयः । यतो हि प्रथमपक्षे, पूर्वोक्तनञ्समभिव्याहारस्थले, पर्णनिष्ठपतनक्रियायां स्वात्मकपर्णनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावस्य सत्त्वेऽपि स्वात्मकपर्णनिष्ठविभागजनकत्वस्यैव सत्त्वेन तदभावस्य बाधितत्वेन तादृशप्रयोगानुपपत्तेः । एवं 'वृक्षात् पतति न भूतलात्' इत्यादौ पतनक्रियायां भूतलनिष्ठविभागजनकत्वाभावस्य सत्त्वेऽपि भूतलनिष्ठभेदप्रतियोगितावच्छेदकत्वस्यैव सत्त्वेन तदभावस्य बाधितत्वेन बाधितार्थबोधकत्वापत्तेः । द्वितीयपक्षे तु

 ISSN: 2320-740X

'वृक्षात् पर्णं पतति न पर्णात्' इत्यादौ पत्रगतपतनक्रियायां पर्णनिष्ठविभागजनकत्वस्य, पर्णान्तरनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य च द्वयोरेव सत्त्वेन तदभावस्य तत्र बाधात् अयोग्यतापत्तेः इति चेन्न, विभागो जनकत्वं च पञ्चम्यर्थः । जनकत्वं चात्र फलोपधानरूपम्, तच्च कार्याव्यवहितप्राक् क्षणावच्छेदेन कार्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपकार्यव्यापकत्वे सति कार्यसामानाधिकरण्यरूपम् । तत्र विभागे पञ्चमीप्रकृत्यर्थस्य वृक्षादेः स्वावधिकत्वसम्बन्धेनान्वयः, तादृशविशिष्टविभागस्य च निरूपितत्वसम्बन्धेन अपरपञ्चम्यर्थे जनकत्वे, तादृशविशिष्टनिरूपितजनकत्वस्य च आश्रयतया धात्वर्थपतनक्रियायाम् अन्वयः इति नञ्समभिव्याहारस्थले वृक्षात् पर्णं पतति इत्यत्र "वृक्षावधिकत्वविशिष्टविभागनिरूपितजनकतवत्पतनाश्रयः पर्णम्" इति शाब्दबोधो जायते ।

'वृक्षात् पर्णं पतति न स्वस्मात्' इत्यत्र नञ्समभिव्याहारस्थले पञ्चमीप्रकृत्यर्थपर्णावधिकत्वविशिष्टविभागोपधायकं न भवति वृक्षपत्रविभागजनकं पत्रगतं पतनम् । पत्रस्य स्वावधिकत्वविशिष्टविभागानधिकरणत्वेन फलोपधायकत्वलक्षणे तादृशविभागाधिकरणवृत्तित्वरूपं विशेष्यदलं पत्रगतपतने नायाति । अतः पतने तादृशजनकत्वाभावः नञा बोद्ध्यत इति नानुपपत्तिस्तादृशप्रयोगस्य ।

**विभागवाचकधातुसमभिव्याहृतपञ्चम्यर्थः –**

वृक्षाद्विभजते इत्यादौ विभागवाचकधातुसमभिव्याहारस्थले स्वरूपसम्बन्धविशेषात्मकावधित्वम् पञ्चम्यर्थः । तत्राधेयतासम्बन्धेन प्रकृत्यर्थवृक्षस्य, पञ्चम्यर्थस्यावधित्वस्य निरूपकत्वसम्बन्धेन धात्वर्थविभागे, विशिष्टविभागस्य च निरूपितत्वसम्बन्धेन आख्यातार्थाश्रयत्वेऽन्वय इति तस्माद्वाक्यात् 'वृक्षावधिकत्वविशिष्टविभागनिरूपिताश्रयतावत्पर्णम्' इति शाब्दधीर्जायते । अत्र च तादृशविशिष्टविभागाश्रयत्वबोध एवाङ्गीकार्यः । अन्यथा विभागस्य द्विनिष्ठतया वृक्षावधिकविभागश्रयत्वस्य वृक्षेऽबाधिततया "वृक्षः स्वस्माद्विभजते" इति प्रयोगापत्तेः । यथा च संयोगस्य द्विनिष्ठत्वेऽपि स्वप्रतियोगिकत्वविशिष्टसंयोगस्य स्वस्मिन्नवृत्तित्वं तथैव स्वावधिकविभागस्य स्वस्मिन्वृत्तित्वेऽपि स्वावधिकत्वविशिष्टविभागस्य स्वस्मिन्नवृत्तित्वमेवेति न तादृशप्रयोगापत्तिः ।

**मतभेदेन पञ्चम्यर्थविचारः –**

"वृक्षात् पर्णं पतति" इत्यादौ विभागः, अधिकरणत्वं, प्रयोजकत्वम् एतत्त्रयं पञ्चम्यर्थः । तत्र पञ्चम्यर्थविभागे प्रकृत्यर्थस्य वृक्षादेः स्वावधिकत्वसम्बन्धेन, तस्य च विभागस्य अपरपञ्चम्यर्थेऽधिकरणत्वे विशिष्टनिरूपितत्वात्मकनिरूपितत्वविशेषसम्बन्धेन, विभागविशिष्टाधिकरणत्वस्य अन्यपञ्चम्यर्थप्रयोजकत्वे निरूपितत्वसम्बन्धेन, प्रयोजकत्वस्य धात्वर्थपतनक्रियायाम् आश्रयतासम्बन्धेन, तादृशक्रियायाः आख्यातार्थाश्रयत्वे निरूपितत्वसम्बन्धेन चान्वय इति तादृशवाक्यात् 'वृक्षावधिकत्वविशिष्टविभागनिरूपिताधिकरणतानिरूपित-प्रयोजकताश्रयपतननिरूपिताश्रयतावत्पर्णम्' इति बोधो जायते । अत्र च पत्रसमवेतपतनक्रियायाः स्वाश्रयवृत्तौ वृक्षावधिकविभागाधिकरणतायां प्रयोजकत्वमिति फलति । कारणस्यैव स्वाश्रयनिष्ठकार्याधिकरणतां प्रति प्रयोजकत्वात् । अत्र च विभागस्य विशिष्टनिरूपितत्वसम्बन्धेन अधिकरणतांशे अन्वयस्य विवक्षितत्वात् , "पर्णं स्वस्मात् पतति" इति प्रयोगस्य नापत्तिः । यतो हि पर्णावधिकत्वविशिष्टविभाग-

निरूपिताधिकरणता च पर्णात्पतति वस्तुन्येव सम्भवति । न तु स्वस्मिन्पर्णे, तादृशाधिकरणतां प्रति न पत्रगतक्रियायाः प्रयोजकत्वं किन्तु तादृशवस्त्वन्तरनिष्ठक्रियायाः एवेति ।

**********

## शास्त्रकोषः

**-ः वाग्वर्धिनीपरिषद् ः-**

**मूलाधारे समुत्पन्नः पराख्यो नादसम्भवः। स एवोर्ध्वतयानीतः स्वाधिष्ठाने विजृम्भितः॥**
**पश्यन्त्याख्यामवाप्नोति तथैवोर्ध्वं शनैः शनैः। अनाहते बुद्धितत्वसमेतो मध्यमाभिधः।**
**तथा तयोर्ध्वतुन्नः सन् विशुद्धौ कण्ठदेशतः॥ वैखर्याख्यः।** (नित्यातन्त्रम्)

ಮೂಲಾಧಾರಚಕ್ರದಲ್ಲಿ ಉದಯಿಸುವ ನಾದವೇ "ಪರಾ" ಎನ್ನಲ್ಪಡುತ್ತದೆ. ಅದೇ ನಾದವು ಮೇಲಕ್ಕೇರುತ್ತಾ ಸ್ವಾಧಿಷ್ಠಾನಚಕ್ರದಲ್ಲಿ ವಿಜೃಂಭಿಸಿದಾಗ "ಪಶ್ಯಂತೀ" ಎಂದು ಕರೆಯಲ್ಪಡುತ್ತದೆ. ನಿಧಾನವಾಗಿ ಇನ್ನೂ ಮೇಲಕ್ಕೇರುತ್ತಾ ಅನಾಹತ ಚಕ್ರವನ್ನು ತಲುಪಿ ಬುದ್ಧಿಗೋಚರವಾದಾಗ "ದುದ್ಯಮಾ" ಎಂಬುದಾಗಿ ಕರೆಯಲ್ಪಡುತ್ತದೆ. ಇನ್ನೂ ಮೇಲಕ್ಕೇರುತ್ತಾ ಕಂಠದ ಬಳಿ ವಿಶುದ್ಧ ಚಕ್ರವನ್ನು ತಲುಪಿದಾಗ ಅದೇ ನಾದವು "ವೈಖರಿ" ಎಂಬುದಾಗಿ ಕರೆಯಲ್ಪಡುತ್ತದೆ.

मूलाधार नामक चक्र में उत्पन्न होनेवाला नाद ही "परा" कहलाता है। वही नाद उपर चढने पर स्वाधिष्ठान चक्र में जब विजृंभण करता है तब पश्यंती कहलाता है। धीरे से और भी उपर जाने से अनाहत चक्र पहुँचकर बुद्धि से दिखाई देने पर मध्यमा कहलाता है।और भी ऊर्ध्वगामी होने पर गले में विशुद्ध चक्र तक पहुँचने वही नाद वैखरी नाम से जाना जाता है।

The voice/ sound which is emerged in the *Mooladhaar* chakra is called as *Paraa*. The same sound going upward, resides in the *Swadhishthana* chakra, and is called as *Pashyantee*. When it climbs up slowly, it reaches the *Anahata* chakra and is visible by our mind. That is called as *Madhyama*. The same sound climbing even more reaches the throat to the *Vishuddha* chakra and is being called as *Vaikharee*.

**********

**द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदकौ। परिव्राड् योगयुक्तश्च रणे चाभिमुखे हतः॥** (पराशरस्मृतिः तृ. 37)

ಯೋಗಿಯಾಗಿರುವ ಸಂನ್ಯಾಸಿ ಹಾಗೂ ಯುದ್ಧದಲ್ಲಿ ಶತ್ರುಗಳಿಗೆ ಇದಿರಾಗಿ ದಿಟ್ಟತನದಿಂದ ಹೋರಾಡಿ ಮಡಿದ ವೀರ ಇವರೀರ್ವರು ಮಾತ್ರ ಲೋಕದಲ್ಲಿ ಸೂರ್ಯಮಂಡಲವನ್ನು ಭೇದಿಸಿ ಮುನ್ನಡೆದು ಉನ್ನತಸ್ಥಾನವನ್ನು ಪಡೆಯಬಲ್ಲರು.

कोई संन्यासी योगी, तथा युद्धभूमि में शत्रु के सामने वीरावेश से खडा हुआ वीर यह दो लोग ही सूर्यमण्डल को भेदकर आगे जाकर उच्चस्थान प्राप्त कर सकते हैं।

A Yogi Saint or a soldier standing in front of the enemy in rage are the only two personalities who could cross the solar system and obtain the highest place.


ISSN: 2320-740X

# तत्त्वचिन्तामणौ समवायवादः

डा. आर्. नवीनः
**प्राध्यापकः, न्यायविभागः**

तत्त्वचिन्तामणौ गुणादिविशिष्टबुद्धिविषयत्वेन समवायः सिद्ध्यतीति अनायासेन मणिकृद्भिः साधितम् । तत्र विशिष्टबुद्धिविषयः शुद्धाभेदः सम्बन्धो भवतु इति पूर्वपक्षमुद्भाव्य तन्निराकरणञ्च कृतम् । तदत्र प्रकटीक्रियते ।

**गुणगुणिनोः अभेद इति पक्षः**

'नीलो घटः' इत्याकारकविशिष्टबुद्धिः न विशेषणस्य समवायावगाहिनी, किन्तु अभेदविषयिणी इति । तत्र प्रमाणं तु 'नीलो घटः' इति अबाधिताभेदानुभव एव । यथा "दण्डी पुरुषः" इत्याकारकः अबाधितानुभवः दण्डिपुरुषयोः अभेदम् अवगाहते । तथा 'नीलो घटः' इत्याकारकः नीलघटयोः अभेदम् अवगाहत इति । यदि "नीलो घटः" इति 'दण्डी पुरुषः' इति च विशिष्टबुद्धी विशेषणसम्बन्धावगाहिन्यौ स्तः, तर्हि नीलो घटः इत्याकारकविशिष्टबुद्धिवद् दण्डः पुरुषः इत्याकारकविशिष्टबुद्धिः स्यात् । यद्वा दण्डी पुरुषः इत्याकारकविशिष्टबुद्धिवत् 'नीलो घटः' इत्याकारिका वा स्यात् । वैषयवैलक्षण्याद्धि ज्ञानवैलक्षण्यमिति न्यायेन 'नीलो घटः' इति बुद्धौ अभेदो विषयः, दण्डी पुरुषः इति बुद्धौ विशेषणसम्बन्धः संयोगादिः विषय इति विषयभेदे ज्ञानयोः असमानाकारकता उपपद्यते इति । 'नीलो घटः' इति प्रतीत्या अभेदावगाहने प्रमाणान्तरं प्रदर्श्यते । कयाचित् प्रतीत्या अभेदावगाहने आर्थशाब्दयोः सामानाधिकरण्ययोः प्रयोजकत्वमुपगम्यते । आर्थं सामानाधिकरण्यं नाम विशेषणतावच्छेदकधर्मस्य विशेष्यतावच्छेदकधर्मस्य च एकाधिकरणवृत्तित्वम् । शाब्दं सामानाधिकरण्यं नाम भिन्नप्रवृत्तिनिमित्तकयोः पदयोः एकार्थबोधकत्वम् । यथा 'चैत्रः सुन्दरः' इत्यादौ विशेषणतावच्छेदकधर्मस्य सुन्दरत्वस्य विशेष्यतावच्छेदकधर्मस्य चैत्रत्वस्य च चैत्रवृत्तित्वरूपसामानाधिकरण्यम् आर्थम् विद्यते । एतच्च सामानाधिकरण्यं ज्ञातं सत् पदार्थयोः अभेदम् अनुमापयति । एवं चैत्रपदसुन्दरपदयोः एकार्थबोधकत्वमपि विद्यते । एतच्च पदार्थयोः अभेदे सत्येवोपपद्यते नान्यथा । तथा प्रकृतेऽपि 'नीलो घटः' इत्यत्रापि विशेषणतावच्छेदकनीलत्वविशेष्यतावच्छेदकघटत्वयोः एकवृत्तित्वज्ञानम् अभेदं ज्ञापयति । एवं नीलपदघटपदयोः भिन्नप्रवृत्तिनिमित्तकयोरपि एकार्थबोधकत्वञ्च विद्यत इति एतच्च सामानाधिकरण्यम् अभेदे सत्येव उपपद्यत इति सामानाधिकरण्यधीः नीलघटयोः अभेदं साधयति ।

न च 'नीलो घटः' इत्यादौ नीलरूपघटयोः अभेदे सत्येव नीलपदघटपदयोः शाब्दं सामानाधिकरण्यम् उपपद्यत इत्यादि यदुक्तं तदनादेयम् । नीलपदं नीलवत्परम् । नीलवतः घटस्य च अभेदस्तु इष्यत इति एकार्थबोधकत्वं मतुबन्तनीलपदघटपदयोः वर्तत इति वाच्यम् । तत्र मतुपः अश्रवणात् । 'गुणवचनात् मतुपो लुगिष्टः' इत्यनुशासनात् नीलपदोत्तरमतुपो लोपात् । यद्वा नीलवदभेदोपपादनाय नीलपदं नीलवत्परम् इति स्वीकारात् ।

ISSN: 2320-740X 

'नीलो घटः' इति शब्दप्रयोगः न नीलघटयोः अभेदसाधकः । अपि तु 'नीलो घटः' इत्याकारकप्रतीतिरेव अभेदसाधिका इति 'नीलो घटः' इति शब्दप्रयोगोपपादनार्थं न वयं समागताः इति । अपि च गौरवभिया पदेऽपि न लक्षणादिकल्पना, मुख्यार्थस्य नीलादिगुणादेः अभेदेन अन्वये बाधासम्भवात् ।

**गुणगुणिनोः अभेद इति पक्षे अस्वारस्यम्**

"शुक्लः पटः" इत्यत्र गुणवाचकशुक्लपदस्य पटपदस्य च एकार्थबोधकत्वरूपं शाब्दं सामानाधिकरण्यं विद्यते तच्च अभेदे सत्येव उपपद्यत इति शुक्लादिगुणस्य पटस्य च अभेदसाधने युक्तिः। वक्ष्यमाणाभिः सप्तभिः आपत्तिभिः सा च न निराक्रियते । तथा हि

(१) शुक्लपदपटपदयोः एकार्थकत्वे "घटो घटः", "घटः कुम्भः" इति सहप्रयोगः यथा न विद्यते तथा 'शुक्लः पटः' इत्यपि प्रयोगो न स्यात् ।
(२) पटादीनां शुक्लाभेदात् अन्धस्य पटत्वाचप्रत्यक्षवत् पटाभिन्नस्यापि शुक्लादेरपि त्वाचं स्यात् ।
(३) अन्धस्य रूपस्याप्रत्यक्षवत् तदभिन्नस्य पटादेरपि अप्रत्यक्षं स्यात् ।
(४) महारजतरक्ते पटग्रहवत् पटाभिन्नस्य शुक्लस्यापि ग्रहः स्यात् , शुक्लाग्रहवत् शुक्लाभिन्नस्य पटस्यापि अग्रहः स्यात् ।
(५) 'पटमानय' इति वाक्ये श्रुते पटानयने प्रवृत्तिरिव पटाभिन्नशुक्लस्याप्यानयने प्रवृत्तिस्स्यात् इति ।
(६) रक्तादौ पटे "अशुक्लः पटः" इति प्रामाणिकः शब्दप्रयोगस्तु दृश्यते । तत्रैव 'अपटः पटः' इति तु प्रयोगः अप्रामाणिकः इत्यपि दृश्यते । पटस्य शुक्लाभिन्नत्वे अशुक्लः पटः इति शब्दप्रयोगस्यापि अप्रामाण्यं स्यात् ।
(७) घटादौ अग्निसंयोगेन श्यामरूपं नश्यति, रक्तरूपम् उत्पद्यते इति वस्तुस्थितिः । गुणिनः घटादेः रूपादिगुणाभिन्नत्वे घटादौ अग्निसंयोगेन श्यामरूपस्य नाशे तदभिन्नस्य घटादेः नाशप्रसङ्गः। एवं घटादौ अग्निसंयोगेन पूर्वाननुभूतरक्तरूपव्यक्तेरुत्पत्तौ तदभिन्नस्य घटादेः पूर्वाननुभूतस्य उत्पत्तिः स्यात् । न चेष्टापत्तिः, सोऽयं घटः इति प्रत्यभिज्ञानानुभवापलापापत्तिश्च स्यात् । तथा च निरुक्तदूषणेन गुणगुणिनोः अभेदः न सम्भवति इति ।

**********


ISSN: 2320-740X

# सामाजिकपरिवर्तनम्

डा. नारायणवैद्य:

**प्राध्यापकः, शिक्षाविभागः**

परिवर्तनं समाजस्य नियम: वर्तते । सदैव समाज: परिवर्तित: भवति । परिवर्तनरहित: समाज: एव नास्ति । क्वचित् समाजस्य परिवर्तनं मन्दं मन्दं भवति । क्वचित् समाजस्य परिवतनं वेगेन भवति । अत: समाज: परिवतनशील: इति वक्तव्यम् । यदा समाज: समारब्ध: तदा आरभ्य आवासव्यवस्थायाम्, भोजनक्रमे, पारिवारिकव्यवस्थायाम्, सामाजिकमूल्येषु च परिवर्तनं दृश्यते । असौ परिवर्तनं सामाजिकपरिवर्तनमित्यभिधीयते ।

प्रत्येकं समाजस्यापि सभ्यतासंस्कृत्यो: परिवर्तनं जायते । परिवर्तनस्य मुख्यं कारणं तु क्रियाशीलता अस्ति । भगवद्गीतायापि उच्यते –

**न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।**
**कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥** (भगवद्गीता 3.5)

सामाजिकपरिवर्तनम् एका प्रक्रिया वर्तते । यथा -

व्यक्तीनाम् अनुभवेषु परिवर्तनम्

↓

व्यक्तीनां दृष्टिकोणेषु परिवर्तनम्

↓

व्यक्तीनां विचारेषु परिवर्तनम्

↓

सामाजिकान्त:क्रियासु परिवर्तनम्

↓

सामाजिकसम्बन्धेषु परिवर्तनम्

↓

सामाजिकसंरचनासु परिवर्तनम्

↓

सामाजिकपरिवर्तनम्

**सामाजिकपरिवर्तनस्य विशेषता:**

1. सामाजिकपरिवर्तनं विश्वव्यापिनी प्रक्रिया अस्ति । सामाजिकपरिवर्तनं विश्वेऽस्मिन् प्रत्येकं समाजे जायते । न कुत्रापि स्थिर: समाज: अवलोक्यते ।
2. समुदायस्य परिवर्तनं सामाजिकपरिवर्तनं भवति ।
3. सामाजिकपरिवर्तनम् अनियमितं सापेक्षितं च भवति । विविधप्रकारेण विभक्तेषु समूहेषु समानतया परिवर्तनं न भवति । परिवर्तनं सर्वदा असमान: एव भवति ।
4. सामाजिकपरिवर्तनस्य भविष्यं वक्तुं न शक्यते । आकस्मिककारकाणि सामाजं परिवर्तयन्ति ।

विलबर्ट इ॰ मोर (Wilbert E. Moore, 1974) महोदय: आधुनिकसमाजस्य दृष्ट्या समाजिकपरिवर्तनस्य सप्त विशेषता: निरूपयति । यथा –

1. सामाजिकपरिवर्तनं निश्चितम् । समाजस्य पुनर्निर्माणसमये परिवर्तनं शीघ्रं भवति ।
2. साम्प्रतं परिवर्तनप्रक्रिया वेगेन जायमाना अस्ति । अद्यत्वे समाजस्य परिवर्तनं स्पष्टतया द्रष्टुं शक्यते ।
3. परिवर्तनं प्रत्येकं सामाजिकजीवनक्षेत्रे द्रष्टुं शक्यते । भौतिकवस्तूनां क्षेत्रे जनानां विचारेषु विभिन्नसंस्थानानां तुलनायां च समधिकवेगेन परिवर्तनं जायमानमस्ति ।
4. अस्माकं विचारा: सामाजिकसंरचनायां स्वाभाविक: परिवर्तनप्रभाव: समधिक: भवति ।
5. सामाजिकपरिवर्तनम् अनुमातुं शक्यते, किन्तु वर्तमानसमये परिवर्तनस्वरूपस्य भविष्यं वक्तुं नैव शक्यते ।
6. सामाजिकपरिवर्तनं गुणात्मक: (Qualitative) भवति । समाजस्य एक: भाग: अपरं भागं परिवर्तयति । इयं प्रक्रिया तावत्पर्यन्तं प्रचलति यावत्पर्यन्तं समाज: दुष्टगुणेन प्राभावित: न भवति ।
7. अद्यत्वे प्रत्येकं समाजे नियोजनेन (Planning) सामाजिकपरिवर्तनं नियन्त्रयित्वा वाञ्छितलक्ष्यं प्रति क्रियाशीलं कर्तुं शक्यते ।


ISSN: 2320-740X

सामाजिकजीवनस्य कस्यापि पक्षस्य केनापि प्रभावेण जायमानं परिवर्तनं सामाजिकपरिवर्तनमिति व्यवह्रियते । अथवा सभ्यतासंस्कृत्योः परिवर्तनं सामाजिकपरिवर्तनम् इत्यपि वक्तुं शक्यते । अतः स्पष्टं भवति यत् सामाजिकपरिवर्तनस्य क्षेत्रं व्यापकं वर्तते इति । तत्र निम्नाङ्कितानि तत्त्वानि सामाजिकपरिवर्तने अन्तर्भवन्ति । यथा –

1. आर्थिकपरिवर्तनम्
2. राजनैतिकं परिवर्तनम्
3. धार्मिकं परिवर्तनम्
4. नैतिकं परिवर्तनम्
5. वैज्ञानिकं परिवर्तनम्
6. शैक्षिकं परिवर्तनम्
7. संस्कृतीकरणम्

अत्रेदम् अवगन्तव्यम् अस्ति यत् उपर्युक्तानंशान् अतिरिच्य मानवानां सामाजिकीकरणविधौ जायमानं परिवर्तनम्, तेषां व्यक्तित्वनिर्माणपरिवर्तनं च सामाजस्य परिवर्तनं करोति इति । एवमेव अन्वेषणम्, आविष्कारः, प्रसारः, आन्तरिकविभेदीकरणम् इत्यादयः सामाजिकस्रोतांसि अपि सामाजिकपरिवर्तने कारणीभूतानि भवन्ति इत्यलं पल्लवेन ।

**सन्दर्भग्रन्थाः**

1. उदीयमान भारतीय समाज में शिक्षा – डा. जे एस वालिया, अहम् पाल पब्लिशर्स, जालान्धर
2. सामाजिक अध्ययन शिक्षाण – श्रीमती राजकुमारी शर्मा, राधा प्रकाशन मन्दिर, आगरा
3. General Sociology – Sri C N Shankar Rao, Jai Bharat Prakashan, Manglore

**********

# पुराणेतिहासयोश्श्राद्धविमर्शः

डा. प्रमोदभट्टः
प्राध्यापकः, व्याकरणविभागः

विदन्त्येव भारतवर्षस्य ज्ञानपरम्परा वेद-पुराणेतिहास-महाकाव्य-नाटक-शास्त्रव्याख्यानादिषु ग्रन्थरत्नेषु प्रवहतीति । तत्र चत्वारो वेदा: ऋग्यजुस्सामाथर्वाख्यास्साङ्गा: इति प्रसिद्धा: । तथैव पुराणान्यष्टादश, रामायण-महाभारताख्यावितिहासौ, धर्मादिबोधकानि शास्त्राणि, तेषां भाष्याणि व्याख्यानानि च महर्षिभिराचार्यै: रचितानि, कालिदासादिमहाकविविरचितानि महाकाव्यनाटकादीनि असङ्ख्यानि राजन्ते लोकेऽस्मिन् ।

तत्र "वेदोऽखिलो धर्ममूलम्" इति वेदस्य प्रथमं स्थानम् । स च वेदो ज्ञातुमशक्य: साधारणजनैः । वेदानाम् उपबृंहणं कार्यम् इतिहासपुराणाभ्याम् । यदुक्तं प्राचीनै: "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" इति । एतानि वेदोपबृंहणत्वेन ख्यातानि इतिहासपुराणानि कदा उत्पद्यन्त ? कस्तेषां कर्ता ? तदध्ययनस्य मुख्यं प्रयोजनं किम् ? इति विचारणीयम् । इतिहासत्वेन प्रसिद्धं रामायणादिकाव्यम्, तच्च महर्षिणा वाल्मीकिना रचितम्, धर्मविग्रहरूपस्य दाशरथे: श्रीरामचन्द्रस्य कथां तद्विस्तरेण कथयति । अन्यश्चेतिहास: महाभारतनाम्ना प्रसिद्धो लक्षश्लोकात्मको ग्रन्थ: कुरुवंशस्य राज्ञां चरितं निरूपयति । अस्य च कर्ता भगवदवतारत्वेन विख्यातो व्यासमहर्षि: । एताभ्यां द्वाभ्याम् अपि वेदवेद्यस्य परस्य पुंस: महिमा गीयते इति सुविदितं सर्वेषाम् । अनयोरितिहासयो: अनुवादा:, सङ्ग्रहा:, व्याख्या:, रूपान्तराणि च जगत: सकलासु भाषासु बोभूयन्ते । प्रायो नास्त्येव कोऽपि भारतवर्षे यो रामायणस्य महाभारतस्य च कथां न श्रुतवान् इति ।

**पुराणानि –**

पुराणानां तावती प्रसिद्धि: अद्य न विद्यते । तथापि तेषां प्रामुख्यं विपश्चिदपश्चिमैर्ज्ञातमेव । भारतवर्षस्य नानाप्रदेशेषु विराजमानानां तीर्थानां, क्षेत्राणां, देवालयानां च माहात्म्यं ग्रहस्थादिधर्माणाम्, आचाराणाम् विषया: पुराणेषूपलभ्यन्ते । महाकवीनां काव्यानाम्, नाटकानां च बहूनां मूलं पुराणेषु प्राप्यते । देशस्य प्राचीनानां राजवंशानां चरितं सूक्ष्मरूपेण पुराणेषूपलभ्यते । अस्य देशस्य जनताया: आचाराणाम्, विचाराणाम्, सञ्चाराणां च परिचयः इतिहासपुराणेषु वर्तते । अत: पुराणानाम् अध्ययनं देशेऽस्मिन् प्रमुखं स्थानं विन्दति ।

**इतिहास: -**

भारतवर्षे वाल्मीकिरचितश्रीमद्वाल्मीकिरामायणमहाकाव्यम्, व्यासरचितमहाभारतञ्च प्रसिद्धौ इतिहासग्रन्थौ । रामायणे सप्तकाण्डानि, २४ सहस्रश्लोका: विद्यन्ते । महाभारते १८ पर्वाणि, एकलक्षाधिका: श्लोकास्सन्ति ।

भारतीयसनातनसंस्कृते: मूलाधारा: वर्तन्ते चत्वारो वेदा: । ते मानवकुलश्रेयसे मार्गदर्शका: भवन्ति ।


ISSN: 2320-740X

अपौरुषेयत्वाच्च ते परमपवित्रास्सन्ति । अतीन्द्रियविषये वेदा: प्रमाणम् । सम्प्रत्यस्माभि: यदनुभूयते सुखं दु:खं वा तयो: कारणीभूतं विद्यते गतजन्मन: पुण्यं पापं वा । अत: सुखप्राप्तये दु:खनिवृत्तये च मानवै: पुण्यसम्पादनमवश्यमेव कर्तव्यम् इति वेदा:, शास्त्राणि, पुराणानि, इतिहासाश्चोपदिशन्त्यस्मान् । पुण्यसम्पादनायानेके मार्गा: अनेकविधकर्तव्यकर्माणि तैरुपदिष्टानि सन्ति । तानि चावश्यकर्तव्यानि कर्माणि मुख्यतया त्रिधा विभक्तानि । नित्यकर्माणि, नैमित्तिककर्माणि, काम्यकर्माणि चेति । नित्यकर्मण:, नैमित्तिककर्मणश्च पापपरिहार एव फलम् । विहिते देशे विहिते कालेऽवश्यं कर्तव्यं कर्म नित्यकर्मेत्युच्यते । तद्यदि न क्रियते तर्हि पापाय । नित्यकर्माणि यथा सन्ध्योपासनम्, अग्निकार्यम्, अग्निहोत्रादीनि, तथैवाधिकारिभ्य: श्राद्धकर्म । नित्यकर्मेत्युक्ते प्रतिदिनं कर्तव्यकर्म इत्येव न किन्तु विहितकाले कर्तव्यमपि कर्म नित्यकर्मेत्युच्यते । तद्यदि न क्रियते तर्हि प्रत्यवाय: । एतेषु कर्मसु श्राद्धकर्म अन्यतमं भवति ।

श्राद्धमिति पारिभाषिकं पदम् । "श्रद्धया दीयते यस्मात्" इति व्युत्पत्त्या श्रौतस्मार्तादीनि सर्वाण्यपि कर्माणि श्रद्धयैव क्रियन्ते चेदपि दानादि सर्वं कर्म श्राद्धमिति न व्यवह्रियते । श्रद्धा इति सर्वश्रौतस्मार्तादिवैदिककर्मसु अवश्यं भवेदेव अत: श्रद्धा श्रौतस्मार्तादिकर्मण: अङ्गं भवति । धर्मशास्त्रे तु श्राद्धसामन्यलक्षणं तु इत्थं प्रतिपादितं वर्तते यत् "पित्रादीन् मृतान् उद्दिश्य विहिते काले देशे पक्वान्नाहिरण्यान्यतमद्रव्यस्य विधिना दानं श्राद्धमिति" । श्राद्धे प्रधानतया त्रय: विभागास्सन्ति यथा १. अग्नौकरणम्, २. पिण्डप्रदानम्, ३. ब्राह्मणभोजनमिति । प्रदर्शितश्राद्धत्रयमपि कर्तुमसमर्थश्चेदपि अधिकारी शास्त्रोक्तरीत्या केवलब्राह्मणभोजनं वा कुर्याच्चेदपि श्राद्धमेव भवति तत् । तथा हि उक्तं शास्त्रकारै: -

**होमश्च पिण्डदानञ्च तथा ब्राह्मणभोजनम् ।**
**श्राद्धशब्दाभिधेयं स्यात् एकस्मिन्नौपचारिकम्** ॥ (धर्मसिन्धु:)

श्राद्धं प्रधानतया चतुर्धा विभक्तम् । १. पार्वणश्राद्धम्, २. एकोद्दिष्टश्राद्धम्, ३. नान्दीश्राद्धम्, ४. सपिण्डीकरणश्राद्धमिति ।

**१. पार्वणश्राद्धम् –**

"पित्रादित्रयोद्देशेन विहितं पिण्डत्रययुतं पार्वणम्", अर्थात् पिता, पितामह:, प्रपितामह: अथवा माता, पितामही, प्रपितामही इत्येतान् त्रीन् उद्दिश्य पिण्डप्रदानं यत्र क्रियते तत्पार्वणश्राद्धमित्युच्यते । सपिण्डीकरणानन्तरं मासिकश्राद्धम् एवं प्रतिवर्षं मृततिथौ क्रियमाणं सांवत्सरिकश्राद्धमपि पार्वणश्राद्धविधावेव अन्तर्भवति ।

**२. एकोद्दिष्टश्राद्धम् –**

"एकोद्देशेन क्रियमाणम् एकपिण्डयुतं श्राद्धम् एकोद्दिष्टश्राद्धमिति", अर्थात् केवलमृतजीवम् उद्दिश्य एकमेव पिण्डप्रदानं यत्र क्रियते तदेकोद्दिष्टश्राद्धमित्युच्यते । मृततिथिमारभ्य एकादशदिनपर्यन्तं क्रियमाणं श्राद्धम् अर्थात् सपिण्डीकरणात् प्राक् क्रियमाणं मासिकश्राद्धम् एकोद्दिष्टश्राद्धम् ।

**३. नान्दीश्राद्धम् –**

"पुत्रजन्मविवाहादौ क्रियमाणं वृद्धिश्राद्धं नान्दीश्राद्धमिति" अर्थात्, पुत्रजन्मनि, उपनयनविवाहादौ क्रियमाणं श्राद्धं

नान्दीश्राद्धम् । एतत् पुत्रजन्मादिमङ्गलकार्यारम्भे पितृगणमुद्दिश्य तेषामाशीर्वादप्राप्त्यर्थं क्रियमाणपूजादिविधिरेव नान्दीश्राद्धम् । नान्दीसमाराधाना इति नान्दीश्राद्धस्यापरं नाम ।

**४. सपिण्डीकरणश्राद्धम् –**

"मृतस्य द्वादशाहादिकाले पिण्डार्घ्यासंयोजनादिरूपं सपिण्डीकरणम्", अर्थात् मृतजीवं पितृगणे विधिवत्संयोजनमेव सपिण्डीकरणमित्युच्यते । मृतदिनात् द्वादशदिने, सार्धैकमासि, अष्टममासि, दशममासि वर्षान्ते वा सपिण्डीकरणश्राद्धं कर्तुं शक्यते इति अनेके काला: निर्दिष्टा: दृश्यन्ते ।

पुत्रादिभि: मातापितृमृततिथौ तान् उद्दिश्य क्रियमाणं श्राद्धं पुत्राणां नित्यं कर्म । यदि न क्रियते तर्हि प्रत्यवाय: । अत: श्राद्धाधिकारिभि: स्वपित्रादिकर्म स्वशक्त्यनुसारं कर्तव्यमेव । ये मातृपित्रादय: मृता: तान् उद्दिश्य श्राद्धं कर्म कर्तव्यमिति श्रद्धया श्राद्धं क्रियते पुत्रादिभि: । श्राद्धसमये अधिकारिभि: यद्दीयते पितॄन् उद्दिश्य पिण्डतिलोदकादि तत्सर्वं किं पितर: स्वीकुर्वन्ति, यतो हि मरणानन्तरं ते स्वपूर्वशरीरं त्यक्त्वा अर्जितपुण्यपापाद्यनुगुणं पितृलोके वसेयु:, अथवा पशुपक्षिमनुष्यदेवादिशरीरं वा प्राप्नुयु: । अत: श्राद्धकरणेन किं प्रयोजनम् इति चेत् स्मृतिपुराणेतिहासादिषु श्राद्धस्य उद्देशफलादिनिरूपणावसरे प्रसङ्गात् उक्तं यत् अधिकारिभि: पितॄन् उद्दिश्य श्राद्धकाले नामगोत्रमन्त्रादीन् यदुच्चार्य हवि:पिण्डजलतिलादिदानं कृतं तान्यवश्यमेव तत्तत्पितर: स्वीकुर्वन्त्येव इति । तत्कथमिति चेत् पित्रादय: देवतास्वरूपं प्रापु: यदि, तर्हि तत् पुत्रदत्तं पिण्डान्नजलादि अमृतस्वरूपेण पितॄन् प्राप्नोति । यदि पशुरूपशरीरं प्राप्तवन्त: स्यु: तत्तृणरूपेण पितॄन् प्राप्नोति, यदि सर्पशरीरं प्राप्तवन्त: तर्हि वायुरूपेण, यदि राक्षसादिशरीरं तदा मांसरूपेण, यदि मनुष्यशरीरं तर्हि अन्नादिरूपेण ते स्वीकुर्वन्ति । श्राद्धदिनं यदि सन्निहितं तर्हि मनोवेगेन पितर: आगत्य वायुरूपेणोपस्थाय आवाहितब्राह्मणैस्सह भुञ्जन्ते । तथा चोक्तम् -

**तस्य ते पितरश्श्रुत्त्वा श्राद्धकालमुपस्थितम् ।**
**अन्योऽन्यं मनसा ध्यात्वा संपतन्ति मनोजवा: ।**
**तै: ब्राह्मणै: सहाश्ननन्ति पितरो वायुरूपिण:** ॥ इति ॥(धर्मसिन्धु:)

श्राद्धार्थं यदि ब्राह्मणा: न लब्धा: तदा दर्भेषु ब्राह्मणम् आमन्त्रयित्वा पिण्डं दद्यात् । श्राद्धोपयुक्तपदार्था: न लब्धाश्चेत् पक्वान्नेन पितृसूक्तद्वारा होमं कुर्यात् । पुन: इतोऽप्यशक्तश्चेत् श्राद्धदिने त्यक्ताहार: भूत्वा ब्राह्मणेभ्य: किञ्चिद्धिरण्यम्, धान्यम्, तिलमथवा जलपात्रं दद्यात् । तत्राप्यशक्तश्चेत् गोभ्य: आहाररूपेण तृणं दद्यात् । तृणमप्यलब्धं यदि एकमुष्टितृणं राशीकृत्य भस्मसात् कुर्यात् । अथवा सङ्कल्पादिकं कृत्वा सम्पूर्णश्राद्धप्रयोगं पठेदधिकारी । सर्वाभावे अरण्यं गत्वा हस्तद्वयम् उपरि उत्थाप्य -

**न मेऽस्ति वित्तं न धनं न चान्यत् ।**
**श्राद्धोपयोगी स्वपितॄन् नतोऽस्मि**
**तृप्यन्तु भक्त्या पितरो मयैतौ ।**

 ISSN: 2320-740X

**भुजौ कृतौ वर्त्मनि मारुतस्य ॥**

(निर्णयसिन्धुः-द्वितीयपरिच्छेदः)

एनं श्लोकं पठित्वा अन्त:करणपूर्वकं पितृन् स्मृत्वा रोदनश्राद्धमाचरेत् । एतत्सर्वमापत्पक्षे एव । एवञ्चेत्थं श्राद्धकर्म न कदापि त्यजेत् अधिकारी ।

मनुष्यलोके यच्चान्द्रमानमेकवर्षं तत् पितृणाम् एकं दिनम् । अत: इहैकं वर्षं श्राद्धं कृत्वा पितृभ्य: आहारं यदि समर्पयति तर्हि पितृलोके एकं दिनं पितृभ्य: आहारं दत्तं भवति । अधिकारी मृतपित्रो: श्राद्धं यथा मृततिथौ करोति तद्वत् वर्षे षण्णवतिकृत्व: नित्यकर्मरूपेण श्राद्धमाचरेत् । तानि १२ सन्क्रान्तिश्राद्धानि, १२ अमावास्याश्राद्धानि, १६ महालयश्राद्धानि, १४ मन्वन्तरश्राद्धानि, १२ अष्टकाश्राद्धानि, ४ युगादिश्राद्धानि, १३ व्यतीपातश्राद्धानि, १३ वैधृतिश्राद्धानि आहत्य षण्णवतिश्राद्धानि सन्ति । एतेषु सामान्यतया श्राद्धप्रतिनिधिरूपेण तिलतर्पणं वा कर्तव्यमिति शिष्टसम्प्रदाय: । श्राद्धाचरणं न केवलं पुत्रादीनां कर्तव्यमेव न, अपि तु पुत्रा: भूत्वा पित्रो: सेवापि । पितृऋणात् मुक्तो भवितुमपि श्राद्धाचरणम् एकमङ्गम् । श्राद्धदिने पितर: वायुशरीरिण: भूत्वा गृहमागच्छन्ति । यदि पुत्रै: श्राद्धाचरणं न क्रियते तर्हि शापं दत्वा निर्गच्छन्ति । अत: अधिकारी श्राद्धं समाचर्य पितृन् सन्तोषयेत् । तदुक्तम्

**श्राद्धाभावे स्वभवनं शापं दत्वा व्रजन्ति ते ।**
**अतो मूलै: फलैर्वापि तथाप्युदकतर्पणै: ।**
**पितृतृप्तिं प्रकुर्वीत नैव श्राद्धं विवर्जयेत्** ॥ इति ॥(निर्णयसिन्धुः-द्वितीयपरिच्छेदः)

सर्वे जन्तव: सुखापेक्षिण: । सुखप्राप्तये मनुष्यप्रयत्नेन सह दैवानुग्रहोऽपि आवश्यक: । विना दैवानुग्रहं पुरुषप्रयत्न: अफलो भवति । देवतार्चनकर्मभि: दैवानुग्रह: अत्यावश्यक: इति वेद एव वदति, तथा हि “देवा अवन्तु शोभायै पितरोऽनुमदन्तु” इति ।

**********

# कालविभागः

डा. प्रसादभट्टः

**प्राध्यापकः, ज्यौतिषविभागः**

कालविधानात्मकं शास्त्रं ज्योतिश्शास्त्रम् इति तु प्रसिद्धमेव । किन्तु जिज्ञासा **कालो नाम कः** ? इति । लोके कालशब्दस्य अनेकार्थाः दरीदृश्यन्ते । तथापि प्रधानतया “कालः पचति भूतानि सर्वाण्येव सहात्मना” इत्यादिवाक्येषु कालो नाम विभुः । तथैव “पञ्चमी तिथिः” “मेषमासः” इत्यादिषु कालो नाम कलनात्मकः कालः । तर्हि शास्त्रे कीदृशः कालः उक्तः इत्युक्ते कलनात्मकः कालः इति । यतो हि कलनात्मककालादेव भूतवर्तमानभाविफलकथनम् ।

तत्र ज्योतिर्विद्भिः आदौ कलनात्मकः कालः द्विधा विभज्यते मूर्तकालः अमूर्तकालः इति । तत्र त्रुट्याद्यः[1] अमूर्तः, प्राणादयः[2] मूर्तः कालः । मूर्तकाले पुनः नवविधकालमानानि सन्ति । तद्यथा –

**ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम् ।**

**सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव ॥** इति

**षड्भिः प्राणैः विनाडी स्यात् तत् षष्ट्या नाडिका स्मृता ।**

**नाडी षष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम् ॥**

इत्युक्तत्वात् षष्टिनाडीभिः एकं **नाक्षत्रं** दिनमिति उच्यते । अर्थात् अमुकनक्षत्रस्य उदयद्वयान्तर्वर्तिकालः षष्टघटिका इति । तथैव सूर्योदयात् सूर्योदयं यावत् एकं **सावनं** दिनं भवति । एवं तिथिः चान्द्रं दिनम् । एवं प्रत्येकमानस्य त्रिंशद्दिनसमूहः तत्तन्मानस्य मासो भवति । सौरमासस्तु **सङ्क्रान्त्या** उच्यते । अर्थात् सूर्यस्य एकांशभ्रमणकालः सौरदिनम् । तादृशस्य प्रत्येकमानस्य द्वादशमासैः तत्तन्मानस्य वर्षं भवति । अतः तत्तन्माने ३६० दिनानि भवन्ति । (सौरदिनं सावनमानेन ३६५ दिनं-१५घटि-३०विघटि) एकस्मिन् वर्षे । अस्माकमेकं वर्षं देवानां दैत्यानाञ्च एकं दिनम् । अपि तु तयोः अहोरात्रमन्योन्यं विपर्ययात् भवति । तस्मात् तेषां वर्षं नाम अस्माकं (३६०×३६०= १२९६००) ३६० वर्षाणि अथवा १२९६०० दिनानि । देवानां वर्षं **दिव्यवर्षम्** इत्युच्यते ।

देवानां द्वादशसहस्रवर्षाणि (१२०००) चतुर्युगमुदाहृतम् ( एकं महायुगः इति) । अर्थात् एकस्मिन् महायुगे ४३२०००० सौरवर्षाणि (१२०००×३६०=४३२००००) । अत्र कृतादीनां धर्मपादव्यवस्थया विभागः । अतः सन्ध्यासन्ध्यांशसहितकृतादियुगमानम् –

| | | | |
|---|---|---|---|
| कृतयुगः | १२०००÷१०×४= | ४८००(दिव्यवर्षाणि) ×३६० = | १७२८०००(सौरवर्षाणि) |

[1] त्रुटिर्हि नेत्रपक्ष्मद्वयसंयोगकालस्य सहस्रत्रयतमभागतुल्या

[2] अव्याहतदशगुर्वक्षरोच्चारणकालसमः

 ISSN: 2320-740X

| | | | |
|---|---|---|---|
| त्रेतायुगः | १२०००÷१०×३= | ३६००(दिव्यवर्षाणि) ×३६० = | १२९६०००(सौरवर्षाणि) |
| द्वापरयुगः | १२०००÷१०×२= | २४००(दिव्यवर्षाणि) ×३६० = | ८६४०००(सौरवर्षाणि) |
| कलियुगः | १२०००÷१०×१= | १२००(दिव्यवर्षाणि) ×३६० = | ४३२०००(सौरवर्षाणि) |
| महायुगः | | १२०००(दिव्यवर्षाणि) | ४३२००००(सौरवर्षाणि) |

एवं महायुगानां सैका सप्ततिः(७१) मन्वन्तरमित्युच्यते । एतदेव **प्राजापत्यं** कालमानं भवति । किन्त्वस्मिन् काले अहोरात्ररूपभेदः नास्ति ।

मन्वन्तरस्यान्ते कृतयुगप्रमाणात्मकसन्धिः भवति । तथैव चतुर्दशमन्वन्तरेण एकः कल्पः । कल्पादौ अपि कृतयुगप्रमाणात्मकसन्धिः तिष्ठति । कल्पः ब्रह्मणः अहः तथा कल्पप्रमाणात्मिका रात्रिरपि तस्य । अतः कल्पद्वयं नाम ब्रह्मणः दिनम् । सः कालः सौरवर्षप्रमाणे - ४३२००००×७१=३०६७२०००० (मन्वन्तरकालः ) ×१४ ( मन्वन्तरसङ्ख्या) = ४२९४०८००००+२५९२०००० (१५सन्धिकालः) =४३२००००००००×२ (दिनप्रमाणात्मिका रात्रिः) = ८६४००००००००(ब्रम्हणः आयुः सौरवर्षमानेन) । तस्य ब्रह्मणः परमायुः शतवर्षप्रमाणम् । ब्रह्मणः इदं **ब्राह्मं** (ब्रह्मसम्बन्धि) ८६४००००००००×३६०×१००= ३११०४०००००००००० (ब्रम्हणः आयुः सौरवर्षमानेन)[1] ।

गुरोः एकराशिभोगकालः गुरोः वर्षं भवति **(गौरवम्)** । विविधप्रकारेण गुरुवर्षस्य नामग्रहणं लोके दृश्यते । अहर्गणादानीतगुरुवर्षाणि षष्ट्या भक्तः शेषः विजयादयो संवत्सराः इत्येकप्रकारः। तथैव –

**वैशाखादिषु कृष्णे च योगात् पञ्चदशे तिथौ ।**
**कार्तिकादीनि वर्षाणि गुरोरस्तोदयात् तथा ॥ (सूर्यसिद्धान्तः)**

एवमेव –

**नक्षत्रेण सहोदयमुपगच्छति येन देवपतिमन्त्री ।**
**तत्संज्ञं वक्तव्यं वर्षे मासक्रमेण वै ॥**
**वर्षाणि कार्तिकादीन्याग्नेयाद्भद्वयानुयोगीनि ।**
**क्रमशस्त्रिभं तु पञ्चममुपान्त्यमन्त्यं च यद्वर्षम् ॥ (बृहत्संहिता)**

"त्रिंशता तिथिभिर्मासश्चान्द्रः पित्र्यमहः स्मृतम्" इत्युक्तत्वात् कृष्णपक्षः पितॄणां दिनं तथा शुक्लपक्षः पितॄणां रात्रिः । अतः एकः चान्द्रमासकालः पितॄणामेकं दिनम् **(पित्र्यम्)** । अत्र कारणं – पितरः चन्द्रस्योर्ध्वभागे निवसन्तीति शृण्मः ।

---

[1] अस्य ब्रह्मणः आयुः – "आयुषोर्धमितं तस्य शेषकल्पोयमादिमः" इत्युक्तत्वात् – ३११०४०००००००००० ÷ २ = १५५५२०००००००००० । अत्र पुनः वर्तमानः आदिमः कल्पः तत्र वर्तमानः सप्तमः वैवस्वतमनुः अतः ६मनवः+७सन्धयः = १८४०३२०००० + १२०९६००० = १८५२४१६०० । वैवस्वतमनोः युगानां त्रिघनं(२७)गतं = ११६६४००००+१७२८०००कृत + १२९६००० त्रेता + ८६४००० द्वापर + ५११८कलि = १२०५३३११८ । आहत्य – १५५५२०३०५७७४७१८ । अत्र अस्मिन् कल्पीयकाले (१९७२९४९१११८) सृष्टिकालः(१७०६४०००) शोध्यते तदा सृष्ट्यादितः गतसौरवर्षः उपलभ्यते – १९५५८८५११८ ।

“दिनं दिनेशस्य यतोऽत्र दर्शने” इति दिनपरिभाषा । अतः “दर्शस्सूर्येन्दुसङ्गमः” इत्युक्तत्वात् दर्शकाले सूर्यः चन्द्रस्योपरि गच्छतीत्यतः तदा पितृणां मध्याह्नः, कृष्णाष्टम्यां सूर्योदयः शुक्लाष्टम्यां सूर्यास्तः, पौर्णमास्यां मध्यरात्रिः इति ।

एवमुक्तेषु नवविधकालमानेषु बार्हस्पत्येन षष्ट्यशब्दं ज्ञेयं, तथा अन्यैः सौरचान्द्रार्क्षसावनैः चतुर्भिः कालमानैः अस्माकं व्यवहारः[1] । तत् कथमिति अत्यन्तसङ्क्षेपेण वदति भास्कराचार्यः -

“वर्षायनर्तुयुगपूर्वकमत्र **सौरात्** मासास्तथा च तिथय**स्तुहिनांशु**मानात् ।
यत्कृच्छ्रसूतकचिकित्सितवासराद्यं त**त्सावना**च्च घटिकादिक**मार्क्ष**मानात्”॥इति ।

वर्षमासकृच्छ्रघटिकादीनां व्यवहारः तदुक्तमान्येष्वेव कर्तव्यमिति आचारः । तदा एव “**शुभे तु काले शुभकृत् फलं शुभमिति**” यदुक्तं तत् सिद्ध्यतीति शास्त्राभिप्रायः ।

**********

## शास्त्रकोषः

**-ः वाग्वर्धिनीपरिषद् ः-**

**द्विसहस्रं योजनानां सगव्यूतुरं क्षणात् । पर्येति देवदेवेशो विश्वव्यापी निरन्तरम् ॥** (देवीभागवतम् 8 स्कन्धः 15अ.43)
ಪ್ರತಿಯೊಂದು ಕ್ಷಣದಲ್ಲೂ ನಿರಂತರವಾಗಿ 2000 ಯೋಜನ ಹಾಗೂ 2 ಕ್ರೋಶಗಳಷ್ಟು ದಾರಿಯನ್ನು ಕ್ರಮಿಸುವುದು ವಿಶ್ವವ್ಯಾಪಕವಾದ ಸೂರ್ಯಪ್ರಕಾಶ. (1 ಯೋಜನ = 9 ಮೈಲಿ, 1 ಕ್ರೋಶ = 3 ಮೈಲಿ)
हर एक पल में लगातार दो हजार योजन और दो क्रोश परिमित मार्ग पार करनेवाला वह विश्वव्यापक सूर्य है।
The almighty Sunrays travel 2000 Yojanas and 2 Kroshas every second continiously.(1 Yojana = 9 miles, 1 Krosha = 3 miles).

**विषुवत्संज्ञमासाद्य गतिसाम्यं वितन्वते । समस्थानमथासाद्य दिनसाम्यं करोति च ॥** (देवीभागवतम् 8 स्कन्धः 16अ.26 - 26)
ವಿಷುವತ್ ಸ್ಥಾನದಲ್ಲಿ ಸೂರ್ಯನು ಸಮಾನಗತಿಯನ್ನು ಹೊಂದಿರುತ್ತಾನೆ. ಈ ಸಮಯದಲ್ಲಿ ದಿನವು ರಾತ್ರಿಯ ಸಮಪ್ರಮಾಣದಲ್ಲಿರುತ್ತದೆ.
विषुवत स्थान में सूर्य की समान गति रहती है। इस वक्त दिन निशाओं के समान रहते हैं।
In the equinox the pace of the Sun is neutral. During this period the duration of the days is equal to the nights.

**दक्षिणायनमासाद्य गतिशैघ्र्यं वितन्वते । अवरोहस्थानमसौ गच्छन् ह्रस्वं दिनं चरेत् ॥** (देवीभागवतम् 8 स्कन्धः 16अ.24 - 25)
ದಕ್ಷಿಣಾಯನದಲ್ಲಿ ಸೂರ್ಯನು ಶೀಘ್ರಗತಿಯನ್ನು ಹೊಂದಿರುತ್ತಾನೆ. ದಕ್ಷಿಣಾಯನಸ್ಥಾನದಲ್ಲಿ ಸೂರ್ಯನು ಇಳಿಯುತ್ತಿರುವ ಸಮಯದಲ್ಲಿ ದಿನಗಳು ಹ್ರಸ್ವವಾಗಿರುತ್ತವೆ.
दक्षिणायन में सूर्य की गति शीघ्र रहती है। दक्षिणायन स्थान में सूर्य उतरते वक्त दिन चौडे हो जाते हैं।
In the winter solstice the Sun travels in a fast pace. When the Sun is switching towards the summer solstice the duration of the days becomes shorter.

[1] “नान्यैः नित्यशः” इत्युक्तत्वात् कदाचित् युगमन्वन्तरादिगणनार्थमुपयोगः ।


ISSN: 2320-740X

# प्रतिभाशालिबालकानां विशेषाः

डा. अरविन्दकुमारसोमदत्तः

प्राध्यापकः, शिक्षाविभागः

**शारीरिकविशेषाः**

1) प्रतिभाशालिबालकाः शारीरिकविशेषतायां सामान्यबालकानाम् अपेक्षया भिन्नाः भवन्ति । सामान्यबालकशारीरिकविकासापेक्षया प्रतिभाशालिबालकशारीरिकविकासः भिन्नः भवति ।
2) विशेषबुद्धिबालाकानां शारीरगतदोषाः न्यूनाः भवन्ति ।
3) टर्मन्, विटि अनुसारेण प्रतिभाशालिबालकानां मातापित्रोः स्वास्थ्येतिहासस्य अध्ययनानन्तरं, सामान्यबालकानां मातापित्रोः स्वास्थ्यस्य अपेक्षया प्रतिभाशालिबालकानां पितरौ अधिकस्वास्थ्यसम्पन्नौ भवतः इति ज्ञातम् । अतः तेषां बालकाः श्रेष्ठाः भवन्ति ।
4) प्रतिभाशालिबालकानां सामान्यबालकानम् अपेक्षया शीघ्रमेव दन्ताः आगच्छन्ति । अतः सामान्यबालकानाम् अपेक्षया मासद्वयात् पूर्वमेव गमनम्, भाषणं च आरभन्ते ।
5) प्रतिभाशालिबालकेषु किशोरावस्था झटिति दृश्यते ।

**संवेगात्मकविशेषाः**

1) संवेगात्मकरूपेण प्रतिभाशालिबालकाः स्थिराः तथा समायोजिताः भवन्ति ।
2) एते प्रायः प्रसन्नचित्ताः भवन्ति । समस्यानां तथा काठिन्यानां परिहारार्थं स्वतन्त्ररूपेण समाधानम् अन्वेष्टुं समर्थाः भवन्ति । एते अधिकधैर्यवन्तः भवन्ति ।
3) अपरिचितजनैः विविधस्थानेषु, नूतनपरिस्थितिषु एते शीघ्ररूपेण कार्यं कर्तुं शक्नुवन्ति ।
4) एते चरित्रे, समायोजने, व्यक्तित्वे अन्येषां बालकानां अपेक्षया श्रेष्ठाः भवन्ति ।
5) एते सामाजिकरूपेण दृढाः भवन्ति ।

**सामाजिकविशेषाः**

1) प्रतिभाशालिबालकाः सस्मितवदनेन प्रसन्नचित्तरूपेण भवन्ति । अतः एते सामाजिकरूपेण परिपक्वाः भवन्ति । तथा सेवाप्रिया भवन्ति ।
2) प्रतिभाशालिबालकाः सस्मितवदनेन प्रसन्नचित्तरूपेण भवन्ति । अतः एते सामाजिकरूपेण परिपक्वाः भवन्ति । तथा सेवाप्रिया भवन्ति ।
3) एते बालकाः गृहे, विद्यालये, समुदाये अन्यत्र कार्यं कर्तुम् इच्छन्ति ।

4) एतेषु नेतृत्वम् अधिकरूपेण भवति ।

**लिङ्गविशेषाः**

बालबालिकानां मध्ये के प्रतिभाशालिनः इति विषये यः कोऽपि उत्तरं सन्तोषेन न दत्तवान् । टर्मन् (१९२५) ६४३ विद्यालयबालकानां १२१ प्रतिभाशालिबालकाः एवं १०० प्रतिभाशालिबालिकाः इति अध्ययनेन ज्ञातवान् । जैनकिन्स (१९३६) नीग्रो जनानाम् अध्ययनेन बालिकाः अधिकप्रतिभाशालिनः भवन्ति ।

**शैक्षिकोपलब्धिः**

1) बौद्धिकरूपेण सर्वश्रेष्ठेभ्यः बालककेभ्यः शैक्षिकोपलब्धिः अधिकमहत्वं ददाति ।
2) एते बालकाः शिक्षायां प्रत्येकस्मिन् क्षेत्रे अधिकोपलब्धिं प्राप्नुवन्ति ।
3) प्रतिभाशालिबालकाः साहित्ये, विज्ञाने, व्याकरणे, गणिते, इतिहासे, भूगोलविषयेषु प्रतिभां प्रदर्शयित्वा बुद्धिमन्तः भवन्ति । शिक्षकेन श्रेष्ठाः इति गौरवं सम्पादयन्ति ।
4) प्रतिभाशालिबालकाः सामान्यविषयेषु बुद्धिद्वारा वैशिष्ट्यं न प्रदर्शयन्ति । इत्युक्ते आपणस्य कार्ये, कलायां सामान्यरूपेण प्रदर्शयन्ति ।
5) एतेषाम् उपलब्धिः बुद्ध्या सह सम्बन्धः अधिकतया भवति ।
6) पुरस्कारार्थं छात्रवृत्तिविषयेषु प्रतिभाशालिबालकाः प्रथमतया भवन्ति । इत्युक्ते निबन्धलेखने, कक्ष्यायां सम्मानविषयेषु ।

पठने, लेखने इत्यदिविषयेषु सामान्यबालकानाम् अपेक्षया श्रेष्ठाः भवन्ति । अधिकरुचिमन्तः अपि भवन्ति ।

**सहगामिक्रियाः**

1) प्रतिभाशालिबालकानां क्रीडासु अधिकरुचिः भवति । एते स्ववयापेक्षया अधिकवयस्कमित्रैस्सह मिलित्वा क्रीडन्ति । निम्नवयस्केभ्यः क्रीडादिविषयेषु अल्पं समयं यच्छन्ति ।
2) प्रतिभाशालिबालकाः क्रीडायां, कार्ये च अधिकरुचिः भवति । अतः एतेषां मानसिकविकासः वृद्धिं प्राप्नोति ।
3) लेहमन् वीटी द्वारा प्रतिभाशालिमहिलाः क्रीडासम्बन्धितगतिविषयेषु व्यस्ताः भवन्ति । प्रतिभाशालिबालकानां शारीरकक्रीडानां रुचिः अल्पमेव भवति । एते पठनं लेखनम् इत्यादिविषयेषु अधिकप्राधान्यतां यच्छन्ति ।
4) प्रतिभाशालिबालकाः विद्यालयं गन्तुं अधिकाम् इच्छां प्रकटयन्ति ।

**व्यक्तिगतविशेषाः**

1) प्रतिभाशालिबालकानां सहयोगः भवति ।
2) एतेषां हास्यविनोदादिविषयेषु रुचिः अधिका भवति ।
3) एतेषां सामाजिकसमायोजनेषु सामान्यबालकानाम् अपेक्षया अधिका अपेक्षा वर्तते ।


ISSN: 2320-740X

4) कक्ष्यायां एतन्मित्राणाम् एतत्सहयोगार्थम् इच्छा भवति ।
5) प्रतिभाशालिबालकाः संवेगात्मकस्थिरतायां तेषां प्रौढावस्थायामपि निरन्तरं स्थितप्रज्ञरूपेण भवन्ति ।

**सामाजिकसांस्कृतिकपृष्ठभूमिः**

१) प्रतिभाशालिबालकानां सामाजिकसांस्कृतिकपृष्ठभूमिः उत्तमा भवति ।
२) प्रतिभाशालिबालकानां परिवाराणां सामजिक आर्थिकगतिः सामान्यात् उच्चैः गच्छति ।
३) कोल् (१९५६) अध्ययने बालकानां माता-पित्रोः व्यवसायिकस्तरे धनात्मकसम्बन्धः आसीत् । नोचेत् सः सम्बन्धः पूर्वबाल्यकालपर्यन्तमासीत् ।
४) प्रतिभाशालिबालकानां पितरौ सामान्यजनानाम् अपेक्षया अधिकशिक्षां प्राप्तवन्तौ ।
५) एतेषां गृहं पार्श्वे विद्यमानस्य गृहमपेक्षया समीचीनं भवति ।
६) प्रतिभाशालिबालकानां परिवाराः उत्तमपुस्तकानि, पत्रिकाश्च पठन्ति ।
७) विदुषां रचिता सांस्कृतिकपृष्ठभूमिः समीचीनतया भवति ।

**बौद्धिकविशेषाः**

१) प्रतिभाशालिबालकाः मानसिकरूपेण सामान्यबालकानाम् अपेक्षया श्रेष्ठाः भवन्ति ।
२) जिज्ञासा, दृढेच्छा, हास्यविनोदस्वाभवः इत्यादिविषयेषु सामान्यबालकानाम् अपेक्षया प्रतिभाशालिबालकाः अधिकप्रज्ञां प्रदर्शयन्ति ।
३) एतेषां विमर्शनात्मकज्ञानमपि अधिकं भवति ।
४) एतेषाम् अवधानात्मकज्ञानमपि अधिकं भवति ।
५) एते विद्यालयकार्येषु विविधकार्येषु च श्रेष्ठातां प्रदर्शयन्ति ।
६) एतेषाम् अधिगमः तीव्ररूपेण भवति । कदाचित् सरलतापि भवति ।
७) एते स्पष्टरूपेण, श्रेष्ठरूपेण च आत्मसात् अभिव्यक्तीकुर्वन्ति ।
८) एतेषु कोशस्य ज्ञानम् अधिकं भवति । सामान्यबालकानाम् अपेक्षया ज्ञानवन्तः ।
९) एते कक्ष्यापुस्तकानि पठित्वा विद्यमानासु उच्चकक्षासु पुस्तकानि पठन्ति । तादृशं सामर्थ्यमपि भवति ।
१०) एते एकाग्रचित्ततया भवन्ति ।
११) एतेषां स्मृतिः अन्यबालकानाम् अपेक्षया अधिका भवति ।

**निशेधात्मकविशेषाः**

१) प्रतिभाशालिबालकाः कदाचित् अनुचितं कार्यं कुर्वन्ति ।
२) एतेषां चिन्तनरुचिः अन्येषां बालकानम् उपरि अधिकं भवति ।
३) एते अन्यबालकानाम् उपरि अभिमानम्, ईर्ष्यां च प्रदर्शयन्ति ।

# ज्योतिषशास्त्रम्

डा. सुधांशुकुमार नन्दा
**वास्तुप्राध्यापकः**

संसारेऽस्मिन् सर्वेषां प्राणिनामाधिभौतिमाधिदैविकमाध्यात्मिकमिति दुःखत्रयं वर्तते । एतेषां दुःखानां निवारणपुरस्सरं चतुर्वर्गफलप्राप्त्यर्थं सफलमार्गदर्शकस्य स्थानमलङ्करोति वेदः । इतिहासाध्ययनात् ज्ञायते यत् भूखण्डे उपलब्धसाहित्येषु सर्वप्राचीनः वेदः । तस्य वेदस्य कर्ता नास्तीति स्वीक्रियते । तदर्थं खलु वेदः अपौरुषेयः इत्युच्यते । स एव सकलज्ञानस्य भाण्डारः । यथोक्तं मनुना - **स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।** एतस्य वेदस्य षडङ्गानि वर्तन्ते । यथा -

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥**

एतेषु वेदाङ्गेषु ज्योतिषस्य वेदाङ्गत्वं कथमिति पश्यामश्चेद् वेदस्य प्रवृत्तिः यज्ञकर्मसम्पादनार्थम्, परन्तु यज्ञः कालाधीनः । अस्माकं ज्योतिषशास्त्रं भवति कालबोधकं शास्त्रम् । तदर्थं मुनिभिः शास्त्रमेतत् वेदाङ्गत्वेन गृहीतम् । भास्कराचार्येण उक्तं यत् -

**वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।**
**शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात् ॥**

वेदस्य षडङ्गेषु अस्य स्थानं नेत्रत्वेन विद्यते । यथोक्तं भास्करेण –

**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।**
**संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाऽङ्गेन हीनो न किञ्चित्करः ॥**

एतादृशेन महिम्ना संयुक्तस्य शास्त्रस्यास्य संज्ञाभेदाश्च कथमिति तत्किञ्चिदत्र विमृश्यते ।

**शास्त्रस्य संज्ञा -**

- द्युतेरिसिन्नादेश्च जः इत्युणादिसूत्रेण ज्वलतिकर्मणो द्युतिधातोरिसिन् प्रत्यये दकारस्य च जकारादेशे गुणे ज्योतिः इति शब्दस्य निष्पत्तिर्भवति, यस्यार्थः स्वयं प्रकाशितग्रहनक्षत्राणाम् आकाशीयपिण्डानां वा अवबोधनं करोति । एवमाकाशीयपिण्डानां गणितफलितीयविवेचनं यत्र विद्यते तदेव ज्योतिषशास्त्रम् ।

- शास्त्राणां पर्यालोचनेन शास्त्रेषु ज्योतिषम्, ज्यौतिषम् इति शब्दद्वयस्य प्रयोगो लभ्यते । तत्र ज्योतिः नक्षत्रादयः, तान् अधिकृत्य कृतं शास्त्रं ज्यौतिषं, ज्योतिः शब्दात् शेषे (४/४/९२) इतिसूत्रेण अणि यस्येति चेति अकारलोपे विभक्तिकार्ये ज्यौतिषम् । अर्शादिभ्यो अच् (५/५/१२७) इति अचि अनुबन्धलोपे यस्येति चेत्यलोपे विभक्तिकार्ये ज्योतिषम् । इत्थम् उभयविधव्युत्पत्त्या नक्षत्रादीनां ज्ञानकरं शास्त्रं ज्योतिषशास्त्रम् । पुनः निम्नप्रकारेणापि अस्य

 ISSN: 2320-740X

संज्ञा निरुपयितुं शक्यते । यथा –

❖ ब्रह्मणः सृष्टौ नानाविधाः प्राणिनः निवसन्ति । तेषु मानवः श्रेष्ठः । तत्र स्रष्टुः सृष्टेः भूः इव मानवपिण्डमपि पञ्चभूतात्मकम् । तदर्थं भूमेः प्रभावेन मानवः सम्पूर्णतया प्रभावितः । पुनश्च एषा (भूः) अपि अन्येषां ग्रहार्क्षादीनामाधारेणैवाधारिता । अस्मादेव कारणात् भूवासिनः सर्वेषां ग्रहपिण्डानां प्रभावेण सञ्चालिताः भवन्ति। तेषां पिण्डानां स्थितिगत्यादीन् आधारीकृत्य मानवः त्रिकालस्य शुभाशुभफलमपि ज्ञातुं शक्नोति । अस्याः फलविचारप्रक्रियायाः वर्णनं यस्मिन् शास्त्रे दृश्यते, तदेव ज्योतिषशास्त्रम् ।

❖ सूर्यकेन्द्रिकः भूकेन्द्रिकः चेति भेदेन ग्रहभ्रमणस्य मतद्वयं विद्यते। यत्राधुनिकाः सूर्यकेन्द्रिकाणां भ्वादिपिण्डानां भ्रमणं स्वीकुर्वन्ति, तत्र प्राचीनाः भूकेन्द्रिकग्रहभ्रमणम् अङ्गीकुर्वन्ति । तत्र भूः स्थिरा इति मत्वा ज्योतिषशास्त्रस्यारम्भः । यतो हि द्रष्टा कुपृष्ठे स्थित्वा एव अपरेषां चलनं परिलक्षयति । एवं वक्तुं शक्यते यद्ध्रुवः ध्रुव इव परिकल्पनं यस्मिन् शास्त्रे विद्यते, तदेव ज्योतिषशास्त्रम् ।

❖ ग्रहाः कथं त्रिकालस्य फलसूचनायाः कारणभूताः भवन्ति ? जीव-ग्रहजगतोः कः सम्बन्धः ? ग्रहाणां प्रभावानुरोधेन मानवाः कथं प्रभाविताः ? एवं च सृष्टेः उत्पत्त्यादिकं कदा सम्भवति ? एवमेव विभिन्नानां प्रश्नानां समाधानार्थं मानवाः यच्छास्त्रमाश्रयन्ति तदेव ज्योतिषशास्त्रम्।

❖ **'अहोरात्रम्'** इति शब्दात् **'होरा'** शब्दस्य उत्पत्तिः। अहः दिनं, तस्याधिपः सूर्यः, रात्र्याः अधिपः चन्द्रः । अनयोः (सूर्यचन्द्रयोः) उदयास्तव्यवस्थायाः परस्परं वैपरीत्यं विद्यते । एतयोः आधिपत्येनैव अहोरात्रव्यवस्थायाः सर्वाणि कार्याणि प्रचलन्ति । तस्मात् कारणादेव एतौ (सूर्यचन्द्रौ) प्रत्येकं स्थलेषु प्रत्यक्षसाक्षिणौ इति मन्येते । एवमेव प्रत्यक्षरूपेण विद्यमानस्य सूर्यस्य चन्द्रस्य च साक्षित्वं स्वीकृत्य यस्य शास्त्रस्य परिकल्पनं विधीयते, तदेव ज्योतिषशास्त्रम् । सूर्यचन्द्रयोः प्रत्यक्षत्वादेव शास्त्रस्यास्य प्रत्यक्षत्वं सिद्धम् । उच्यते -

**अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।**
**प्रत्यक्षं ज्योतिषं शास्त्रं चन्दार्कौ यत्र साक्षिणौ ॥**

एकेन वाक्येन उच्यते यथा - सूर्यादिग्रहार्क्षादीनां गतिं स्थितिं चाधारीकृत्य कृतं शास्त्रं ज्योतिषशास्त्रम् ।

एतादृशेन महिम्ना परिपूर्णस्यास्य शास्त्रस्यारम्भः किमर्थमिति शङ्कायां नारदसंहिता समादधाति यत् जातकस्य शुभाशुभफलनिरूपणार्थं शास्त्रस्यास्य सृष्टिः ब्रह्मणा कृतेति । तथा चोक्तं -

**अभिधेयञ्च जगतः शुभाशुभनिरूपणम् ।**
**यज्ञाध्ययनसङ्क्रान्तिग्रहषोडशकर्मणाम् ॥**
**प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयात् ।**

पुनश्च-

**विनैतदखिलं श्रौतस्मार्तकर्म न सिद्ध्यति ।**

**तस्माज्जगद्धितायेदं ब्रह्मणा रचितं पुरा ॥**

**शास्त्रस्य स्वरूपम्**

अस्य ज्योतिषशास्त्रस्य सिद्धान्त-संहिता-होरारूपकं स्कन्धत्रयात्मकं स्वरूपम् आचार्यैः प्राचीनकालादेव समुपस्थापितम् । वराहमिहिरकृतबृहत्संहितायां वराहमिहिरेण स्पष्टतया अभाणि यथा-

**ज्योतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्**

**तत्कात्स्न्योर्पनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता ।**

**स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ**

**होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः॥**

वेदस्य इव ज्योतिषस्यापि जातक-गोल-निमित्त-प्रश्न-मुहूर्त-गणिताख्यानि षडङ्गानि परिलक्ष्यन्ते। यथोक्तम् -

**जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि ।**

**अभिदधतीह षडङ्गान्याचार्याः ज्योतिषे महाशास्त्रे ॥**

स्कन्धेन साकम् अङ्गानां समन्वयोऽपि वर्तते। तत् कथं विद्यते इत्यस्मिन् विषये प्रश्नमार्गकारः अवर्णयत् - गणितगोलौ सिद्धान्तान्तर्गतौ, निमित्तं तु संहितायाः, जातकप्रश्नमुहूर्ताः होरास्कन्धस्य विषया इति। पुनश्च केचन ज्योतिषं पञ्चस्कन्धात्मकमिति आमनन्ति। उपर्युक्तभेदत्रयेण साकं केरलिः शकुनश्चेति इतरभेदद्वयम् अङ्गीक्रियते। तथा चोक्तम् –

**पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः।**

**केरलिः शकुनश्चेति ज्योतिःशास्त्रमुदीरितम् ॥**

ज्योतिषस्य स्कन्धविभाजनावसरे दृष्टिपथे यद्यपि अस्य बहुभेदाः परिदृश्यन्ते तथापि स्कन्धत्रयमेव प्रामुख्येन स्वीक्रियते। एतेषां सङ्क्षिप्तपरिचयः -

**सिद्धान्तः**

भास्कराचार्येण स्वसिद्धान्तशिरोमणौ अस्य स्कन्धस्य लक्षणं बहुसरलरीत्या प्रतिपादितम् । यत्र गणितेन ग्रहाणां गतिः स्थितिश्च गण्यते, एवं त्रुटिकालादारभ्य प्रलयान्तं यावत् कालस्य परिकल्पना क्रियते स एव सिद्धान्तस्कन्धः । तद्यथा –

**त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमा-**

**च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।**

**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**

**सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ॥**

**संहिता**

जनपुष्टिः, जनक्षयः अर्थात् भूकम्पोल्कापातादयः, केतुदर्शनस्य शुभाशुभफलानि, वृष्टिः, धुमकेतुलक्षणं, वास्तुविद्या,

दकार्गलः, पिटकलक्षणम्, ग्रहचारः, वृक्षायुर्वेदप्रभृतीनां विषयाणां वर्णनं यत्र दृश्यते, स एव संहितास्कन्धः । अमुं विषयमाधारीकृत्य प्रश्नमार्गः वदति -

**जनपुष्टिक्षयवृष्टिद्विरदतुरङ्गादिसकलवस्तूनाम् ।**
**केतूल्कादीनां वा लक्षणमुदितं हि संहितास्कन्धे ॥**

**होरा**

**अहेरात्र** इति शब्दस्यादिवर्णः **अ** एवम् अन्त्यवर्णः **त्र**, अनयोः वर्णयोः लोपेन होराशब्दः निष्पद्यते । श्रीकल्याणवर्मकृतसारावल्यामुच्यते यत् –

**आद्यन्तवर्णलोपाद्धोराशास्त्रं भवत्यहोरात्रात् ।**
**तत्प्रतिबद्धश्चायं ग्रहभगणश्चिन्त्यते यस्मात् ॥**

जन्मकालिकग्रहस्थित्यनुरोधेन जातकस्य सम्पूर्णफलविचारः अस्य प्रमुखविषयः । मानवजीवनस्य सुखदुःखेष्टानिष्टोन्नत्यवन्नतिभाग्योदयादिसमस्तशुभाशुभविषयाणां विचारः स्कन्धेऽस्मिन् क्रियते । एवमेव वक्तुं शक्यते यत् वैयक्तिकफलविधायकं भवति होराशास्त्रम् । फलितान्तर्गतविषयं स्वीकृत्य नारदपुराणं कथयति यत् -

**जातके राशिभेदाश्च ग्रहयोनिर्वियोनिजम् ॥**
**निषेकजन्मारिष्टानि ह्यायुर्दायो दशाक्रमः ।**
**कर्माजीवं चाष्टवर्गो राजयोगाश्च नाभसाः ॥**
**चन्द्रयोगाः प्रव्रज्याख्या राशिशीलं च दृक्फलम् ।**
**ग्रहभावफलं चैवाश्रययोगप्रकीर्णके ॥**
**अनिष्टयोगाः स्त्रीजन्मफलनिर्णयमेव च ।**

एवमेव प्रकारेण शास्त्रस्यास्य संज्ञा स्वरूपञ्च विचारयितुं शक्यते ।

**अनुशीलितग्रन्थसूची –**


- ज्योतिश्शास्त्रस्येतिहासः
- प्रश्नमार्गः
- बृहत्संहिता
- भारतीयज्योतिषम्
- सारावली
- सिद्धान्तशिरोमणिः


**********

# आयुर्दशाः

विद्वान् एन्. रमानन्दभट्टः
**प्राध्यापकः, ज्यौतिषडिप्लोमाविभागः**

"अनायुषां जन्मभृतां च लक्षणैः प्रयोजनं किं कथितं बुधैरिति[1]" अनायुषां राजयोगादिफलकथनस्य वैयर्थ्यापत्तेः प्रथमम् आयुर्निर्णय एव कार्य इति सकलमुनीनामभिप्रेतो विषयः । अत एव प्रथममायुर्दायं कृत्वा सत्यायुषि फलं कथयेत् । तत्र ग्रहाणां फलदानकालस्यैव दशेति संज्ञा । दशाशब्दस्य नानार्थकत्वे "ज्योतिषोक्ते नक्षत्रानुसारेण सूर्यादिग्रहाणां स्वामित्वेन भोग्यकाल एव दशा" इति कोषकारः स्पष्टं तदर्थमाह । अतः ग्रहाणां स्वस्वफलप्रदानकालस्यैव दशेति संज्ञा ज्ञेया । श्रीपतिरपि तदेव आह **नूनं दशासु निखिलासु शरीरभाजां व्यक्तिश्शुभाशुभविमिश्रफलस्य सम्यक्**[2] इति ।

तत्रापि दशासु वैविध्यं दृश्यते । विंशोत्तरी, अष्टोत्तरी, कालचक्रम् इत्यादिभेदेन । तेषु आयुर्दशाप्यन्यतमा । तदाह भगवान् मिहिरः **आयुः कृतं येन हि यत्तदेव कल्प्या दशा**[3] इति । आयुर्दायेषूक्तवत् येन ग्रहेण लग्नेन वा कृतम् आयुःप्रमाणमेव तस्य ग्रहस्य लग्नस्य वा दशा कल्प्या । आयुर्दायेषूक्तवत् ग्रहाणामायुःप्रमाणं साध्यम् । तदेव तत्तद्ग्रहदशा भवतीत्यर्थः । आयुर्दशाप्रमाणे ज्ञातेऽपि दशाक्रमः न ज्ञातो भवति । तत्र क्रमज्ञानार्थं विधिरस्ति । अतः दशाक्रममाह श्रीपतिः **लग्नादित्योडुपानामधिकबलवतः स्याद्दशाद्या**[4] इत्यादिना । लग्नसूर्यचन्द्रमसां मध्ये अधिकबलवतः दशा प्रथमा स्यादित्यर्थः । अथ यस्य आद्या दशा जाता ततः तत्केन्द्रादिस्थितानां ग्रहाणां दशाः ज्ञेयाः । यस्य प्रथमा दशा भवति तस्य भावकुण्डलिकायां केन्द्रस्थस्य ग्रहस्य द्वितीया दशा भवति । केन्द्रद्वितीये पणपराख्ये यो ग्रहोऽस्ति तस्य तृतीया दशा भवति । केन्द्रात् तृतीयस्थाने आपोक्लिमाख्ये यो ग्रहोऽस्ति तस्य चतुर्थदशा भवति । यदि केन्द्रे कोऽपि ग्रहो नास्ति तदा पणपरस्थस्य द्वितीया दशा आपोक्लिमस्थस्य तृतीया दशा भवति । यदि केन्द्रपणपरयोः कोऽपि ग्रहो नास्ति तदा आपोक्लिमस्थस्यैव द्वितीया दशा भवतीति सिद्धम् । अत एवोक्तं बृहज्जातके भवति हि **फलपक्तिः पूर्वमापोक्लिमेऽपि**[5] इति । अथ यदि केन्द्रे पणफरे आपोक्लिमे वा द्वित्र्यादयो ग्रहा भवन्ति तर्हि तेषां क्रमः कीदृगित्याह **इह बहुषु पुनर्वीर्यत** इति । इह केन्द्रादौ बहुषु ग्रहेषु सत्सु वीर्यतो वक्ष्यमाणदशाक्रमबलात् दशा ज्ञेयाः । अयमर्थः । केन्द्रे यदि द्व्यादयो ग्रहा भवन्ति तदा तेषां मध्ये यस्य दशाक्रमबलमधिकं तस्य द्वितीया दशा भवति । एवं शेषग्रहमध्येऽपि यस्य दशाक्रमबलमधिकं तस्य तृतीया दशा भवति । एवमग्रेऽपि । एवं पणफरे चापोक्लिमे द्वित्र्यादिषु ग्रहेषु ज्ञेयम् । अथ यदि केन्द्रादौ द्व्यादयो ग्रहा भवन्ति तेषां

---

[1] आयुर्निर्णयः १.४ ।

[2] श्रीपतिपद्धतिः ७.१ ।

[3] बृहज्जातकम् ८.२ । केशवीयेऽपि "यस्यायुर्यदसौ दशास्य" इति - ६.२९ ।

[4] श्रीपतिपद्धतिः ७.८ ।

[5] बृहज्जातकम् ८.१ ।

 ISSN: 2320-740X

दशाक्रमबलसाम्यं चास्ति तदा किं कार्यमित्याह **वीर्यसाम्ये बह्वायुर्वर्षदातुः** इति । दशाक्रमबलसाम्ये सति तेषां मध्ये यस्य दशा अधिका तस्य दशा प्रथमतो भवति । यस्य न्यूना तस्य पश्चाद्भवति । अथ दशासाम्यमपि भवेत् तदा दशाक्रमः कथं ज्ञेय इत्याह **प्रथममिनवशेनोदितस्याब्दसाम्य** इति । अब्दसाम्ये वर्षादिदशासाम्ये सति इनवशेन सूर्यवशेन प्रथममुदितस्य आद्या दशा भवति । तत्र ययोर्ग्रहयोर्दशासाम्यमस्ति तयोर्मध्ये यस्य ग्रहस्य सूर्यवशेन उदयः प्रथमतोऽस्ति तस्य दशा पूर्वा अन्यस्य पश्चादिति ।

एवं दशाक्रममुक्त्वा तन्निर्णायकबलसाधनं कथयति **पूर्वं विलग्नस्य दशा यदा स्याद्**[1] इत्यादिना । यद्यपि ग्रहशषड्बलानि साधितानि सन्ति । किन्तु एतद्द्वारा दशाक्रमो न निर्णीयते । अतः दशाक्रमनिर्णयार्थं पुनः अन्यथा बलसाधनं कार्यं भवति । यदा विलग्नस्य दशा पूर्वं स्यात्तदा ग्रहात् भावं विशोध्य शेषं भावान्तरभागखण्डाद् विशोध्य ततस्तद्वीर्येण षड्बलैक्येन निहन्यात् । ततस्तद्भावान्तरांशार्धविभाजितं दशाक्रमे वीर्यमुदाहरन्ति । अथ यदि ग्रहाद् भावो न शुद्ध्यति तदा ग्रहे भावाद्विशुद्धेऽपि पाकविधौ प्राग्वद्बलं प्रसाध्यम् । एतदुक्तं भवति । यस्य ग्रहस्य दशाक्रमबलं साध्यते स ग्रहो यस्मिन्भावे तिष्ठति येन भावेन स्वल्पमन्तरं भवति तेन भावेन सह अन्तरं कार्यम् । तत् ग्रहभावान्तरं कृत्वा एकत्र स्थाप्यम् । अथ भावयोरन्तरं कार्यम् । तत्र ग्रहे भावापेक्षया ऊने सति तस्य भावस्य पूर्वभावेन सह अन्तरं कार्यम् । ग्रहे अधिके तु उत्तरभावेन सह अन्तरं कार्यम् । तस्यार्धमंशादि ग्राह्यम् । तद्भावान्तरभागखण्डो भवति । अथ ग्रहभावान्तरं भावान्तरभागखण्डात् संशोध्य शेषं तस्य ग्रहस्य षड्बलैक्येन गुणयेत् । भावान्तरभागखण्डेन भजेत् । यल्लभ्यते तद्दशाक्रमे बलं भवतीति । एवं केन्द्रगानां पणफरगतानाम् आपोक्लिमगतानां च ग्रहाणां बलानि प्रसाध्यानि । एवं बले साधिते यस्य ग्रहस्य अधिकं बलं भवति तस्य दशा अन्तर्दशा वा विदशा प्रथमतो भवतीति । एवं लग्ने बलिष्ठे दशाक्रमसाधनम् ।

पुनः रविचन्द्रयोर्मध्ये अन्यतरस्य दशा आद्या चेत् तत्र बलसाधनमाह **आद्या दशा चेत्सवितुर्विधोर्वा** इत्यादिना । यदि सूर्यस्य दशा आद्या स्यात् अथवा चन्द्रस्य दशा आद्या तदा यस्य ग्रहस्य दशाक्रमबलं साध्यते तस्य षड्बलैक्यं चतुर्भक्तं राशिबलं भवति । अन्येषु वर्गेषु होरादिषु तदर्धं स्थाप्यम् । अथ यथाक्रमं गृहहोरादिक्रमेण स्ववर्गपानां बलैर्गुणयेत् । गुणने कृते यज्जातं तद्वर्गबलमाहुः । अथ प्राक् युगपत्प्राप्तौ यौ दशेश्वरौ ग्रहौ अथवा बहवो ग्रहास्तेषां यावन्तो वर्गबलानां साम्यमस्ति तेभ्यः वर्गबलेभ्यो वर्गबलं परस्परं विशोध्य समानवर्गबलानां नाशः कार्य इत्यर्थः । शेषं वर्गबलं दशाक्रमे तद्बलमाहुः । समानानां वर्गबलानां नाशे कृते अवशिष्टवर्गबलानामैक्यं दशाक्रमबलं भवतीत्यर्थः । इह वर्गबले बलिनः ग्रहस्य दशा अन्तर्दशा वा वाच्या ।

---

[1] श्रीपतिपद्धतिः ७.९ ।

लग्नचन्द्रसूर्याणां मध्ये लग्ने बलिष्ठे अंशायुर्दायः, चन्द्रे बलिष्ठे निसर्गायुर्दायः, रवौ बलिष्ठे पिण्डायुर्दायः, एतेषां त्रयाणामपि बलहीनत्वे जीवशर्मगदितम् आयुः जातेन अनुभूयते । ते आयुर्दायाः एव दशात्वेन परिगण्यते । तथा प्रोक्तानां कस्य बलमधिकं तस्यैव दशा प्रथमा भवति अर्थात् अंशायुर्दायरीत्या दशास्वीकारे लग्नदशा प्रथमा, पैण्ड्ये रवेः, निसर्गे चन्द्रस्येति ।

एवमेव लग्नादित्योडुपानामधिकबलवतः स्याद्दशाद्येत्युक्तविधिना जीवशर्मोदितेऽप्यायुर्दाये दशाक्रमोऽवगन्तव्यः । ननु यत्र लग्नसूर्यचन्द्राणां द्वयोर्वा बलसाम्यं स्यात् आद्यदशापतेरनिश्चयात् आद्यदशापतिं पुरस्कृत्य प्रवृत्तस्य दशाक्रमस्य कथमवगम्यत्वमत्रेति चेत् अत्रेदं प्रतिभाति । वीर्यसाम्ये बह्वायुर्वर्षदातुरित्युक्तत्वात् लग्नसूर्यचन्द्राणां मध्ये यस्य भूयसी दशा तस्य आद्यदशा भवति । तत उक्तदशाक्रमबलमानीय दशाक्रमोऽवगन्तव्य इति । न च वीर्यसाम्य इत्यत्र दशाक्रमवीर्यसाम्ये सतीति । तत्कथं षड्बलसाम्ये बह्वायुर्वर्षदातुरित्यर्थः क्रियत इति वाच्यम् । यथा लग्नादित्योडुपानामधिकबलवतः स्याद्दशाद्येत्यत्र दशाक्रमबलस्य असाध्यत्वात् षड्बलमेव गृह्यते । तद्वदत्रापीति दूषणानवकाशात् । न तु तथापि यत्र सूर्यचन्द्रयोर्बलसाम्यमस्ति तत्र तयोरन्यतरस्य आद्यदशापतित्वानिश्चयेऽपि आद्या दशा चेत्सवितुर्विधोर्वेति द्वयोरेकरीत्यैव दशाक्रमबलसाधनस्योक्तत्वाद्दशाक्रमबलं पूर्वमानीय तद्बलवशात् आद्यदशापतिनिश्चयोऽस्तु न तु बह्वायुर्वर्षदातुरित्यनेनेति चेन्न । एवं सति यत्र रवेः षड्बलमधिकमस्ति तत्रापि उक्तविधिना दशाक्रमबलानन्तरमेव आद्यदशापतिनिश्चय आपद्येत । तथा सति रविबलवशात् प्रवृत्तपिण्डायुषि रवेरन्योऽपि आद्यदशापतिः स्यादिति महदयुक्तं स्यात् सम्प्रदायविरोधश्च स्यात् । तस्मादुक्तरीत्यैव दशाक्रमो ज्ञेय इति प्रतिभाति ।

अथ दशासु अन्तर्दशाविभागं कथयति **अर्धमेकगृहगस्त्रिकोणगः** इत्यादिना । दशापतिना सह एकगृहगः यो ग्रहः स अर्धं पाचयति । दशापतिभावकुण्डल्यां यदि दशापतिना सह अन्योऽपि ग्रहोऽस्ति तदा दशाया अंशत्रये कृते अंशद्वयस्य फलं दशापतिर्ददाति । तृतीयांशस्य फलं त्रिकोणगो ग्रहो ददातीत्यर्थः । एवम् अस्तगृहगः दशापतेः सप्तमो ग्रहः सप्तमांशं पाचयति । एवमेव चतुरस्रसंस्थितः दशापतेश्चतुर्थोऽष्टमो वा ग्रहः पादं चतुर्थांशं पाचयति । अत्र विशेषोऽस्ति । स यथा । उक्तस्थानमध्ये यदि एकस्थाने द्व्यादयो ग्रहा भवन्ति तदा सर्वेषां तेषामन्तर्दशा न भवति । किन्तु तेषां मध्ये यो बली तस्यैवान्तर्दशा भवति ।

एतदुक्तं होरामकरन्दे -

एकर्क्षे यदि भूयांसः सम्भवन्ति नभश्चराः । एक एव तदा तेषां दद्यादन्तर्दशां बलीति ॥

अथ अन्तर्दशाक्रमो विचार्यते । तत्र मूलदशापतेरन्तर्दशा प्रथमा । परतः केन्द्रादिविधिना जातो यो दशासु क्रमः स एवान्तर्दशास्वपि क्रम इत्येके । अपरे तु मूलदशापतेरन्तर्दशा प्रथमा । ततः पाठक्रमेणान्तर्दशासु क्रमः इति । स यथा । पूर्वम् एकगृहगस्य अन्तर्दशा । ततः परं त्रिकोणगृहगस्यान्तर्दशा । ततोऽपि परम् अस्तगृहगस्यान्तर्दशा । ततः पश्चाच्चतुरस्रसंस्थितस्येति । इदं पक्षद्वयमुक्तं कल्याणवर्मणा - **केन्द्रादिविधिना वान्ये केचित्पाठक्रमेण च** इति । अत्र पाठक्रमेणान्तर्दशाक्रमो युक्त इति प्रतिभाति । अन्यथा तद्विदां पाठे क्रमानुरोधो न स्यात् । अस्ति च क्रमानुरोधः । तथा हि -

अर्धमेकगृहगस्त्रिकोणगस्त्र्यंशमस्तगृहगः स्वरांशकम् । पादमत्र चतुरस्रसंस्थितः[1] ॥ इति श्रीपतिः ।

[1] श्रीपतिपद्धतिः ७.१५ ।


ISSN: 2320-740X

श्रीकेशवज्योतिर्विदोऽपि – अर्धस्यैकभगस्त्रिकोण-गृहगस्त्र्यंशस्य चास्ते नगांशस्याङ्घ्रेश्चतुरस्रगो निजगुणैः पक्तैकभे स्याद्बलीति ।

सुबोधिन्यामपि -

एकर्क्षेऽर्धं त्र्यंशमेव त्रिकोणे अश्वांशोऽश्वैरङ्घ्रयः वेदवस्वोः ४।८ ॥ इति ॥

बृहज्जातके श्रीवराहोऽपि -

एकर्क्षगोऽर्धमपहृत्य ददाति तु स्वं त्र्यंशं त्रिकोणगृहगः स्मरगः स्वरांशम् ।
पादं फलस्य चतुरस्रगतः स्वहोरास्त्वेवं परस्परगताः परिपाचयन्ति[1] ॥ इति ॥

एवमन्येष्वपि ग्रन्थेषु पाठे एक एव क्रमोऽस्ति । तस्मात्पाठक्रमेणैवान्तर्दशाक्रमो युक्त इति । नन्वेवं सति पूर्वग्रन्थविरोधः । तथा हि । **खचारिणः तस्य दशाग्रतः स्यादन्तर्दशा वा विदशाह्वया वा** इत्यत्र तथा **यस्याधिकं वीर्यमिहावशिष्टं वाच्या दशा चान्तरजा च तस्य** इत्यत्र पूर्वग्रन्थे दशान्तर्दशाविदशानां क्रम एक एव उक्तोऽस्ति । तत्कथं पाठक्रमेणान्तर्दशामङ्गीकुर्वतां पूर्वग्रन्थविरोधो न स्यात् । न च एकत्र स्थितयोर्द्वयोर्बहूनां वा अन्तर्दशाक्रमसन्देहे पाठक्रमेण तन्निर्णयो भवतीति । तत्र दशाक्रमवदेव अन्तर्दशाक्रमार्थं पूर्वग्रन्थतात्पर्यमिति वाच्यम् । एकत्र स्थितयोः द्वयोः द्वयोः वा बहूनां मध्ये बलिन एकस्यैव अन्तर्दशास्वीकारेण अन्तर्दशाक्रमसन्देहाभावादिति चेत् न । नवमपञ्चमस्थितयोस्तथा चतुर्थाष्टमयोर्ग्रहयोरन्तर्दशाक्रमसन्देहे पूर्वग्रन्थस्य सफलत्वात् । एवमन्तर्दशाक्रमनिर्णये सति मतभेदे गुरुसम्प्रदायागतः क्रमः स्वीकार्यः इति भाति । अनेनैव क्रमेण विदशा-उपदशादिकमपि ज्ञेयं भवति ।

एवमायुर्दायानुगुणं दशावर्षप्रमाणेन आयूंषि ज्ञात्वा दशानिर्णयः आयुर्दशा इत्युच्यते । दशाफलानि यान्युक्तानि तानि अत्र विचिन्त्य वाच्यानि इत्यलम् ॥

**ग्रन्थसूची -**


केशवपद्धतिः

केशवपद्धतेः केशवकृतस्वोपज्ञव्याख्या

केशवपद्धतेः प्रौढमनोरमाव्याख्या

बृहज्जातकम्

श्रीपतिपद्धतिः

श्रीपतिपद्धतेः कृष्णदैवज्ञकृतव्याख्या

श्रीपतिपद्धतेः सूर्यदेवयज्वकृतव्याख्या

होरामकरन्दः


---

[1] बृहज्जातकम् ८.३ ।

# अरिस्टाटिलः

डा. एम्. श्रीनिवासमूर्तिः
**प्राध्यापकः, साहित्यविभागः**

प्रतीचीसारस्वतविमर्शकेषु प्रप्रथमशास्त्रीयविमर्शकः भवति अरिस्टाटिलमहोदयः। दार्शनिकः विमर्शकः वैज्ञानिकश्चायं महोदयः क्रीस्तोः पूर्वं ३८४ वर्षात् ३२२ वर्षं यावत् जीवितः आसीत् । अस्य "पोयेटिक्स्" (Poetics)नामकः विमर्शग्रन्थः षड्विंशति-अध्यायात्मकः अयम् आधुनिकप्रतीचीविमर्शसौधाय भूमिकावत् वर्तते । अनेके सारस्वतसिद्धान्ताः ग्रन्थेऽस्मिन् परिशीलिताः वर्तन्ते । प्रथमपञ्चाध्यायेषु कवित्वं काव्यव्याकरणञ्च विवृतमस्ति। कला लोकवृत्तानुकरणम् इति अस्य प्रधानं सूत्रम् (Art is the imitation of Nature)। अत एव अयम् अनुकरणवादी इति कथ्यते।

विमर्शे प्लाटोमहोदयः लक्षण-लक्ष्यपद्धतिम् अवलम्बते स्म । अरिस्टाटिलस्तु लक्ष्य-लक्षणपद्धतिम् अवालम्बत । पद्धत्याम् अस्यां परिशीलनम्- परिच्छेदः – वर्गीकरणम् -सामान्यीकरणमिति चत्वारः अंशाः मुख्यास्सन्तीति अनेन प्रत्यपादि । प्लटोमहाशयेन प्रतिपादितस्य अनुकरणपदस्यार्थः अन्धानुकरणं वा यथातथानुकरणं वा नास्तीति, सृजनात्मकानुकरणमिति न्यरूपयत्। अयं विमर्शकाग्रेसरः कविताकलां सङ्गीतेन अनुसन्दधाति स्म ।

त्रासदीत्वम्- निर्वचनञ्च (Tragedy) - स्वकीये 'पोयेटिक्स्' नामके ग्रन्थे अनेन ६ - १९ अध्यायेषु विशेषतया त्रासदीत्वं चर्चितम् । प्लाटोमहाशयेन Tragedy - Comedy इति द्विधा प्रतिपादितं नाटकभेदमङ्गीकृत्य अरिस्टाटिलः त्रासदीत्वं निरुवाच । तेन निरुक्तं त्रासदीत्वं बुचर् (Bucher) लियोन् गोल्डेन् (Leon Golden) महाशयौ एवं स्पष्टीचक्रतुः-

"Tragedy then is an imitation ....."

अर्थात्- उदात्तस्य स्वयं सम्पूर्णस्य समुचितपरिमाणवतः लोकवृत्तस्य अनुकरणमेव त्रासदी । तत्र स्वरतालयुता गीतालङ्कृता च भाषा प्रयुज्यते । केचन भागाः छन्दोबद्धाः, केचन गेयनिबद्धाश्च भवन्ति । लोकवृत्तमेतत् न तु आख्यानरूपेण किन्तु नाटकीयतया प्रदर्श्यते । शोकभयाभ्यां तावेव भावौ समुचितरीत्या क्षालितौ भवतः । निर्वचनमिदं त्रासद्याः(Tragedy) स्वरूपं प्रयोजनञ्च निरूपयति ।

अरिस्टाटिलस्य अभिप्राये त्रासदी विषादान्तभूयिष्टा भवेदिति नियमो नास्ति । विषादकरघटनाः अथवा सङ्घटनाः वा भवेयुः । कदाचित् विशादान्तमपि भवितुमर्हति । एतद्विषादात्मकता एव त्रासदीं कामेडीतः(Comedy) पृथक्करोति। अरिस्टाटिलस्य निर्वचने १ अनुकरणम् (Imitation) २ काव्यम्(Action) ३ केथार्सिस् (Catharsis) इति-इमे-अंशाः प्रधानाः भवन्ति । तत्र अनुकरणं यथा -


ISSN: 2320-740X

**अनुकरणम् -** अनुकरणं नाम न यथा तथानुकरणं किन्तु सृजनात्मकानुकरणमिति भावः। अरिस्टाटिलमहाशयस्य निर्वचनं स्पष्टीकुर्वन् बुचरः – एवं वदति –

"Imitation so understood, is a creative art ........"

अर्थात् अनुकरणमित्युक्ते यथार्थप्रतिरूपमिति न ग्राह्यम् । वास्तविकभावग्रहणे भावचित्रद्वारा निर्दिष्टांशस्य व्यक्तीकरणम् अनुकरनमित्यर्थः ।

एल्. ए. काम्ब्री नामको विमर्शकः अरिस्टाटिलस्य अनुकरणमेवं विशदीकृतवान् – "The Poet first derives ........" अर्थात् कविः प्रथमं तावत् अवस्य भावनाशक्त्या समाजे स्फूर्तिं प्राप्नोति।तां भावनास्फूर्तिं कवित्वकलया स्वस्य भाषायाम् अनुकरोतीति भावः।

एवम् अनुकरणमित्युक्ते सृजनात्मकानुकरणमेव न तु यथाथानुकरणमिति ज्ञायते।

**कार्यम् -** कार्यकारणसम्बन्धतया नाटकप्रदानोद्देश्यस्य विकासः एव कार्यम्। अर्थात् इतिवृत्तविकास एव कार्यमिति कथ्यते। एतत् कार्यम् अनुकरणयोग्यं भवेत् । विषादनाटके कार्यम् उदात्तं गम्भीरञ्च भूत्वा आदिमध्यान्तसमन्वयवत् भवेत् । परिमितपरिमाणम्, स्वयंसमग्रता, सहजसम्भवनीयता, कार्यकारणसम्बन्धश्चेति लक्षणचतुष्टयं नाटककार्ये अवश्यं भवेत् ।

अरिस्टाटिलदृष्टौ कार्यं कथं भवेदिति इत्थं प्रोक्तं ( F.L. Lukas) एफ़्. एल्. लूकास् नामकविमर्शकेन यथा - "All that Aristotle insisting upon.........." अर्थात् नाटके आद्यन्तयोः अर्थवन्ति कारणनि भवेयुः । सङ्घटनाः परस्परसम्बद्धाः स्युः, काकतालीयतया असम्बद्धतया च न भवेयुः । सङ्घटनानां पौर्वापर्यविषये स्पष्टता स्यात् ।

**केथार्सिस् -** भरतस्य रससूत्रव्याख्यानावसरे यथा संयोगनिष्पन्नशब्दयोः विभिन्नाभिप्रायाः प्रादुर्भूताः तथैव अरिस्टाटिलस्य केथार्सिस् विषये - अपि । पाश्चात्यविमर्शकेषु केथार्सिस् विषये चत्वारः – अभिप्रायाः दृश्यन्ते ।

क्षालनवादः (Theory of Purgation)
पवित्रीकरणवादः (Theory of Purification)
सामरस्यवादः (Theory of Balancing)
स्पष्टीकरणवादः (Theory of Clarification) इति ।

भयशोको उद्वेगाः सामाजिकश्रेयोप्रतिबन्धका इति प्लाटोमहाशयस्याभिप्रायः। अस्याभिप्रायम् अनङ्गीकृत्य, शोकभयादीनां जीवितसम्बन्धित्वं निरूप्य अरिस्टाटिलः त्रासद्याः प्रयोजनं केथार्सिस् इति – अवोचत् ।

**क्षालनवादः :-** वैद्यपरिभाषायां केथार्सिस् इत्यस्य क्षालनमित्यर्थः । त्रासदीसन्दर्शनेन भयशोकादयः उत्पन्नाः भूत्वा ततः पूर्वमेव प्रेक्षकस्य हृदि सुप्तावस्थायां स्थितान् शोकभयादीन् क्षालयन्तीति अरिस्टाटिलस्याभिप्रायः - इति । F.L. Lukas

स्वस्मिन् Tragedy ग्रन्थे एवमुक्तवान्- There is a strong evidence that catharsis means not purification but purgation.

**पवित्रीकरणवादः :-** O.B. Hardison पण्डितः केथर्सिस् विषये एवमुक्तवान् - विषादनाटकदर्शनेन प्रेक्षकः कथं शोकभयादिभावाः नैतिकतया विनियोक्तव्याः इति जानाति\अत्रापि पाश्चात्यपण्डितेषु नैके अभिप्रायाः दृश्यन्ते ।

**स्पष्टीकरणवादः :-** नाटके प्रदर्श्यमानैः वस्तुभिः जीवने अनवगताः क्लेशकराः शोकभयादयः स्पष्टतया अवगम्यन्ते इत्यतः केथर्सिस् इत्यस्य स्पष्टीकरणमित्यपि वादः सन्दृश्यते ।

**सामरस्यवादः :-** जीवने शोकभयादयः आवश्यका एव, किन्तु तेषां परिमितिः भवेत् । शोकभयादयः अपरिमितिं गत्वा जीवने सामरस्यं यदा भञ्जयन्ति तदा विषादरूपकं तान् शोकभयादीन् परिमितौ स्थापयतीति सामरस्यवादः ।

**सारांशः :**

- त्रासदीद्वारा जायमाना अनुभूतिः आनन्दात्मिका एव न तु दुःखात्मिका ।
- स च आनन्दः ज्ञानजन्यः ।
- इतिवृत्तगतविशिष्टांशैः विश्वजनीनविषयाणां सम्बन्धावगमनमेव ज्ञानम् । विश्वजनीनविषयैरेव विशिष्टांशाः अन्विताः भवन्ति ।
- केथर्सिस् इति विषयः "त्रासदी" इत्यस्य प्रयोजनं सूचयति । तत्प्रयोजनं स्पष्टीकरणमेव। स्पष्टीकरणप्रक्रियायामस्यां क्षालनप्रक्रिया अपि अन्तर्भवति ।
- अरिस्टाटिलमहोदयेन त्रासदीत्वं षड्विधं विभक्तं विद्यते –

- इतिवृत्तम् - Plot
- पात्रम् - Character
- भावः - Thought
- भाषा - Diction
- सङ्गीतम् - Melody
- रङ्गप्रसाधनम् - Spectacle

**********


ISSN: 2320-740X

# दृष्टिसृष्टिवादः

डा. गणपति वि. हेगडे

वेदान्ते सृष्टिविषये दृष्टिसृष्टिवादः, सृष्टिदृष्टिवादश्चेति वादद्वयं प्रसिद्धं वर्तते । तत्र दृष्टिसृष्टिवादो यथा- अज्ञानानुपहितं शुद्धं चैतन्यमीश्वरः, अज्ञानोपहितं च जीव इति मुख्यो वेदान्तसिद्धान्त एकजीववादाख्यः । इममेव दृष्टिसृष्टिवादमाचक्षते । अस्मिन् पक्षे जीव एव अज्ञानाधीनो जगत उपादानकारणं निमित्तकारणं च भवति । एकमेव चैतन्यं बिम्बत्वाक्रान्तम् ईश्वरचैतन्यम्, प्रतिबिम्बत्वाक्रान्तं जीवचैतन्यम् । बिम्बप्रतिबिम्बकल्पनोपाधिश्च एकजीववादे अविद्या । अनेकजीववादे तु अन्तःकरणान्येव । अविद्यान्तःकरणरूपोपाधिप्रयुक्तो जीवपरभेदः । उपाधिकृतदोषाश्च प्रतिबिम्बे जीवे एव वर्तन्ते न तु बिम्बे परमेश्वरे । एतादृशजीवस्य दृष्टिरेव सृष्टिरिति दृष्टिसृष्टिवादः । तदुक्तं सिद्धान्तबिन्दौ यथा – जीव एव स्वाज्ञानवशात् जगदुपादानं निमित्तं च । दृश्यं च सर्वं प्रतीतिकम् । देहभेदाच्च जीवभेदभ्रान्तिः इति । यथोक्तमद्वैतसिद्धौ दृष्टिसृष्ट्युपपत्तौ – यदा यत्पश्यति तत् समकालं तत् सृजतीत्यत्र तात्पर्यमिति ।

आचार्यमण्डनमिश्रैः जीवस्य मिथ्याविषयदर्शनमेव मिथ्याविषयसृष्टेः मूलम् इत्युक्तम् । जाग्रद्ज्ञानमपि स्वप्नज्ञानतुल्यम् । स्वाप्नविषयाः यथा मानसकल्पिताः जाग्रद्विषया अपि तथैव अविद्याकल्पिताः । ब्रह्मणः जीवभावः मिथ्या, ब्रह्मैव सत्यम् । जीवभावस्य मिथ्यात्वेन विषयदर्शनविषयभोगादेरपि च मिथ्यात्वम् । एवं च यावदेव जीवस्य मिथ्याविषयदर्शनम्, तावदेव दृश्यप्रपञ्चस्य अस्तित्वम्, द्रष्टुः जीवस्याभावे दृश्यप्रपञ्चस्यापि अभावः । तथा च जीवस्य दृष्टिरेव विश्वसृष्टेः कारणमित्ययं वादः दृष्टिसृष्टिवादः इत्युच्यते ।

भामतीकाराणां मतेऽपि जगत्सृष्टिः जीवगताविद्यायाः विलासमात्रम्, अत एव च मिथ्या । पूर्वपूर्वविभ्रमसंस्कारः एव अविद्यायाः मूलम् । पूर्वतनभ्रमसंस्कारात् अध्यासः, अध्यासाच्च संस्काराः इत्येवम् अध्यासविभ्रमसंस्कारयोः चक्रम् अनादिकालादारभ्य प्रवर्तते । तदुक्तम्- आचार्यशङ्करभगवत्पादैः ब्रह्मसूत्रभाष्ये यथा - मिथ्याज्ञाननिमित्तः सत्यानृतं मिथुनीकृत्य अहमिदं ममेदम् इति नैसर्गिकोऽयं लोकव्यवहारः इति । उपाधिभेदेन जीवानां बहुत्वात् , अविद्या अपि प्रतिजीवं विभिन्ना, अविद्यासंस्कारवशात् उत्पन्नः दृश्यप्रपञ्चोऽपि प्रतिजीवं विभिन्नः । तथापि आविद्यकसृष्टौ सादृश्यवशात् तुल्यरूपेण गोत्वादौ सर्वेषां गोत्वज्ञानमेव भवति न तु अश्वादीनाम् ।

विश्वसृष्टेः जीवगताविद्यायाः विलासमात्रत्वे लोकवत्तु लीलाकैवल्यम् इति सूत्रविरोधः स्यादिति चेन्न । अस्मिन् सूत्रे विश्वसृष्टिः परमेश्वरस्य लीलामात्रत्वेन उच्यते सूत्रकारैः । आप्तकामः परमेश्वरः क्रीडावशात् सृष्टिचक्रं प्रवर्तयति । यथा कश्चन पुरुषः स्वीयप्रतिबिम्बस्य ऋजुवक्रादिकाः क्रिया दृष्ट्वा मोदते तथैव परमेश्वरोऽपि जीवस्य सृष्टिलीलां दृष्ट्वा

आनन्दम् अनुभवति । तदुक्तम् कल्पतरुकारैः-

**प्रतिबिम्बगताः पश्यन् ऋजुवक्रादिकाः क्रियाः ।**
**पुमान् क्रीडेद् यथा ब्रह्म तथा जीवस्य विक्रियाः ॥ इति ।**

अत एव दृष्टिसृष्टिवादे जाग्रत्प्रपञ्चस्य व्यावहारिकसत्यत्वम् अङ्गीकरणीयमेव सूत्रविरोधपरिहाराय । बहुजीववादे अयं दृष्टिसृष्टिवादः न सम्यगुपपद्यते ।

ज्ञेयप्रपञ्चस्य च विभ्रममात्रत्वे वेदोक्तयागादीनां स्वर्गादीनां च मिथ्यात्वं स्यात् , तथैव वेदस्य अप्रामाण्यप्रसङ्गः अपि । तस्मादेव चित्सुखाचार्यप्रभृतिभिः बहुभिः न समर्थितः अयं दृष्टिसृष्टिवादः । तस्मात् परमेश्वरसृष्टमिदं जगत् न जीवस्य दृष्टिविभ्रममात्रम् , अस्य व्यावहारिकसत्यत्वमपि अवश्यं स्वीकरणीयम् । तर्हि दृष्टिसृष्टिवादः न समीचीनो वा इति शङ्का न कार्या । अयं दृष्टिसृष्टिवादः उत्तमाधिकारिणः उद्दिश्य विहितो वर्तते । मुमुक्षोः साधनपरिपक्वतादशायाम् अयं वादः स्वतः पुरस्कृतो भवति ।

श्रीमदप्पय्यदीक्षितेन्द्रैः सिद्धान्तलेशसङ्ग्रहे अयं वादः सुष्ठु निरूपितः यथा - ननु दृष्टिसृष्टिमवलम्ब्य जाग्रत्प्रपञ्चस्य कल्पितत्वोपगमे कस्तस्य कल्पकः । निरुपाधिरात्मा अविद्योपहितो वा । नाद्यः मोक्षेऽपि साधनान्तरनिरपेक्षस्य कल्पकस्य सत्त्वेन प्रपञ्चानुवृत्त्या संसाराविशेषप्रसङ्गात् । न द्वितीयः, अविद्यायाः अपि कल्पनीयत्वेन तत्कल्पनात्प्रागेव कल्पकसिद्धेर्वक्तव्यत्वात् । अत्रोच्यते समाधानं पूर्वपूर्वकल्पिताविद्योपहितोत्तराविद्याकल्पकः । अनिन्दप्रथमत्वाच्च कल्पककल्पनाप्रवाहस्य नानवस्थादोषः इति । तस्मात् जीवस्य दृष्टिरेव विश्वसृष्टिः । तदुक्तं विष्णुपुराणे –

**ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः ।**
**अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्यन्ये कुदृष्टयः ॥ इति ।**

अत्र श्रीमदप्पय्यदीक्षितेन्द्रैः वेदान्तसिद्धान्तमुक्तावलीकाराणां नामोल्लेखनं कृतं विद्यते । तस्मात् वेदान्तसिद्धान्तमुक्तावलीकाराः दृष्टिसृष्टिवादस्य समर्थनं कुर्वन्ति स्म इति वक्तुं शक्यते ।

**********


ISSN: 2320-740X

# भारतीयज्यौतिषे यवनज्योतिषस्य प्रभावः- एकं विश्लेषणम्

डा. प्रदीपशर्मा
प्राध्यापकः, ज्योतिषविभागः

**म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।**
**ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्विजा ॥**[1]

इत्याचार्यवराहमिहिरमतानुसारं फलितज्योतिषे यवनानाम् अवदानं नास्ति न्यूनम् । अत एव प्रायः तत्पृष्ठवर्तिनः सर्वेऽपि आचार्याः यवनाचार्याणां ज्ञानस्य भारतीयज्योतिषेण सह साम्यं प्रकटयन्तः यवनानां प्रशंसामकुर्वन् । सामान्यतया 'यवन'पदस्य प्रयोगः एतावत्पर्यन्तं भारतस्य पश्चिमे स्थितानां यूनान-अरबादिदेशीयानां जनानां कृते भवति । किञ्च अस्माकं सर्वमान्यपुराणादिनानाशास्त्रीयग्रन्थेषु अपि यवन-यवनेश्वरादिशब्दानां प्रयोगः प्रचुरतया प्राप्यत एव । यथा-

**"किरात-हुणान्ध-पुलिन्द-पुल्कषा-अभीरकङ्का-यवना-खशादयः।**
**येऽन्ये च पापा यदुपाश्रपाश्रयाः शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः॥"**

वराहमिहिरस्य बृहज्जातक-बृहत्संहितादिग्रन्थेषु विशेषतश्च उत्पलभट्टेन स्वटीकायां यवनानां विशेषोल्लेखः कृतः। अन्यच्च सूर्यादिग्रहाणां दशावर्षाणां प्रमाणेषु मयनाम्नः दानवस्य म्लेच्छजातीयस्य यवनाचार्यस्य पाराशरमतस्य च स्पष्टतया उल्लेखः प्राप्यते। तद्यथा- **"मययवनमणित्थशक्तिपूर्वैः दिवसकरादिषु वत्सराः प्रदिष्टाः।"**[2] इति । किञ्च मयो नामा दानवः सूर्यलब्धवरप्रसादात् सिद्धान्तज्योतिषं सम्यग् अध्यगीष्ट इति सूर्यसिद्धान्तग्रन्थावलोकनेन स्पष्टम् अवगम्यते । तद्यथा-

**अल्पावशिष्टे तु कृते मयो नाम महासुरः ।**
**रहस्यं परमं पुण्यं जिज्ञासुर्ज्ञानमुत्तमम् ॥**[3] इति।

अनेनैवोदाहरणेन यवनाः म्लेच्छाः सन्तोऽपि होराविदः इति स्पष्टं भवति।

**यवनानां भारतीयानां च सम्बन्धः**

---

[1] बृहत्संहिता २/३२

[2] बृहज्जातकम् ७/१

[3] सूर्यसिद्धान्त-१/२

भारतीयानां प्राचीनकालादेव सुदूरस्थितैः विश्वस्य सुसंस्कृतैः विकसितैः च नैकदेशैः साकं सम्पर्कः आसीत् । बहवो हि भिन्नजातीयाः वैदेशिकाः भारतमागताः, भारतस्य च विशालसांस्कृतिकसागरे विलीनाः अभूवन् । ते हि स्वीयस्वभावानुसारम् अस्माकं संस्कृतिं प्रति अभिरुचिं प्रकटितवन्तः । ततश्च अवसरानुरूपम् अन्यत्र अस्याः संस्कृतेः प्रचारः अपि जातः । भारतं प्रविष्टेषु वैदेशिकेषु ग्रीकदेशीयाः अरबदेशीयाः च प्रमुखाः आसन् । येषु आक्रान्तारः बुद्धिजीविनः दार्शनिकाः संस्कृतिप्रेमिणश्च अधिकाः । अरबदेशीयाः एव प्रायः यवननाम्ना प्रसिद्धाः। यवनशब्दस्य नैके अर्थाः प्रयुक्ताः दृश्यन्ते । अद्यत्वे यवनशब्दस्य योऽर्थः स्वीक्रियते सः वृद्धयवनजातककारस्य मीनराजस्य काले व्यवहारे नासीत्। वस्तुतः ये बर्बरजातीयाः भारतवर्षे आक्रमणं कृतवन्तः ते एव यवनाः इति प्रसिद्धाः । संस्कृते तु यवनशब्दः प्राचीने पौराणिककाले 'तुर्वसु' इत्यस्य सन्ततीनां कृते यवनशब्दस्य प्रयोगः कृतः दृश्यते। अनु-यदु-द्रुह्यु-तुर्वसु-पुरूत्यादिनामानि आर्याणां प्रमुखदुर्गाणाम् आसन्। एतेषां दुर्गाणां नामान्तरं 'पञ्चजनाः' इत्यासीत् । उक्तञ्च-

**यदोस्तु जाता यदवस्तुर्वसोर्यवनाः सुताः।**
**द्रुह्योस्तु तनया भोजा अनोस्तु म्लेच्छा जातयः॥**
**पुरोस्तु पौरवो वंशो यत्र जातस्तु पार्थिवः॥**[1]

अतः सिद्ध्यति यत् तात्कालीनार्याणां शाखाऽपि यवनः इत्युच्यते स्म । ब्रह्माण्डपुराणेऽपि यवनानाम् आर्यावर्तदेशे शासनस्थिते उल्लेखः प्राप्यते । कालिदासेनापि रघुवंशे दिग्विजयप्रसङ्गे यवनी रमणी इत्यादिपदानां प्रयोगः विहितः तद्यथा- **यवनी मुखपद्मानां सेहे मधुमदं न सः ।**[2] यवनाचार्यनामा ज्योतिषशास्त्रप्रवर्तकेषु अन्यतमः कोऽपि ऋषिः अपि गण्यते । तद्यथा- **"लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः"** इति । अत एव पौलिशसिद्धान्तस्य रचना युनानी इति आधारेण जाता इति अलबरूनीवर्यस्य आशयः । यद्यपि इदं भारतीयमेव इति उक्त्वा तन्मतं सम्यक् खण्डितवान् कर्नवर्यः। एवं भारतीयफलितज्योतिषशास्त्रं बहुत्र यवनैः प्रभावितं दृश्यते ।

फलितज्योतिषस्य उद्भावः भारतीयमहर्षिभिः उत यवनाचार्यैः इत्ययं विवादः ज्योतिषशास्त्रेतिहासे अत्यन्तं व्यापकः, यत्र विशेषतः पाश्चात्त्यानां कथनानि प्रमुखानि । अस्मिन् विषये यवनेन यवनाचार्यैः वा फलितज्योतिषस्य प्रचारो अभूत् इत्युक्तिः तथ्यपूर्णा इति न केनापि प्रमाणेन सम्भाव्यते । किन्तु ज्योतिषशास्त्रमिदं भारतीयैः महर्षिभिः स्वीयदिव्यदृष्टिभिः महता परिश्रमेण निरूपितम् इति अनन्तानि प्रमाणानि, उदाहरणार्थम् इदं प्रमाणीभूतं भवति आद्यकवेः वाल्मीकेः कथनेन । यतो हि वाल्मीकिना रामायणे तात्कालिकग्रहयोगैः राज्ञः मृत्युफलमपि उक्तं तद्यथा-

**"आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः ।**

---

[1] मत्स्यपुराणम् अ. ३५

[2] रघुवंशः ४.६


ISSN: 2320-740X

**प्रायेण हि निमित्तानामीदृशां समुद्भवे ।**
**राजा मृत्युमवाप्नोति घोरां विपदमृच्छति ।**[1]

अन्यच्च उच्यते-

**"ततश्च द्वादशे मासि चैत्रे नावमिके तिथौ ।**
**नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थासु पञ्चसु ।**
**ग्रहेषु कर्कटे लग्ने वाक्पताबिन्दुना सह ।**
**कौसल्याऽजनयद्रामं दिव्यलक्षणसंयुतम् ।"**[2]

पद्यसृष्टेः मूलग्रन्थः रामायणम् इत्यत्र नास्ति कस्यापि संशयः । तस्मिन् आदिमे ग्रन्थे ज्योतिषस्य वर्णनं ज्योतिषोत्पत्तौ भारतीयप्रामुख्यं द्योतयति । तथैव पुराणेषु अपि ज्योतिशशास्त्रस्य तत्र तत्र उल्लेखः प्राप्यते । इत्थं फलितज्योतिषे भारतीयानां योगदानात् पूर्वं यवनानां योगदानं न कदापि साधयितुं शक्यम् , किञ्च भारतीयफलितज्योतिषस्य श्रुतिमौलिकतायाम् आद्योत्पत्तौ च संशयः कर्तुं न शक्यते ।

सामान्यतः विज्ञानस्य क्षेत्रे भूमण्डलस्य किमपि राष्ट्रम् अन्यराष्ट्रात् क्षेत्रात् वा अधिकम् उन्नतं विकसितं च भवितुम् इच्छति । उन्नतेः संसाधनाय महतः साधनस्य आवश्यकता भवत्येव इत्यत्र नास्ति संशयः । फलितज्योतिषेऽपि यवनेश्वरादीनाम् आचार्याणां विशेषाधिकारो भवितुम् अर्हति । यतः अरब-यूनानादिदेशेषु अस्य महान् प्रचारो दृश्यत एव । क्रमशः यवनशब्दाः वराहमिहिरकालपर्यन्तं भारते अपि प्रसिद्धाः अभूवन् । अत एव वराहमिहिरेण यत्र-तत्र तेषां प्रयोगः विहितः । विशेषतः राशीनां नामानि यथा-

**क्रियतावुरिजितुमकुलीरलेयपाथोनजूककौर्प्याख्याः ।**
**तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभञ्चेत्थम् ॥**[3]

यद्यपि वराहमिहिरस्य शब्दाः संस्कृता इव सन्ति तथापि ध्यातव्यं यत् तेषां प्रयोगः वराहमिहिरात् प्राक् न कस्मिन्नपि ग्रन्थे अभूत् । अन्यच्च अस्य प्रमाणमपि विद्यते यत् यवनाः बाबुलजनेभ्यः तेषां राशिनाम्नाम् अनुवादं कृतवन्तः । ईदृशनामानि यवनदेशे ५३१ ईस्वीवर्षात् पूर्वमेव प्रारब्धानि । (भारतसर्वकारस्य पञ्चाङ्गसंशोधनसमितेः संस्तुत्यां १९३ तमपृष्ठसंख्यायाम् आवश्यकानि उदाहरणानि प्राप्यन्ते) । ज्योतिषविशारदेन श्रीमता हजारीप्रसादद्विवेदिवर्येण अपि अङ्गीकृतं यत् राशीनां नामानि भारतीयाः यवनपद्धतितः स्वीकृतवन्तः इति । तेषां मतं यत् प्राक् कृत्तिकानक्षत्रात्

---

[1] आ.का.सर्ग/४,श्लोक/१६

[2] वा. का. सर्ग १९ श्लोक ८-१७

[3] बृहज्जातकम्-१/८

सप्तविंशतेः नक्षत्राणां गणना क्रियते स्म । परं राशिषु अश्विनीनक्षत्रात् क्रियते, दशादीनां हि पुनः कृत्तिकातः एव गणना।

विशिष्य वर्षप्रवेशस्य गणनादिपरम्परा यवनानाम् अवदानमिति केचन आमनन्ति । ताजिकनीलकण्ठ्यादयो ग्रन्थाः अत्र प्रमाणीभूताः । यद्यपि नीलकण्ठाचार्यः भारतीयः । तथापि ग्रन्थोऽयं हि यवनप्रभावेन एव विरचितः दृश्यते । तत्र विद्यमानानां सिद्धान्तानां च व्यवहारे महान् प्रयोगः दृश्यते अतः इदं वक्तुं शक्नुमः यत् यद्यपि फलितज्योतिषस्य प्रयोगः भारते आबहोः कालात् प्रवर्तमानः आसीत्, कालान्तरे च यवनाचार्याः अपि ज्योतिषे महान्तं श्रमम् अकार्षुः । तस्मादेव वराहमिहिरादयः आचार्याः एतान् अपि स्वग्रन्थेषु स्मृतवन्तः ।

**परामृष्टाः ग्रन्थाः –**


1. बृहज्जातकम्, स.- सत्येन्द्रमिश्रः, चौखम्बा सुरभारतीप्रकाशनम्, वाराणसी २०१४
2. मानसागरी, व्या.- विजयकान्तमिश्रः, भारतीयविद्याप्रकाशनम्, दिल्ली २००३
3. जातकपारिजातः, गोपेशकुमार ओझा, मोतीलालबनारसीदास, दिल्ली २००४
4. वृद्धयवनजातकम्, मीनराजप्रणीतम्, सं- सुरेशचन्द्रमिश्रः, रञ्जनपब्लिकेशन्स, दिल्ली
5. जातकतत्त्वम्, व्या.- हरिशङ्करपाठकः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी,
6. चमत्कारचिन्तामणिः, भट्टनारायणः, मोतीलालबनारसीदास, दिल्ली २००५
7. बृहज्जातकम्,व्या.- केदारदत्तजोशी, मोतीलालबनारसीदास, वाराणसी
8. बृहत्पराशरहोराशास्त्रम्, स.- देवचन्द्रझा, चौखम्बा प्रकाशनम् वाराणसी


**********

## शास्त्रकोषः

**-ः वाग्वर्धिनीपरिषद् ः-**

**जनः पैतृकदोषेण दोषान्मातामहस्य च । गुरुदोषात् त्रिभिर्दोषैः हरिदोषो भवेद् ध्रुवम् ॥**

**कुलत्रयं यच्च शुद्धं कथं सोऽहंकृतो भवेत् ॥** (देवीभागवतम् 9 स्कन्धः 41अ.7)

ಮಾನವನು ತನ್ನ ತಂದೆಯ ವಂಶದಲ್ಲಿರುವ ದೋಷದ ಕಾರಣದಿಂದ ಅಥವಾ ತನ್ನ ತಾಯಿಯ (ತಂದೆಯ) ವಂಶದಲ್ಲಿರುವ ದೋಷದ ಕಾರಣದಿಂದ ಅಥವಾ ತನ್ನ ಗುರುವಿನ ದೋಷದ ಕಾರಣದಿಂದಾಗಿ ಭಗವಂತನಲ್ಲಿ ದೋಷವನ್ನೆಸಗುವನು. ತಾಯಿ–ತಂದೆ–ಗುರು ಇವರು ಮೂವರೂ ಪರಿಶುದ್ಧರಾಗಿದ್ದರೆ ಮಾನವನು ದುರಹಂಕಾರಿಯಾಗಲಾರ.

मनुष्य अपने पिता के या अपने मातामह के वंश मे स्थित दोषों से अथवा अपने गुरु के दोषों से भगवान के विषय में दोष करता है। माँ - पिता – गुरु यह तीनों की परिशुद्धता रहने पर वह भला अंहकारी कैसे हो सकता है।

A man gets mistaken regarding the God due to the earlier mistakes of his ancestors and his Guru. How shall a man can be mistaken when his forefathers and the Guru has the purity.


ISSN: 2320-740X

# कौमुदीव्याख्यायां श्रीनीलकण्ठवाजपेयिविरचितसुखबोधिन्यां समर्थसूत्रविचारः

विद्वान् अरुणभट्टः
**प्राध्यापकः, व्याकरणविभागः**

नामरूपात्मकेऽस्मिन्प्रपञ्चे सर्वोऽपि मानवव्यवहारः शब्दैरेव प्रवर्तते । सुसंस्कृत-सुनिश्चितशब्दमन्तरा भाषायाः दुरवगमादाचार्यैः शब्दसाधुत्वप्रतिपादकं शब्दशास्त्रं निर्ममे । सत्स्वपि अनेकेषु व्याकरणेषु पाणिनीयमेव मूर्धन्यं स्थानमावहति लौकिकवैदिकोभयशब्दसंस्कारत्वात् पाणिनीयाष्टाध्यायीमधिकृत्य वार्तिकानि महाभाष्यञ्चाचार्यैः व्यरचि । एतत्समुदितं त्रिमुनिव्याकरनमिति प्रसिद्धम् । गच्छता कालेन नवीनपरम्परा आरब्धा । अध्ययनसौकर्याय प्रकरणं प्रविभज्य भट्टोजीदीक्षितैः विरचिता वैयाकरणसिद्धान्तकौमुदी सिद्धान्तानां कौमुदीत्वेन राराष्टि। कौमुदीमधिकृत्य अनेकाः व्याख्याः सुप्रसिद्धाः। सिद्धान्तकौमुदीव्याख्यासु श्रीनीलकण्ठवाजपेयिना विरचिता सुखबोधिनीव्याख्या अन्यतमा अतिदुर्लभा च । तत्रोक्तसामर्थ्यविचारः किञ्चिदिव निरूप्यते ।

**समर्थः पदविधिः ॥**

सुप्तिङन्तमिति सूत्रे श्रुतक्रमानुरोधेन सुबन्ते प्रथमं निरूप्यमाणे अर्थवत्प्रातिपदिकप्रकृतिकम् अनर्थप्रातिपदिकप्रकृतिकं ङ्याप्प्रकृतिकञ्च सुबन्तं निरूप्य समासान्निरूपयितुं पदविधिसाधारणपरिभाषां वक्ति – समर्थः पदविधिः[1] इति । पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः इति कौमुदी । समर्थशब्दस्य तदाश्रिते लक्षणा । विधीयते इति विधिः । पदस्य विधिः, पदयोर्विधिः, पदानां विधिः इति समासः । पदमुद्दिश्य यो विधिः समासकृत्तद्धितसनाद्येकशेषरूपः स समर्थाश्रितः । पश्यति कृष्णं श्रितः देवदत्तम् इत्याद्यनतिप्रसङ्गाय समर्थपदम् । तथा च वस्वमुपगोरपत्यं चैत्रस्य इत्यादौ अणपि न असमर्थत्वात् ।

**द्विविधं सामर्थ्यम् ॥**

सामर्थ्यञ्च द्विविधम् । व्यपेक्षालक्षणमेकार्थीभावलक्षणञ्चेति । स्वार्थपर्यवसायिनां पदानाम् आकाङ्क्षादिवशात् यः परस्परसम्बन्धः सा व्यपेक्षा । सा च वाक्ये राज्ञः पुरुषः इत्यादौ । तत्र व्यपेक्षां सत्यां यो यस्सन्निहितः योग्यश्च तेन तेन सम्बन्धो दृश्यते । यथा राज्ञः पुरुषः, अश्वश्च राज्ञः , देवदत्तस्य पुरुषः इति । एकार्थीभावस्तु राजपुरुषः इत्यादि समासादौ

[1] पाणिनीयाष्टाध्यायी २-१-१

वृत्तावेव । स च प्रक्रियादशायां पृथगर्थत्वेन प्रथमगृहीतस्य विशिष्टैकार्थित्वरूपः । तेन राजपुरुषः इत्यादौ वृद्धस्येत्यादेर्नान्वयं पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेश इति व्युत्पत्तेः । देवदत्तस्य गुरुकुलमित्यादौ तु देवदत्तोत्तरषष्ठ्यर्थस्य कुलेनैवान्वयात् सम्बन्धस्तु उपस्थितगुरुद्वारक एव षष्ट्यर्थो न तु तदितरः । उक्तञ्च वाक्यपदीये–

**समुदायेन सम्बन्धो येषां गुरुकुलादिना ।**
**संस्पृश्यावयवानां ते तु युज्यन्ते तद्वता सह[1] ॥ इति ।**

चैत्रस्य नप्तेत्यादाविव ससम्बन्धिकस्थलेऽपि एकदेशान्वयोऽस्तीति मतान्तरम् । उक्तञ्च –

**सम्बन्धिशब्दस्सापेक्षो नित्यं सर्वस्समस्यते[2] ।**
**वाक्यवत्साव्यपेक्षा हि वृत्तावपि न हीयते ॥ इति ।**

न च राज्ञोऽपि नित्यसापेक्षत्वात् एकदेशत्वेऽपि ऋद्धस्येत्वत्र अन्वयप्रसङ्ग इति वाच्यम् , राज्ञः ईशितुरीशितव्यं प्रति साकाङ्क्षत्वेऽपि ऋद्धं प्रत्यनाकाङ्क्षत्वात् अत्र च वृत्तौ एकार्थीभावे जहत्स्वार्था वाक्ये व्यपेक्षायामजहदर्था इति विवेकः । “राजपुरुषः” इत्यादौ राजादिपदानां क्लृप्तशक्तित्यागायोगात् एकार्थीभावपक्षे जहत्स्वार्थता दुर्वचा इति न वाच्यम् । समासादौ अवश्यक्लृप्यातिरिक्तशक्तैव राजविशिष्टपुरुषभानसम्भवे सति राजपुरुषशब्दयोः पुनस्तद्बोधकत्वं न कल्प्यम् । तथा च पृथगर्थकल्पनायां सत्यां प्रौढ[3] इत्यत्रेव प्रोढवानित्यत्र पादूहोढोढ्येषैष्येष्विति वृद्धिः , पटुजातीयेत्यत्र तीयस्य ङित्सु सर्वनामतायाः, प्रौढवान् पटुजातीयस्मै इत्याद्यनिष्टापत्तेः । इत्थमनेकेषु दोषाः दुर्वाराः। तस्माद्विशिष्टशक्तिमाश्रित्य अवयवानामानर्थक्यम् आश्रयणीयम् । एवञ्चार्थवद्ग्रहणे नानर्थकस्येति परिभाषया एकदेशानामनर्थकत्वान्नोक्तदोषाः ।

**अर्थवत्परिभाषाप्रसक्तिः**

नन्वेवमपि निमित्तापाये नैमित्तिकस्याप्यपाय इति न्यायेन ‘सुपः लुकि’ अर्थवत्वनिमित्तकप्रातिपदिकपदत्वयोः हान्यापत्तिरिति वाच्यम् । समाससंज्ञानिमित्तसुपो लुक्यपि पदत्वं न निवर्तते। नापि अकृतव्यूहाः पाणिनीयाः कृतमपि निवर्तयन्तीति परिभाषया निवृत्तिस्स्यादिति वाच्यम् । रजेत्यादौ नलोपे सति तन्निमित्तकोपधादिर्घहान्यापत्या परिभाषायाः आकारासम्मतत्वात् । ननु अर्थवत्परिभाषया नलोपसूत्रमपि राजा इत्यर्थवत्प्रातिपदिके चरितार्थम् अनर्थके समासान्तर्गते न प्रवर्तेत । न च वृषण्वस्वयोः इति वार्तिकेन वृषणश्वः वृषण्वसुरित्यत्र भसंज्ञाविधानात् ज्ञापकात् न लोपविधौ अवर्थवत्परिभाषा न प्रवर्तते । अनेन हि भत्वं सम्पाद्य तेन पदत्वं व्युदस्य पदान्तत्वान्नलोपो वार्यते । सोऽयमर्थवत्परिभाषया ऐव निर्वाहे व्यर्थः स्यात् । अतः अवयवानर्थक्येऽपि न दोष इति वाच्यम् । ज्ञापकेन

---

[1] वाक्यपदीयम् प.का ४८

[2] वाक्यपदीयम् प.का ४९

[3] प्रादूहोढोढ्येषैष्येषु

 ISSN: 2320-740X

निर्वाहाभ्युपगमे टिड्ढाणञित्यत्र[1] ठञ् ग्रहणं दयायासश्च[2] इत्यत्र दयाग्रहणं व्रश्चादिसूते[3] भ्राजिग्रहणञ्च व्यर्थं स्यात् । अञ् अय् राजिग्रहणादेव तेषां लाभात् एकदेशग्रहणे समुदाया न गृह्यन्ते इति ज्ञापनार्थं तेषां पृथग्ग्रहणम् इत्यतः एकदेशानाम् अनर्थकत्वेऽपि प्रादूहोढ इत्यादौ कृद्याद्यतिप्रसङ्गपरिहारसम्भवात् क्लृप्तार्थत्यागायोगात् ।

एवञ्च धातुकार्यार्थं ज्ञापकाश्रयणम् । तथा च समासावयवस्य अनर्थकत्वात् नलोपादिकं न प्रवर्तते इति चेदत्राहुः । अर्थवत्परिभाषया विशिष्टरूपोपादानविषयत्वेन नलोपविधौ तदभावात् परिभाषायाः अप्रवृत्त्या-नलोपप्रवृतत्तेर्निर्विघ्नत्वात् । किञ्च "राजपुरुषः" इत्यादिषु पदैकानाम् अर्थवत्वे अर्थवत्सूत्रेण प्रातिपदिकत्वविभक्त्युत्पत्त्यापत्तिः । अत एव अर्थवत्पदं प्रत्येकं वर्णानाम् अनर्थकानां विभक्तिवारणायेति प्राचां सिद्धान्तः ।

**विशिष्टशक्त्यस्वीकारे दिषाः**

वाक्ये क्लृप्तयैव अवयवशक्त्योपपतौ विशिष्टार्थविषयकशक्तिकल्पनम्मास्तु , इति चेदत्राहुः ।

**बहूनां वृत्तिधर्माणां वचनैरेव साधने**
**स्यान्महद्गौरवन्तस्मादेकार्थीभाव आश्रितः[4]॥**
**चकारादि निषेधोऽथ बदुव्युत्पत्तिभञ्जनम् ।**
**कर्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितम् [5]॥ इति ।**

अयमर्थः - वृत्तेर्धर्माः विशेषणमिङ्गसङ्खाद्ययोगादयः । व्यपेक्षासामर्थ्यम् इत्यभ्युपगमे तेषां वचने साधने गौरवम् । विशिष्टशक्त्यस्वीकारे 'राज्ञः पुरुषः' इत्यत्रेव "रजपुरुषः" इत्यत्रापि विशेषणादन्वयः स्यात् । राजपदेन स्वतन्त्रोपस्थितिसत्त्वात् विभाषावचनञ्च समासनिवारणाय कार्यम् । न च सविशेषणानामिति वचनं विभाषाग्रहणञ्च कृतमेवेति वाच्यम् । एकार्थीभावपक्षे तयोर्न्यायसिद्धत्वात् राज्ञः पदार्थैकदेशतयायोगात् विग्रहे व्यपेक्षायास्सत्वेन तस्यापि तत्त्वात् । अत एव भाष्यकृता समर्थसूत्रे व्यपेक्षापक्षमुद्घाट्य अथैतस्यां व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्य इति दूषणमुक्तम् । अतः सूत्रे एकार्थीभावस्य एव सामर्थ्यरूपेण ग्रहणं न तु व्यपेक्षायाः । "संसृष्टार्थं

---

[1] पाणिनीयाष्टाध्यायी ४-१-१५

[2] पाणिनीयाष्टाध्यायी ३-१-३७

[3] पाणिनीयाष्टाध्यायी ८-२-३६

[4] भूषणसारः ३२

[5] भूषणसारः ३३

समर्थम्[1]” इति भाष्यम् ।

विशिष्टशक्यस्वीकरे चित्रगुरित्याद्यषष्ट्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पनापात्तिः क्लृप्तव्युत्पत्तित्यागश्च । तथा हि चित्रगुरित्यादौ विशिष्टशक्तिं विना न स्वाम्यादिप्रतीतिः । न च चित्रपदे लक्षणेति वाच्यम् । चित्रस्वामिगौरिति बोधप्रसङ्गात् । नापि गोपदे गोः स्वामी चित्र इति बोधापत्तेः । चित्रादिमात्रलक्षणायाम् एकदेशत्वेन तत्र गवादेः अन्वयायोगात् । न च चित्राभिन्नागौरिति शक्त्युपस्थाप्ययोः अन्वयबोधानन्तरं तादृशगोस्वामी गोपदेन लक्ष्यत इति वाच्यम् । गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासिद्धेः ।

अतः अखण्डशक्तिरूपः एकार्थीभावः आवश्यकः । लक्षणाभ्युपगमे तु शोभनायां गङ्गायामित्यादौ लाक्षणिकेऽपि सङ्ख्यालिङ्गविशेषणान्वय इव “राजपुरुषः” इत्यत्र राज्ञः, चित्रगुरित्यत्र चित्रगवि च उपकुम्भमित्यादौ कुम्भे, पाणिपादमित्यादौ पण्यादौ, “औपगवः” इत्यत्र उपगोः पक्त इत्यत्र पाकः इत्येवमादिषु शोभन इत्यादि विशेषणानां सङ्ख्याकारकाणाञ्च यथायथमन्वयप्रसङ्गः । नन्वेवं चैत्रस्य नप्तेत्यादौ देवदत्तस्य दुरुकुलमित्यादौ च विशेषणान्वयो न स्यादिति चेन्न , नप्तृत्वं स्वजन्यजन्यत्वं स्वजन्यपितृसम्बन्धेन न नप्त्रर्थे चैत्रादेरन्वयः । अत एव समुदायेन सम्बन्धो येषाम् इत्यादि वाक्यपदीयं सङ्गच्छते। अत एव समाहारे पाणिपादमित्यादौ समासे शक्तिसिद्धौ पाणिपादं वादय इति समाहारे विशेष्ये वादनकर्मत्वान्वयासम्भवात् परम्परया तत्रान्वयः स्वीकृतः । यद्वा समसम्बन्धकस्थल एव एकदेशान्वयः । तथैव व्युत्पत्तेः । तथा च वाक्यपदीयं सम्बन्धिशब्दस्सापेक्ष इत्यादि ।

अपि च विशिष्टशक्त्यस्वीकारे समासस्थले सर्वत्र प्रातिपादिकसंज्ञा सुबुत्पत्त्यादिकं न स्यात् । शक्तिलक्षणान्यतरसम्बन्धेन अर्थवत्वाभावेन अर्थवदिति प्रातिपदिकसंज्ञाभावात् समासशक्त्यभावेन शक्यसम्बन्धरूपलक्षणायाः अभावात् लाक्षणिकत्वस्यापि अभावात् । न चैवमपि असूर्यम्पश्येत्याद्यसमर्थ-समासेऽर्थवत्वाभावात् प्रातिपदिकसंज्ञा न स्यादिति वाच्यम् । असूर्यललाटयोर्दृशितपोः[2] इति सूत्रे असूर्यमित्यस्य दृशिना नञः सम्बन्धात् असमर्थसमासत्वेन, तद्राज्ञापकादेव ‘अश्राद्धभोजी ब्राह्मणः’ इत्यसमर्थसमासानां प्रातिपदिकत्वसिद्धेः । न चैवमपि शशशृङ्गादिपदे प्रातिपदिकत्वानापत्तिः शक्त्या लक्षणया वा विशिष्टार्थकत्वरूप एकार्थीभावाभावादिति वाच्यम् । विशकलितप्रसिद्धशशशृङादिकः आरोपितसम्बन्धः शक्याऽस्तीति अभ्युपगम्य अर्थवत्वादेव प्रातिपदिकत्वसिद्धेः ।

**उपसंहारः**

प्रक्रियादशायां प्रत्येकम् अर्थवत्वेन गृहीतानां पदानां समुदायशक्त्या विशिष्टस्य एकार्थस्य बोधनशक्तिः एव

1 समर्थसूत्रभाष्यम्

2 पाणिनीयाष्टाध्यायी ३-२-३६

 ISSN: 2320-740X

एकार्थीभावसामर्थ्यम् । वैयाकरसिद्धान्ते व्यपेक्षात्मके सामर्थ्ये समासादौ वृत्तावेव । समासप्रकरणे विभाषाधिकारत्वेन पाक्षिकः समासः समासाभावश्च तिष्ठति । न तु एकार्थीभावव्यपेक्षयोः। पारे मध्ये षष्ट्या वा[1] इति अव्ययीभावस्य पाक्षिकत्वं विधीयते । न तु एकार्थीभावव्यपेक्षयोः । तादृशः विकल्पः यदि इष्टः स्यात् तर्हि विभाषाधिकारेण एव सिद्धेः । अत एव 'पारेगङ्गम्' इत्यव्ययीभावस्य अभावपक्षे एकार्थीभावसद्भावात् षष्ठीसमासात् गङ्गापारम् इति, विभाषाधिकारात् व्यपेक्षाया गङ्गायाः पारम् इति च सिद्ध्यति ।

एवं समर्थः पदविधिः इति सूत्रमधिकृत्याह् नैके विचराः प्रस्तुताः । तत्र सुखबोधिन्यां प्रतिपादितानां विषयाणां परिचयः मया सङ्क्षेपेण व्यधायि ।

**यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे न हि ।**
**यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्न हि ॥**

**परिशीलितग्रन्थाः –**


- पाणिनीयाष्टाध्यायी
- महाभाष्यम्
- वाक्यपदीयम्
- भूषणसारः
- वैयाकरणसिद्धान्तकौमुदी
- सुखबोधिनीव्याख्या
- तत्त्वबोधिनीव्याख्या


**********

[1] पाणिनीयाष्टाध्यायी २-१-१८

# गणेशपुराणोक्तरीत्या श्रीगणेशस्य निर्विशेषस्वरूपचिन्तनम्

विद्वान् निरञ्जनभट्टः
प्राध्यापकः, वेदान्तविभागः

अनाद्यविद्यासम्बद्धः सर्वोऽपि जीवः स्वस्वरूपाज्ञानेन नित्यशुद्धबुद्धमुक्तसत्यस्वभावे आत्मनि अन्तःकरणाद्यनात्मतद्धर्मान् अध्यस्य कामकर्मसमारब्धसंसारसागरे आवर्तादावर्तान्तिरं कीट इव जन्मनो जन्मान्तरं प्राप्नुवन् दुःखसाहस्रमनुभवति । तादृशदुःखसागरनिमग्नान् जीवान् समुद्दिधीर्षयैव प्रवृत्तमिदं वेदान्तशास्त्रं परमकारुणिकीं श्रुतिमवलम्ब्य बोधयति – "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः[1]" इति । श्रुतिस्तु श्रीमद्भगवत्पादोक्तानुसारं 'मातापितृसहस्रेभ्यो हितैषिणी[2]' सती योऽयं परमात्मा जगत्सर्गस्थितिध्वंसकारणं नित्यनिरतिशयपरमानन्दस्वरूपः स एव सर्वस्यापि जीवस्य स्वरूपभूतः, श्रवणादिसाधनैः तस्य परमात्मनः साक्षात्कारादेव परब्रह्मस्वरूपमोक्षं प्रति साधनमित्याघोषयति । अयमेव आम्नायप्रमाणकवेदान्तशास्त्रस्य तात्पर्यभूतः परमः सिद्धान्तोऽपि । अधिकारिभेदेन मुमुक्षूणाम् अनेकविध – उपासनादिसाधनक्रमा अपि परमात्मनः अद्वितीयतत्त्वाधिगमायैव वेदान्तेषु सम्यग्विशदीकृता दरीदृश्यन्ते ।

"वेदोऽखिलो धर्ममूलम्[3]" इति प्रवृत्तिधर्मस्य निवृत्तिधर्मस्य वा परमं प्रमाणं भवति वेद एव । किन्तु साधारणप्रज्ञानां वेदार्थज्ञानप्राप्तिरपि अशक्या इत्यतः तादृशानां वेदार्थज्ञानपूर्वकं धर्ममार्गप्रवृत्तिः भवेदिति धियैव सकलवेदार्थसारगर्भितानां पुराणानां संरचनम् अभवदिति पुराणानां प्रयोजनं पण्डितादिपामरपर्यन्तानां सर्वेषामपि प्रवृत्तिधर्मे वा निवृत्तिधर्मे वा परमात्मनः सविशेषरूपे वा निर्विशेषरूपे वा समादरोत्पत्त्या मोक्षप्राप्तिरेवेति निश्चप्रचम् । "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" इति प्राचीनोक्तिवत् वेदार्थतात्पर्यजिज्ञासूनां तदर्थज्ञानाय पुराणेतिहासादयो वेदार्थगर्भिताः अनुष्ठानप्रधानोपदेशिनो ग्रन्थाः अवश्यम् अध्येतव्याः अधिगन्तव्याश्च । पुराणानि भारतस्य सांस्कृतिकसामाजिकैतिहासिकादिविचारान् प्रकाशयन्तीति प्रायः सर्वेऽपि जानन्ति । तथापि पुराणेषु, तत्रापि उपपुराणेषु दार्शनिकविचारान् काव्यकथासौन्दर्ययोर्मध्ये सामाजिकैतिहासिकादिविचाराणां मध्ये वा अन्तर्निहितान् पृथक्तया ज्ञातुं न पारयन्ति । श्रीगणेशपुराणे एव गणेशस्य अवतार-महिमाद्याख्यायिकान्तर्गततत्वेन तस्य वेदान्तप्रतिपादित-अद्वितीयसच्चिदानन्दस्वरूपनिरूपणमपि निहितं वर्तते । पुराणेऽस्मिन् वेदान्तसिद्धान्तप्रतिपादनपराः बहवो हि श्लोकाः

[1] बृहदारण्यकोपनिषत् २.४.५

[2] कठोपनिषद्भाष्यम् ।२.१.१५

[3] मनुस्मृतिः २.६


ISSN: 2320-740X

श्रीगणेशस्य अद्वितीयनिर्विशेषस्वरूपत्वं बोधयन्तो लभ्यन्ते । यथा

**यमाहुः परमानन्दं यमाहुः परमां गतिम् ।**
**यमाहुः परमं ब्रह्म वेदशास्त्रार्थदर्शिनः ।**
**तं गच्छ शरणं वत्स द्विरदाननमादरात्[1] ॥**

इति । अनेन श्लोकेन गजाननस्य वेदशास्त्रादिभिः प्रतिपाद्यमानं परमानन्दात्मकत्वं तस्य परब्रह्मस्वरूपत्वं च संसूचितं वर्तते । तस्मात् यद्ब्रह्मस्वरूपं निरतिशयानन्दलक्षणम् "आनन्दो ब्रह्म" "विज्ञानमानन्दं ब्रह्म" इत्यादिवेदवाक्यादिगम्यं तदेव गणेशस्यापि इति सिद्धं भवति । प्रसिद्धोऽयं श्रीगणेशस्तवोऽपि श्रीगणेशपुराणान्तर्गत एव । तद्यथा –

**अजं निर्विकल्पं निराकारमेकं निरालम्बमद्वैतमानन्दपूर्णम् ।**
**परं निर्गुणं निर्विशेषं निरीहं परं ब्रह्मरूपं गणेशं भजेम[2] ॥**

इत्यादयः । पुराणेऽस्मिन् द्वादशश्लोकात्मकोऽयं स्तवः गणेशस्य अद्वितीय-निर्गुणनिराकारसच्चिदानन्दरूपस्वरूपलक्षणं "सत्यं ज्ञानमनन्तं ब्रह्म[3]" इति श्रुत्यादिलक्षितम्, जगज्जन्मस्थितिलयकर्तृत्वरूपतटस्थलक्षणं "यतो वा इमानि भूतानि जायन्ते[4]" इत्यादिश्रुतिबोधितं च प्रतिपादयति । स्तवेऽस्मिन् द्विरदाननस्य सर्वदेवस्वरूपत्वमपि स्तोत्रमाध्यमेन प्रकाशितम्। तथा च –

**निराधरोऽखिलाधारो नित्यज्ञानोऽजरोऽमरः ।**
**नित्यानन्देन सम्पूर्णो मायावी क्षर एव च ॥**
**अक्षरः परमात्मा च विश्वरूपोऽखिलेश्वरः ।**
**उग्रैस्तपोभिस्त्वां ज्ञात्वा निर्वृत्ताः सनकादयः[5] ॥**

अत्र च गजाननस्य सर्वस्यापि जगतः आधारभूतत्वात् सर्वाधारत्वम्, गणेशं विहाय आधारान्तराभावान्निराधारत्वम्, सर्वत्रापि सम्पूर्णत्वात् सर्वव्यापकत्वम्, सर्वनियन्तृत्वात् सर्वेश्वरत्वम्, नित्यज्ञानस्वरूपत्वं च निरूपितम् । नाशरहितत्वादक्षरत्वमपि गणेशस्य प्रतिपादितम् । तच्चोपनिषत्प्रतिपादितब्रह्मलक्षणमेवेति ब्रह्मस्वरूपत्वं विनायकस्य ज्ञातुं शक्यते । तथैव –

**भक्तप्रियं निराकारं साकारं गुणभेदतः ।**
**नमाम्यहमतिस्थूलमणुभ्योऽणुतरं विभुम्[1] ॥**

---

[1] श्रीगणेशपुराणम् . उ.ख. अ. १०.२७

[2] श्रीगणेशपुराणम् . उ. ख. अ.१३.३

[3] तैत्तिरियोपनिषत्. ब्र.वल्ली ।

[4] तैत्तिरियोपनिषत्. भृ.वल्ली ।

[5] श्रीगणेशपुराणम् . उ. ख. अ.३४.१९-२०

श्लोकेऽस्मिन् निराकारोऽपि गणेशः भक्तानुग्रहकाङ्क्षया साकारं प्राप्नोतीति समसूचि । "अणोरणीयान्महतो महीयान्[2]" इति श्रुत्युक्तरीत्या श्रीगणेशस्य अतिस्थूलत्वमणोरपि सूक्ष्मत्वं चात्र प्रत्यपादि ।

द्वितीये क्रीडाखण्डे 'श्रीगणेशगीता' एकादशाध्यायमिता श्रीमद्भगवद्गीतासदृशी वेदान्तार्थप्रतिपादिका विराजते । स्वयं गणेशेनैव उपदिष्टेयं गणेशगीता गणेशस्य निर्विशेषस्वरूपप्रतिपादनपरा, भगवद्गीतायामिव 'कर्मसंन्यासयोगः', 'क्षेत्रक्षेत्रज्ञविवेकयोगः', 'विश्वरूपवीक्षणयोगः' इत्येवंरीत्या विविधयोगसंयुता निर्विशेषपरमात्मनः श्रीगणेशस्य प्रत्यगात्मस्वरूपतया ज्ञातुमेव अनुष्ठानप्रधानतया सम्यक् प्रपञ्चिता वर्तते । एवं गणेशपुराणे मुमुक्षूणामुपकाराय सरससुन्दरकाव्यशैल्या श्रीगणेशस्य निर्विशेषसच्चिदानन्दाद्वितीयपरमात्मस्वरूपत्वं वेदान्तप्रतिपादितं निरूप्य तज्ज्ञानाय विविधसाधनाप्रकाराः उपासनानि च विशदीकृतानि ।

**********

# चमकाध्याये गणितचमत्कारः

श्री विनायकभट्टः

**ज्यौतिषपरियोजनासहायकः**

### ❖ प्रस्तावना

"वेदोऽखिलो धर्ममूलम्" इत्यादिवचनैः धर्मबोधनाय स्वयं भगवता सृष्टस्य वेदस्य पारमार्थिकत्त्वम् अवगम्यत एव । परमत्र सूक्ष्मेक्षिकया पश्यामश्चेत् प्रत्यक्षतया परोक्षतया वा गणितविचारा अपि दृश्यन्ते । यजुर्वेदस्य चमकप्रश्नस्य अन्तिमानुवाके गणितस्य प्रसक्तिः वर्तते । अत्र श्रेढीव्यवहरः, वर्गसङ्ख्याः इत्यादीनां विचाराः दृश्यन्ते ।

### ❖ चमकाध्याये श्रेढीव्यवहारः

'श्रेढी' इत्यस्य प्राकृतरूपः श्रेणी इति । हिन्दी इत्यादिभाषासु सीढी इति वर्तते । जैनग्रन्थेषु अस्य प्राकृतरूपं स्वीकृतमस्ति । पश्चात् व्यवहारेऽपि आगतमस्ति । यजुर्वेदे समानान्तरसङ्ख्यानां विषमसङ्ख्यानां च गणितीयप्रक्रियारूपः श्रेढीव्यवहारः दृश्यते । श्रेढीगणिते आदिः नाम प्रथमसङ्ख्या, चयः नाम समानान्तरम्, पदं नाम अन्तिमसङ्ख्या । अत्र विषमसङ्ख्यानां श्रेढी यथा –

---

[1] श्री गणेशपुराणम् . क्री. ख. अ.१३०. १७

[2] कठोपनिषत् . प्र.अ. द्वि. वल्ली. २०

 ISSN: 2320-740X

**एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च मे एकादश च मे .......त्रतस्त्रिंशच्च मे ।**[1]

अत्र समसङ्ख्यानां समानान्तरश्रेढी – 1, 3, 5, 7, 9, 11..........

तथा समसङ्ख्यानां श्रेढी यथा –

**चतस्रश्च मे अष्टौ च मे द्वादश च मे षोडश च मे विंशतिश्च मे चतुर्विंशतिश्च मे .....**[2]

अत्र समसङ्ख्यानां श्रेढी – 4, 8, 12, 16, 20, 24, 28, 32,........

अस्मिन्नेव मन्त्रे इतोऽपि गणितविशेषाः वर्तन्ते । “सङ्कलनार्थे चकारनिर्देशनम्” इति न्यायानुसारं मन्त्रेऽस्मिन् उक्तसङ्ख्यानामनन्तरम् एकसङ्ख्यायोजनेन द्विसङ्ख्यायाः श्रेढी भवति । यथा-

| | |
|---|---|
| एका च मे | 1 + 1 = 2 |
| तिस्रश्च मे | 3 + 1 = 4 |
| पञ्च च मे | 5 + 1 = 6 |
| सप्त च मे | 7 + 1 = 8 |
| नव च म | 9 + 1 = 10 |
| एकादश च मे | 11+ 1 = 12 |
| त्रयोदश च मे | 13 + 1 = 14 |
| पञ्चदश च मे | 15 + 1 = 16 |
| सप्तदश च मे | 17 + 1 = 18 |
| नवदश च मे | 19 + 1 = 20 |

एवमत्र 2, 4, 6, 8, 10, ..... एवं द्विसङ्ख्यायाः समानान्तरश्रेढी दृश्यते । अत्र 2 आदिः, चयः,

तथा अग्रिमसङ्ख्यानां परस्परयोजनेन अस्मिन्नेव मन्त्रे अग्रे उक्तस्य चतस्रश्च मे अष्टौ च मे...... इत्यादि 4 सङ्ख्यायाः समानान्तरश्रेढी भवति, तच्च चतस्रश्च मे अष्टौ च मे.... इति मन्त्रोक्तसङ्ख्यासमानं भवति । यथा -

| | | |
|---|---|---|
| एका च मे तिस्रश्च मे | 1 + 3 = 4 | = चतस्रश्च मे |
| तिस्रश्च मे पञ्च च मे | 3 + 5 = 8 | = अष्टौ च मे |
| पञ्च च मे सप्त च मे | 5 + 7 = 12 | = द्वादश च मे |
| सप्त च मे नव च मे | 7 + 9 = 16 | = षोडष च मे |
| नव च म एकादश च मे | 9 + 11 = 20 | = विंशतिश्च मे |
| एकादश च मे त्रयोदश च मे | 11 + 13 = 24 | = चतुर्विंशतिश्च मे |

---

1 कृ.यजुर्वेदः ४/७/११

2 कृ.यजुर्वेदः ४/७/११

| | | |
|---|---|---|
| त्रयोदश च मे पञ्चदश च मे | 13 + 15 = 28 | = अष्टाविंशतिश्च मे |
| पञ्चदश च मे सप्तदश च मे | 15 + 17 = 32 | = द्वात्रिंशच्च मे |
| सप्तदश च मे नवदश च मे | 17 + 19 = 36 | = षट्त्रिंशच्च मे |

एकादीनां सङ्ख्यानां योगकरणसमये पृथक् योगः क्रियते चेत् दीर्घप्रक्रिया भवति । अतः सूत्रानुसारेण क्रियते चेत् सुलभाय । तथैव सङ्कलितानां योगः, कृतीनां योगः, घनस्य च योगः कर्तुं शक्यते ।

❖ **वर्ग-वर्गमूलविचारः**

गणितीयप्रक्रियासु वर्गमूलस्य महत्त्वं विद्यत एव । समद्विघातः कृतिरुच्यते । कृतिः नाम वर्गः । अस्य मूलं वर्गमूलम् । एका च मे ... इत्यादिषु वर्गमूलस्यापि प्रसक्तिः द्रष्टुं शक्यते । यतो हि अत्र सङ्कलितैक्येन वर्गसङ्ख्याः लभ्यन्ते । तथा तेषां मूलानि क्रमशः एकादिसङ्ख्याः भवन्ति । यथा –

| | | |
|---|---|---|
| एका च मे | = 1 | $(\sqrt{1} = 1)$ |
| 1 + तिस्रश्च मे | = 1 + 3 = 4 | $(\sqrt{4} = 2)$ |
| 4 + पञ्च च मे | = 4 + 5 = 9 | $(\sqrt{9} = 3)$ |
| 9 + सप्त च मे | = 9 + 7 = 16 | $(\sqrt{16} = 4)$ |
| 16 + नव च मे | = 16 + 9 = 25 | $(\sqrt{25} = 5)$ |
| 25 + एकादश च मे | = 25 + 11 = 36 | $(\sqrt{36} = 6)$ |
| 36 + त्रयोदश च मे | = 36 + 13 = 49 | $(\sqrt{49} = 7)$ |
| 49 + पञ्चदश च मे | = 49 + 15 =64 | $(\sqrt{64} = 8)$ |
| 64 + सप्तदश च मे | = 64 + 17 = 81 | $(\sqrt{81} = 9)$ |
| 81 + नवदश च मे | = 81 + 19 = 100 | $(\sqrt{100} = 10)$ |

❖ **उपसंहारः**

एवं वेदेषु बहुत्र गणितविचाराः दृश्यन्ते । अत्र तु केवलं यजुर्वेदस्य चमकाध्याये विद्यमानगणितविचारान् स्वीकृत्य मया निरूपणं कृतं वर्तते । श्रेढीविचारः गणितग्रन्थेषु सुष्ठुः प्रतिपादितः अस्ति । अस्योपयोगः गणितप्रक्रियासु लौकिकव्यवहारे च नितरां वरीवर्ति । एवं वेदेषु निहितं तत्त्वम् अस्माभिरन्वेष्टव्यमिति शम् ।

******

**आधारग्रन्थाः -**


◆ लीलावती । भास्कराचार्यः । सं- रामचन्द्रपाण्डेयः
चौखाम्बा कृष्णदास अकाडमी, वाराणसी ।



ISSN: 2320-740X

- कृष्णयजुर्वेदीय तैत्तरीयसंहिता । सं-मैत्रेयी देशपाण्डे ।
  न्यू भारती बुक् कार्पोरेशन्, दिल्ली ।
- वेदों मे गणित एवं ज्योतिर्विज्ञान । डा. गणेशदत्तशर्मा ।
  उर्मिलाप्रकाशनम् , साहिबाबाद ।
- गणितशास्त्र के विकास की भारतीय परम्परा । डा. सुद्युम्न आचार्य ।
  मोतीलाल बनारसीदास, वाराणसी ।


**********

# स्थानेऽन्तरतमः


कलाधरभट्टः

**शोधच्छात्रः, व्याकरणविभागः**


लोकानुद्धर्तुकामः भगवान् पाणिनिः दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता प्रयासेन भगवन्तं चन्द्रशेखरं समाराध्य उपचतुस्सहस्रसूत्रात्मिकाम् अष्टाध्यायीं रचयामास । अत एव सत्स्वपि ऐन्द्रचान्द्रादिव्याकरणेषु पाणिनीयमेव भजते वेदाङ्गत्वम् । तत्र चाष्टाध्याय्यां संज्ञासूत्राणि, परिभाषासूत्राणि, विधिसूत्राणि, नियमसूत्राणि, अधिकारसूत्राणि, अतिदेशसूत्राणि इति षड्विधानि सूत्राणि प्रणीतानि । तत्र परिभाषाप्रकरणे अन्तर्भवति इदं सूत्रं "स्थानेऽन्तरतमः" इति ।

"स्थाने अन्तरतमः" इति द्विपदात्मकं सूत्रमिदम् । 'दर्भाणां स्थाने शरैः प्रस्तरितव्यम्' इत्यत्र स्थानशब्दस्य प्रसङ्गेदर्शनात् 'स्थानञ्च प्रसङ्गः' इत्युक्तम् । पूर्वस्मिन् "षष्ठी स्थानेयोगा" इति सूत्रे आदेशः षष्ठ्याः स्थाने भवतीति प्रतिपादितः । स आदेशः स्थानिनः अन्तरतमः भवतीति अनेन सूत्रेण प्रतिपाद्यते । अनन्तरशब्दः अत्र सदृशपर्यायः । अतिशयितोऽन्तरः अन्तरतमः इति। तेन गङ्गोदकमित्यादौ त्रिमात्रो न ।

यदि अयं स्वतन्त्रो विधिस्स्यात् तर्हि "दधि मधु" इत्यादावादेशप्रसङ्गः । न च अन्यादेशाभावात् तस्य स एव इष्टापत्तिरिति वाच्यम् । तथा सति पुनः पुनरादेशप्रवृत्तेः अनवस्थाप्रसङ्गात् । मास्त्विति चेत् तथा सति सर्वस्य निवृत्त्युन्मुखतया अर्थप्रत्यायनाय प्रयोगानापत्तिः, किञ्च बिसम्बिसमित्यादौ समुदायस्यादेशतया सकारमात्रस्य अनादेशत्वात् षत्वाप्रसङ्गः । तस्मात् सस्यादेशत्वं षत्वप्रवृत्तये अभ्युपेयम् । तच्च अस्याः परिभाषात्वं विना न सिद्ध्यतीत्यतः, परिभाषाप्रकरणस्थत्वात् परिभाषेयम् । यत्र स्थानषष्ठी तत्रोपतिष्ठते । तेन विधिवाक्यानाम् अनेन सूत्रेण एकवाक्यत्वात् विधानकाल एव अन्तरतम आदेशो विधीयते । अतः भट्टोजीदीक्षितेन सूत्रार्थः एवं प्रतिपादितः

सिद्धान्तकौमुद्याम्- “प्रसङ्गे सति सदृशतमः आदेशस्स्यात्” इति ।

ननु वाग्घरिरित्यादौ ‘झयो होन्यतरस्यामिति’ पूर्वसवर्णे कार्ये हकारस्य द्वितीयः खकारः कुतः न स्यात् , तस्य स्थानिना हकारेण श्वासाघोषविवारप्रयत्नभेदे सत्यपि महाप्राणप्रयत्नसाम्यसत्वात् । तथा तृतीयो वा गकारः कुतो न स्यात्, तस्य स्थानिना हकारेण अल्पप्राणप्रयत्नभेदेऽपि घोषनादसंवारप्रयत्नसाम्यसत्त्वात् । अत एव ङकारो वा कुतो न स्यादितिचेत् न, सूत्रे तमब्ग्रहणेन उक्तातिप्रसङ्गनिरासात् । अतिशयितो हि अन्तरः अन्तरतमः । अतिशयितञ्च प्रयत्नतः सादृश्यं हकारेण घकारस्यैव, उभयोरपि घोषनादसंवारमहाप्राणात्मकप्रयत्नचतुष्टयसाम्येन सादृश्यातिशयसत्त्वात् । खकारस्य महाप्राणप्रयत्नसाम्येऽपि घोषनादसंवारप्रयत्नविरहात् । गङयोः घोषनादसंवारप्रयत्नसाम्येऽपि महाप्राणप्रयत्नविरहात् । अतः हकारस्य घकार एव भवति नान्यः ।

ननु चेता स्तोता इत्यादौ इकारस्य उकारस्य च “सार्वधातुकार्धधातुकयोः” इति गुणो भवन् प्रमाणत आन्तर्यवान् अकारः कुतो न भवति इति चेत्, अत्र वार्तिकमिदं प्रसक्तम्-“ **यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यम् बलीयः**” इति । तेन इकारस्य एकारः, उकारस्य ओकारश्च गुणो भवति, स्थानसाम्यात् । न त्वकारः, स्थानभेदात् । न च इकारेण एकारस्य उकारेण ओकारस्य च कथं स्थानसाम्यम् , एकारस्य ओकारस्य च कण्ठस्थानाधिक्यादिति वाच्यम् । यावत्स्थानसाम्यस्य सावर्ण्यप्रयोजकत्वेऽपि आन्तरतम्यपरीक्ष्यायां कथञ्चित् स्थानसाम्यस्यैव प्रयोजकत्वात् । अत्र सूत्रे पूर्वसूत्रात् स्थाने ग्रहणमनुवर्तते, एकदेशे स्वरितत्वप्रतिज्ञाबलात् । तृतीयान्तञ्च विपरिणम्यते । अनुवर्त्यमानश्चायं स्थानशब्दः पूर्वसूत्रे प्रसङ्गपरोऽप्यत्र ताल्वाद्यन्यतमस्थानपरः, शब्दाधिकाराश्रयणात् । अन्तरतमः इत्यपि तेन सम्बद्ध्यते । ततश्च स्थानेनान्तरतम इति वाक्यान्तरं सम्पद्यते । सति संभवे ताल्वादिस्थानत एवान्तरतमो भवतीत्यर्थः । ततश्च यत्र अनेकविधमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयः इत्यर्थः ।

आन्तर्यञ्च स्थानार्थगुणप्रमाणतश्चतुर्विधमित्यर्थः । अत्र स्थानशब्देन ताल्वादिस्थानं विवक्षितम्, गुणशब्देन प्रयत्नः । प्रमाणशब्देन एक द्विमात्रादि परिमाणम् । तत्र स्थानान्तर्यस्य उदाहरणं भवति ‘दध्यत्र’ इति । दधीत्यत्र तालुस्थानिकस्य इकारस्य तालुस्थानिको यकारादेशः । अर्थतो यथा- वतण्डी चासौ युवतिश्च वतण्डयुवतिः । तत्र वतण्डस्यापत्यं स्त्रीति अपत्यार्थे ’वतण्डाच्च’ इति यञो लुक्, ‘स्त्रियाम्’ इति तस्य लुक्, शार्ङ्गरवादिपाठात् ङीन् । ततः वतण्डी चासौ युवतिश्चेति विग्रहे पोटायुवतीत्यादिना समासे ‘पुंवत्कर्मधारयजातीयदेशीयेषु’ इत्यतिदिश्यमानः वतण्डापत्यवाचिनो वतण्डीशब्दस्य तदपत्यवाची वातण्डशब्दो भवतीति वृत्तिकारहरदत्तौ । एवं ‘तृज्वत्क्रोष्टुः’ इति क्रोष्टु शब्दस्य उकारान्तस्य तृजन्तः आदेशो भवन् अर्थसाम्यात् क्रोष्टृशब्द एव तृजन्तः आदेशो भवति । गुणतो यथा- ‘वाग्घरिः’ । अत्र हकारः स्थानी घोषनादसंवारमहाप्राणप्रयत्नवान् । तस्य घोषनादसंवारमहाप्राणप्रयत्नसम्यात् घकार एवादेशो भवति, नतु ककारादयः । प्रमाणतस्तु- ‘अमुम् अम्’ इत्यादौ आन्तर्यात् ह्रस्वस्य ह्रस्वः उकारः दीर्घस्य च दीर्घः ।

एतच्च सूत्रं समाजादिन्यायेन सदृशतमादेशस्य लोकसिद्धत्वात् ‘प्रत्यात्मवचनमशिष्यं स्वभावसिद्धत्वात्’

‘अन्तरतमवचनञ्च’ इति वार्तिकाभ्यां भाष्ये प्रत्याख्यातम् । तत्र हि- अन्तरतमवचनं चाशिष्यम् । योगश्चाप्ययमशिष्यः । स्वभावसिद्धत्वादेव । तद्यथा समाजेषु समासेषु समवायेषु चास्यतामित्युक्ते नैव कृशाः कृशैः सहासते, न पाण्डवः पाण्डुभिः । येषामेव किञ्चिदर्थकृतमान्तर्यं तैरेव सहासते । तथा गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति, तेन सह शेरते । तथा यान्येतानि गोयुक्तकानि सङ्घुष्टकानि भवन्ति, तान्यन्योन्यमपश्यन्ति शब्दं कुर्वन्ति ।

अचेतनेष्वपि । तद्यथा लोष्टः क्षिप्तो बहुवेगं गत्वा नैव तिर्यग्गच्छति नोर्ध्वमारोहति । पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः । तथा या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः । स धूम आकाशे निवसते । नैव तिर्यग्गच्छति नार्वागवरोहति । अब्विकारोऽप एव गच्छत्यान्तर्यतः । तथा ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते सुप्रज्वलितं नैव तिर्यग्गच्छति नार्वागवरोहति । ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः । इति । **स्थानेऽन्तरतमः ।**

**********

# पाश्चात्यमते न्यायावयवस्वरूपम्

सन्दीपकानेट्‌करः

**शोधच्छात्रः, न्यायविभागः**

“प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः" (१.१.३२) इति गौतमीयन्यायसूत्रानुसारं नैयायिकैः न्यायस्य प्रतिज्ञादिपञ्चवयवाः स्वीकृताः । नैयायिकातिरिक्तानां भारतीयदार्शनिकानां मते इयमवयवसङ्ख्या तत्तन्मतानुसारेण भिद्यते । एवमेव पाश्चात्यतर्किकैः “Premise” एवं “Conclusion” इति अवयवद्वयमेव स्वीकृतम् । उद्देश्यविधेयभावयुक्तं वाक्यं पाश्चात्यैः 'Proposition' अथवा 'Statement' इति पारिभाषिकपदेन व्यवह्रियते । यथा 'पर्वतो वह्निमान्' इति वाक्यं 'Proposition' इत्युच्यते । इदमेव वाक्यं यदि न्यायावयवो भवति तर्हि इदं “Premise” अथवा “Conclusion” भवति । यथा नैयायिकैः 'पर्वतो वह्निमान्' इति वाक्यमेव न्यायावयवभूतं सत् प्रतिज्ञा इत्युच्यते, न्यायबहिर्भूतं सत् वाक्यमित्युच्यते । पाश्चात्यैश्च वाक्यद्वयात्मकः, वाक्यत्रयात्मकः, बहुवाक्यात्मकश्च न्यायः अङ्गीकृतः । तत्र वाक्यत्रयात्मके न्याये उदाहरणोपनयावुभावपि 'Premise' इति पदवाच्यौ, निगमनञ्च 'conclusion' इति पदेन व्यवह्रियते । न्यायः argument इत्युच्यते । अत्र पश्चात्यानां अवयवस्वरूपस्य, अवयवानां अनुपूर्व्याः, एवं वादस्वरूपस्य च विचाराः सङ्गृहीताः । 'प्रतिज्ञावाक्यम्' इति पदस्य अत्र 'proposition' इत्यर्थः, न तु न्यायावयवान्तर्गता 'प्रतिज्ञा' इति ।

वादः (argument) इत्युक्ते केवलं नैकप्रतिज्ञावाक्यानां (proposition) समूहः इत्येव नार्थः । अयमपि काचन परिधिं वहति । तस्यां परिधौ च “Premise” एवं “conclusion” इति पदार्थद्वयं कार्यं निर्वहतः। conclusion इतीदं वादे(argument) वर्तमानं एकं प्रतिज्ञावाक्यम् (proposition). एतच्च वादे (argument) विद्यमानानां अन्यान्यप्रतिज्ञावाक्यानां (proposition) आधारेण कञ्चन सिद्धान्तं निरूपयति । वादे (argument) विद्यमानानि अवशिष्टप्रतिज्ञावाक्यानि (proposition) Premise इति पदेन उच्यन्ते । एतानि च conclusionद्वारा स्थाप्यमानस्य सिद्धान्तस्य अधाररूपाणि अथवा कारणानि भवन्ति । उदाहरणार्थं अयं वादः (argument) -

सर्वाणि रूपवद्रव्याणि स्पर्शवन्ति ।

घटः रूपवत् । तस्मात् घटः स्पर्शवत् ।

अत्र प्रथमेन एवं द्वितीयेन प्रतिज्ञावाक्येन तृतीयं प्रतिज्ञावाक्यं प्राप्तमस्ति । तृतीयप्रतिज्ञावाक्यं प्रथमद्वितीयप्रतिज्ञावाक्ययोः आधारेण समुत्पन्नम् । तस्मात् तदेव conclusion इत्युच्यते । तत्प्रतिज्ञा(conclusion)प्राप्तये कारणीभूते प्रथमद्वितीयप्रतिज्ञावाक्ये । तावुभे Premise इति कथ्येते । तथा च वादे(argument) Premise एवं conclusion अवश्यं भवतः । प्रत्येकस्मिन्नपि वादे (argument) एकं conclusion भवति । एवमेकं अथवा अनेकानि Premise भवतः । एतद्वययुक्तमेव वादः (argument) इत्युच्यते । Premise एवं conclusion एतद्वयमपि परस्परसम्बन्धिसंज्ञे भवतः । एकमेवार्थम् एवम् एकामेवानुपुर्वी वहत्प्रतिज्ञावाक्यम् एकस्मिन् वादे Premise अन्यस्मिन् वादे conclusion भवितुमर्हति ।

उदाहरणार्थं - वह्न्यवयवानि द्रव्याणि ।

वह्निः वह्न्यवयवजन्यः ।

तस्मात् वह्निः द्रव्यम् ।

अत्र वह्निः द्रव्यम् इति प्रतिज्ञावाक्यं conclusion अस्ति । अवशिष्टे द्वे प्रतिज्ञावाक्ये Premise वर्तेते । वह्न्यवयवानि द्रव्याणि इति प्रतिज्ञावाक्यम् अग्रिमे उदाहरणे conclusion जातमस्ति ।

वह्निः वह्न्यवयवजन्यः ।

वह्निः द्रव्यम् ।

तस्मात् वह्न्यवयवानि द्रव्याणि ।

यत्किमपि प्रतिज्ञावाक्यं प्रत्येकरूपेण Premise अथवा conclusion न भवति । कस्मिंश्चित् वादे (argument) सिद्धान्तप्रतिपादकं तर्कं ये प्रतिपादयन्ति ते (Premise) इत्युच्यन्ते । एवमेव वादे(argument) प्रतिज्ञावाक्यवाक्यानि अनुसृत्य कश्चनसिद्धान्तबोधकप्रतिज्ञावाक्यमेव (conclusion ) इत्युच्यते । तस्मात् स्वामिभृत्यपदवत् Premise एवं conclusion एतद्वयमपि परस्परसम्बन्धिसंज्ञे इति कथ्येते । यथा एका एव व्यक्तिः


ISSN: 2320-740X

एकस्मिन्नेव कर्मणि स्वमी भृत्यश्च न भवति । पृथक्कर्मसु एकत्र यः स्वामी भवति स एव अन्यत्र भृत्योपि भवितुमर्हति । इमेपि संज्ञे तथैव भवतः ।

उपरि दृष्टेषु केषुचिद्वादेषु Premiseवाक्यानि पूर्वं भवन्ति । (conclusion )वाक्यम् अन्ते भवति । अरन्तु अयमेव क्रमः सर्वेषु वादेषु भवेदिति नियमो नास्ति । क्वचित् अनयोः वैपरीत्यमपि भवति । तन्नाम पूर्वमेव (conclusion ) अन्ते Premiseवाक्यानि अपि भवन्ति । उदाहरणार्थं **अरिस्टाटल्** महोदयस्य **पोलिटिक्स्** इति ग्रन्थे विद्यमानः अयं वादः(argument) - प्रजाप्रभुत्वे धनिकानामपेक्षया दरिद्रा एव शक्तिमन्तः, यतः तत्र दरिद्रा एव अधिकसंख्याकाः, एवं बहुसंख्याकाकानां सङ्कल्प एव अतिमुख्यम् ।(In a democracy the poor have more power than the rich. Because there are more of them, and the will of the majority is supreme.)

अस्यैव वादस्य अवयवाः यदि प्रसिद्धक्रमे योज्यन्ते तर्हि एवं भवन्ति ।

**प्रजाप्रभुत्वे दरिद्राः बहुसंख्याकाः ।**
**प्रजाप्रभुत्वे बहुसंख्याकाः शक्तिमन्तः ।**
**तस्मात् प्रजाप्रभुत्वे दरिद्रा एव शक्तिमन्तः ।**

निरुक्तोदाहरणे conclusion पूर्वमस्ति, एवम् Premise अन्ते वर्तेते । प्रसङ्गात् वयं अस्मिन् वादे सामान्यवाक्यानां प्रतिज्ञावाक्यानां च मध्ये विद्यमानान् अतिरिक्तभेदान् पश्यन्तः स्मः । यथा निरुक्तोदाहरणे एकस्मिन्नेव वाक्ये सम्पूर्णः वादः घटको वर्तते । एकस्मिन् वादे न्यूनातिन्यूनं प्रतिज्ञावाक्यद्वयं अवश्यं भवेत् । एकं conclusion एवं एकमनेकं वा Premise । अत्र तु सामान्यवाक्यस्येकत्वेपि प्रतिज्ञावाक्यानि त्रीणि सन्ति । वस्तुतः अत्रापि वाक्यछेदः यदि क्रियते तर्हि अत्रापि वाक्यत्रयम् उपलभ्यते । परन्तु वाक्यछेदने छेदनाकरणे वा वक्तुः स्वातन्त्र्यमस्ति । यदि वाक्यछेदनं वक्ता नेच्छति तर्हि वाक्यमेकमेव तिष्ठति । प्रतिज्ञात्वं तु न तथा । उपर्युक्तोदाहरणे वाक्यस्येकत्वेपि प्रतिज्ञात्रयं तत्र अवश्यमस्ति । यदि वाक्यं छेदितं, तदानीमपि प्रतिज्ञात्रयमेव तत्र तिष्ठति ।

पुनः conclusion वाक्यं वादस्य अदौ अथवा अन्त्ये एव भवेदित्यपि नियमो नास्ति । द्वयोः Premiseवाक्ययोः मध्येपि conclusion आगछचति । उदाहरणार्थं **डेविड् ह्यूम्** विरचिते अ ट्रीटैस् आफ् ह्यूमन् नेचर्(A Treatice of human nature) ग्रन्थे विद्यमानः वादः -

Since morals....... have an influence on the actions and affections, it follows that they cannot be derived from reason; and that because reason alone as we have already proved, can never have any such influence.

अत्र “morals cannot be derived from reason” इदं conclusion वाक्यं भवति । ह्यूम् महोदयस्य अस्मिन् वादे conclusion पूर्वम्, तन्नन्तरमपि Premiseवाक्यानि सन्ति ।

वादस्य सत्यासत्यताप्राप्तिरेव तार्किकानां गम्यं भवति । तत्प्राप्त्यर्थं परिछचेदेषु वाददर्शने सति वादस्थ conclusion एवं Premise वाक्यानां अन्वेषणसामर्थ्यं अपेक्षितम् । अधुना वादस्थ conclusion एवं Premise वाक्यानां अन्वेषणं सुलभतया कर्तुं कोपि मार्गः अस्ति वा इति पश्यामः । एतावता वयं conclusion वाक्यं वादस्य मध्ये, अदौ, अन्ते वा भवितुमर्हति ईति जानीमः । तस्मात् वादे conclusion वाक्यस्य स्थानं दृष्ट्वा एतत्स्थानस्थमेव conclusion वाक्यम् इति सूत्ररूपेण वक्तुं समर्थाः । तर्हि तस्य अन्वेषणं कथमिति चेत्, तमेन्वेष्टुं कानिचन पदानि अथवा केचन प्राचीनप्रयोगाः अस्माकं सहायमाचरन्ति । conclusion सूचकप्रसिद्धपदानि एवं सन्ति ।

Therefore for these reasons
Hence it follows that
So I conclude that
Accordingly which shows that
In consequence which means that
Consequently which entails that
Proves that which implies that
As a result which allows us to infer that
For this reason which points to the conclusion that
Thus we may infer

वादाङ्गभूतPremise वाक्यसूचकपदानि एवं सन्ति ।

Since as indicated by
Because the reason is that
For the reason that
As may be inferred from
Follows from may be derived from
As shown by may be deduced from
In as much as in view of the fact that

सम्पूर्णपरिच्छेदं अथवा वादं यदा परिशीलयामः तदा एतानि पदानि Premise एवं conclusion अन्वेषणे सहायमाचरन्ति । वादघटिताः सर्वेपि परिच्छेदाः निरुक्ततार्किकसंज्ञाबोधकपदयुक्ताः एव भवेयुः इति नियमोपि नास्ति । उदाहरणार्थं युनैटेड् स्टेटस् देशस्थ सर्वोच्चन्यायालयेन प्रदत्तादेशस्य कश्चन परिच्छेदः ।

It takes obtuse reasoning to inject any issue of the “free exercise” of religion into the present case. No one is forced to go to the religious classroom and no religious exercise or


ISSN: 2320-740X

instruction is brought to the classroom of the public schools. A student needs not to take religious instruction. He is left to his own desires at to the manner or time of his religious devotions, if any.

अस्मिन्परिच्छेदे विद्यमानस्य conclusionवाक्यस्य भावानुवादः एवास्ति - “इदं प्रकरणं “free exercise” इत्यनेन कमपि सम्बन्धं न वहति" इति । अयं भावः परिछचेदस्थप्रथमवाक्येन ज्ञायते । तदनन्तरं विद्यमानानि त्रीण्यपि वाक्यानि हेतुरूपेण conclusion प्राप्तये साहाय्यमाचरन्ति । अत्र प्रथमवाक्यं conclusion भवति, अग्रिमाणि च Premiseवाक्यानि भवन्ति इति कथं ज्ञातुं शक्यते ? वास्तवसङ्गतियुक्तत्वात् परिच्छेदस्थ सन्निवेश एव अत्र महत्साहाय्यमाचरति । एवमेव परिच्छेदस्थ प्रतिज्ञायाः भावसूचकानि पदपुञ्जान्यपि सहायकानि सन्ति । यथा It takes obtuse reasoning to inject इति पदपुञ्जं प्रकरणेस्मिन् चर्चाविषयीभूतधर्मस्य “free exercice” इति प्रश्नस्यैव असामञ्जस्यं स्पष्टतया सूचयति । अवशिष्टप्रतिज्ञावाक्येषु सम्पर्णतया यथार्थविचारा एव निरूपिताः । तस्मात् तेषां मध्ये न कोपि विवादः, एवं Premise वाक्यत्वेन तेषां स्थानमपि न प्रश्नार्हमस्ति ।

एकस्मिन् वादे विद्यमानाः सर्वाः विचाराः Premise एवम् conclusion भवेयुः इत्यपि नियमो नास्तीत्यवगन्तव्यम् । वादघटितेषु परिच्छेदेषु अन्येपि विषयाः भवेयुः । कदाचिद्वादासम्बद्धोपि विषयः घटको भवेत्, कदाचिच्च वादसम्बद्धः वादघटकविषयानां परिचायकोपि विषयः परिच्छेदे उपलभ्येत । उदाहरणार्थं Pessimismn Schopenhauer महोदयस्य कश्चन परिच्छेदः ।

If the criminal law forbids suicide, that is not an argument valid in the church; and besides, the prohibition is ridiculous; for what penalty can frighten a person who is not afraid of death itself.

अस्मिन्परिच्छेदे प्रथमसेमिकोलन् पर्यन्तं वर्तमानः भागः न Premise वाक्यम्, नापि conclusion वाक्यम् । परन्तु तद्वाक्यज्ञानं विना conclusionवाक्ये कस्य निषेधः क्रियते इति ज्ञातुं न शक्यते । अस्मिन् वादे the criminal law's prohibition of suicide is ridiculous इति conclusion वाक्यमस्ति । तस्मात् सर्वाणि परिच्छेदघटकानि प्रतिज्ञावाक्यानि कीदृशानि आदौ चिन्तनीयम् । तत्र च Premise एवम् conclusion ज्ञापकसंज्ञानि भवेयुः उत न भवेयुः, अथापि प्रकरणादिकं सम्यग्विचिन्त्य अयं कश्चन वादः इति निर्णेतव्यम् भवति । वादे च न्यूनातिन्यूनं एकं Premise वाक्यम्, एकं च conclusion वाक्यम् अवश्यम् भवति इति ।

**********

# महाविस्फोटसिद्धान्तः

राकेशः पि.

**शोधच्छात्रः, न्यायविभागः**

प्राचीनभारतीयविज्ञानपरम्परा विश्वविख्याता इति आधुनिकैरपि उच्यते । अद्य विश्वे सर्वत्र वर्तमानानां सिद्धान्तानां मूलाधारः भारतीयदर्शनेषु दृश्यते । किन्तु तद्विज्ञानं संस्कृतभाषायां शास्त्रीयशैल्यां वर्तत इत्यतः सर्वे तदवगन्तुं न शक्नुवन्ति । शास्त्रीयभाषानभिज्ञेभ्यः तद्विज्ञानस्य सम्प्रदानं संस्कृतज्ञानां कर्तव्यमस्ति । तदर्थम् आधुनिकविज्ञाने के के सिद्धान्ताः प्रचलन्तः सन्ति ते कथं प्रतिपादिताः इत्यादिज्ञानं संस्कृतज्ञानामपि अपेक्ष्यते । तत्प्रसङ्गात् महाविस्फोटसिद्धान्तोपयोगिनां केषाञ्चन तथ्यानाम् उल्लेखः अत्र क्रियते ।

**महाविस्फोट-एकता**

द्रव्यस्य, ऊर्जस्य, आकाशस्य, कालस्य, दिशः च आरम्भः यत्र अभवत् तदेव ("महाविस्फोट-एकता" इत्युच्यते) । कालस्य आरम्भे समस्तं द्रव्यम् ऊर्जञ्च एकस्मिन् सूक्ष्मतमदेशविशेषे आकुञ्चितमासीत् । तत्रैव देशविशेषे समस्तस्य आकाशस्यापि भवनमासीत् । अत एव दिश अपि आरम्भः तस्मात् जातः । प्रपञ्चोत्पत्तिशास्त्रज्ञानानाम् आधुनिकानां मतानुसारं महाविस्फोट-एकता नाम कश्चन देशविशेषः, यत्र गुरुत्वाकर्षणशक्तिमापनार्थमुपयुज्यमानाः मापनाङ्काः अनन्ताः भवन्ति । गुरुत्वाकर्षणशक्तिगणनार्थं द्रव्यस्य गुरुत्वं द्रव्ययोर्मिथः दूरञ्च प्रधानतया परिगण्येते । गुरुत्वाधिक्ये, दूरन्यूनत्वे च गुरुत्वाकर्षणशक्तिः अधिका भवति, प्रत्युत गुरुत्वन्यूनत्वे दूराधिक्ये च न्यूना । अतः महाविस्फोट-एकतायां गुरुत्वम् अत्यधिकं, द्रव्ययोर्मिथः दूरञ्च अतिन्यूनमिति स्वीक्रियते । (सामान्यतः आकाशकालसिद्धान्ताः महाविस्फोट-एकतायाः विशदीकरणार्थं पर्याप्ताः न भवन्ति ।

सापेक्षिकतासिद्धान्तः (Theory of General Relativity), कणिकासिद्धान्तः (Quantum Mechanics) इत्यादिमौलिकसिद्धान्तैः अपि महाविस्फोट-एकतायाः विशदीकरणं कर्तुं न शक्यते । कणिकासिद्धान्तानुसारं तरङ्गस्वभाववन्ति द्रव्याणि, तेषां तरङ्गदैर्घ्यात् न्यूनतरदेशे भवितुं नार्हति । निरन्तर-कणिकागुरुत्वाकर्षणशक्तिनियमः (Theory of Loop Quantum Gravity) इत्यादिनियमाः "महाविस्फोट-एकता" भवितुं नार्हति इति ज्ञापयति । द्वयोः द्रव्ययोः मध्ये न्यूनातिन्यूनदूरं सर्वदा भवति, यस्मात् परं गुरुत्वाकर्षणशक्तेः आधिक्यं न भवति, येन पुनः दूरे न्यूनता भवितुं नार्हति इति अस्य मूलभूताशयः वर्तते । तथापि महाविस्फोट-एकता भवति इत्येव प्रपञ्चोत्पत्तिशास्त्रे अङ्गीकृतम् । महाविस्फोट-एकतां विना प्रपञ्चस्य क्रमिकपरिणामः विशदीकर्तुं न शक्यते इति इयम् एकता प्रपञ्चोत्पत्तिशास्त्रस्य आधारः भवति ।

 ISSN: 2320-740X

महाद्वारमित्यत्रापि (Black Holes) एतादृश-एकता भवितुमर्हति इति नूतननिरीक्षणैः ज्ञायते । प्रपञ्चे बहुत्र महाद्वाराणि सन्ति । सर्वेषाम् आकाशगङ्गानां मध्यभागे एकं महाद्वारं वर्तते । स्टीफण् रश्मिः (Stephan radiation) इत्यस्य उपस्थापनायाः पूर्वं महाद्वारात् रश्मिः बहिरागन्तुं शक्यते इति न स्वीक्रियते स्म । तेन महाद्वारम् ऊर्जं बहिः प्रेषयति इति ज्ञातम् । प्रपञ्चे दृश्यमानानां सर्वेषां महाद्वाराणां तापाङ्कः सूक्ष्मरश्मितः न्यूनः अस्ति । अत एव तानि इदानीम् ऊर्जं स्वीकुर्वन्ति सन्ति इति ज्ञायते । महाद्वारस्य समीपे यद्यत् आगच्छति तत् सर्वं महाद्वारं आकर्षति । अपेक्षितस्य ऊर्जस्य स्वीकरणात् परं यदा सूक्ष्मारङ्गरश्मि-समान-स्पर्शाङ्कः जायते तदा ऊर्जं बहिः प्रेषयितुमारभ्यते ।

**प्लाङ्क् कालः**

महाविस्फोट-एकतातः – अथवा कालस्य आरम्भात् – $10^{-43}$ क्षणपर्यन्तकालः प्लाङ्क्कालः इति नाम्ना अभिधीयते । एषः प्रपञ्चोत्पत्तिचरित्रस्य अतिपुरातनः मौलिककालः इति उच्यते । तस्मिन् काले प्रपञ्चः अतिसूक्ष्मतमदेशे आकुञ्चित आसीत् । अत एव गुरुत्वाकर्षनशक्तिः अत्यधिकासीत् । इतराणि त्रीणि मौलिकबलानि (Fundamental Forces of Nature) गुरुत्वाकर्षणशक्तेः पुरतः निष्प्रभानि भूत्वा एकीकृतगुरुत्वाकर्षणशक्तिरूपेण स्थितानि । अत्युष्णस्य सान्द्रतायाः च कारणात् तदानीं प्रपञ्चः अस्थिर आसीत् । अतः प्लाङ्क्कालात् परं प्रसारेण शीतीभवनेन च स्थिरतां प्राप्तः । तेन च इतर मौलिकबलानि प्रबलानि जातानि ।

सामान्यभौतिकशास्त्रीयनियमाः प्लाङ्क्कालीनप्रक्रियाणां विशदीकरणं कर्तुम् असमर्थाः । प्रधानतया मौलिकबलानां पृथक्करणं यत् प्लाङ्क्काले जातं, तत् कथं जातमित्यत्र किमपि प्रामाणिकं विशदीकरणं नास्त्येव। प्लाङ्क्कालात् न्यूनतरे काले, प्लाङ्क्दैर्घ्यात् न्यूनतरे देशविशेषे वा जायमाना प्रक्रियाणां कल्पना अपि आधुनिकविज्ञानेन कर्तुं न शक्यते । एकक्षणस्य दशसहस्र-शतकोटि-शतकोटि-शतकोटि-शतकोटि-अंशेषु एकः अंशः प्लाङ्क्कालः इति व्यपदिश्यते ।

**महाप्रसारः**

महाविस्फोट-एकतातः $10^{-36}$ क्षणतः $10^{-32}$ क्षणपर्यन्तकाले प्रपञ्चस्य अतिशीघ्रविकासः जातः, यः महाप्रसारः इत्युच्यते । महाप्रसारानन्तरमपि प्रपञ्चस्य प्रसारः जातः जायमानोऽप्यस्ति । किन्तु महाप्रसारापेक्षया न्यून वेगेन इति वैलक्षण्यम् । आकाशस्य प्रसरणात् अतिसूक्ष्मदेशविशेषे स्थितानां द्रव्याणां स्थूलतमदेशविशेषे वितरणं जातमिति महाप्रसारः ज्ञापयति । अद्यतनप्रपञ्चे दृश्यमानानाम् अनेकेषां प्रतिभासानां विशदीकरणम् अनया प्रक्रियया जायते यथा – आकाशगङ्गादीनां बृहदाकारकस्थापत्यानां (Large Structures) संरचना, सर्वासु दिक्षु द्रव्याणां समानरीत्या वितरणम्, सूक्ष्मतरङ्गरश्मीनां सर्वत्र प्रपञ्चे एकरूपता, कान्तिक एकद्रुवस्य अभावः इत्यादि । महाविकासकारणीभूतानि भौतिकशास्त्रीयतत्त्वानि विरलानि चेदपि काश्चन प्राक्कल्पनाः कृताः याः निरीक्षणैः, ताः

सत्यमिति ज्ञायते । इन्फाट्टृण् इति प्राक्कल्पनासमुदायः महाविस्फोटस्य समर्थकः इति उच्यते । अतिशीघ्रं विकसतः प्रपञ्चस्य काश्चन परिधिः निश्चीयते यत् अतिबाह्येदेशविशेषे कालविशेषे च जातानां च प्रक्रियाणां निरीक्षणं नैव सम्भवति । प्रकाशस्य, अथवा अन्यरश्मीनां वेगः प्रपञ्चविकासस्य वेगमपेक्ष्य न्यूनो वर्तते । अतः तादृशकल्पितपरिधेः बाह्यदेशे काले च वर्तमान रश्मयः परिध्यन्तःस्थरश्मिना साकं मेलनं कदापि न प्राप्नुवन्ति । तेन तादृशपरिधेः बाह्यरश्मीनां पठनम् असाध्यमिव जायते । महाप्रसारः इति प्रतिभासेन तादृशपरिधेः बाह्येऽपि देशे काले का प्रक्रिया जाता, कियान् तापाङ्कः आसीत् इत्यादिः विशदीकर्तुं शक्यते ।

प्रपञ्चस्य अतिशीघ्रविकासः जातः, येन द्रव्यस्य सर्वासु दिक्षु समानरीत्या वितरणं जातम् इति महाप्रसारेण विशदीकर्तुं शक्यते । एकस्मात् प्रदेशात् आकुञ्चितद्रव्यस्य स्फोटनम् अत्र नोच्यते । यदि तादृशस्फोटेन द्रव्यस्य सर्वदिगवच्छेदेन समानरीत्या गमनमिति स्वीक्रियते, तदा मध्यदेशे अधिकतापाङ्कः बाह्यदेशेऽपि क्रमेण न्यूनः इति स्यात्, यत् प्रत्यक्षविरुद्धम् । किन्तु द्रव्ययोर्मध्ये वर्तमानस्य आकाशस्य विकासः उच्यते, येन सर्वदिगवच्छेदेन प्रपञ्चे समानस्पर्शाङ्कः, समानरीत्या द्रव्यवितरणञ्च जायते । अस्यामवस्थायां प्रपञ्चे सर्वत्र महाप्रसारमण्डलस्य (Inflation Field) अधिभवनमासीत् ।

महाविस्फोट-एकता नामके अतिसूक्ष्मदेशविशेषे वर्तमानस्य प्रपञ्चस्य सर्वदिगवच्छेदेन समानतया प्रसारार्थं कीदृशः विकासः अपेक्ष्यते इति चिन्त्यते । महाविस्फोट-एकतायाः $10^{-36}$ तः $10^{-32}$ क्षणपर्यन्ते अतिसूक्ष्मकाले $10^{76}$ गुणस्य विकासः जातः इति स्वीक्रियते । तदानीं स्पर्शाङ्के अतीवन्यूनता जाता । तावता कालेन स्पर्शाङ्कः पूर्वतनस्पर्शाङ्कस्य एकलक्षांशेषु एकांशम् इति रीत्या न्यूनं जातम् । वस्तुतः तस्मिन् काले किं जातमिति ज्ञानार्थं निरीक्षणफलानां लब्धिः सुतरां नास्ति इत्यतः कल्पना एव अस्य सिद्धान्तस्य आधारः । अत एव अस्मित् विषये बहूनि शोधकार्याणि जायमानानि सन्ति ।

**आकाशप्रसारः**

द्वयोः द्रव्ययोर्मध्ये वर्तमानस्य आकाशस्य कालेन सह प्रसरणं जायते । अन्यस्मात् प्रसरणात् स्फोटात् वा अस्य अयं भेदः यत् अयं समस्तप्रपञ्चस्य कश्चन धर्मः इति । अत एव प्रसारबहिर्भूततया स्थित्वा अस्य निरीक्षणमवगमनं वा नैव सम्भवति । एतत् एफ्.एल्.आर्.डब्ल्यु प्रतिकृतिना (FLRW Model) गणितरीत्या उपस्थापितं विशदीकृतञ्च । अयं प्रसारः बृहदाकारकयोर्मध्ये एव अवगमनविषयः भवति यथा द्वयोः आकाशगङ्गयोर्मध्ये । आकाशगङ्गतोऽपि सूक्ष्मानि सौरयूथसदृशस्थापत्यानि गुरुत्वाकर्षणशक्त्या परस्परं बद्धानि अतः विकासः तयोर्मध्यस्थस्य आकाशस्य न जायते ।

सापेक्षता सिद्धान्तेन (Theory of Relativity) अनुशासितरीत्या महाप्रसारकाले प्रपञ्चे सर्वत्र द्रव्य-ऊर्जयोः समानरीत्या वितरणं जातम् । तदानीमेव अस्य विकासस्य आरम्भः जातः । शास्त्रीयगणनानुसारं प्रायः 7.8 शतकोटि वर्षपर्यन्तं प्रपञ्चविकासस्य प्रवेगः (velocity) गुरुत्वाकर्षणशक्तिवशात् क्रमेण न्यूनो जायमान आसीत् । ततः परं

 ISSN: 2320-740X

द्रव्याणां मध्ये दूराधिक्यात् गुरुत्वाकर्षणशक्तिः क्रमेण न्यूनतां प्राप्तुमारब्धवती । अतः प्रपञ्चविकासः क्रमेण अधिकाधिकं प्रवेगतां प्राप्तः । अर्थात् द्वयोः द्रव्ययोः परस्परदूरगमनस्य वेगतः क्रमेण आधिक्यं प्राप्तुमारब्धवान् । लाम्ब्डा सि.डि.एम् प्रतिकृत्यनुसारं भाविकाले अयं प्रवेगः इतोऽपि अधिको भविष्यति ।

सैद्धान्तिकप्रपञ्चोत्पत्तिशास्त्रज्ञाः महाविस्फोटसिद्धान्तस्य आविष्कारार्थं कतिपयनिरीक्षणफलानामुपयोगं कुर्वन्ति । अत्र आकाशस्य विकासः जायते इति निर्धारणाय प्रधानतया प्रापञ्चिकतत्त्वं (Cosmological Principal), कोपर्निकतत्त्वं (Copernican Principal) इति सिद्धान्तद्वयं प्रधानतया अवलम्बितम् । प्रापञ्चिकतत्त्वानुसारं प्रपञ्चे सर्वदिगवच्छेदेन समानतया द्रव्यवितरणं जातम् । कोपर्निकतत्त्वानुसारं प्रपञ्चस्य किञ्चन मध्यस्थानं नास्ति, अर्थात् प्रपञ्चे सर्वेषाम् स्थानानां समानं प्राधान्यं वर्तते । सैद्धान्तिकप्रपञ्चोत्पत्तिशास्त्रज्ञाः एतेषां विशदपठनेन निरीक्षणैश्च अस्य प्रामाणिकतां ज्ञातवन्तः । एतेषां प्रामाणिकतोपस्थापनार्थं पर्याप्तकारणानाम् आविष्कारः समीपकाल अपि जातः । अतः साक्षात् द्रष्टुं न शक्यते चेदपि आकाशविकासः जायते इति अङ्गीकरणार्थं ते निर्बन्धं प्राप्नुवन् ।

हब्बिल्महोदयेन वाननिरीक्षणम् उपयुज्य आकाशगङ्गाः दूरं गच्छन्त्यः सन्तीति उपस्थापितवान् । बृहत्स्थापत्यानां पठनेन आकाशगङ्गानां वितरणम् आकाशे सर्वदिगवच्छेदेन समानरीत्या जातमिति ज्ञातम् । गामारश्मिः इतरे रश्मयश्च प्रपञ्चे सर्वत्र समानरीत्या वितरिता इति ज्ञायते । European Southern Observatory इत्यत्र वर्तमानाः शास्त्रज्ञाः सूक्ष्मतरङ्गरश्मीनां पठनेन, तेषां सर्वदिगवच्छेदेन एकरूपता, क्रमिकशीतीभवनञ्च जातमिति ज्ञातवन्तः । एतत्सर्वं निरीक्षणेन लब्धानि आकाशप्रसारसाधकानि कारणानि इति परिगण्यन्ते ।

**नक्षत्राणामुत्पत्तिः**

घनीभूत-अणुकमेघाः यत्र भवति तत्र नक्षत्रोत्पत्तिदेशः (stellar nurseries) इत्यपि अभिधीयते, तत्रस्थद्रव्याणां सङ्घटनात् नक्षत्राणि उत्पद्यन्ते । नक्षत्रोत्पत्तिशास्त्रमिति शास्त्रशाखा तदभिज्ञाः, अन्तर्नक्षत्रीय देशः (Interstellar Medium - ISM), अणुमेघः (Molecular Clouds) इत्यादीन् नक्षत्राणामुत्पत्तिस्थानमिति मन्यन्ते । नक्षत्रोत्पत्तिप्रक्रियायाः आकाशगङ्गानामुत्पत्ति प्रक्रियया साम्यमामनन्ति । नक्षत्रोत्पत्तिनियमाः एकस्य नक्षत्रस्य, नक्षत्रयुगलस्य च कृते समानाः भवन्ति ।

घनीभूतजलजनकवायुः नक्षत्रवत् परिणमति । अत्र 70% जलजनकं, अवशिष्टे भूरिभागः हीलियञ्च भवति । जलजनकं अणुकरूपेण (ज.ज.$_2$) तत्र भवति इत्यतः नक्षत्रोत्पत्तिपूर्वकालीनावस्थायाः अणुकमेघः इति नाम भवति । इतरनक्षत्रेषु नाक्षत्र-अणूत्पत्तिद्वारा (Stellar Nucleosynthesis) उत्पन्नानां अधिकगुरुत्ववतां मूलकानाम् अल्पीयम् अस्तित्वम् अणुकमेघे भवितुमर्हति चेदपि, जलजनकं हीलियमिति न्यूनतमगुरुत्ववद्भिः वायुमूलकैरेव नक्षत्रस्य उत्पत्तिः जायते । अणुकमेघे अणुकानां क्रमेण आधिक्यं भवति । यदा पर्याप्तानि अणुकानि मूलकमेघे सञ्चितानि भवन्ति, तदा तानि गुरुत्वाकर्षणशक्तिवशात् परस्परं सङ्घटितुमारभन्ते । तेन अणुकमेघः गोलाकृतिं सम्प्राप्य ऊर्ज-औष्ण्ययोः बहिः

प्रेक्षणकारी नक्षत्ररूपेण परिणमति ।

**नाक्षत्र-अणूत्पत्तिः**

नाक्षत्र-अणूत्पत्तिः इत्याख्यप्रक्रियया प्रपञ्चे जलजनकं हीलियम् इति मूलकाभ्याम् अधिकगुरुत्ववतां मूलकानां उत्पत्तिः ज्ञायते । नक्षत्रस्य मध्यभागे अत्युष्णावस्थायाम् अणुजनक-युगल-संयोगः (Nuclear Fusion) जायते, येन न्यूनगुरुत्ववद्भ्यः मूलकेभ्यः अधिकगुरुत्ववतां मूलकानामुत्पत्तिर्जायते । अनया प्रक्रियया महदूर्जं बहिरागच्छति, तेन च नक्षत्रस्य परिमाणे न्यूनता भवति । एवं कालान्तरे नक्षत्रस्य नाशोऽपि जायते । प्रपञ्चे मूलकानां वैविध्यस्य कारणम् एषा प्रक्रिया भवति ।

इयं प्रक्रिया अणूत्पत्तिः इति प्रक्रियाधारायाः प्रधानाङ्गं भवति । सूर्यात् आगच्छन् प्रकाशः औष्ण्यञ्च एतादृश-अणूत्पत्तेः अनन्तरफलरूपेण बहिरागच्छन् ऊर्जः एव । न्यूनतरपरिमाणगुरुत्ववत् अणुभ्यः अधिकपरिमाण-गुरुत्ववदणवः परम्परया उत्पद्यन्ते इति प्रक्रिया । सूर्ये तु जलजनकस्य हीलियंरूपेण परिवर्तनमेव जायते इति निर्धारितम् । अन्तरिक्षे जलजनकस्य दहनमित्यतः भिन्ना एव प्रक्रिया, येन हीलियं नोत्पद्यते ।

**नक्षत्रस्फोटनम्-अणूत्पत्तिः**

नक्षत्रस्फोटनम् उभयथा जायते । यदि एकं नक्षत्रं समीपस्थनक्षत्रात् चन्द्रशेखरपरिधिः (Chandrasekhar Limit) इति परिधेः अपि अधिकं द्रव्यम् आकृष्य स्वीकरोति, तदा तस्य नक्षत्रस्य स्फोटः जायते इति प्रथमः । द्वितीयश्च, यदि नक्षत्रे निक्कल्-56 इति मूलकात् अयः-56 इति मूलकमुत्पद्यते, तदा नक्षत्रस्य स्फोटः जायते इति । अनेन अतीव गुरुत्ववतां मूलकानामुत्पत्तिः, न्यूनतरगुरुत्ववन्मूलकात् जायते ।

**आकाशगङ्गोत्पत्तिः**

आकाशगङ्गा नाम ग्रह-नक्षत्रसमूहः, यत्र नक्षत्राणां परितः ग्रहाः भ्रमन्ति । सर्वे अपि सौरयूथसदृशाः ग्रहनक्षत्रसमूहाः पुनः कञ्चन मध्यभागं परितः भ्रमन्ति, यत्र महाद्वारं वर्तते इति समीपकाले ज्ञातम् । आकाशगङ्गायाः गुरुत्वस्य भूरिभागे विद्रव्यं (Dark Matter) भवति यस्य प्रत्यक्षेण निरीक्षणं कर्तुं न शक्यते । एवं गुरुत्वाकर्षणशक्ति-तदितरेषां बलानां प्रभावः विद्रव्ये न भवति । आकाशगङ्गाख्यस्थापत्यस्य उत्पत्तिः अपि गुरुत्वाकर्षणशक्तिवशात् ग्रहनक्षत्राणां समीपीकरणेन जाता ।

**प्रपञ्चोत्पत्तिकालनिर्धारणम्**

प्रपञ्चोत्पत्तिः कदा जाता इत्यस्मिन्विषये प्रपञ्चोत्पत्तिशास्त्रे बहूनि शोधकार्याणि जातानि । तत्र “लाम्ब्डा सि डि एम्” इति प्रपञ्चप्रतिकृत्यनुसारं (Lambda-CDM Model of Universe) निर्धारितः कालनिर्देश एव अद्यत्वे प्रामाणिकत्वेन स्वीक्रियते । तदनुसारेण 13.799 शतकोटिवर्षात् पूर्वं प्रपञ्चस्योत्पत्तिर्जाता । अस्यां कालगणनायां


ISSN: 2320-740X

विविधकारणैः 21 दशलक्षवर्षाणां त्रुटिः अर्थात् आधिक्यमथवा न्यूनता भवितुमर्हति इत्यपि तैः निवेद्यते । इयं 21 दशलक्षवर्षाणामस्पष्टता कतिपयवैज्ञानिकसंशोधनैः लब्धा यथा – प्लाङ्क्-इत्यादिभिः उपग्रहैः(satallite) कृत सूक्ष्मतरङ्गरश्मि (Cosmic Microwave Background Radiation) गणनाश्रितसंशोधनम्, "डब्ल्यु माप्" (WMAP) उपग्रहेण निर्मितप्रपञ्चमातृकाधारितशोधनं, प्रपञ्चः अनन्तस्पर्शाङ्कात् (infinite temperature) अद्यतनस्पर्शाङ्कपर्यन्तं शीतीभवनार्थं कियन्तं कालं स्वीकृतवान् स्यात् इति सैद्धान्तिकशोधनं, प्रपञ्चविकासप्रवेगस्य (acceleration of expansion of Universe) गणनया कियता कालेन अद्यतनरूपेण प्रसारः जातः स्यादिति सैद्धान्तिकसंशोधनमित्यादीनि ।

13.8 शतकोटिवर्षात्मककाले अत्युष्ण-अतिसान्द्र-एकात्म्य-मौलिकावस्थातः अद्यतनावस्थापर्यन्तं प्रपञ्चस्य क्रमिकविकासात्मकपरिणामः "लाम्ब्डा सि डि एम्" प्रतिकृत्या ज्ञातुं शक्यते । किन्तु अतिमौलिकस्य प्रपञ्चस्य विशदांशाः अद्यापि अज्ञाता एव । "लाम्ब्डा सि डि एम्" प्रतिकृतिमौलिकज्ञातकालः महाविस्फोट-एकता (Big Bang Singularity) इति नाम्ना अभिधीयते । सामान्यभौतिकशास्त्रसिद्धान्तैरनिरूप्यो भवति अयमवस्थाविशेषः । तदानीं समस्तं द्रव्यम् ऊर्जम् आकाशञ्च एकत्र बिन्दौ आकुञ्चितमासीत्, यत्र स्पर्शाङ्कः, सान्द्रता च अनन्तासीत् । कालस्यापि आरम्भः तत एव जातः । ततः अतिशीघ्रं प्रपञ्चस्य (आकाशस्य) प्रसरणं  शीतीभवनञ्च जातम् । महाविस्फोट-एकता इति कालात्, एकक्षणस्य लक्षं-कोटितः एकस्मिन्नंशात्मके अतिसूक्ष्मकाले, प्रपञ्चे महान् परिणामः जातः इति तावातः कालस्यापि महत् प्रामुख्यं प्रपञ्चचरित्रे वर्तते । किन्तु महाविस्फोट-एकतायाः कालः 13.799 शतकोटिवर्षात् पूर्वं इत्यत्र 21 दशलक्षवर्षाणाम् अस्पष्टता पूर्वोक्तवत् वर्तते इत्यतः, महाविस्फोट-एकतायाः समनन्तरमतीव सूक्ष्मकाले जातानां प्रक्रियाणां कालनिर्धारणम् अतिमौलिकप्रपञ्चस्य विशदांशाश्च अद्यापि अस्पष्टाः संशोध्यमानाः सन्ति । तथापि सैद्धान्तिकरीत्या परीक्षणेन च उभयथा अस्य प्रामाणिकता सिद्धा । "अन्ताराष्ट्रिय आकाशगोलविज्ञानसमितिः" (International Astronomical Union) इत्यनेन "लाम्ब्डा सि डि एम्" प्रतिकृत्यनुसारमुक्तकाल एव प्रपञ्चस्यायुरिति स्वीक्रियत इत्यपि अस्य सार्वभौमिकप्रामाणिकतां समर्थयति ।

प्रपञ्चोत्पत्तिकालः प्रपञ्चे वर्त्तमानाऽतिपुरातनद्रव्योत्पत्तिकालात् पूर्वमेव अवश्यं भवेदित्यतः तादृशद्रव्याणां कालगणनया प्रपञ्चोत्पत्तिकालस्य अस्पष्टता न्यूनीकर्त्तुं शक्यते । तादृशकालगणनापठने अतिशीतस्पर्शाङ्कवत् white dwarf (coolest white dwarf) इत्यस्य स्पर्शाङ्कः, अतिपुरातननक्षत्राणां प्रकाशश्च मुख्यौ अवलम्बकौ ।

Lambda-CDM प्रतिकृतिमुपयुज्य प्रपञ्चस्य आयुर्निर्धारणे केषाञ्चन दत्तांशानां (Data) निर्धारणमपेक्ष्यते । आहत्य प्रपञ्चे कियत् द्रव्यगतमूर्जं (Matter-Energy) वर्तते, तस्य सान्द्रतामाधारीकृत्य (Density) दत्तांशः लभ्यते, यदुपलब्ध्यर्थं कतिपयनासु उपग्रहाणामेव विक्षेपणं प्रपञ्चोत्पत्तिशास्त्रज्ञैः कृतम् । तदाधारेण

फ्रेड्मान् समवाक्यस्य(Friedmann's equation) निर्धारणं क्रियते । प्रपञ्चस्य विकासः एतावति काले एतावान् जातः, अतः विकासप्रक्रियायाः आरम्भः एतावतः कालात् पूर्वं स्यात्, इत्यादिप्राक्कल्पना अत्र उपयुक्ता ।

नासा (NASA) इति संस्थाद्वारा विक्षेपितेन 'डब्ल्यु माप्' (Wilkinson Microwave Anisotropy Probe - WMAP) इति उपग्रहेण नववर्षात्मक आकाशनिरीक्षणैः सञ्चितदत्तांशानां प्रसिद्धीकरणं 2012 तमे वर्षे जातम् । तदनुसारेण कृतैः संशोधनैः प्रपञ्चस्यायुः 13.722 शतकोटिवर्षाणि इति निर्धारितम् । अत्र 59 दशलक्षवर्षाणाम् अस्पष्टता भवितुमर्हति इत्यपि सूचितम् ।

इसा (European Space Agency) इति संस्थायाः प्लाङ्क् (Plank) इति व्युपग्रहस्य सार्धचतुष्टय वर्षात्मक-आकाशनिरीक्षणेन लब्धानां दत्तांशानां वर्षद्वयं यावत् शोधनात्परं प्रपञ्चस्यायुः 13.813 शतकोटिवर्षाणि इति निर्धार्य 2015 तमे वर्षे प्रसिद्धीकृतम् । अत्र अस्पष्टता 38 वर्षात्मिका । इतराण्यपि बहूनि शोधकार्याणि समीपकाले सञ्जातानि यथा तरङ्ग-आयुर्विद्या (Radiometric Dating) इत्यादयः ।

एतेषां विभिन्नानां स्वतन्त्राणां सैद्धान्तिकानां प्रायोगिकानां च शोधकार्याणां फलेन पुनः संशोधनेन प्रपञ्चस्यायुः 13.799 शतकोटिवर्षाणि – यत्र 21 दशलक्षवर्षाणां अस्पष्टता - इति आगोलप्रपञ्चशास्त्रज्ञैः ऐकमत्येन स्वीकृतम् । अतिनूतनाः केचन शास्त्रज्ञाः प्रपञ्चस्यायुर्विषये मतभेदमुपस्थापितवन्तः इति ज्ञायते । Gause Tia (26 feb 2015), Das Saurya; Bhaduri Rajat K (18 Nov 2014), Ali Ahammed Faraq (4 Feb 2015) इत्यादि शास्त्रज्ञानां मतानुसारं प्रपञ्चस्य आदिः नास्ति, "महाविस्फोट-एकता" अपि नास्ति । तेन प्रपञ्चस्यायुः अनन्तः भवति इति । तथापि मुख्य-महाविस्फोटवादिनाम् अत्र नैर्भर्यं नास्ति ।

**प्रतिद्रव्यम्**

द्रव्यं कणेभ्यः उत्पन्नं चेत् प्रतिद्रव्यं प्रत्येकं कणाद् उत्पन्नम् । प्रतिद्रव्यं द्रव्यसमान-गुरुत्ववत् भवति, किन्तु द्रव्यं वैपरीत्य charge युक्तं भवति । यथा electron इत्यस्य प्रतिद्रव्यं positron, proton इत्यस्य प्रतिद्रव्यं antiproton, neutron इत्यस्य प्रतिद्रव्यं antineutron, जलजनकम् इत्यस्य प्रतिजलजनकम् (anti-hydrogen) इति । द्रव्यवत् प्रतिद्रव्यमपि संयोगद्वारा सूक्ष्मात् स्थूलमित्येवमुत्पद्यते । यथा positron, antiproton, antineutron च मिलित्वा द्रव्यस्य अणुवत् प्रतिद्रव्यस्य प्रति-अणु उत्पद्यते ।

प्रति-अणुः यद्यपि परीक्षणशालायाम् एतावता न निर्मातुं शक्यः, तथापि प्रति-अणु-जनकानां positron, antiproton, antineutron इत्येतेषाम् उत्पत्तिः भौमान्तरिक्षे सामान्यतया जायते, परीक्षणशालायामपि उत्पादयितुं शक्यते । प्रपञ्चोत्पत्तेः आरम्भकाले द्रव्यसमसङ्ख्याकं प्रतिद्रव्यमासीत् । अद्यतनप्रपञ्चे तु प्रतिद्रव्यापेक्षया द्रव्यस्य महदाधिक्यं दृश्यते । अस्य कारणम् baryogenesis इति प्रतिभासः इति प्रपञ्चशास्त्रकारैः उच्यते ।


ISSN: 2320-740X

**द्रव्य-प्रतिद्रव्य-सम-अनुपातभङ्गः / बरियोण्जन्यानाम् (द्रव्याणां) उत्पत्तिः**

प्रपञ्चोत्पत्तेः मौलिककाले द्रव्य-प्रतिद्रव्याऽनुपातः समानम् आसीत् । अद्यतनप्रपञ्चे तु प्रतिद्रव्यापेक्षया द्रव्यस्य आधिक्यं दृश्यते । अर्थात् महाविस्फोट-एकतायाः परं कश्चन प्रक्रमभङ्गः (asymmetry) जातः, येन baryon-antibaryon अनुपाते भेदः आगतः । अतः Baryogenesis इति काचन प्रक्रिया कल्प्यते । अनेन baryon जन्यद्रव्याणां antibaryon जन्यद्रव्याणाञ्च निरन्तरतया सङ्घटनं जातम् । तेन उभयोः गुरुत्वप्रलीनता (mass annihilation) भूत्वा photons, neutrons, न्यूनगुरुत्ववत् द्रव्य-प्रतिद्रव्य-युगलानि, प्रलीनगुरुत्वसमानतया ऊर्जञ्च उत्पन्नम् । तदुत्तरं antibaryon जन्यद्रव्यापेक्षया baryon जन्य द्रव्यस्य आधिक्यम्, अर्थात् प्रतिद्रव्यापेक्षया द्रव्यस्य आधिक्यं जातम् । एतत् प्रक्रिययया उत्पन्नद्रव्यैः एव अद्य दृश्यमानप्रपञ्चस्य उत्पत्तिर्जाता ।

Baryogenesis नियमानां निर्मितिः, Quantum Field नियमः, statistical physics इत्यादीनामवलम्बनेन कृतेति अस्य शास्त्रीयाधारो वर्तत एव । अत एव तादृशप्रक्रियायाः प्राक्कल्पनायामपि न दोषः । प्रतिद्रव्यं द्रव्यात् न्यूनं वर्तते इति इयं प्रक्रिया कल्पिता । ननु प्रपञ्चे कुत्रापि सञ्चितरूपेण प्रतिद्रव्यस्य द्रव्यसमानरूपेणैव अस्तित्वं वर्तते, अस्माभिः न ज्ञातं तावदेव इति चेत् एषा कल्पना व्यर्था भवति । किन्तु एतावता परीक्षणैः निरीक्षणैर्वा तादृशसञ्चितावस्थायां प्रतिद्रव्यस्य अस्तित्वं प्रपञ्चे कुत्रापि न ज्ञातम् । आकाशगङ्गायाः मध्यप्रदेशेषु यत्र अत्यूर्जेन प्रक्रियाः जायन्ते, तत्र - प्रतिद्रव्यमेघानाम् अस्तित्वं European Space Agency द्वारा विक्षेपितः "INTEGRAL" इति उपग्रहः ज्ञापयति, किन्तु सः द्रव्याधिक्यं समीकर्तुं पर्याप्तो न भवति । अतः Baryogenesis इति प्रक्रियाकल्पनं सार्थकमामनन्ति ।

Baryogenesis कालानन्तरं Big Bang Nucleosynthesis इति प्रक्रिया जाता, यतः अणोः मध्यस्थानवर्त्तिनोः अणुजनकपदार्थयोः proton - neutron इत्यनयोः युगलम् उत्पन्नम् ।

**म.वि. अणुजनक-सूक्ष्मकणयुगलस्य (न्यूक्लियस्) उत्पत्तिः**

महाविस्फोटात् 10 क्षणतः 20 निमेषपर्यन्तकाले जाता प्रक्रिया Big Bang Nucleosynthesis इत्यभिधीयते । ततः अल्पतमगुरुत्ववद्भ्यः जलजनकं-हीलियं-इत्यादिमूलकेभ्यः nuclei उत्पन्नम् । अन्येषामधिकगुरुत्ववतां मूलकानां nuclei बहुकालानन्तरं stellar nucleosynthesis इति प्रक्रियया उत्पन्नानि । अस्मिन् काले स्पर्शाङ्कः 116 giga.kelvin तः 1.16 giga.kelvin पर्यन्तं न्यूनो भूत्वा प्रपञ्चः क्रमेण शीतीभूतः । एषा उत्पादनप्रक्रिया एवं शीतीभवनञ्च प्रपञ्चे सर्वत्र एकरूपेण एकदा अभवत् ।

यदा प्रपञ्चः 10 क्षणात्मककाले ततः पूर्वतनस्पर्शाङ्कापेक्षया ईषत् शीतीभूतः, तदा एषा प्रक्रिया आरब्धा । ततः पूर्वतन काले स्पर्शाङ्कस्य आधिक्यात्, proton-neutron युगलस्य – nuclei इत्यस्य – उत्पत्तिः न जायते

स्म । अति-ऊर्ज-शीघ्रतावद्भिः photon पदार्थैः, nuclei इत्यस्य विभागः उत्पत्तिसमनन्तरमेव जायते स्म । यदा स्पर्शाङ्कः न्यूनः जातः तदा 10 क्षणादारभ्य proton, neutron च मिलित्वा nuclei इति युगलस्य उत्पत्तिरारब्धा । nuclei इत्यत्र अधिकसंख्याकं proton, neutron च भवितुं नार्हतिस्म इत्यतः न्यूनतमगुरुत्ववतो जलजनकस्य हीलियाच्च nuclei एव उत्पन्नाः , न तु अधिकगुरुत्ववतामन्येषाम् । विविधगणितीयपद्धत्या तदानीन्तन proton-neutron सङ्ख्या, तेषां अनुपातश्च प्रपञ्चशास्त्रकारैः निर्धारितः । तदनुसारं प्रत्येकं neutron कृते सप्त proton आसन्निति ज्ञातम् । proton सङ्ख्यायां दृष्टमिदम् आधिक्यं तस्य अल्पगुरुत्ववशात् जातमिति निर्धारितम् । तदानीन्तनस्पर्शाङ्के जायमानप्रतिक्रियाणां स्पष्टं विशदीकरणं भौतिकशास्त्रीयनियमैः कर्तुं शक्यते । अतः ततः पूर्वकालीन baryogenisis प्रक्रियावत् अत्र अस्पष्टता नास्ति । पुनश्च ततः पूर्वकालीनप्रक्रियाणाम् अनुबन्धरूपेण एतत्कालीना प्रक्रिया जाता इति तत्र कारणप्रदर्शनमपि सुलभं भवति ।

प्रपञ्चस्य विकासेन तस्य शीतीभवनं जातम् । तावत्पर्यन्तं स्पर्शाङ्कस्य आधिक्यात् यद् यद् nuclei जायते स्म तत्सर्वम् उत्पत्तिसमनन्तरमेव अतिशीघ्र-ऊर्जवत्फोटोण्पदार्थैः नष्टं जायते स्म यत् deuterium bottleneck इति नाम्ना अभिधीयते । विंशतिनिमेषात्मककालानन्तरञ्च, प्रपञ्चस्य क्रमिकशीतीभवनात्, नूतन nuclei उत्पत्त्यर्थं यावान् स्पर्शाङ्कः अपेक्ष्यते तावदसत्वात्, नूतना nuclei उत्पत्तिः असाध्या जाता ।

**विसंयोगः / अणुजनकसंयोगः**

महाविस्फोटात् 378,000 वर्षेभ्यः परं काचन प्रक्रिया जाता येन electron एवं proton मिलित्वा कश्चन अणुः – अर्थात् जलजनकवायोः अणुः – प्रथमतया प्रपञ्चे उत्पन्नः । सा प्रक्रिया Recombination इत्युच्यते ।

महाविस्फोटात् परं प्रपञ्चः अत्युष्ण-अतिसान्द्र photon electron proton इत्यादीनां प्लास्मावत् आसीत् । प्रपञ्चस्य क्रमिकविकासेन औष्ण्य-सान्द्रते न्यूने अभवताम्, ततः जलजनकवायोः उत्पत्त्यर्थं या अवस्था अपेक्ष्यते, तस्याम् अवस्थायाम् आगतप्रपञ्चः । तदा अतिवेगेन electron proton च मिलित्वा जलजनकस्य अणोः उत्पत्तिरारब्धा । तेन जलजनकस्य, electron proton इत्यनयोः च अनुपातं 10,000 जलजनकस्य स्थाने अतिन्यूनसङ्ख्याक electron proton इति जातम् । अतिमौलिकद्रव्यात् photon यदा स्वतन्त्रो जातः (photon decoupling) तदा एषा प्रक्रिया आरब्धा इति अस्य प्रक्रियायाः नाम photon स्वातन्त्र्यम् (photon decoupling) इत्यपि वर्तते । स्वतन्त्रो भूतः photon अन्यद्रव्यैः प्रतिक्रियाम् अकृत्वा प्रपञ्चे सर्वत्र प्रसारितः यत् Cosmic Microwave Background Radiation इति नाम्ना अभिधीयते इति ।

**********


ISSN: 2320-740X

# नीलकण्ठकृतसुखबोधिन्याः सुखबोधकत्वम्

नवीनभट्टः
शोधच्छात्रः, व्याकरणविभागः

"रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" इति पातञ्जलमहाभाष्ये[1] व्याकरणाध्ययनस्य मुख्यप्रयोजनान्युल्लिखितानि । वेदमादिङ्कृत्वा पुराणकाव्येतिहासादि निखिलसारस्वतवाङ्मयस्य शब्दज्ञानाधीनत्वात् शब्दो ह्यवश्यं वशीकार्यः जिज्ञासुभिः । सा हि शब्दावगतिरन्तरेण व्याकरणं नैव सेत्स्यतीति हेतोर्नितरां व्याकरणमेव शरणम् ।

पाणिनीयानुशासनमात्मसाध्विधातुं विद्येते प्राधान्येन द्वौ पन्थानौ काशिकामार्गः प्रक्रियामार्गश्चेति । उभावपि मार्गौ मन्दमध्यमबुद्धीनां पाणिनीयप्रवेशाय सहकुरुतः । तत्र प्रक्रियामार्गे हि दशमशताब्देरारभ्य महत्सञ्चलनं दृष्टम् । धर्मकीर्तेः रुपावतारः, विमलसरस्वतिविरचिता रूपमाला इतीमे प्रक्रियामार्गस्थे आदिमे द्वे व्याकरणकृती । तदनु रामचन्द्राचार्यस्य प्रक्रियाकौमुदीति ग्रन्थः चतुर्दशशताब्दे विद्वल्लोकाय समर्पितः । तत्पश्चात् तमेव पन्थानमनुसरद्भिः श्रीमद्भिः भट्टोजिदीक्षितैः वैयाकरणसिद्धान्तकौमुदीत्यभिधो व्याकरणग्रन्थो व्यरचि, यश्च प्रक्रियामार्गस्थेषु ग्रन्थेषु मूर्धन्यस्थानं भजते, समेषामपि पाणिनीयसूत्राणामत्र व्याख्यातत्वात् । ग्रन्थस्यास्य प्रसिद्धिं व्यख्यापयन् तदुपरि लिखिताः अनेकाः व्याख्याः । लघुनोपायेन शब्दज्ञानाय प्रवृत्तेषु ग्रन्थेषु गच्छता कालेन अध्येतृभिः काठिन्यमनुभूतमिति कृत्वा सरलार्थावगमिकाः व्याख्याः आविरभूवन् । सिद्धान्तकौमुद्याः सतीष्वपि नैकासु व्याख्यासु मनोरमा, तत्त्वबोधिनी, बालमनोरमा, शब्देन्दुशेखरादय एव अद्यापि विद्वज्जगन्मण्डयन्ति, अन्यासां कृतीनां वैशिष्ट्याभावात् क्वचिदनुपलभ्यत्वाच्च । उपलब्धासु वैशिष्ट्यपूर्णासु व्याख्यासु काश्चन एतावता नैव प्राकाश्यन्त । तादृशी काचित् सिद्धान्तकौमुदीव्याख्या सुखबोधिनीति, श्री नीलकण्ठवाजपेयिकृता । तस्याः अप्रकाशितायाः सुखबोधिन्याः सुखबोधकत्वं कथमिति पत्रस्यास्य जिज्ञास्यो विषयः ।

**ग्रन्थस्यास्य वैशिष्ट्यम्**

सिद्धान्तकौमुद्याः स्वोपज्ञटीका[2] प्रौढमनोरमा तथा श्री ज्ञानेन्द्रसरस्वतिविरचिततत्त्वबोधिनी च बहुत्र साम्यमावहतः । सिद्धान्तकौमुद्यां स्वमतं ख्यापयन्तो दीक्षिताः तद्व्याख्याने प्रौडमनोरमाख्ये बहुत्र परमतम् अनामग्राहं

---

[1] व्याकरणमहाभाष्यम् – पस्पशाह्निकम्

[2] श्रीमद्भट्टोजिदीक्षितैरेव कृता व्याख्या ।

ISSN: 2320-740X

खण्डयन्ति, तदेव हि तत्त्वबोधिन्यां ज्ञानेन्द्रसरस्वतिभिः अनुस्रियते । वस्तुतस्तु दीक्षितैर्नैकत्र खण्ड्यमानाः 'प्राञ्चः' के इति तत्त्वबोधिनीबालमनोरमयोरध्ययनेन नैव ज्ञायते, अतस्तदवगमनाय सुखबोधिनी शरणीगन्तव्या । अनेकेषां प्राचां विदुषां मतमवलोक्य दीक्षितैः स्वग्रन्थे सूत्राणां वृत्तिः, उदाहरणं, वार्त्तिकोद्धरणमित्यादिकं व्यधायि । भाष्यकैयटन्यासकारहरदत्तमिश्राणां चाभिप्रायं विमृश्य स्वग्रन्थे अल्पीयसा वाक्येन शास्त्रमुपन्यस्यते दीक्षितैः । नीलकण्ठीयस्याध्ययनेन एषां दीक्षितवाक्यानां मूलं किमिति ज्ञातुं शक्यम् । तदेव न अपि तु, एषु स्थानेषु दीक्षितहृदयं किमिति तज्ज्ञात्रा नीलकण्ठेन स्वग्रन्थे सुखबोधिन्याख्ये विव्रियते । अत एव नीलकण्ठः दीक्षितहृदयविदिति वक्तुमुचितम् । एवं च सिद्धान्तकौमुद्यध्येतृषु अत्यन्तबालानामपि ग्रन्थबोधः यथा स्यात्तथा इयं सिद्धान्तकौमुदीव्याख्या निबद्धा वर्तते । तदेतत्कथमित्यग्रे निरूपयिष्यते । सुखबोधिन्याः सुखबोधकत्वे सन्त्यनेकानि उदाहरणानि ।

**स्तोः श्चुना श्चुः**[1]

स्तोः श्चुना श्चुरित्यत्र स्तोः श्चौ श्चुः इति लाघवार्थं भवति किं श्चुनेति तृतीयाप्रयोगेन, इति जिज्ञासायां ' तत्तु पूर्ववर्णेनापि योगे यथा सूत्रप्रवृत्तिः स्यादित्यर्थकः' इति विवृणोति नीलकण्ठः । अयं च प्रश्नः प्रौढमनोरमा-तत्त्वबोधिनी-बालमनोरमेति प्रमुखासु सिद्धान्तकौमुदीव्याख्यासु नाप्युत्थापितः न वा समाधत्तः । न्यासकारेण उपन्यस्तोऽयं विषयः बालानामुपकारार्थम् अत्रोपनिबध्यते व्याख्याकृता । सिद्धान्तकौमुदीव्याख्यावसरे न्यासकारस्याप्याशयं विशदीकृत्य न्यासकौमुद्योः समानांशाभिव्यञ्जकत्वमपि नीलकण्ठस्य वैशिष्ट्यम् ।

**न पदान्ताट्टोरनाम्**

न पदान्ताट्टोरनामिति सूत्रे व्याख्याने 'अनामिति लुप्तषष्ठीकं पदम्' इति सिद्धान्तकौमुदीकारः । काशिकन्यासादिष्वदृष्टा इयं पङ्क्तिः प्राथम्येन सिद्धान्तकौमुद्यामेवोक्ता । अत्र लुप्तषष्ठीकं पदमिति कथमिति सम्भवतः प्रश्नस्य 'स चादेशस्य स्थानीति षष्ठ्यन्तत्वमेव युक्तम्' इति व्याख्यात् नीलकण्ठः । परन्तु स्थानित्वं नैतावता निश्चितम्, अनाम् इति पर्युदासमात्रस्य सूत्रेण कण्ठतः उक्तत्वात्, अनाम्शब्दात्षष्ठीप्रत्ययागोचराच्च । अतः लुप्तषष्ठीको निर्देशः इति वक्तव्ये अन्यदेव किञ्चिल्लिङ्गं स्यात् । स्तोरित्यनुवृत्तस्य अनामिति विशेषणत्वे तु स्तोरित्यस्य स्थानीत्वात्षष्ठीत्वाच्च तद्विशेषणस्यापि समानविभक्तिकत्वं शास्त्रसिद्धम् । सकारस्य कथञ्चिदपि नामावयवासम्भवात्तुरेवावशिष्टः इति तु स्पष्टमेव । इदमेव मनसि निधायाग्रे ' स्तोरित्यस्य सामानाधिकरण्यासम्भवाद्वैयधिकरण्येन..' इत्याद्याह सुखबोधिनीकारः । अत्रापि अनामिति स्तोरित्यस्य विशेषणमित्यङ्गीकारे तु वैयधिकरण्याशङ्काया अभावात् अन्वयः सुकरः।

**नीलकण्टीये कौमुदीव्याक्यानां मूलान्वेषणम्**

---

[1] वस्तुतः स्तो श्चुना श्चुरिरिति विसर्गरहितं रूपं दृश्यते सुखबोधिन्याम् । स्तोरित्यस्य विसर्गस्य सकारे स्तोश् श्चुनेति जाते, अनेनैव सूत्रेण श्चुत्वे स्तोश् श्चुनेति स्थितौ झरो झरि सवर्णे इत्यनेन लोपे स्तोः इति विसर्गरहितं रूपम् । तेन स्तोः श्चुनेत्यपि साध्वेवेति व्याख्याकर्तुराशयः । एतादृशाः अनेके अंशाः व्याख्यानेऽस्मिन् लभ्याः ।

 ISSN: 2320-740X

सिद्धान्तकौमुद्यां दीक्षितानाम् अभिप्रायस्य मूलं किमिति ज्ञातुम् एवञ्च तत्पङ्क्तीनां मूलं किमिति वा ज्ञातुं सहकुरुते नीलकण्ठकृता सुखबोधिनी । तद्यथा- झयो होऽन्यतरस्यामिति सूत्रे हकारस्थाने घकारः किमर्थमिति विवृण्वता कौमुदीकृता 'घोषवतो नादवतो महाप्राणस्य संहृतकण्ठस्य हस्य तादृशो वर्गचतुर्थ एवादेशः' इत्युक्तम् । तस्य मूलमुद्घाटयन्नीलकण्ठः मिश्रवाक्यं तदिति स्पष्टीकरोति । स्वकृतकौमुद्याशयं स्वकीयप्रौढमनोरमायां विस्तरेण प्रकटयन्तः प्राचां मतं खण्डयन्तश्च दीक्षिताः के ते प्राञ्च इति कण्ठतो न वदन्ति । अतः प्राक्षु कस्य मतस्य खण्डनं क्रियते इति मनोरमावलोकनेन नावगम्यते । सुखबोधिन्यां तावत् दीक्षितोक्तेराशयम्, तत्र खण्ड्यमानं प्राञ्चं च नामग्राहं विवृणोति व्याख्याकारः । तद्यथा- तच्छिवः इत्यत्र तच् शिव इति विग्रहे, जश्त्वे, खरि चेति चर्त्वे च रूपमिति प्राचा यदुक्तं तन्न इति मनोरमायाम् । इदं प्रक्रियोक्तमिति[1] सुखबोधिन्याम् । तद्वदेव स्वगुरोः ज्ञानेन्द्रसरस्वतिनापि कासाञ्चन पङ्क्तीनां मूलं किमिति वावदीति नीलकण्ठः । तद्यथा - डः सि धुट् इति सूत्रे सीति सप्तमी, या च डः इति पञ्चम्या षष्ठीत्वेन विपरिणम्यते इति स्थितम् । सीति सप्तमीनिर्देशस्तु लाघवार्थ इति तत्त्वबोधिनीकारः । अत्र नीलकण्ठस्तावत् स्वगुरुवाक्यस्य मूलमन्विष्यन् 'इति न्यासकारः' इत्याह । तदध्ययनस्य गहनतायै इदं निदर्शनम् । तत्रैव सूत्रे 'धुटः परादिरस्तु धुगिति पूर्वान्तः क्रियताम्, डकारस्य सकारे परे इति व्याख्यायताम्' इत्याशङ्कायां पूर्वान्तत्वे ष्टुत्वप्रसङ्गावारणाय परादित्वं कृतमिति तत्त्वबोधिन्यां समाहितम् । तत्त्वबोधिनीकारस्यास्य आशयस्य मूलमुद्धरन्नीलकण्ठः वृत्तिकारं काशिकाकृतं स्मरति ।

**उपसंहारः**

इत्थं च श्री नीलकण्ठवाजपेयिकृतसिद्धान्तकौमुदीव्याख्यायाः कानिचन विशिष्टांशानां निरूपणद्वारा तद्व्याख्यानस्य सारतः परिचयः व्यधायि । सम्पूर्णां सिद्धान्तकौमुदीं व्याख्यास्यमानः अयं सुखबोधिनीग्रन्थः अष्टसु भागेषूपनिबद्धः विस्तरश्च वर्तते । अतः तस्मात् खिलभागमेव स्वीकृत्य स्थालीपुलाकन्यायेनात्र ग्रन्थस्यास्य सुखबोधकत्वनिरूपणाय उदाहरणानि प्रादायिषत । कौमुदीकर्तुः हृदयस्य, तद्ग्रन्थगतसूक्ष्मांशानां च सरलतया व्याख्यानेन लोकमुखानयनं सुखबोधिन्यां दृश्यते । इदमेव भवति ग्रन्थस्यास्य सुखबोधकत्वमपि । एतेन स्वनाम्नः सार्थक्यं ख्यापयति सुखबोधिनी ।

**********

[1] श्री रामचन्द्राचार्याणामयं ग्रन्थः प्रक्रियाकौमुदीति । प्रायः समेषु स्थलेषु मनोरमायां प्राञ्च इति शब्दप्रयोगः एतानुद्दिश्यैव कृतः दीक्षितैः । प्रक्रियासरणौ रामचन्द्राचार्यानेव स्वपूर्वत्वेन प्राक्त्वेन च गृह्णन्ति दीक्षिताः । तदुपरि विद्यमानादरेण उत तत्प्रभावेण वा स्वग्रन्थस्य नाम्नि कौमुदीति पदं योजयामासुः, यच्च रामचन्द्राचार्यस्य ग्रन्थनाम्न्यपि दृश्यते ।

# सङ्गीतशास्त्रे नादस्य सप्तस्वराणाञ्चोत्पत्तिप्रक्रिया

नारायण रायकरः

**शोधच्छात्रः, न्यायविभागः**

संस्कृतवाङ्मयप्रपञ्चे अनितरसाधारणतया सर्वेषां मनोरञ्जकमिति प्रशंस्यमानं शास्त्रं सङ्गीतशास्त्रम् । वेदपुराणादिषु काव्येषु च व्यासवाल्मीकिकालिदासप्रभृतिभिः कविभिः सङ्गीतविद्येयं बहुधा परिवर्णिता दृश्यते । अनादिकालादस्माभिः समनुभूयते यत् सङ्गीतेन सर्वेषां मनः परितुष्यति । सङ्गीतरसास्वादजनितं सुखं को वा न वाञ्छति । सर्वैरप्यास्वाद्यमानः एक एव श्रवणविषयश्चेत् तत्सङ्गीतम् । तदित्थमभिलप्यते-

**सङ्गीतकेन रम्येण सुखं यस्य न चेतसि । मनुष्यवृषभो लोके विधिनैव स वञ्चितः ॥** इति ।

विषयानुभवरहितस्यापि इदमिदानीमुत्पन्नस्य शिशोरपि गीतश्रवणेन हर्षो जायते । तदुक्तम्-

**अज्ञातविषयास्वादो बालः पर्यङ्किकागतः । रुदन् गीतामृतं पीत्वा हर्षोत्कर्षे प्रपद्यते ॥**

**वनेचरस्तृणाहारश्चित्रं मृगशिशुः पशुः । लुब्धो लुब्धकसङ्गीते गीते त्यजति जीवितम् ॥**

(सङ्गीतरत्नाकरः)

चतुषष्टिकलासु प्रधानभूतानां नृत्यगीतवादनानां संयोगेन सङ्गीतं प्रादुर्भवति । उक्तञ्च सङ्गीतरत्नाकरे “गीतं वाद्यं तथा नृत्यं त्रयं सङ्गीतमुच्यते” इति । अपि चोक्तमन्यत्र-

**तालवाद्यानुगं गीतं नटीभिर्यत्र गीयते । नृत्यस्यानुगतं रङ्गे तत्सङ्गीतकमुच्यते ॥** इति ।

इत्थं बहुधा प्रशंसितायाः सङ्गीतविद्यायाः स्वरूपमत्र नादस्वरूपविवेचनपुरस्सरमुपस्थाप्यते ।

नादस्वरूपविवेचनं विना सङ्गीतस्वरूपविवेचनं परिपूर्णं न भवति । न केवलं सङ्गीतमपि तु समस्तमपि जगत् नादात्मकम् । शब्दाभिव्यक्तेः प्रथमसोपानं नाद एव । नादोत्पत्तेः पश्चादेव जगतो वाग्व्यवहार आरभ्यते । इत्थं नाद एव जगतः व्यवहारव्यवस्थितिः प्रतिष्ठिता । तदुक्तं सङ्गीतदामोदरकारैः -

**न नादेन विना गीतं न नादेन विना स्वरः । न नादेन विना रागस्तस्मान्नादात्मकं जगत् ॥**

**न नादेन विना ज्ञानं न नादेन विना शिवः । नादरूपं परं ज्योतिर्नादरूपी परं हरिः ॥”**

**(सङ्गीतदामोदरः)**

तथा च सङ्गीतं नादात् कथमुत्पद्यते इति विवेचनात् पूर्वं व्यवहारस्य नादेनोत्पत्तिः कथमिति पर्यालोचनमावश्यकम् । अत्र आपाततः पर्यालोचने कृते एतदवगम्यते यत् आदौ शरीरे नादस्याविर्भावः, ततो मुखे ताल्वादिस्थानभेदेन वर्णानां प्रादुर्भावः, उत्पन्नानां वर्णानां समुदायात् पदम्, पदसमुदायेन वाक्यमित्येवं क्रमेण नादेनैव हि

 ISSN: 2320-740X

जगतो वाग्व्यवहारः आरभ्यते । अनेनैव क्रमेण आविर्भूतेन नादेन अभिव्यञ्जकनाडीभ्यः श्रुतीनामुत्पत्तिः, ताभ्यः श्रुतीभ्यः सप्त शुद्धस्वराः द्वादश विकृतस्वराश्च, ततः स्वरविशेषैः निष्पन्नशब्दभेदाद्गीतस्याऽविर्भावः, गीतस्य वाद्यनृत्ययोः सम्मेलनात् सङ्गीतस्योत्पत्तिरिति सङ्क्षेपेण सङ्गीतोत्पत्तिस्वरूपमुक्तं भवति । तदुक्तम् सङ्गीतदर्पणे -

**नादेन व्यज्यते वर्णः पदं वर्णात् पदाद्वचः । वचसो व्यवहारोऽयं नादाधीनमतो जगत् ॥**

अपि च -

**शरीरं नादसम्भूतिः स्थानानि श्रुतयस्तथा । ततः शुद्धास्स्वराः सप्त विकृता द्वादशात्मनि ॥**

(सङ्गीतरत्नाकरः)

**"गीतं नादात्मकं वाद्यं नादव्यक्त्या प्रशस्यते । तद्वयानुगतं नृत्यं नादाधीनमतस्त्रयम् ॥**

(सङ्गीतदर्पणम्)

अत एव सङ्गीतविद्यायाः समीचीनतया प्रतिसन्धानाय नादस्योत्पत्तेः विवेचनमावश्यकम् । तदत्र सङ्क्षेपेण ग्रन्थोक्तरीत्या निरूप्यते ।

पाणिनीयशिक्षा-सङ्गीतदामोदर-सङ्गीतरत्नाकरप्रभृतिषु ग्रन्थेषु नादस्योत्पत्तिप्रक्रिया इत्थं निरूपिता । प्रथमं मनः आत्मनः प्रेरणां सम्प्राप्य देहस्थम् अग्निं प्रेरयति । स चाग्निः ब्रह्मग्रन्थिस्थितं प्राणवायुं प्रेरयति । इत्थम् अग्निना प्रेरितः प्राणवायुः ऊर्ध्वपथे सन्चरन् नाभिप्रदेशं प्रविशति । पश्चात् क्रमेण हृत्कण्ठमूर्धसु सञ्चरन् वदने ध्वनिमाविर्भावयति । स एव ध्वनिः नाद इति संज्ञया प्रकीर्तितः । तदुक्तम् - सङ्गीतरत्नाकरे

**आत्मा विवक्षमाणोऽयं मनः प्रेरयते मनः । देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम् ॥**
**ब्रह्मग्रन्थिस्थितः सोऽथ क्रमादूर्ध्वपथे चरन् । नाभिहृत्कण्ठमूर्धस्वाविर्भावयति ध्वनिम् ॥**

उक्तमपि पाणिनीयशिक्षायाम्-

**आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥**
**मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् । प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् ॥**
**कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥**
**सोदीर्णो मूर्ध्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः॥**
**स्वरतः कालतः स्थानात् प्रयत्नानुप्रधानतः। इति वर्णविदः प्राहुर्निपुणं तं निबोधत ॥**

तथा च प्राणाग्निसंयोगेन शरीरे नादस्याविर्भावो भवतीति नाद इत्यत्र 'न' कारेण अग्निः, 'द' कारेण प्राणवायुः विवक्षितः । तदुक्तम् -

**नकारं प्राणनामानं दकारमनलं विदुः । जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते ॥**

(सङ्गीतरत्नाकरः)

**नाभेरूर्ध्वं हृदि स्थानात् मारुतः प्राणसंज्ञकः । नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्तितः ॥**

एवं प्राणाग्निसंयोगात् समुत्पन्नो नादः क्रमशः सञ्चरन् नाभिप्रदेशे अतिसूक्ष्मः, हृद्देशे सूक्ष्मः, कण्ठे पुष्टः, मूर्ध्नि अपुष्टः मुखे कृत्रिमः इति पञ्चधा विभज्य आविर्भवति । तत्र कृत्रिमसंज्ञको नाद एव अस्मदादिव्यवहारे उपयुज्यमानः श्रवणेन्द्रियग्राह्यश्च । तदुच्यते-

**पावकप्रेरितः सोऽथ क्रमादूर्ध्वपथे चरन् । अतिसूक्ष्मध्वनिं नाभौ हृदि सूक्ष्मं गले पुनः ॥**

**पुष्टं शीर्षे त्वपुष्टञ्च कृत्रिमं वदने तथा । आविर्भावयतीत्येवं पञ्चधा कीर्त्यते बुधैः ॥**

एवं शरीरे नादस्योत्पत्तिक्रमोऽत्र निरूपितः । स च नादः आकाशाग्निवायुतत्त्वेभ्यः समुत्पन्नः पूर्वोक्तरीत्या शरीरे नाभिहृत्कण्ठमूर्धसु सूक्ष्मरूपेण सञ्चरन् मुखे अभिव्यक्तो भवति । तदुक्तम्-

**आकाशाग्निमरुज्जातो नाभेरूर्ध्वं समुच्चरन् । मुखेऽतिव्यक्तमायाति यः स नाद इतीरितः ॥**

परं केवलं शरीरे एव नादस्योत्पत्तिर्न जायते । शरीरव्यतिरिक्तेष्वपि उत्पन्नो नादः अनुभूयते । तथा च शरीराद्युत्पत्तिस्थानभेदेन नादः त्रिधा विभक्तः । प्राणिभवः, अप्राणिभवः, उभयसम्भवश्चेति । तत्राद्यः पूर्वोक्तप्रक्रियानुगुणं अस्मदादिशरीरे उत्पद्यमानः । द्वितीयस्तु वायुसहकारं विना वीणाभेर्यादिवाद्येषु शब्दजनकाभिघाताख्यसंयोगादुत्पद्यमानः । तृतीयः मनुष्यमुखान्निर्गतवायुसहकारेण वंशादिवाद्येषु उत्पद्यमानः । तदेवोच्यते-

**स च प्राणिभवोऽप्राणिभवश्चोभयसम्भवः ।**

**आद्यः कायभवो वीणादिभवस्तु द्वितीयकः ॥**

**तृतीयोऽपि च वंशादिभव इत्थं नादस्त्रिधा मतः ॥**

तत्र पुनः शरीरे उत्पद्यमानो नादः व्यवहारे हृदादिस्थानभेदेन मन्द्रः मध्यः तारश्चेति प्रभेदेन त्रिधा श्रवणगोचरो भवति । हृदि मन्द्रः, कण्ठे मध्यः, मूर्ध्नि तारः इत्येवं क्रमेण नादस्याविर्भावो निरूपितः । तदुक्तं सङ्गीतरत्नाकरे-

व्यवहारे त्वसौ त्रेधा हृदि मन्द्रोऽभिधीयते । कण्ठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः ॥

प्रकारान्तरेण नादः आहतः अनाहतश्चेति द्वेधा प्रकीर्तितः । तत्रानाहतनादः गुरूपदेशमार्गेण योगिभिरुपास्यमानः । स च मोक्षकारणीभूतः । आहतनादस्तु लौकिकव्यवहारे उपयुज्यमानः अस्मदादिसामान्यानां मनोरञ्जकः । भवभञ्जकश्च । श्रुत्यादिद्वारतः अस्योत्पत्तिर्विहिता । तदुच्यते ।

**तत्रानाहतनादं तु मुनयः समुपासते । गुरूपदिष्टमार्गेण मुक्तिदं न तु रञ्जकम् ॥**

**स नादस्त्वाहतो लोके रञ्जको भवभञ्जकः । श्रुत्यादिद्वारतस्तस्मात् तदुत्पत्तिर्निरूप्यते ॥**

इत्थं पूर्वोपदर्शितप्रक्रियानुसारं प्रादुर्भूतो नादः मुखे ताल्वादिस्थानभेदात् वर्णरूपतामवाप्य अभिव्यज्यते । एवम् स एव नादः अभिव्यञ्जकनाडीभेदेन श्रवणेन्द्रियगोचरत्वात् श्रुतिरूपतामवाप्य अभिव्यज्यते । तथा

 ISSN: 2320-740X

चात्र नादात् सङ्गीतशास्त्रसम्मतसप्तस्वराणामुत्पत्तिहेतुभूतानां श्रुतिस्थानानां विवेचनं क्रियते । श्रुत्युत्पत्तिविषये सङ्गीतरत्नाकरस्य व्याख्याने कल्लिनाथेन एवमभिप्रेतम् - मारुताद्याहत्यनन्तरोत्पन्नक्षणेषु प्रथमक्षणवर्ती यः श्रवणमात्रयोग्यो ध्वनिः तस्यैव श्रुतिरिति व्यवहार इति । उक्तमप्यन्यत्र-

प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः । सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणा ॥ इति ।

शरीरे तस्या उत्पत्तिक्रमस्त्वित्थम् निरूप्यते- हृदि ऊर्ध्वभागे स्थितयोरिडापिङ्गलनामकनाड्योः संलग्नाः द्वाविंशतिः सच्छिद्रनलिकारूपाः नाड्यो भवन्ति । एताः नाड्यः श्रुतिस्थानानीति प्रकीर्तितानि । एतेभ्यः श्रुतिस्थानेभ्यः प्राणाग्निसंयोगेनोत्पन्नः श्रवणयोग्यो ध्वनिरेव श्रुतिरिति कथ्यते । सा श्रुतिः अभिव्यञ्जकनाडीभेदेन द्वाविंशतिधा विभक्ता । ताश्च नान्दी, विशाला, सुमुखी, विचित्रा, चित्रा, घना, चालनिका, माला, सरसा, मातङ्गी, माधवी, मैत्री, शिवा, कला, कलरवा, बाला, शार्ङ्गरवी, जया, अमृता, रसा, मात्रा, मधुकरी चेति । तदुक्तम्-

**नान्दी चालनिका रसा च सुमुखी चित्रा विचित्रा घना मातङ्गी सरसामृता मधुकरी मैत्री शिवा माधवी ।**
**बाला शार्ङ्गरवी कला कलरवा माला विशाला जया मात्रेति श्रुतयः पुराणकविभिर्द्वाविंशतिः कीर्तिताः ॥**

एवं पूर्वोपदर्शितासु द्वाविंशतिश्रुतिषु कश्चन स्वरः इति काश्चन श्रुतयः श्रुत्यन्तराणि इति व्यवह्रियन्ते । तदुक्तं सङ्गीतरत्नाकरे-

**श्रवणेन्द्रियग्राह्यत्वात् ध्वनिरेव श्रुतिर्भवेत् । सा चैका द्विविधा ज्ञेया स्वरान्तरविभागतः ॥**
**नियतश्रुतिसंस्थानाद्गीयते सप्तगीतिषु । तस्मात्स्वरगता ज्ञेयाः श्रुतयः श्रुतिवेदिभिः ॥**

तथा च श्रुतिस्थानेषु या श्रुतिः आविर्भवन्ती मनोरञ्जनयोग्या भवति, सा श्रुतिः स्वर इति परिगण्यते । अस्य मनोरञ्जकत्वं सङ्गीतोपयोगित्वञ्च सङ्ख्यानियममाश्रित्य निर्णीयते । तत्र सङ्गीतोपयोगितया परिगणिताः सप्त स्वराः षड्जः, ऋषभः, गान्धारः, मध्यमः, पञ्चमः, धैवतः, निषाध इति सप्तधा प्रसिद्धाः । तदेवात्राभिहितम्-

“स स्वरो यः श्रुतिस्थाने स्वनन् हृदयरञ्जकः । षड्जोः ऋषभगान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्त्तिताः” भरतः ।

एवं दर्शितस्वरेषु प्रत्येकम् एकस्मात् स्वरतः अग्रिमस्वरस्य मध्ये विद्यमानं व्यवधानमेव श्रुत्यन्तरमिति कथ्यते । तच्च सङ्ख्यानियममाश्रित्य निर्णीयते । तथा च यादृशसङ्ख्यानियममाश्रित्य श्रुत्यन्तरनिर्धारणेन याः श्रुतयः गायनयोग्या भवन्ति, तादृशसङ्ख्यानियमेन ताः श्रुतयः स्वरा इति परिगण्यन्ते ।
तत्र क्रमशः एतेषां स्वराणां सङ्ख्यानियमः इत्थं निरूप्यते ।

**“चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः । द्वे द्वे निषादगान्धारौ त्रिस्त्रिर्ऋषभधैवतैः ॥”**
**चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः। ऋषभे धैवते तिस्रो द्वे गान्धारनिषादके॥”** इति ।

तथा च प्रागुक्तद्वाविंशतिश्रुतिस्थानेषु चतुर्थे षड्जः, सप्तमे ऋषभः, नवमे गान्धारः, त्रयोदशे मध्यमः, सप्तदशे

पञ्चमः विंशे धैवतः, द्वाविंशे च निषाध इति क्रमेण सप्तस्वराणामुत्पत्तिः कथ्यते ।

तथा चोक्तसङ्ख्यानियमानुगुणं तत्तन्नामपुरस्सरं द्वाविंशतिश्रुतिभ्यः सप्तस्वराणामुत्पत्तिक्रमोत्र दर्श्यते- नान्दी-विशाला-सुमुखी-विचित्रेति श्रुतिभ्यः षड्जस्वरः उत्पद्यते । चित्राघनाचालनिका इत्येतासां संयोगेन ऋषभः, मालासरसासंयोगेन गान्धारः, मातङ्गी-माधवी-मैत्री-शिवा इत्येताभ्यः मध्यमः, कला-कलरवा-बाला-शार्ङ्गरवीत्येताभ्यः पञ्चमः, जयामृतारसानां संयोगेन धैवतः, मात्रामधुकरीत्येताभ्यां निषाधः इति रीत्या स्वराणामुत्पत्तिव्यवस्था शास्त्रे निरूपिता । तच्चैवमुच्यते-

नान्दी-विशाला-सुमुखी-विचित्रासम्भवः सदा । षड्जो मतो मुनीन्द्रेण भरतेन शिवेन च ॥

**चित्रा घना चालनिका निवेशात् सञ्जायतेऽसौ ऋषभस्तथैव ।**

**स्वरोऽपि माला सरसानिवेशात् गान्धारनामा प्रथितः पृथिव्याम् ॥**

**मातङ्गी माधवी मैत्री शिवाजातस्तु मध्यमः । कला कलरवा बाला शार्ङ्गरव्यास्तु पञ्चमः ॥**

**जयामृतारसानान्तु संयोगाद्धैवतस्वरः । मात्रा मधुकरीयोगात् निषादः संप्रजायते ॥**

सङ्गीतरत्नाकरे षड्जादिभेदे अन्यविधाः श्रुतय उक्ताः । यथा

**"तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगाः । दयावती रञ्जनी च रतिका ऋषभे स्थिता ।**

**रौद्री क्रोधा च गान्धारे वज्रिका च प्रसारिणी । प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः ।**

**क्षिती रक्ता च सान्दीपिन्यालापी चैव पञ्चमे । मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः ।**

**उग्रा च क्षोभिणीति द्वे निषादे वसतः श्रुती" ।**

एवं सङ्गीतशास्त्रे सप्तस्वराणामुत्पत्तिक्रमः ग्रन्थोक्तरीत्या यथामति अत्रोपस्थापितः ।

**********

# पदार्थविभजने गुणविभजने च मतभेदः

सुनिताभट्

**शोधच्छात्रा, न्यायविभागः**

न्यायवैशेषिकमते शास्त्रान्तरे च पदार्थानां विभागे मतभेदः वर्तते । तत्र वैशेषिकास्तावत् द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः इति सप्तपदार्थानङ्गीकुर्वन्ति । यद्यपि "धर्मविशेषप्रसूताद्द्रव्यगुणकर्म-

 ISSN: 2320-740X

सामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्” [1] इत्युद्देशसूत्रे षड्भावपदार्थानामेव उल्लेखो वर्तते नाभावस्य, तथापि “कारणाभावात्कार्याभावः”[2] “क्रियागुणव्यपदेशाभावात् प्रागसत्”[3] इत्यादिसूत्रे अभावस्यापि उल्लेखः कृतः ।

गौतममहर्षिणा प्रणीते न्यायदर्शने षोडशपदार्थाः उद्दिष्टाः वर्तन्ते । तद्यथा “प्रमाणप्रमेय-संशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निः - श्रेयसाधिगमः” इति ।

एतेषां षोडशपदार्थानां वैशेषिकमतोक्तसप्तपदार्थेष्वेवान्तर्भावः कृतः । तद्यथा –“प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि” इति सूत्रेण[4] चतुर्विधप्रमाणं दर्शितम् । तत्र प्रत्यक्षकारणीभूतानां चक्षुरादीन्द्रियाणां द्रव्ये, अनुमित्यादिकारणीभूतव्याप्तिज्ञानादीनां गुणे अन्तर्भावः ।

“आत्मशारीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्” इति सूत्रेण[5] द्वादशप्रमेयाः उक्ताः । तत्र आत्मशरीरेन्द्रियाणां द्रव्ये, गन्ध-रस-रूप-स्पर्श-शब्दात्मकार्थस्य गुणे, बुद्धेः गुणे, मनसः द्रव्ये, प्रवृत्तेर्गुणे, राग-द्वेष-मोहपदप्रतिपाद्यानां दोषाणाम् इच्छा-द्वेष-मिथ्याज्ञानात्मकतया गुणे अन्तर्भावः ।

प्रेत्य मृत्वा भावो जननमिति[6] व्युत्पत्त्या मरणोत्तरजन्मत्वं प्रेत्यभावपदप्रवृत्तिनिमित्तम् । चरमप्राणशरीरसंयोगध्वंसो मरणम् । आद्यशरीरप्राणसंयोगो जन्म । तथा च मरणोत्तरं तादृशसंयोगरूपस्य प्रेत्यभावस्य गुणे अन्तर्भावः ।

एवं सुखदुःखसंवेदनस्वरूपस्य मुख्यफलस्य गुणे, गौण-मुख्य-साधारण-जन्ममात्रस्वरूपफलस्याऽपि द्रव्येषु अन्तर्भावः । एवम् आत्यन्तिक दुःखनिवृत्तिरूपापवर्गस्य अभावे, संशयस्य गुणे, साध्यतया इच्छाविषयरूपप्रयोजनस्य यथायथं द्रव्यादिषु, साध्यसाधनोभयवत्तानिश्चयविषयस्य दृष्टान्तस्य यथायथं द्रव्यादिषु, तत्तच्छास्त्रसिद्धार्थरूपस्य सिद्धान्तस्य द्रव्यादिषु, शब्दस्वरूपप्रतिज्ञाद्यन्यतमरूपाणामवयवानां गुणे, व्याप्यारोपेण व्यापकारोपस्य तर्कस्य गुणे, निर्णयस्य गुणे, तत्त्वबुभुत्सोः कथारूपवादस्य गुणे, विजिगीषुकथारूपजल्पस्य गुणे,

[1] वैशेषिकसूत्रम् १.१.३

[2] वैशेषिकसूत्रम् १.२.१

[3] वैशेषिकसूत्रम् ९.१.१

[4] न्यायसूत्रम् १.१.३

[5] न्यायसूत्रम् १.१.९

[6] एतेन जन्मानन्तरं मरणं, तदनन्तरं जन्मेति जन्मसन्ततेरनादित्वग्रहो वैराग्यजननद्वारा मोक्षे उपयुज्यत इति सूचितम् । (दिनकरी)

स्वपक्षस्थापनाहीनकथारूपवितण्डायाः गुणे, अनुमिति-तत्करणाऽन्यतरप्रतिबन्धकज्ञानविषयरूपाणां हेत्वाभासानां यथायथं द्रव्यादिषु, अभिप्रायान्तरेण प्रयुक्तशब्दस्याऽर्थान्तरं परिकल्प्य दूषणाभिधानरूपस्य छलस्य गुणे, असदुत्तररूपजातेर्गुणे, पराजयहेतुस्वरूपनिग्रहस्थानानां यथायथं द्रव्यादिष्वन्तर्भावः कृतः । अतः न्यायवैशेषिकनये सप्तैव पदार्थाः ।

वैशेषिकनये द्रव्याणि नवधा भवन्ति । तथा च सूत्रम् "पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि[1]" इति । गुणास्तु चतुर्विंशतिः । तथा च सूत्रम् "रूपरसगन्धस्पर्शाः सङ्ख्या परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्चगुणाः[2]" इति । अत्र सूत्रे सप्तदशगुणा एव कण्ठतः उक्ताः । अन्ये गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः चकारेण समुच्चिताः प्रशस्तपादभाष्ये विशिष्य दर्शिताः ।

**भाट्टमीमांसकाः तु द्रव्यं जातिः गुणः क्रिया अभावश्चेति पञ्चैव पदार्थान् मन्यन्ते । तद्यथा –**
**वयं तावत् प्रमेयं तु द्रव्यजातिगुणक्रियाः । अभावश्चेति पञ्चैतान् पदार्थानाद्रियामहे[3] ॥ इति ।**

एवं पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मामनश्शब्दतमांसि इति एकादशद्रव्याणि, रूपरसगन्ध-स्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कर-ध्वनिप्राकट्यशक्तिभेदात् चतुर्विंशतिगुणान्[4] मन्यन्ते ।

विमर्शः - भाट्टाः विशेषसमवायौ पदार्थत्वेन नाङ्गीकुर्वन्ति । द्रव्यव्यावर्तकत्वात् विशेषस्य पृथक्त्वाख्यगुणे अन्तर्भावः क्रियते । समवायस्य स्थाने तादात्म्यस्याङ्गीकारात्, तस्य तु तत्तत्पदार्थे अन्तर्भावात् नातिरिक्तपदार्थत्वम् । वैशेषिकमते तु विशेषसमवायौ अतिरिक्तपदार्थौ ।

एवं भाट्टमते तमसः अतिरिक्तद्रव्यत्वेऽपि, वैशेषिकमते तस्य तेजोऽभावस्वरूपत्वात् नातिरिक्तद्रव्यत्वम् । एवं मतद्वयेऽपि शब्दः द्विविधः ध्वन्यात्मकः वर्णात्मकश्चेति । किन्तु तत्र वर्णात्मकशब्दः द्रव्यम् ध्वन्यात्मकः गुण इति भाट्टाः, वैशेषिकास्तु द्विविधशब्दोऽपि गुण एव इति अङ्गीकुर्वन्ति । ज्ञाततापरपर्याय एव प्राकट्यम् । तच्च वैशेषिकमते ज्ञानविषयतारूपत्वात् तत्तत्पदार्थेष्वेव अन्तर्भवात् नातिरिक्तगुणः । एवं शक्तिरपि नातिरिक्तगुणः, पदशक्तेः ईश्वरेच्छारूपत्वत्, सहजशक्तेः आधेयशक्तेश्च कारणतारूपत्वात् ।

प्राभाकराः तु द्रव्यगुणकर्मसामान्यसमवायशक्तिसङ्ख्यासादृश्यानि इति अष्टपदार्थान्[5], पृथिव्यप्तेजोवाय्वाकाश-

[1] वैशेषिकसूत्रम् १.१.५

[2] वैशेषिकसूत्रम् १.१.६

[3] मानमेयोदयः, प्रमेयपरिच्छेदः ।

[4] मानमेयोदयः प्रमेयपरिच्छेदः ।

[5] द्रव्यगुणकर्मसामान्यसमवायशक्तिसङ्ख्यासादृश्यान्यष्टौ पदार्थाः । (तन्त्ररहस्यम् प्रमेयपरिच्छेदः)

 ISSN: 2320-740X

पृथिव्यप्तेजोवाय्वाकाश-कालदिगात्ममनांसि इति नव द्रव्याणि, रूपरसगन्धस्पर्शपरिमाणपृथक्त्व-संयोगविभागपरत्वापरत्वगुरुत्व-द्रवत्वस्नेहसंस्कारशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्माः इति त्रयोविंशतिगुणानङ्गीकुर्वन्ति[1] ।

विमर्शः - गुरुमते तु वैशेषिकमतरीत्या समवायस्य पदार्थत्वाङ्गीकारेऽपि विशेषाभावयोः पदार्थत्वं नाङ्गीक्रियते । एवं सङ्ख्या न गुणः अपि तु अतिरिक्तपदार्थः इति ते वदन्ति । तथैव भाट्टमतोक्तरीत्या शक्तेः गुणत्वं इति न स्वीकुर्वन्ति अपि तु अतिरिक्तपदार्थः इति । एवं सादृश्यस्यापि अतिरिक्तपदार्थत्वामाहुः । एवं सङ्ख्यामतिरिच्य द्रव्यविभजने गुणविभजने च वैशेषिकमतमेवानुसृतवन्तः ।

मीमांसकैकदेशिनस्तु (कुतूहलकारास्तु) द्रव्यगुणकर्मशक्तिसामान्याभावाः इति षट्पदार्थान्[2], एकादशद्रव्याणि, गुणान्-रूपरसगन्धस्पर्शसङ्ख्यापरिमाणसंयोगगुरुत्वद्रवत्वस्नेहबुद्धिसुखदुःखेच्छाप्रयत्नधर्माधर्मसंस्कारभेदात् अष्टादशभेदान्[3] च अङ्गीकुर्वन्ति ।

विमर्शः – कुतूहलकाराः अपि शक्तेः अतिरिक्तपदार्थत्वमाहुः । एवं सङ्ख्यायाः गुणत्वात्, सादृश्यस्य तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वात् नातिरिक्तपदार्थत्वम् । एते भाट्टमतमनुसृत्य द्रव्याणां विभागं कृतवन्तः । किन्तु गुणविभजने भेदः वर्तते ।

पृथक्त्वस्य अन्योन्याभावे, परत्वापरत्वयोः दिक्कालसंयोगरूपत्वात् संयोगे, विभागस्य संयोगाभावरूपत्वात् अभावे, द्वेषस्य तु ज्ञानविशेषरूपत्वात् ज्ञाने अन्तर्भावः कृतः[4] । शब्दस्य तु अतिरिक्तद्रव्यत्वात् न गुणत्वम् इति स्वीकुर्वन्ति ।

मीमांसकैकदेशिमते (भाट्टार्ककारमते) पदार्थाः भावाभावभेदेन द्विधा । भावः अष्टधा द्रव्य-गुण-कर्म-सामान्य-शक्ति-सङ्ख्या-विषयता-वैशिष्ट्यभेदात्[5] । तत्र द्रव्यं तावत् दशधा विभक्तम् – पृथिव्यप्तेजोवाय्वाकाश-कालदिगात्ममनोवर्णभेदात्[6] । गुणाः तु पञ्चदश रूपरसगन्धस्पर्शपरिमाणसंयोगगुरुत्वद्रवत्वस्नेहज्ञानसुख-

---

द्रव्यजातिगुणाः कर्म सङ्ख्यासादृश्यशक्तयः । समवाय इतीमेऽष्टौ पदार्था गुरुसम्मताः । (मानमेयोदयः परिशिष्टम्)

[1] तन्त्ररहस्यम् प्रमेयपरिच्छेदः । मानमेयोदयः परिशिष्टम् ।

[2] द्रव्य-गुण-कर्म-शक्ति-सामान्यानां पदार्थानां कर्मसमुच्चितं तत्त्वज्ञानं निःश्रेयसहेतुः । (मीमांसाकुतूहलम्)

[3] मीमांसाकुतूहलम् गुणनिरूपणम् ।

[4] मीमांसाकुतूहलम् गुणनिरूपणम् ।

[5] भाट्टार्कः भावप्रकाराधिकारः।

[6] भाट्टार्कः द्रव्याधिकारः ।

दु:खेच्छाद्वेषयत्नाः[1] इति ।

विमर्शः – एतेऽपि भाट्टमत एव विशेषसमवाययोः पदार्थत्वं नाङ्गीकुर्वन्ति । किन्तु भावाभावभेदेन पदार्थं विभज्य तत्र गुरुमतोक्तं समवायं सादृश्यञ्च विहाय तत्स्थाने विषयतां वैशिष्ट्यञ्च अङ्गीकृतवन्तः । तत्र यद्यपि द्रव्यविभजनावसरे शब्दः द्रव्यमित्युक्तम् । तथापि तत्र द्विविधशब्दस्यापि द्रव्यत्वं वा वर्णात्मकस्यैव द्रव्यत्वं ध्वन्यात्मकस्य गुणत्वं वा इत्यत्र भ्रमः जायते । यतः तत्र शब्दनिरूपणावसरे ध्वनिः वायोर्गुणः इत्युक्तम् । किन्तु तस्य ध्वनेः गुणविभजनावसारे परिगणनं न कृतम् । तमस्तु तेजःसंसर्गाभाव एव, न तु अतिरिक्तद्रव्यम् । एवं सङ्ख्यायाः अतिरिक्तपदार्थत्वात्, शब्दस्य द्रव्यत्वात् तयोः गुणत्वेन परिगणनं नास्ति । पृथक्त्वस्य अन्योन्याभावत्वात्, विभागस्य संयोगध्वंसत्वात्, परत्वापरत्वयोः दिक्कालसंयोगरूपत्वात्, त्रिविधसंस्कारेषु वेगस्य क्रियासन्तानरूपत्वात्, भावनायाः आधेयशक्तित्वात्, स्थितिस्थापकस्य क्वचित् सहजशक्तित्वात् क्वचिदाधेयशक्तित्वात्, धर्माधर्मयोः अपि शक्तित्वात् न गुणत्वम् इत्याहुः ।

दीधितिकृदस्तु क्षण-स्वत्व-शक्ति-कारणता-सङ्ख्या-वैशिष्ट्यादीन् अनन्तान् पदार्थानङ्गीकुर्वन्ति ।

**********

# रप्रत्याहारविचारः

आनन्दपाण्ड्यः

**शोधच्छात्रः, व्याकरणविभागः**

यस्य वर्णद्वयस्य आस्यप्रयत्नौ तुल्यौ भवत: तस्य वर्णद्वयस्य परस्परं सवर्णसंज्ञां विधातुं भगवता पाणिनिना 'तुल्यास्यप्रयत्नं सवर्णम्' इति सूत्रम् आरब्धम् । विवृतम् ऊष्मणां स्वराणां च इति अभियुक्तोक्त्या ऋकारलृकारयो: विवृतरूपाभ्यन्तरप्रयत्नसाम्येऽपि ऋटुरषाणां मूर्धा, लृतुलसानां दन्ता: इति वचनप्रामाण्यात् उच्चारणस्थानभिन्नत्वात् तयो: अप्राप्तायां सवर्णसंज्ञायाम् ऋकारलृकारयो: परस्परं सर्वर्णसंज्ञां विदधाति वार्त्तिकृतोक्तं वार्त्तिकम् ऋलृवर्णयोर्मिथ: सावर्ण्यं वाच्यम् । अनेन च वार्त्तिकेन ऋकारलृकारयो: परस्परं विहितायां सवर्णसंज्ञायाम् ऋकारेण लृकारस्यापि ग्रहणात् ऋकारस्य स्थाने जायमानं कार्यं लृकारस्य स्यात् । तथा च 'उरण् रपर:' इत्येतत्सूत्रघटकेन उ: इति पदबोध्येन ऋकारेण लृकारस्यापि ग्रहणात् ऋकारस्य स्थाने जायमानं रपरत्वं लृकारस्यापि प्रसक्तम् । एवं च तवल्कार: इत्यादिप्रयोगेषु रपरत्वं स्यात् । न तु लपरत्वम्। अत: लपरत्वसाधनाय रपरत्ववारणाय च तुल्यास्यप्रयत्नमिति भाष्ये भगवता पतञ्जलिना

[1] भाट्टार्कः गुणाधिकारः ।

 ISSN: 2320-740X

लपरत्वं इत्युक्तम् । किन्तु कात्स्न्र्येऽपि भाष्ये लपरत्ववचनस्य अदर्शनात् लपरत्वं वक्ष्यामि इति वाक्यं रप्रत्याहाररूपेण व्याख्यास्यामि इति कैयटो व्याख्यात् । व्याख्यानं च रप्रत्याहाराश्रयणरूपम् ।

**रप्रत्याहारसिद्धिप्रक्रिया -**

लण्सूत्रस्थावर्णस्य अनुनासिकत्वं स्वीकृत्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण तस्येत्संज्ञाञ्च विधाय 'आदिरन्त्येन सहेता' इति सूत्रे इत्पदग्रहणसामर्थ्यात् अनन्त्येनापि इत्संज्ञकेन लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफ: 'उरण् रपर:' इति सूत्रघटकरेफरलयो: संज्ञा भवति । तथा च रेफपदेन रेफलकारयो: उभयो: ग्रहणात् आन्तरतम्यात् ऋकारस्य स्थाने जायमानोऽण् रपर: लृकारस्य स्थाने च जायमानोऽण् लपर: सन् प्रवर्त्तते । तेन तवल्कार: इत्यादिप्रयोगेषु लपरत्वं सिद्धम् । तदुक्तं सिद्धान्तकौमुद्यां लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफरलयो: संज्ञा । एवं च लण्सूत्रस्थावर्णस्यानुनासिकत्वं स्वीकुर्वद्भि: कैयटमतानुयायिभि: भट्टोजिदीक्षितप्रभृतिभिराचार्यै: रप्रत्याहार: स्वीक्रियते ।

**नव्यमतम् -**

लण्सूत्रस्थावर्णस्यानुनासिकत्वं स्वीकृत्य रप्रत्याहारस्वीकारो नोचित: । यत: रप्रत्याहारस्वीकारे रत्वावच्छेदेन रेफपदेन रेफलकारयो: उभयो: बोध: अङ्गीकार्य: । तथा सति अतो ल्रान्तस्य इत्येतत्सूत्रघटकरेफपदेनैव रेफलकारयो: उभयो: बोधे सम्भवे पृथक्तया लकारोच्चारणस्य वैय्यर्थ्यं स्यात् । अतो ल्रान्तस्येति सूत्रे भगवत: पाणिने: लकारोच्चारणसार्थक्याय रप्रत्याहाराङ्गीकार: अनावश्यक: । तवल्कार: इत्यत्र लपरत्वसाधनाय लपरत्वं वक्ष्यामि इति वाक्ये वच्पदस्वारस्यात् उरण् रपर: लपरश्च इति न्यासे एव भगवत: आकरकारस्य तात्पर्यम् अवधार्यम् ।

पूर्वोक्तप्रकारेण नव्यै: दोषे प्रदत्ते सति प्राचीना: निगदन्ति यत् अतो ल्रान्तस्य इत्येतत्सूत्रघटकलकारोच्चारणसामर्थ्यात् रप्रत्याहारस्यानित्यत्वं कल्प्यते । रप्रत्याहारस्य अनित्यत्वादेव रषाभ्यां नो ण: समानपदे इति सूत्रे रेफपदेन रेफलकारयो: उभयो: अग्रहणात् कमलानामित्यत्र णत्वाभाव:, रदाभ्यां निष्ठातो न: पूर्वस्य च द: इति सूत्रे रेफपदेन रेफमात्रस्यैव ग्रहणात् प्रफुल्तम् इत्यत्र नत्वाभावश्च सिद्ध: ।

प्राचीनानां पुर्वोक्ते समाधाने प्रदत्ते सति नव्या: ब्रुवते यत् अतो ल्रान्तस्य इति सूत्रे लकारोच्चारणसामर्थ्यात् रप्रत्याहारोऽनित्य: इति वदतां भवतां कोऽभिप्राय: ? रेफशब्दोऽनित्य: उतो वा रेफपदनिष्ठा शक्तिरनित्या आहोस्वित् रेफपदजन्यबोधोऽनित्य: अथवा तात्पर्यमनित्यम् ? अत्र शब्दस्य शब्दार्थरूपाया: शक्तेर्वा अनित्यत्वं प्रतिपादयितुं दुष्करमेव । सिद्धे शब्दार्थसम्बन्धे इति वार्त्तिकेन शब्दार्थसम्बन्धस्य नित्यत्वावगमात् । रेफपदजन्यबोधस्यापि अनित्यत्वं कल्पयितुं भवानप्रभुरेव । यत: शक्तिज्ञानसत्त्वे वचनसहस्त्रेणापि बोधस्य अवारणीयत्वात् । कथञ्चित् वक्तुरिच्छारूपतात्पर्यस्य अनित्यत्वं कल्पयितुं शक्यते यत् रपदं सर्वत्र रलतात्पर्येन नोच्चारितम् । किन्तु क्वोभयतात्पर्येणोच्चारितं क्व न इत्यस्य व्याख्यानात् निर्णेयत्वेन 'उरण् रपर:' इत्यत्र इव अतो ल्रान्तस्य इति सूत्रेऽपि उभयतात्पर्येणोच्चरितमिति व्याख्यातुं शक्यत्वेन अतो ल्रान्तस्य इत्येतत्सूत्रघटकलकारस्य स्वांशे चारितार्थ्यं न सम्भवति ।

ISSN: 2320-740X

चारितार्थ्याभावे च ज्ञापकत्वं दुर्वचमेव । यत: ज्ञापकं तदेव वरं यत् स्वांशे चारितार्थ्यं वचनसिद्धिफलमन्यत् इति अभियुक्तोक्ते: ।

किञ्च लण्सूत्रस्यावर्णस्य इत्संज्ञकत्वे 'इको यणचि' , इणो यण् इत्यादिषु लाघवानुरोधात् भगवान् पाणिनि: यप्रत्याहारेणैव व्यवहरेत् न तु यण् प्रत्याहारेण । अतो ज्ञायते लण्सूत्रस्थावर्णस्यानुनासिकत्वं अप्रामाणिकम् ।

ननु लण्सूत्रस्थावर्णस्य इत्संज्ञकत्वेऽपि 'इको यणचि', इणो यण् इत्यादिसूत्रेषु यण्निर्देशानुपपत्ति: नास्ति। यत: विसर्जनीयस्य स: इति सूत्रघटकविसर्जनीयपदेन ज्ञाप्यते यत् पर्यायवाचकशब्दानां लाघवगौरवचर्चा नाद्रियते । अत: भगवता सूत्रकारेण विसर्जनीयस्य स्थाने विसर्गपाठ: न कृत: । एवं च यण्प्रत्याहार-यप्रत्याहारयो: पर्यायत्वेन यप्रत्याहारस्य स्थाने यण्प्रत्याहारकरणेऽपि न दोष: । इति चेन्न ? पर्यायवाचकशब्दानां लाघवगौरवचर्चा नाद्रियते इति न्यायस्य गृहीतशक्तिकपदविषयकत्वेन प्रकृते अणादिपदशक्तिग्राहकेण आदिरन्त्येन सहेतेति शास्त्रबोधितसङ्केततावच्छेदकत्वं यण्त्वम् अनपेक्ष्य यत्वमेव लाघवात् कुतो न स्वीकृतम् इति शङ्काया: सम्भवात् लण्सूत्रस्थावर्णस्य अनुनासिकत्वम् अप्रामाणिकम् ।

ननु संज्ञा च नाम यतो न लघीय: इति भाष्यवचनप्रामाण्येन संज्ञाशब्दानाम् अर्द्धमात्रिकत्वस्य स्वीकार्यतया यण्प्रत्याहारविषये यण्त्वं शक्यतावच्छेदकं स्यात् अथवा यत्वं शक्यतावच्छेदकत्वं स्यात् इति न लाघवावकाशः , उभयो: अर्द्धमात्रिकत्वस्वीकारादेव इति चेत् उच्यते संज्ञाशब्दानाम् अर्द्धमात्रिकत्वनियमपक्षेऽपि लण्सूत्रघटकलकारेण निष्पद्यमानो यो य: प्रत्याहार: तेषां सर्वेषामपि लण्सूत्रस्थावर्णेन सह निष्पादनसम्भवात् लण्सूत्रे णकारोच्चारणस्य वैय्यर्थ्यम् अस्त्येव ।

ननु लण्सूत्रे णकारोच्चारणेन ज्ञाप्यते यत् अकारेण सह रप्रत्याहार एव भवति , न तु इतरप्रत्याहार: । अत: णकारोच्चारणस्य न वैय्यर्थ्यम् । अत एव ङेर्य: इति सूत्रे योऽचि इत्यादिसूत्रेषु च यशब्देन न प्रत्याहारग्रहणम् । किञ्च यरलवेति वर्णचतुष्टयबोधनाय क्वचित् णकारेण क्वचिदकारेण च प्रत्याहाराश्रयणे अर्द्धजरतीयत्वं स्यात् । किञ्च यप्रत्याहाराश्रयणे यस्य हल:, योऽचि इत्यादौ प्रत्याहाराश्रयवारणाय कृत्रिमाकृत्रिमन्यायबोधनाय व्याख्यानाश्रयणे महद्गौरवं स्यात् । किञ्च लक्ष्यानुसारिव्याख्यानेन सर्वत्र उभयोर्ग्रहणवारणाय पुनर्लक्ष्यानुसारिव्याख्यानाश्रयणे च अतिगौरवं प्रसज्येत । अत: लण्सूत्रस्थावर्णस्य अनुनासिकत्वं न प्रामाणिकम् ।

ननु लण्सूत्रस्थावर्णस्य अनुनासिकत्वमभ्युपगम्य रप्रत्याहारस्वीकारे अनुबन्धानाम् अजादिप्रत्याहारे ग्रहणाभावे आचारादप्रधानत्वात् , लोपश्च बलवत्तर: इति भाष्योक्तस्य तृतीयहेतो: अव्यापकत्वापत्ति: स्यात् इति ।

**********


ISSN: 2320-740X

# स्थानिवद्सूत्रस्य बालमनोरमा-शरद्रात्रिसमीक्षा

नागकौमुदी
**शोधच्छात्रा, व्याकरणविभागः**

स्थानिवदिति सूत्रार्थविचारः बालमनोरमाशरद्रात्रिव्याख्यानुरोधेन अत्र विविच्यते । कौमुद्याम् आदेशः स्थानिवत्स्यात्, न तु स्थान्यलाश्रयविधौ । अनेनेह यकारस्य स्थानिवद्भावेनाच्त्वमाश्रित्य **'अनचि'**[1] इति द्वित्वनिषेधो न शङ्कयः'अनल्विधौ' इति तन्निषेधात् इति उक्तं दीक्षितैः । स्थानिवत्-आदेशः-अनल्विधौ इति त्रिपदात्मकं सूत्रम् । सुधी उपास्यः इत्यत्र यणि सुध्युपास्यः इति रूपम् । अत्र अनचि च इति द्वित्वं भवति नवेति विचारः। गुरुस्थानापन्ने शिष्यादौ गुरुगताग्रासनादिप्राप्तिः लोके दृश्यते तथा प्रकृते ईकारस्थानिके यकारे ईकारगतम् अच्त्वम् आश्रित्य अनचि च इति द्वित्वनिषेधः भवतु इति चेत् न, अल्विधौ स्थानिवद्भावस्य निषेधात् । अत्र बालमनोरमाकारैः तद्स्थानापन्नः तद्धर्मं लभते इति न्यायस्य दृष्टान्तद्वयं दर्शितं गुरुस्थानापन्ने गुरुपुत्रादौ तद्धर्मलाभः लोकतो दृष्टः । कुशस्थानापन्ने शरादौ तद्धर्मलाभः वैदिकव्यवहारसिद्धः । तर्हि सूत्रं कुत इति चेत् ,अत्र स्वं रूपं शब्दस्य इति वचनात् स्थानिधर्मः आदेशे न प्राप्नोति तद्प्राप्त्यर्थं स्थानिवत्सूत्रम् । स्थानं नाम प्रसङ्गः स्थानम् अस्य अस्ति इति स्थानी ।

**बालमनोरमा**

यस्य स्थाने अन्यद्विधीयते तत् स्थानि । येन विधीयमानेन अन्यत् प्रसक्तं निवर्तते स आदेशः । स्थानिना तुल्यं स्थानिवत् । **'तेन तुल्यं क्रिया चेद्वतिः'**[2] इति सूत्रेण वतिप्रत्ययः । आदेशः स्थानिना तुल्यो भवति , स्थानिधर्मको भवतीति यावत् । अलिति वर्णपर्यायः । विधीयत इति विधिः कार्यम् । अलाश्रयो विधिः अल्विधिः, न अल्विधिः अनल्विधिः । अलाश्रयभिन्ने कार्ये कर्तव्ये इति प्रतीयमानोऽर्थः । अलाश्रयकार्ये कर्तव्ये स्थानिवन्न भवतीति फलितम् ।

अलाश्रयेति सामान्यवचनाद् अला विधिः, अलः परस्य विधिः, अलो विधिः, अलि विधिश्चेति चतुर्धा अर्थः ग्राह्यः। विग्रहस्तु अलः विधिः इत्येव सम्बन्धसामान्ये षष्ठी । स्थानिवदादेशोऽनल्विधौ इति सूत्रास्य अर्थद्वयं भवति स्थानिवत् आदेशः । आदेशः स्थानिवत् स्यात् इति सूत्रार्थः । अल्विधौ आदेशः स्थानिवत् न ।

अल्विधिः इति समस्तपदस्य नैके विग्रहाः सम्भवन्ति । तद् –

१. अला विधिः-अल्विधिः

[1] अ. सू.सं. ८.४.४७

[2] अ. सू.सं. ५.१.११५

२. अलः (परस्य) विधिः-अल्विधिः

३. अलः(स्थाने) विधिः-अल्विधिः

४. अलि (परे) विधिः- अल्विधिः

अला विधौ स्थानिवद्भावः न अलः परस्य न अलः स्थाने न अलि परे न । तत्र-

१. अला विधिः-

यदि स्थान्यल्-द्वारा तेन व्यवधाने च कश्चन विधिः कर्तव्यः तर्हि आदेशः स्थानिवत् न भवति । यथा- व्यूढोरस्केन । व्यूढम् उरो यस्य स व्यूढोरस्कः तेन व्यूढोरस्केन ।अत्र विसर्गस्य स्थाने **'सोऽपदादौ'**[1] इति सूत्रेण सकारः कृतः वर्तते । वार्तिककार- भाष्यकारैः विसर्गः अट्प्रत्याहारे स्वीकृतः ।यदि अयं सकारः स्थानिवद्भावाद् विसर्गरूपेण स्वीक्रियेत तर्हि विसर्गस्य अट्-प्रत्याहारास्थत्त्वात् **'अट्कुप्वाङ्नुम्व्यवायेऽपि'**[2] इति सूत्रेण नकार-स्थाने णकारः स्यात् यद् अनिष्टं वर्तते । अतः अट्कुप्वाङ् इति विधिःअलाविधिरल्विधिः इत्यस्य उदाहरणम् । तद् विधौ आदेशः न स्थानिवत् इत्युक्तत्वात् णत्वं न भवति ।

२.अलः(परस्य)विधिः-

यदि अलः परस्य स्थाने कश्चन विधिः करणीयः अस्ति तर्हि आदेशः स्थानिवत् न भवति । यथा-द्यौः । अत्र दिव् इति प्रातिपदिकात् सुप्रत्यये **'दिव औत्'**[3] इति सूत्रेण 'व' कार स्थाने 'औ' कारे दि औ स् इति जाते, यणादेशे रुत्वे विसर्गे च द्यौः इति रूपं भवति । अत्र वकारस्थानिकस्य औकारस्य स्थानिवद्भावेन हल्त्वात् **'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्'**[4] इति सूत्रेण सकार-लोपः प्राप्तः अस्ति यः अभीष्टः न वर्तते । अतः अलः परस्य विधौ हल्ङ्याब्भ्यः इति विधौ आदेशः औकारः स्थानिवत् वकारवत् न इति निषेधात् न सुलोपप्रसङ्गः ।

३. अलः(स्थाने) विधिः-

यदि अलः स्थाने कश्चन विधिः करणीयः अस्ति तर्हि आदेशः स्थानिवत् न भवति यथा-

द्युकामः । दिवं कामयते इत्यर्थे दिव्+काम इत्यत्र **'दिव उत् '**[5] इति सूत्रेण वकारस्थाने उकारादेशे इको यणचि इत्यनेन

[1] अ. सू. सं. ८.३.३८

[2] अ. सू. सं. ८.४.२

[3] अ. सू. सं. ७.१.८४

[4] अ. सू. सं. ६.१.६८

[5] अ. सू. सं. ६.१.१३१


ISSN: 2320-740X

यणादेशे द्युकामः इति भवति ।

अस्याम् अवस्थायां वकारस्य स्थाने उकारे , तस्य स्थानिवद्भावे वल्-प्रत्याहारान्तर्गतत्वेन तस्मिन्परे **'लोपो व्योर्वलि'**[1] इति सूत्रेण वकारलोपः प्राप्नोति स च नेष्टः । अतः 'उ' इत्यादेशः स्थाविवत् न भवति ।

४. अलि(परे) विधिः-

यदि अलि परे कश्चन विधिः कर्तव्यः तर्हि आदेशः स्थानिवत् न भवति यथा- क इष्टः। किम् इति प्रातिपदिकात् सुप्रत्यये किमः कः इत्यनेन क-आदेशे क+स् इति जाते **'ससजुषोरुः'**[2]इति सूत्रेण रुत्वे क+र् इति जाते क्तान्तयज्धातुना योगे वाक्यसंस्कारपक्षे, यज् धातोः क्तप्रत्यये अनुबन्धलोपे क+र् यज्+त इति जाते य **'वचिस्वपियजादीनां किति'**[3] इत्यनेन तप्रत्यये परे सम्प्रसारणे इ+अज् इति जाते **'सम्प्रसारणाच्च'**[4] इति पूर्वरूपे इज्+त इति जाते **'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः'**[5] इति सूत्रेण षत्वे इष्+त इति जाते **'ष्टुना ष्टुः'**[6]इति सूत्रेण ष्टुत्वे इष्+ट इति जाते सौ रुत्वे विसर्गे इष्टः इति रूपम् । कस्+इष्टः इत्यत्र **'ससजुषोरुः'** इति रुत्वे कर्+इष्ट इति जाते **'भोभगोअघोअपूर्वस्य योऽशि'**[7] इत्यनेन यत्वे कय्+इष्टः इत्यत्र **'लोपः शाकल्यस्य'**[8] इति सूत्रेण यकारस्य लोपे च क+इष्टः इति सिध्यति । अधुना अत्र यकारस्य स्थानिवद्भवेन रेफस्य हश्-प्रत्याहारान्तर्गतत्वेन **'हशि च'**[9] इति सूत्रेण रेफस्थाने उत्त्वं प्राप्येत, ततश्च आद् गुणः इति सूत्रेण गुणे को+इष्टः इति जाते **'एचोऽयवायावः'**[10] इति सूत्रेण अवादेशे लोपः शाकल्यस्य इति वकार लोपे क+इष्टः इति रूपं सिध्यत्येव । तथाऽपि पक्षे कविष्टः इति अनिष्टं रूपं प्राप्नोति ।

सिद्धान्ते लोपाभावपक्षे कयिष्टः इति यकारघटितरूम् इष्टम् । तन्न सिध्येत् । अतः अलि विधौ स्थानिवद्भावस्य निषेधः उक्तः। तथा च अलि विधौ यत्वविधौ यकारस्थानिकस्य इकारस्य स्थानिवद्भावाभावेन हश्त्वाभावेन **'हशि च'** इति उत्वस्य न प्रसक्तिः । उत्वाभावे गुणाभावेन न अवादेशस्य प्रसक्तिः । एवं च कविष्टः इति रूपं न भवति । इदमेव अलि विधौ स्थानिवद्भावाभावस्य फलम् इति चतुर्षु स्थलेषु स्थानिवद्भावनिषेधस्य फलं वर्तते । तदेवं फलं बालमनोरमायाम्

[1] अ. सू. सं. ६.१.६६

[2] अ. सू. सं. ८.२.६६

[3] अ. सू. सं. ६.१.१५

[4] अ. सू. सं. ६.१.१०८

[5] अ. सू. सं. ८.२.३६

[6] अ. सू. सं. ८.४.४१

[7] अ. सू. सं. ८.३.१७

[8] अ. सू. सं.८.३.१९

[9] अ. सू. सं. ६.१.११४

[10] अ. सू. सं. ६.१.७८

उपापादितम् अला विधौ व्यूढोरस्केन इति, अलः परस्य विधौ द्यौरिति , अलः स्थाने विधौ द्युकामः, अलि विधौ क इष्टः इति ।

स्थानि - स्थान्यवयव - अल्वृत्तिधर्म - घटितविधौ न स्थानिवत् इति निषेधांशवाक्यार्थः दर्शितः । स्थान्यलाश्रयविधौ इत्यत्र स्थानिसम्बन्धित्वाभावे रामाय इत्यत्र आदेशगतयकाररूप – अलाश्रये विधौ सुपि च इति दीर्घविधौ अपि निषेधे रामाय इत्यस्य असिद्धिः दर्शिता ।

नीञ्धातोर्ण्वुलि अकादेशे वृद्धौ 'नै अक' इति स्थिते, ऐकारस्य स्थानिवद्भावेन ईकारधर्मकत्वादायादेशो न स्यात् । इह हि स्थानिप्रयुक्तं यत् कार्यं शास्त्रीयं तदेवातिदिश्यते , ईकारस्य च आयादेशाभावो न शास्त्रविहित इति न तस्य ईकारस्थानिके ऐकारे अतिदेशः ।

प्रकृतोदाहरणे ईकारस्थानिकस्य यकारस्य स्थानिवद्भावेन अच्त्वमाश्रित्य अर्थात् अच्कार्यकारित्वमाश्रित्य अनचि च इति द्वित्वनिषेधः न भवति । कुत इति चेत् अलि विधौ स्थानिवद्भावनिषेधात् । एवं च द्वित्वनिषेधाभावे यकारस्य द्वित्वे यद्वयघटितरूपसिद्धिरिति एते विषयाःबालमनोरमायां विचारिताः ।

**शरद्रात्रिः**

शरद्रात्रिव्याख्याने बालमनोरमोक्तानि उदाहरणानि नोक्तानि चेदपि चतुर्धा अर्थप्रदर्शनम् अनल्विधौ इत्यस्य कृतम् । स्थान्यलाश्रये विधौ, स्थान्यवयव - अल्मात्रवृत्तिधर्मनिमित्तके लोपात्मके विध्यात्मके च विधौ निषेधः इति यावत् । अल्मात्रवृत्तिधर्मपुरस्कारकत्वं विधेः करणत्वादिना बोध्यम् इति, तेन अल्मात्रवृत्तिधर्मकरणकविधौ, अल्मात्रवृत्ति-धर्मपरकविधौ, अल्मात्रवृत्तिधर्मस्थानिकविधौ, अल्मात्रवृत्तिधर्मनिमित्तकविधौ च स्थानिवद्भावाभावः फलम् उपदर्शितम् । सुध्युपास्यः इत्यत्र च स्थानिभूतः यः अल् इकारः तद्वृत्तिः यः धर्मः अच्त्वं तन्निमित्तकः यः विधिः अनचि च इति द्वित्वनिषेधविधिः तद्विधौ स्थानिवद्भावस्य अभावेन द्वित्वसिद्धिः उपदर्शिता । अनल्विधावित्यत्र नञः भाष्याद्युपदर्शितप्रसज्यप्रतिषेधपरता अत्रापि व्याख्याता ।

**समीक्षा-**

चतुर्षु स्थलेषु उभयत्रापि स्थानिवद्भावनिषेधः उक्तः । बालमनोरमायाम् उदाहरणान्यपि प्रदर्शितानि इति विशेषः । स्थान्यलाश्रये विधौ, स्थान्यवयवालाश्रये च विधौ स्थानिवद्भावो न इति द्वेधा व्याख्यानम् उभयत्र च कृतम् । अल्मात्रवृतिधर्मपुरस्कारकत्वं विधेः करणत्वादिना बोध्यम् इति अलाविधौ इत्यत्र तृतीयया साधितम् अट्कुप्वाङिति विधिरपि अल्करणकविधिः अट्कुप्वाङ्नुम् इत्यत्र लुप्ततृतीयानिर्देशः इत्युक्तत्वात् ।

**********

 ISSN: 2320-740X

# एकाचो बशो भष् इत्यत्र झलीत्यस्य अनुवृत्तौ मतभेदः

शशाङ्क ति. भट्टः

**शोधच्छात्रः, व्याकरणविभागः**

'एकाचो बशो भष् झषन्तस्य स्ध्वोः' (८.२.३७) इति भष्भावविधायकं सूत्रम् । एकाचः इत्यवयवषष्ठी । एकः अच् यस्य इति विग्रहः । बशः इति स्थानषष्ठी । 'दादेर्धातोर्घः' (८.२.३२) इत्यस्मात् धातोरिति अवयवषष्ठ्यन्तमनुवर्तते । 'पदस्य' (८.१.१६) इत्यधिकृतम् । 'स्कोः संयोगाद्योरन्ते च' (८.२.२९) इत्यस्मात् अन्ते च इत्यनुवर्तते । धातोरिति एकाचः इत्यनेन वैयधिकरण्येनान्वयः । तथा च धातोरवयवः यः एकाच् झषन्तः तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे पदान्ते च इति सूत्रार्थः सिद्ध्यति । धुगित्याद्युदाहरणानि ।

अत्र प्रक्रियाकौमुदीकारः 'सूत्रेऽस्मिन् 'झलो झलि' (८.२.२६) इत्यस्मात् झलीत्यनुवर्त्य धातोरवयवः यः एकाच् तस्य झषन्तस्य बशः स्थाने भश् स्यात् सकारे ध्वशब्दे च परे । प्रातिपदिकसंज्ञस्य तु झलि पदान्ते च इति सूत्रार्थः इति सूत्रार्थमाह ।[1] प्रक्रियाकौमुद्याः व्याख्यात्रा प्रसादकारेण प्रक्रियाकौमुदीकारस्य आशयः इत्थं वर्णितः - प्रातिपदिकसंज्ञकस्य प्रातिपदिकसंज्ञकस्य तु झलि पदान्ते च , धातोस्तु पदान्ते परे एव बशः स्थाने भष्भावः इत्यर्थः इति ।[2]

दीक्षितैः एवमुच्यते सूत्रेऽस्मिन् झलीति निवृत्तम् । यद्यत्र झलीति अनुवर्तेत तर्हि सकारधकारयोः झल्षु एव अन्तर्भावात् सूत्रे स्ध्वोर्ग्रहणमनर्थकं स्यात् । अतः स्ध्वोर्ग्रहणसामर्थ्यात् झलीति इह नानुवर्तते । अतः धातोरवयवः यः एकाच् झषन्तः तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे पदान्ते च इत्येव सूत्रार्थः इति ।[3]

इह सूत्रे झलीत्यनुवर्त्य धातोरवयवः यः एकाच् तस्य झषन्तस्य बशः स्थाने भश् स्यात्  झलि सकारे ध्वशब्दे च परे इत्यर्थस्वीकारे दुग्धमित्यादौ दुह्धातोः क्तप्रत्यये, 'दादेर्धातोर्घः' इति घत्वे कृते तकारस्य झल्त्वात् भष्भावः स्यात् इति दोषं मनसि निधाय धातोरवयवः यः एकाच् तस्य झषन्तस्य बशः स्थाने भश् स्यात् सकारे ध्वशब्दे च परे । प्रातिपदिकसंज्ञस्य तु झलि पदान्ते च इति सूत्रार्थः उक्तः प्रक्रियाकौमुदीकृता । तदा तु दुह् इत्यस्य प्रातिपदिकत्वाभावात् भष्भावो न भवतीति तस्य आशयः । परमुक्तार्थस्वीकारे अधोग् इत्यत्र दुह्धातोः लङि, अडागमे, तिपि, शपि, अदादित्वात् तस्य लुकि, लघूपधगुणे, हस्य 'दादेर्धातोर्घः' इति घत्वे अदोघ् त् इत्यवस्थायाम् अदोघ् इत्यस्य प्रातिपदिकत्वाभावात्

[1].प्र.कौ भागः १ पृ.सं २०८

[2].प्र.कौ -१ प्रसा.व्या पृ.सं २०८

[3].सि.कौ – १ पृ.सं ३४२

भष्भावो न स्यात् । ननु झलीत्यस्य अननुवृत्तौ दुग्भ्यामित्यादौ दुह् भ्याम् इति स्थिते हस्य घत्वे भष्भावो न स्यात् खलु इति चेत् दुघ् भ्याम् इत्यवस्थायां 'स्वादिष्वसर्वनामस्थाने' (१.४.१७) इति पदसंज्ञायां तस्य पदान्तत्वादेव भष्भावः सिद्ध्यतीत्यतः तदर्थं झलीति अनुवर्त्त्य, प्रातिपदिकसंज्ञकस्य तु झलि पदान्ते च इत्यर्थकरणं च व्यर्थमेव ।

'एकाचो बशो भश्' - इति सूत्रे 'ह्रस्वादङ्गात्' (२.४.२७) इत्यतः अङ्गादित्यनुवर्तते । अङ्गं च द्विप्रकारकं धातुरूपं प्रातिपदिकरूपं च इत्याशयेन प्रसादकारः तत्र प्रातिपदिकसंज्ञकस्य तु झलि पदान्ते च, धातोस्तु पदान्ते परे एव बशः स्थाने भष्भावः इत्येवं प्रक्रियाकौमुदीकारस्य अभिप्रायम् आविश्चकार । यद्यपि एतदर्थस्वीकारे अधोग्, दुग्भ्यामित्यादौ भष्भावः सिद्ध्यति । तथापि स्वरितत्वकल्पनया अङ्गादित्यनुवर्त्य उक्तव्याख्याने मानाभावः । अपि च अनुवृत्तस्य 'अङ्गात्' इति पञ्चम्यन्तस्य अङ्गस्य इति षष्ठ्यन्ततया विभक्तिविपरिणामः कर्तव्यः । तत्र विभक्तिविपरिणामेऽपि प्रमाणाभावः । किं च उक्तार्थस्वीकारे तद्बाट् इत्यत्र प्रथमैकवचने तद्बाह् सु इत्यवस्थायां हल्ङ्यादिना सुलोपे पदान्तत्वात् भष्भावः स्यात् । तद्बाड्भ्याम् इत्यत्र भ्यामः भकारस्य झल्त्वात् दकारस्य भष्भावप्रसङ्गः । सिद्धान्तपक्षे तु झल्ग्रहणाननुवृत्या अङ्गादित्यस्य अननुवृत्तेश्च धातोरवयः यः एकाच् इत्येवार्थाश्रयणेन तद्बाट् इत्यत्र दकारस्य धातोरवयवत्वाभावात् , तद्बाड्भ्यामित्यत्र भकारस्य सकारध्वशब्दत्वाभावात् भाष्भावो न भवति । तस्मात् झलित्यस्य अनुवृत्तौ झलि परे एव अस्य प्रवृत्तिरित्यतः सकारध्वशब्दयोरपि झल्षु एव अन्तर्भाविन सूत्रे स्ध्वोर्ग्रहणवैयर्थ्यात् झलित्यस्य अननुवृत्तिरेव उचिता इति दीक्षितोक्तं युक्तमेव । मनोरमाशब्दरत्नयोः स्फुटमिदम् ।

**परामृष्टाः ग्रन्थाः**


- प्रक्रियाकौमुदी
- सिद्धान्तकौमुदी
- प्रौढमनोरमा
- शब्दरत्नम्


**********

# श्रीमद्भगवद्गीतायां कर्मयोगे प्रतिपादितसामाजिकचिन्तनम्


प्रियाङ्काचन्द्र

**शोधच्छात्रा, शिक्षाशास्त्रविभागः**


"शिक्षासमाजशास्त्रं शिक्षा-समाजयोर्मध्ये सम्बन्धं चिन्तयति" ।

 ISSN: 2320-740X

(“Sociology of education is concerned with the relationship between education and society” - Hempsen)

“शिक्षासमाजशास्त्रस्य रुचिः सम्पूर्णसामाजिकशिक्षाव्यवस्थायाः अध्ययने भवति” ।

(“The sociology of education is interested in the study of the educational system in relation to the social system” – B. V. Shah)

शिक्षासमाजशास्त्रस्य क्षेत्रं बहुविस्तृतमस्ति । सामाजिकसांस्कृतिकपरिस्थितिषु समाजस्य यः कोऽपि प्रभावः शिक्षायां दृश्यते अथवा समाजे शिक्षायाः यः कोऽपि प्रभावः भवति त्रिषु एव कालेषु (भूत-वर्तमान-भविष्येषु), तत् सर्वं शिक्षासमाजशास्त्रस्य विषयः भवति ।

अस्मिन् प्रसङ्गे भगवद्गीतायां कर्मयोगनामके तृतीयेऽध्याये प्रतिपादितस्य सामाजिकचिन्तनस्यैव विषयाः प्रतिपाद्यन्ते ।

**भगवद्गीतायाः सामान्यपरिचयः–**

वेदान्ताध्ययने प्रस्थानत्रयं प्रसिद्धमस्ति । यथा –

१) उपनिषदः २) ब्रह्मसूत्राणि ३) श्रीमद्भगवद्गीता ।

तत्र भगवद्गीता महाभारते भीष्मपर्वणि २५ अध्यायतः ४२ अध्यायपर्यन्तम् अर्जुनम् उद्दिश्य भगवता श्रीकृष्णेन उपदिष्टः अष्टादशाध्यायात्मकः ग्रन्थः । महाभारतस्य नवनीतरूपेण अस्य ग्रन्थस्य प्रसिद्धिः विद्यमाना वर्तते।

ग्रन्थेऽस्मिन् अष्टादशाध्यायाः विद्यन्ते । पञ्चचत्वारिंशत्अधिकसप्तशतश्लोकाः (745) सन्ति ।

षटशतानि सविंशतिश्लोकानां प्राह केशवः । अर्जुनः सप्तपञ्चाशत् सप्तषष्टिञ्च सञ्जयः ।
धृतराष्ट्रश्लोकमेकं गीतायाः मानमुच्यते ।

इत्यनेन ज्ञायते यत् श्रीकृष्णेन विंशत्याधिकषड्शतश्लोकाः (620) प्रोक्ताः, अर्जुनेन सप्तपञ्चाशत् (57) श्लोकाः प्रोक्ताः, सञ्जयेन प्रोक्ताः सप्तषष्ठिश्लोकाः (67) एवं धृतराष्ट्रेण एकः श्लोकः प्रोक्तः ।

वर्तमाने भगवद्गीतायां सप्तशतश्लोकाः (700) उपलभ्यन्ते । तत्र धृतराष्ट्रेण एकः(1), सञ्जयेन एकचत्वारिंशत् (41), अर्जुनेन चतुरशीतिः (84), श्रीकृष्णेन चतुःसप्तत्यधिकपञ्चशतश्लोकाः (574) प्रोक्ताः ।

भगवद्गीतायां तृतीये अध्याये प्रतिस्थापितानि सामाजिकचिन्तनानि अद्यतने काले समाजम् उपकुर्वन्ति न वा अथवा कथम् उपकुर्वन्ति, अथवा कीदृशः सामाजिकविषयः निरूपितोऽस्ति तस्मिन् विषये अत्र पर्यालोचना क्रियते ।

भगवद्गीतायाः तृतीये अध्याये सज्जन-दुर्जनभेदज्ञानम्, आदर्शपुरुषः, परस्परनिर्भरशीलतादिविषयाः विमृष्टाः सन्ति । अधः तेषाम् उपस्थापनं भवति ।

**सज्जनदुर्जनयोर्भेदज्ञानम्–**

सामान्यतः समाजे सज्जन-दुर्जनभेदे द्विप्रकारकाः जनाः विद्यन्ते। भगवद्गीतायां कः गुणभूयिष्ठः को व दोषसिक्तः इत्यस्योपरि तृतीये अध्याये आलोकपातः कृतः वर्तते । इदानीन्तनकाले मनुष्याः सर्वे विषयासक्ताः वर्तन्ते । इष्टविषयाणां प्राप्तिः सामान्यतया मानवैः अभिकाङ्क्ष्यते । परन्तु सर्वदा इष्टविषयाणां प्राप्तिः न भवति । तदा मानवाः दुःखम् अनुभवन्ति । पौनःपुन्येन इष्टविषयाणां अप्राप्तौ सत्यां ते मनसि खिद्यन्ति । इत्थम् दुःखसन्तप्ताः सन्तः मानवाः जगतीतले भ्राम्यन्ति । अर्थात् ते मानसिकरूपेण अस्वस्थाः भवन्ति । तस्मात् अन्यैः सह अशुद्धाचरणं कुर्वन्ति । तथापि ते विषयासक्तिं न त्यजन्ति । यदा मानवः अशुद्धाचरणं दुर्व्यवहारं वा करोति तदा सः मानवः तस्य क्रूरव्यवहारकारणात् समाजे दुष्टव्यक्तिरूपेण परिचयं प्राप्नोति । अन्ततो गत्वा सः मानवः न तु स्वयं सुखी भवति न तु अन्यान् सुखीकरोति । अस्मिन् सन्दर्भे श्रीकृष्णः निगदति –

**कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् । इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥**

**यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन । कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥**

**(श्रीमद्भगवद्गीता – ३- ६,७)**

अर्थात् यः पुरुषः बहिरिन्द्रियाणि (वाक्-पाणि-पाद-पायु-उपस्थान्) निरुध्य चित्तेन इन्द्रियार्थान् विषयान् चिन्तयति सः पुरुषः कपटपुरुषः अथवा मूढपुरुषः नाम्ना ज्ञायते । एवञ्च यः इन्द्रियाणि मनसा वशीकृत्य कर्मेन्द्रियैः कर्माचरणं करोति सः साधुपुरुषः उत्तमपुरुषः श्रेष्ठपुरुषरूपेण वा परिचिनोतीति भगवता प्रकटितः । अतः भगवत्प्रीतयैव निष्कामभावनया स्वकार्यं सम्पादनीयम् ।

पुनः यः उपकारिणः उपकारं नाङ्गीकरोति अथवा कार्तज्ञ्यं न प्रकटयति सः दुष्टः असाधुपुरुषः । तथैव यः सर्वदा स्वार्थचिन्तनमेव करोति सोऽपि दुष्टः असाधुः एव परिगणितो भवति । अस्य वर्णनम् एवं कृतं वर्तते –

**इष्टान्भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः । तैर्दत्तानप्रदायैभ्यो यो भुङ्कते स्तेन एव सः ॥**

**यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः । भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥**

**(भगवद्गीता – ३- १२,१३)**

वस्तुतः अस्माकं समाजे अधिकांशमानवाः कार्यारम्भात् प्राक् तेन कार्येण प्राप्यमाणलाभादीनां विषये चिन्तयन्ति । यदि आकाङ्क्षानुरूपं लाभाः तेभ्यो नोपलभ्यन्ते तर्हि ते मनसि खेदमनुभवन्ति । तस्मिन् सन्दर्भे अन्यः कश्चन आशानुरूपो लाभान्वितः भवति चेत् एकस्य मनसि अपरस्य विषये काचित् हिंसाभावना जागर्ति । मनसि विद्यमानभावस्य व्यवहारेण बहिः प्रकटनं भवति । मनसि खिद्यमानः सन् मानवः वस्तुतः स्वस्यैव हानिं करोति ।यः आत्मविषये चिन्तयति सः एव दुःखमनुभवति । तेन सः स्वयमपि सुखेन न तिष्ठति, अन्यान् अपि सुखीकर्तुम् असमर्थो भवति ।

अतः कार्यारम्भात् प्राक् मनसि कामना न स्थापनीया । कामनां वासनां च परित्यज्य भगवत्प्रीतये एव स्वकार्यं सम्पादनीयम् । तदा मनुष्यः बन्धने न बध्नाति । सामान्यतया यदा कृतकार्यस्य लाभहान्यादिविषये मनसि चिन्तां न


ISSN: 2320-740X

करोति मनः यदा शान्तः, स्थिरः भवति मनुष्यः तदा स्व-लक्ष्यमपि सुष्ठु प्राप्नोति । तदा मानसिकशान्तिमनुभवति मानवः । तस्य व्यवहारे मानसिकशान्तेः लक्षणं परिलक्षितं भवति । इत्थं सुन्दरेण व्यवहारेण समाजे सः प्रतिष्ठां प्राप्नोति ।

**आदर्शः पुरुषः**

समाजे विद्यमानानां जनानां सर्वेषां कश्चन् आदर्शः पुरुषः भवति । यः आदर्शपुरुषः, सः कथं व्यवहरति आचरति वा किं किं करोति तत् सर्वं अन्यैः परिलक्ष्यते । कीदृशः पुरुषः आदर्शपुरुषः तस्मिन् विषये भगवद्गीतायां विवरणं दृश्यते । जनकादि राजानः कर्माचरणेनैव सद्गतिम् आस्थिताः । अतः लोकहिताय कार्यं करणीयम् । श्रेष्ठः पुरुषः यथा आचरति सामान्यजनाः तथैव अनुसरन्ति । प्रपञ्चेऽस्मिन् आदर्शः भवितुं सर्वे नार्हन्ति । युक्तायुक्तविचक्षणत्वात् कश्चन एकः एव आदर्शपुरुषः भवितुमर्हति । तदानीं सः यत् यत् आचरति, यत् यत् प्रमाणं करोति तत् तत् सामान्यजनाः प्रमाणत्वेन अङ्गीकुर्वन्ति । अतः स्वकल्याणाय जनहिताय च स्वकर्मणि रतौ भाव्यम् । यदि श्रीकृष्णः परमात्मा भूत्वापि स्वकल्याणाय लोकहिताय च स्वकर्तव्यकर्माचरति तर्हि वयं मनुष्याः भूत्वा किमर्थं न ? समाजे आदर्शः भवितुम् आदर्शाचरणम् आदौ स्वयं कृत्वा अनन्तरं लोकान् उपदिशेम । अत्र श्रीकृष्णः अपि आदौ स्वयम् आचरति अनन्तरम् अन्यान् उपदिशति ।

**कर्मणैव हि संसिद्धिमास्थिता जनकादयः । लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ॥**

**यद्यदाचरतिश्रेष्ठस्तदेवेतरोजनः। सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते॥**

**नमेपार्थास्तिकर्तव्यंत्रिषु लोकेषु किञ्चन। नानवाप्तमवाप्तव्यंवर्तएवचकर्मणि॥**

**(श्रीमद्भगवद्गीता–३- २०,२१,२२)**

**परस्परनिर्भरशीलता–**

अस्मिन् जगति सर्वे प्राणिनः परस्परं निर्भरशीलाः भवन्ति । तत्रापि प्राणिनः आदौ प्रकृत्याश्रिताः । वयं प्रकृत्याः वायुं जलं प्रकाशादि स्वीकुर्मः । अतः एतेषां सामञ्जस्यमपि अस्माभिरेव संरक्षणीयम् । शुद्धवायुः शुद्धं जलञ्च न भवति चेत् जीवाः मरणं प्राप्नुवन्ति । यावत् प्रकृत्याः अस्माभिः स्वीक्रियते तावत् प्रकृत्यै न प्रत्यर्प्यते चेत् सामञ्जस्यं विदधातुं क्लेशः भवति । अतः वृक्षच्छेदनं न करणीयम्, जले कलुषितपदार्थाः न क्षेपणीयाः, कृषिकार्ये अधिकाधिकानां रासायनिकानां पदार्थानाम् उपयोगः न करणीयः। इदानीमपि अस्माकं देशस्य बहुषु स्थलेषु अनावृष्टेः प्रभावो दृश्यते ।

भगवद्गीतायां श्रीकृष्णेन परस्परनिर्भरशीलतायाः विषयः इत्थं प्रतिपादितः–

**देवान्भावायतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥**

**अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः । यज्ञाद्भवति पर्जन्यः यज्ञः कर्मसमुद्भवः ॥**

**(श्रीमद्भगवद्गीता – ३- ११,१४)**

यज्ञे हविषा देवाः सन्तुष्टाः भवन्ति । तस्मात् ते अस्मान् आशिषः प्रयच्छन्ति । एवं परस्परं वर्धयन्तः उत्तमं हितं

ISSN: 2320-740X

साधयन्ति । समाजेऽपि एवं परस्परं सम्भूय मनुष्याः उत्तमसमाजं निर्मातुम् अर्हन्ति ।

अद्यतनसमाजः भ्रष्टाचारैः परिपूर्णः । समाज-विद्यालयोर्मध्ये घनिष्ठः सम्बन्धोऽस्ति । यथा सामाजिकप्रभावः विद्यालये आपतति तथैव विद्यालयस्य प्रभावोऽपि समाजे परिलक्ष्यते । समाजः यथा परिवर्तितो भवति विद्यालयस्य पठन-पाठनशैली पाठ्यचर्यादि अपि परिवर्तितो भवति । विद्यालये छात्राः शिक्षकेभ्यः यथा शिक्षाम् अधिगच्छन्ति तथैव ते गृहे परिवारे समाजे च आचरन्ति । अतः बाल्यकालादेव देशस्य प्रत्येकस्मिन् विद्यालये भगवद्गीतायाः पाठनं सामाजिक-राष्ट्रिय-मनोवैज्ञानिकदृष्ट्या मातृभाषया व्याख्या छात्राणां स्तरानुगुणम् अध्यापकैः छात्रेभ्यः प्रस्तोतव्यम् । तेन बाल्यकालादेव छात्राणां मनसि सामाजिक-नैतिक-संस्कारादीनां ज्ञानं भवति । छात्राः सुशिक्षिताः भवन्ति चेत् समाजे दुर्नीतयः अपगच्छन्ति । तेन उत्तमराष्ट्रनिर्माणम् भविष्यति ।

**सन्दर्भग्रन्थाः -**


- श्रीमद्भगवद्गीता में वैज्ञानिक चिन्तन
- श्रीमद्भगवद्गीता व्याख्यानम्
- गीताप्रवेशः (संस्कृतभारती)
- विविधशोधपत्राणि


**********

# विधित्रैविध्यम्


प्रशान्तगाँव्करः

**शोधच्छात्रः, मीमांसाविभागः**


धर्मविचाराय प्रवृत्ते मीमांसाशास्त्रे धर्मस्य वेद एव परमं प्रमाणम् । तत्र अपौरुषेयस्य वेदस्य पञ्चधा विभागः मीमांसकैः प्रकल्पितः । तद्यथा "वेदः विधिमन्त्रनामधेयनिषेधार्थवादात्मकः" इति । तत्राद्यः अज्ञातार्थज्ञापकः वेदभागः विधिः ।

स च विधिः यादृशं प्रमाणान्तरेणाप्राप्तं तादृशप्रयोजनवदर्थविधानेनार्थवान् । यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति विधिः मानान्तरेणाप्राप्तं स्वर्गरूपप्रयोजनवद्धोमं विधत्ते । यत्र च प्रमाणान्तरेण प्राप्तं तत्र प्रमाणान्तरप्राप्तकर्मोद्देशेन गुणमात्रं विधत्ते । यथा – 'दध्ना जुहोति' इति विधिः 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यनेन होमस्य प्राप्तत्वात् तदग्निहोत्रहोमोद्देशेन दधिरूपगुणमात्रं विधत्ते । यत्र तु कर्मगुणद्वयमपि अप्राप्तं तत्र विशिष्टं विधत्ते ।


ISSN: 2320-740X

यथा – 'सोमेन यजेत' इत्यत्र प्रमाणान्तरेण सोमरूपगुणस्य यागस्य च अप्राप्तत्वात् मत्वर्थलक्षणामङ्गीकृत्य 'सोमवता यागेन इष्टं भावयेत्' इति सोमविशिष्टयागविधानं क्रियते ।

स च विधिः त्रिविधः परिसङ्ख्याविधिः नियमविधिः अपूर्वविधिश्चेति । तत्र शब्दतः फलतो वा यस्य शास्त्रस्य अन्यनिवृत्तिर्विषयः सः परिसङ्ख्याविधिः । तत्र शब्दतः अन्यनिवृत्तिर्यथा 'नानृतं वदेत्' इत्यत्र नञ् पदेनैव निवृत्तिः बोध्यते। फलतः निवृत्तिर्यथा – 'इत्यश्वाभिधानीमाधत्ते' इत्यत्र तु गर्दभरशनायामपि लिङ्गप्राप्तस्य मन्त्रस्य ततः निवृत्तिर्विधीयते ।

अथ यस्य शब्दतः फलतः वा पाक्षिकायोगव्यावृत्तिरूपो नियमः शास्त्रविषयः सः नियमविधिः । अर्थात् नियमविधिना शब्दतः फलतः वा कादाचित्कप्राप्त्यभावस्य व्यवच्छेदः क्रियते इति । यथा 'सत्यमेव वदेत्' इत्यत्र कादाचित्कप्राप्त्यभावस्य व्यावृत्त्यर्थकेन एवकारेण नियमस्यैव विधेयत्वम् । 'व्रीहीनवहन्ती'त्यादौ व्रीहीणां तुषविमोकाकाङ्क्षायां तत्साधनत्वेन नखविदलनादेः कल्पनात् पूर्वप्रवृत्तेरपि अवघातस्य नियमप्रापकत्वेन स्वीकारात् न वैयर्थ्यं शङ्कनीयम् ।

अत्र च कादाचित्कप्राप्त्यभावः तन्मात्रविध्यप्रवृत्तिनिमित्तकः विध्यन्तराप्रवृत्तिसहितैतद्विधि-प्रवृत्तिनिमित्तकश्चेति बोध्यः । यथा 'व्रीहीनवहन्ती'त्यादौ विधिमात्रप्रवृत्तौ आक्षेपेण नखविदलनादेः प्रसक्तौ अवघाताभावप्रसक्त्या तद्व्यवच्छेदनाय नियमविधिः ।'व्रीहिभिर्यजेत' इत्यादौ 'यवैर्यजेत' इति यवविध्यभावसहितव्रीहिविध्यभावे व्रीहीणां यागविध्याक्षिप्तानां पक्षप्राप्त्या तत्र अभावस्य व्यावृत्तिः सम्भवति ।

तथा च नियमपरिसङ्ख्यातिरिक्तफलकः विधिः अपूर्वविधिः । यथा 'व्रीहीन् प्रोक्षती'ति । अत्र प्रोक्षणादिप्राप्तिरेव फलम् ।

**********

# अष्टमङ्गलप्रश्नपूजा

हेमन्तः पि. के.

**शोधच्छात्रः, ज्योतिषविभागः**

मानुषविषये देवविषये पुनरितरविषयेऽपि त्रैकालिकाखिलफलनिरूपणमार्ग एव अष्टमङ्गलप्रश्नः ।

कुत्रचित् समतले प्रदेशे अष्टमङ्गल-दीप-शुद्धतण्डुलप्रस्थादिभिः अलङ्कृते, गोमयवारिणा प्रोक्षिते भूतले राशिचक्रस्य लेखनं करणीयम् ।

तस्मिन् स्थाने पृच्छकः भस्मना वा तण्डुलचूर्णेन वा हस्तप्रमाणं चतुरश्रं राशिचक्रस्य विलेखनं कुर्यात् । चतुर्विंशत्यङ्गुलप्रमाणं राशिचक्रं षडङ्गुलवत् षोडशधा विभज्य मध्यस्थेषु चतुर्षु खण्डेषु चतुर्दलपद्मं विलिख्य, परितः विद्यमानान् द्वादशखण्डान् मेषादीन् राशीनिति सङ्कल्पयति ।

दैवज्ञः पूजको वा आत्मपूजां गणेशपूजां च कृत्वा चक्रमध्यस्थिते चतुर्दलपद्मे पीठपूजानन्तरं कैलासाद्रेः ईशकोणे स्फटिकमण्डपे उपविशन्तम्, ऋषिगणेभ्यः ज्ञानोपदेशकर्तारं महादेवम् आवाह्य, मूर्त्तिपूजां कृत्वा सपरिवारान् द्वादशराशीन् निजाधिष्ठितराशिषु संस्थाप्य ततः सगुलिकनवग्रहाश्च पूज्याः । निवेद्यानन्तरं प्रसन्नपूजायाम् अष्टोत्तरशतं पञ्चाक्षर्यार्च्चनादिकं च कृत्वा ब्रह्मार्पणान्ते पुष्पैः वाग्देवीं (सरस्वतीं), गुरुं च अष्टमङ्गले श्रीभगवतीं दीपे च आराध्य वन्देमहि ।

अनन्तरं सुवर्णं प्रक्षाल्य पत्रे विन्यस्य, गन्ध-पुष्प-अक्षतैश्च संयोज्य, वामहस्ते निधाय, अपरहस्तेन पिधाय, साष्टशतं पञ्चाक्षरीम्, अन्यान् मन्त्रान् अपि भक्तितः जप्त्वा एकत्र विन्यस्य अष्टमङ्गलक्रियां प्रारभेत ।

पूजितराशिचक्रं दक्षिणीकृत्य प्राङ्मुखम् उपविश्य अभिन्ने फलके, दुग्धेन तीर्थेन च प्रक्षालितान् साष्टशतवराटिकान् निधाय मन्त्रपूरितजलं प्रोक्ष्य गन्ध-पुष्प-अक्षतैः अलङ्कृत्य तस्मिन् राशिचक्रे पूजितवत् महेश्वरम् आवाह्य अर्चयेत् ।

तस्य पूर्वाद्यष्टदिक्षु रवि-कुज-गुरु-बुध-शुक्र-शनि-चन्द्र-राह्वाद्यष्टग्रहानपि पुष्पैः सम्पूज्य, ताः वराटिकाः स्पृष्ट्वा, पुनरपि अष्टोत्तरशतपञ्चाक्षरीं जपेत् ।

ततः कन्या वा कुमारो वा यः राशिग्रहस्थितिं न जानाति, तेषु यः कोऽपि स्नात्वा वस्त्राद्यलङ्कृत्य राशिचक्रस्य पश्चिमे उपेत्य प्राङ्मुखं स्थित्वा पुष्पैः श्रीभगवतीं विघ्नेश्वरं च तत्तद्दीपे आराधयेत्, सूर्यादिग्रहेश्वरान् निजाधिष्ठितराशिषु च पुष्पेणाराधयेत् । (तुम्बाभिदं शुक्लकुसुमम् एतत् पूजायां प्रधानम्)

ततः अस्य दक्षिणहस्ते साक्षतपुष्पकं सुवर्णं दद्यात् । एतत् (सुवर्णं) ऊढ्वा राशिचक्रप्रदक्षिणं वारत्रयं कृत्वा पश्चात् चक्रस्य समीपतः सुधीः (श्रद्धया) प्राङ्मुखं तिष्ठेत् । तदानीं प्रष्टा अपि निजाभीष्टं ध्यायन् साञ्जलिं तिष्ठेत् ।

अथ दैवज्ञः अभीष्टं स्मृत्वा वराटिकां संस्पृश्य " मूर्तित्वे ..... " इति पूर्वकं मन्त्रं वारत्रयं जप्त्वा तत् जपस्यान्ते सुवर्णं कस्मिंश्चिद्राशौ न्यसेत् इति दूतं वदेत् ।

सुवर्णं यस्मिन् राशौ स्थितं भवति स राशिः स्वर्णारूढः । दैवज्ञः वराटिकाम् उदक्पूर्वं त्रिधा विभजेत् । निमित्तानि स्पर्शशरादिकं, समयं च सुवर्णस्य स्थितिमपि ज्ञात्वा, त्रिधा विभाजितवाराटिकान् अष्टभिः हृत्वा शेषस्थानत्रितयस्थसङ्ख्यां च ज्ञात्वा, अनन्तरं पूजासमापनं करणीयम् । अनन्तरं पृच्छानिर्गमादिप्रमाणरूपेण फलनिर्देशः च कर्तव्यः ।


ISSN: 2320-740X

# सद्योवृष्टिविचारः

कृष्णकुमारद्विवेदी
**शोधच्छात्रः, ज्यौतिषविभागः**

अस्माकं संस्कृतसाहित्ये धर्मार्थकाममोक्षा इति पुरुषार्थाः वर्तन्ते । एतान् पुरुषार्थान् साधयितुं मनुष्यशरीरमपेक्षते । तथा शरीरस्य कृते अन्नमपेक्षते । एवमन्नं जलाधीनवृष्टेरधीनं भवति । अन्नेन विना जीवशरीरस्य गतिरेव नास्ति । उक्तञ्च बृहत्संहितायाम् **“अन्नं जगतः प्राणाः**[1]” इति । यदि वृष्टिरेव न भविष्यति चेत् अस्माभिः अन्नेन विना जीवनस्य परिकल्पनापि कर्तुं न शक्यते । अतः वृष्टिविषये अस्माभिः अवश्यमेव चिन्तनीयम् ।

वृष्टिकाले अस्माभिः सूर्यवशात्/मेघवशात्/पशुपक्षिणां चेष्टादिवशात्, तेषां लक्षणानि दृष्ट्वा ज्ञातुं शक्यते यत् सद्य एव वृष्टिः भविष्यति वा न वेति ? तत्रादौ-

**सूर्यवशात् सद्योवृष्टिज्ञानम्-**

बृहत्संहितायां सूर्यस्वरूपतः सद्योवृष्टिविषये लिख्यते यत्-

**उदयशिखरिसंस्थो दुर्निरीक्ष्योऽतिदीप्त्या द्रुतकनकनिकाशः स्निग्धवैदूर्यकान्तिः ।**
**तदहनि कुरुतेऽम्भस्तोयकाले विवस्वान् प्रतपति यदि चोच्चैः खं गतोऽतीव तीक्ष्णम्**[2] **॥**

यदि वृष्टिकाले प्रातःकालीनसूर्यः अत्यधिककान्त्या दुर्निरीक्ष्यः स्यात्, गलितस्वर्णवत् निर्मलवैढूर्यकान्तिवत् वा कान्तिमान् स्यात्, तथा च यस्मिन् दिने मध्याह्ने अतितीक्ष्णरश्मियुक्तः रविः भवति । तर्हि तस्मिन्नेव दिने सद्य एव वृष्टिः भविष्यतीति निश्चेतव्यम् ।

**मेघवशात् सद्योवृष्टिज्ञानम्-**

**पर्यन्तेषु सुधाशशाङ्कधवला मध्येऽञ्जनालित्विषः**
**स्निग्धा नैकपुटाः क्षरज्जलकणाः सोपानविच्छेदिनः ।**
**माहेन्द्रीप्रभवाः प्रयान्त्यपरतः प्राग् वाम्बुपाशोद्भवा**
**ये ते वारिमुचस्त्यजन्ति न चिरादम्भः प्रभूतं भुवि**[1] **॥**

---

[1] बृ.सं.-२१.०१

[2] बृ.सं.-२८.०३

ISSN: 2320-740X 

यदि मेघाः सुधा(चूना)वत् चन्द्रवत् वा श्वेतः, मध्ये कज्जलवत् भ्रमरवत् वा कान्तिः, निर्मलाः, उपर्युपरि स्थिताः, त्यजन्तः जलबिन्दवः, सोपानवत् स्थिताः, पूर्वस्यां दिशि उत्पन्नाः पश्चिमायां यान्ति पश्चिमायामुत्पन्नाः पूर्वस्यां वा यान्ति । तर्हि, भूमौ शीघ्रमेवात्यधिका वृष्टिः भविष्यति ।

**मयूरशुकचाषचातकसमानवर्णा यदा जपाकुसुमपङ्कजद्युतिमुषश्च सन्ध्याघनाः ।**
**जलोर्मिनगनक्रकच्छपवराहमीनोपमाः प्रभूतपुटसञ्चया न तु चिरेण यच्छन्त्यपः[2] ॥**

यदा मेघानां मयूर-शुक-चाष(नीलकण्ठ)-चातक-जपाकुसुम-पङ्कजादीनां यथा कान्तिः तद्वत्, जलोर्मि(भँवर)-पर्वत-नक्र(मकर)-कच्छप-वराह-मीनादीनां सदृशाकृतिः भवति । तदा शीघ्रमेव वृष्टिः भविष्यति ।

**जन्तुचेष्टाभिः सद्योवृष्टिज्ञानम्-**

**गावः सूर्यं निरीक्षन्ते कृकलासगणास्तथा । गृहान्नेच्छन्ति पशवो निर्गमं कुक्कुरास्तथा[3] ॥**

यदि गावः कृकलासगणाश्च (गिरगिट) सूर्यं बहुकालं यावत् पश्यन्ति । एवमेव शुनकादयः पशवः गृहात् बहिर्गन्तुं नेच्छन्ति चेत् सद्य एव वृष्टिः भविष्यति ।

**पिपीलिका यदाऽण्डानि गृहीत्वोच्चम्प्रयान्ति च । सर्पा वृक्षं समायान्ति तदा बहुजलप्रदाः[4] ॥**

पिपीलिकाः यदि स्वाण्डानि गृहीत्वा उच्चस्थानेषु गच्छन्ति । सर्पाः यदि वृक्षस्यारोहणं कुर्वन्ति । तर्हि, सद्य एव बहुवृष्टिः भविष्यति । एतदेव बृहत्संहितायां लिखितं यत्-

**विनोपघातेन पिपीलिकानामण्डोपसङ्क्रान्तिरहिव्यवायः ।**
**द्रुमावरोहश्च भुजङ्गमानां वृष्टेर्निमित्तानि गवां प्लुतञ्च[5]** ॥ इति ।
**ओतुर्नखैर्लिखन् भूमिं रथ्यायां शिशुभिः कृतः । सेतुबन्धश्च सम्प्राप्तमाराद् वर्षं निवेदयेत्[6] ॥**

यदि मार्गे मार्जाराः स्वनखैः भूमिं कर्षति । एवं शिशुभिः सेतुबन्धस्य निर्माणं क्रियते चेत् शीघ्रमेव वृष्टिः भविष्यति ।

**गिरयोऽञ्जनचूर्णसन्निभा यदि वा बाष्पनिरुद्धकन्दराः ।**

---

[1] बृ.सं.२८.१५

[2] बृ.सं.२८.१४

[3] वृ.वि.१५.१३

[4] वृ.वि.१५.१२

[5] बृ.सं.२८.०७

[6] प्र.मा.२५.२७


ISSN: 2320-740X

**कृकवाकुविलोचनोपमाः परिवेषाः शशिनश्च वृष्टिदाः**[1] **॥**

यदि पर्वताः कृष्णवर्णाः सन्दृश्यन्ते, बाष्पेन पूरितः कन्दरः, जलकुक्कुटस्य नेत्रवत् चन्द्रकिरणाः यदि भवन्ति चेत् सद्य एव वृष्टिः भविष्यति ।

**तरुशिखरोपगताः कृकलासा गगनतलस्थितदृष्टिनिपाताः ।**
**यदि च गवां रविवीक्षणमूर्ध्वं निपतति वारि तदा न चिरेण**[2] **॥**

यदि वृक्षस्य शिखरे स्थित्वा कृकलासः आकाशं पश्यति । गावः यदि मुखमुपरि कृत्वा सूर्यं पश्यन्ति चेत् सद्य एव वृष्टिः भविष्यति ।

**नेच्छन्ति विनिर्गमं गृहाद्धुन्वन्ति श्रवणान् खुरानपि ।**
**पशवः पशवच्च कुक्कुरा यद्यम्भः पततीति निर्दिशेत्**[3] **॥**

यदि पशवः गृहाद् बहिर्गन्तुं नेच्छन्ति तथा कर्णान् पादानपि कम्पयन्ति तदा वृष्टिः भवति । अथवा पशुवत् शुनकः चेष्टां करोति चेदपि सद्य एव वृष्टिः भवति ।

**यदा स्थिता गृहपटलेषु कुक्कुरा रुदन्ति वा यदि विततं वियन्मुखाः ।**
**दिवा तडिद्यदि च पिनाकिदिग्भवा तदा क्ष्मा भवति समैव वारिणा**[4] **॥**

यदा श्वानः गृहपटलेषु स्थित्वा गगनं पश्यन् रोदनं कुर्वन्ति । तथा ऐशान्यां दिशि दिवसे तडित् दृश्यते चेत् अत्यधिका वृष्टिर्भवति ।

**शुककपोतविलोचनसन्निभो मधुनिभश्च यदा हिमदीधितिः ।**
**प्रतिशशी च यदा दिवि राजते पतति वारि तदा न चिरेण च**[5] **॥**

यदा शुकस्य कपोतस्य वा नेत्रसदृशो मधुसदृशो वा चन्द्रः भवति । अथवा व्योमे द्वितीयचन्द्रस्य दर्शनं भवति । तर्हि, सद्य एव वृष्टिः भवति ।

**स्तनितं निशि विद्युतो दिवा रुधिरनिभा यदि दण्डवत्स्थिताः ।**
**पवनः पुरतश्च शीतलो यदि सलिलस्य तदाऽगमो भवेत्**[6] **॥**

यदि रात्रौ मेघशब्दो भवति, दिवसे दण्डाकार रुधिरसदृशीं विद्युत् दृश्यते एवं पूर्वस्यां दिशि शीतलवायुः प्रवहति

1 बृ.सं.२८.०६
2 बृ.सं.२८.०८
3 बृ.सं.२८.०९
4 बृ.सं.२८.१०
5 बृ.सं.२८.११
6 बृ.सं.२८.१२

चेत् वृष्टेरागमनं भवति ।

**वल्लीनां गगनतलोन्मुखाः प्रवालाः स्नायन्ते यदि जलपांशुभिर्विहङ्गाः ।**
**सेवन्ते यदि च सरीसृपास्तृणाग्राण्यासन्नो भवति तदा जलस्य पातः[1] ॥**

यदि वल्लीनां नूतनपत्राणि ऊर्ध्वगामीनि भवन्ति तथा पक्षिणः जलेन धूल्या वा स्नानं कुर्वन्ति । अथवा सरीसृपाः तृणस्याग्रभागे भवन्ति चेत् शीघ्रमेव वृष्टिः भविष्यतीति ।

**आधारग्रन्थाः-**


१. बृहत्संहिता – चौखम्बा विद्याभवन, वाराणसी-२२१००१
२. वृष्टिविज्ञानम् – परिमल पब्लिकेशन्स, दिल्ली-११०००७
३. प्रश्नमार्गः – चौखम्बा सुरभारती प्रकाशन, वाराणसी-२२१००१
४. बृहद्दैवज्ञरञ्जनम् – मोतीलाल बनारसीदास, दिल्ली-११०००७


**********

# सामुद्रिकशास्त्रोक्तनायिकायाः लक्षणम्


कुलदीपः
**शोधच्छात्रः, ज्यौतिषविभागः**


मानवशरीरम् अनेकैः अङ्गैः मिलित्वा निर्मितं वर्तते । तत्र च प्रत्येकमप्यङ्गस्य विशिष्टं स्थानं वर्तते । यदि मानवः अन्धः अस्ति तर्हि सः संसारेऽस्मिन् किमपि द्रष्टुं न प्रभवति, बधिरश्चेत् किमपि न श्रुणोति, खञ्जः अस्ति चेत् अन्येषां साहाय्यं विना स्थानान्तरं गन्तुं न शक्नोति । अतः मानवः अङ्गस्यैकस्याप्यभावेन अपूर्णः एव भवति । एतादृशी स्थितिः तस्य मानवस्य कृते दुःखदायिनी भवति । सामुद्रिकशास्त्रे मानवस्य नखशिखान्तमङ्गैः पादोदरकटिग्रीवाहस्तस्कन्धनासाललाटकेशैः वर्णाकृतिस्वरूपादीनाम् अध्ययनं फलचिन्तनं च क्रियते । शरीररचनाविन्यासाधारेण प्रवृत्तं शास्त्रं सामुद्रिकशास्त्रम् । अस्य च क्षेत्रमतिविस्तृतमस्ति । शरीरे विद्यमानस्य प्रत्येकम् अङ्गस्य आकार-वर्ण-चेष्टादयः समेऽप्यंशाः सामुद्रिकशास्त्रे प्रमाणभूताः । अनेन व्यक्तेः व्यवहारः, चरित्रं, व्यक्तित्वाद्यंशाः निर्धारयितुं शक्यन्ते । नायिकायाः शरीरलक्षणानि सामुद्रिकशास्त्रानुसारेण कथ्यन्ते ।

**पादलक्षणम्** – पादौ अस्माकं शरीरस्य आधारस्तम्भौ स्तः। गमनागमनयोः कार्यसम्पादने च पादयोः महती भूमिका

[1] बृ.सं.२८.१३

 ISSN: 2320-740X

भवति । नारीणां पादौ पुष्टौ मांसलौ च भवेताम् । पादयोः स्वरूपं कान्तियुक्तं भवेत् । हस्तस्पर्शेन उष्णतायाः भानं भवेत् । पादौ अतिशीतलौ न भवेताम् । प्राकृतिकचिकित्सायामपि एकस्य स्वस्थस्य मानवस्य लक्षणमुक्तम्– शीतलं शिरः, मृदु उदरम्, उष्णौ पादौ– इति सिद्धान्तानुसारमपि पादयोः उष्णता शुभा इति मन्यते । पादयोः स्वेदः न आगच्छेत् ।

**पादाङ्गुलीनां नखानां च लक्षणम्** – यस्याः स्त्रियाः मध्यमा अङ्गुली अन्याभिः अङ्गुलीभिः सह संयुक्ता चेत्, सा सर्वदा उत्तमं भोगं भुङ्क्ते, तस्याः एकमपि दिनं दुःखेन व्यतीतं न भवति । यस्याः अङ्गुष्ठं गोलं मांसलम्, अग्रभागः उन्नतश्च भवति, सा अतुलं सुखं सौभाग्यं च प्राप्नोति । यस्याः स्त्रियाः पादनखाः स्निग्धाः, समुन्नताः, ताम्रवर्णाः, गोलाकाराः, सुन्दराश्च पादतले भवन्ति, सा राजमाता इव सुखानि भुङ्क्ते । यस्याः पादौ कोमलौ दृश्येते सा जीवने सर्वदा सुखं प्राप्नोति ।

**गुल्फलक्षणम्** – सामुद्रिकशास्त्रानुसारं कस्याश्चिदपि नार्याः गुल्फद्वयमवनतं मांसाच्छादितञ्च स्याच्चेत्तर्हि सा नारी शुभलक्षणसम्पन्ना मन्यते । मल्लिनाथः कथयति – " गुढगुल्फत्वं स्त्रीलक्षणम्" । यथा सामुद्ररत्ने –

**गूढौ गुल्फौ शिवायोक्तावशिरालौ सुवर्तुलौ । स्थपुटौ शिथिलौ दृश्यौ स्यातां दौर्भाग्यसूचकौ॥**
**समपार्ष्णिः शुभा नारी पृथुपार्ष्णिश्च दुर्भगा । कुलटोन्नतपार्ष्णिः स्याद्दीर्घपार्ष्णिश्च दुःखभाक्॥**[1] इति।

**जान्वोर्लक्षणम्** – यस्याः स्त्रियाः जानुनी मांसले, सुन्दरे, पुष्टे, वृत्ताकारे च भवतः, सा सौभाग्यवती भवति । शोभनं गोलाकारं निर्लोमं चिक्कणं सुन्दरं जानुद्वयं यस्याः सा नारी राजप्रिया भवति । यस्याः ऊरुद्वयं गोलाकारं कोमलं गजशुण्डाकारं मनोहरं गम्भीरं च भवति सा राजमहिषी भवति ।

**हस्तयोर्लक्षणम्** – हस्तः त्रिविधः उक्तः तीक्ष्णाग्रहस्तः, समकोणहस्तः, गोलाङ्गुल्यग्रहस्तश्च । यस्याः हस्तौ तीक्ष्णाग्रौ, मांसलयुक्तौ उन्नतौ भवतः, सा धनवती, सुखवती, ज्ञानवती च भवति । तीक्ष्णहस्तः उत्तमानां युवतीनां लक्षणम् उच्यते । समकोणहस्तस्य अङ्गुल्यः साधारणतः दीर्घाः भवन्ति । करतलस्थाः रेखाः पीतवर्णयुक्ताः विस्तृताश्च भवन्ति । अङ्गुल्यः स्थूलाः हस्तस्य च वर्णः पीतः प्रतीयते । उत्तमाः रेखाः उन्नताः यस्याः, सा परिश्रमवती, दृढा, अध्यवसायिनी, कर्मठा, निष्कपटा, लोकप्रिया, परोपकारिणी, तर्ककर्त्री, अनुसन्धात्री च भवति । ईदृग्घस्तः मध्यमवर्गीयः मन्यते ।

**हस्ताङ्गुलिनखलक्षणम्** – शरीरे हस्तयोः अत्यधिकं महत्त्वं वर्तते । यस्याः प्रदेशिनीमध्यमयोः अङ्गुल्योः अन्तरं सघनं भवति, परस्परं ते संयुक्ते स्तः तथा च संयोजनेन तयोर्मध्ये किमप्यन्तरं नास्ति सा बाल्यवस्थायां सुखं प्राप्नोति । दीर्घाः

[1] सामुद्ररत्नम् पृष्ठ सं. ३१ श्लोक सं. २६ - २७

अङ्गुल्यः दीर्घजीविनीनाम्, सरलाः सुन्दर्यः कृशाश्च अङ्गुल्यः बुद्धिमतीनां भवन्ति । कनिष्ठानामिकयोः सघनमन्तरं भवेत् तदानीं वार्धक्ये सुखं प्राप्नोति । यस्याः सर्वाः अङ्गुल्यः सघनाः भवन्ति सा धनधान्ययुक्ता सुखिनी कर्त्तव्यशीला च भवति । यस्याः अङ्गुलीनां पर्वाणि दीर्घाणि भवन्ति, सा सौभाग्यवती जीवति । यस्याः अङ्गुल्यः लघ्व्यो भवन्ति सा पराक्रमवती, चतुरा, कवयित्री, लेखिका, प्रशासिका च भवति । यस्याः अङ्गुल्यः सुदीर्घाः भवन्ति, सा प्रमादयुक्ता अस्थिरविचारवती च भवति । यस्याः दीर्घा अङ्गुल्यः तीक्ष्णाग्रा भवन्ति चेत्, सा महत्त्वकाङ्क्षिणी, धनवती, परिश्रमवती, यशस्विनी च भवति । अङ्गुष्ठः इच्छाशक्तेः, निग्रहशक्तेः, कीर्तेः, सुखसमृद्धेश्च द्योतकः मन्यते । स्त्रीणां करः कमलपत्रमिव कोमलः सुन्दरश्च स्यात् तर्हि शुभकरः भवति ।

**********

# त्यदादीनि तदीयानि

उमामहेश्वरः

**शोधच्छात्रः, व्याकरणविभागः**

राराज्यते विस्मयावहःप्रयोगलोकःसंस्कृतभाषायाम् । देववाणी वर्ण-पद-वाक्येषु च विन्यस्ता शास्त्रप्रर्वतकैः महामहिमशालिभिः। सर्वदा सा च बुहुशब्दरत्नप्रसविनी वर्वर्ति । वाचः स्वरूपवैचित्र्यरामणीयकतार्थवैशाल्यपदप्रकारविश्चित्तिगाम्भीर्यादयो नैके विषयाः प्रत्यहं प्रतिजनचित्ते नवं भावं वपन्तः विस्मयसागरे निमज्जन्ति । तथैवास्ति कश्चिदवान्तरो लोकः त्यदादीनि तदीयानीति । तद्विषये किञ्चिदत्र प्रस्तोष्यते ।

पाणिनेः पञ्चाङ्गव्याकरणे गणपाठोऽपि विशिष्यते । तत्रापि प्रथमगणः सर्वादिः । स च 'सर्वादीनि सर्वनामानि' इति सूत्रेण सह सम्बध्नाति। सर्वादिगणेऽवान्तराणि पञ्च सूत्राणि सन्ति तनि यथा 'सर्वादीनि सर्वनामानि''पूर्वपरावरदक्षिणोत्तरपराधराणिव्यवस्थायामसज्ञायाम्" 'स्वमज्ञातिधनाख्यायाम्' 'अन्तरं बहिर्योगोपसंव्यानयोः' 'त्यदादीनि च' इति। तेष्विह त्यदादिगणमाश्रित्य विषयो निरूप्यते । त्यदादिगणे १२ शब्दाःसन्ति । ते च क्रमशः त्यद्-तद्-यद्-एतद्-इदम्-अदस्-एक-द्वि-युष्मद्-अस्मद्-भवतु-किमः । त्यदादिगणे मान्तप्रकृतिकत्वेन इदम् किम् इति शब्दौ परिगण्येते । अकारान्तः 'एक' शब्द एक एवास्ति ।

धातवो द्विप्रकाराः औपदेशिकाः अतिदेशिकाश्चेति। औपदेशिकास्तु पाणिनिना स्वगणपाठे विन्यस्ताः केचन सौत्रा अपि तद्विभागे एवान्तर्भवन्ति। साधितधातव अथवा आतिदेशिकास्तावत् औपदेशिकान् धातून् क्वचित् नामप्रकृतिं वा समाश्रित्य प्रवर्तन्ते । तदर्थमेव प्रत्यया अपि केचन अपेक्षितार्थविशेषम् अतिदेष्टुं सूत्रैरूपन्यस्ताः। त एव सनादयः । ते

 ISSN: 2320-740X

च त्रयोदश प्रत्यया: सन्ति यथा सन्-क्यच्-काम्यच्-क्यष्-क्यङ्-क्विप्-णिङ्-ईयङ्-णिच्-यक्-आय्-यङ्-यङ्लुक: (यङ्लुकोऽप्यत्र लेखने प्रत्ययत्वव्यवहार: क्रियते निरूपणसौकर्याय)। एतदन्ता एव सनाद्यन्ताः भवन्ति । तेषां धातुसंज्ञा "सनाद्यन्ताः धातव" इत्यनेन सूत्रेण विधीयते। एतेषु प्रत्ययेषु पुनर्विभागो भवेदित्थम् । यङ्-यक्-यङ्लुक्-सन्-णिच् इतीमे पञ्च प्रत्यया औपदेशिकेभ्यः धातुभ्यः विधीयन्ते। अन्ये अवशिष्टाः क्यच् –काम्यच्-क्यङ्-क्यष्-क्विप्-ईयङ् आय णिङिति अष्ट प्रत्यया: प्रातिपदिकेभ्यः विधीयन्ते । द्वादशानां प्रत्ययानां गणेऽस्मिन् केवलं क्विप् इत्ययं प्रत्ययः वार्तिकसंविधानः । अन्ये समेऽपि सूत्रसंविधाना एव । क्यजादयो यो प्रातिपदिकेभ्यः विधीयन्ते तदन्ताः नामधातव इत्यपि प्रसिद्ध्यन्ति ।

साम्प्रतं क्रमशः त्यदादिगणपाठितशब्दान् आश्रित्य सनाद्यन्तर्भूततया विद्यमानैः क्यजादिभिः अष्टभिः प्रत्ययैः सह योगेन निष्पत्स्यमानानां क्रियापदीभूतत्यदादिशब्दानां विचारोऽत्र विधीयते ।

**क्यच्-** सुप आत्मनः क्यच् (३.१.८) इत्यनेन सूत्रेण विधीयते क्यच् प्रत्ययः । इषिकर्मणः एषितुरेवात्मसम्बन्धिनः सुबन्तादिच्छायामर्थे वा क्यच् प्रत्ययो भवति । कश्चित् कर्ता आत्मने इच्छति (न त्वन्यस्मै) तदा तस्याः इच्छायाः कर्मवाचकात् सुबन्तात् क्यच्प्रत्ययो विधीयते । यथा देवदत्तः आत्मनः पुत्रम् इच्छति-पुत्रीयति देवदत्त इति प्रयोगः । अत्र इच्छायाः कर्ता देवदत्तः । देवदत्तस्य इच्छायां कर्मत्वेन सम्बन्धानि पुत्रः । **अ**तः कर्मवाचकात् सुबन्तात् क्यच्प्रत्ययो विहितः। तद्वदत्रापि ।

- देवदत्तः आत्मनः "तद" इच्छिति इत्यर्थे तद्यति देवदत्तः इति प्रयोगः । एवमेव एतच्छब्दस्य एतद्यति अदस् शब्दस्य अदस्यति इत्येवं रूपाणि भवन्ति ।
- एकशब्दः अकारान्तः त्यदादिगणे एक एवस्ति । अकारान्ते सति क्यचि च इति सूत्रेण ई इत्यादेशो भवति तदा एकीयति इति रूपं सिद्ध्यति ।
- किञ्च इच्छा तु द्विधा विभज्यते समान्या लालसेति च भेदेन (लालसा=उत्कटेच्छा) । यदि लालसेच्छा तर्हि सुगुसुगौ इति आगमौ विधीयेते सर्वप्रातिपदिकानाम् क्यचि लालसायां सुगसुगौ इत्यनेन वार्तिकेन यथा क्षीरस्यति, दधिष्यति इति असुगि लवणस्यति मध्वस्यति दध्यस्यति सुगागमे देवदत्तः आत्मनः तद् इच्छति इति विवक्षायाम् तत्स्यति इति प्रयोगो भवति । असुगागमे – देवदत्तः आत्मनः एतद् इच्छति इति विवक्षायाम् एतदस्यति इति प्रयोगः ।
- क्यचो निषेधः । मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यच् न इति वार्तिकेन निषेधात् इदम् किम् इति शब्दाभ्यां क्यच् प्रत्ययो न विधीयते । किम् इच्छति इदम् इच्छति इत्येव प्रयोगः ।

- क्यच अर्थान्तरेऽपि विधानं दृश्यते । उपमानादाचारे **(३.१.१०)** इत्यनेन सूत्रेण उपमानवाचिनः कर्मणः सुबन्ताद् आचरार्थे वा क्यच् प्रत्ययो विहितः यथा-गुरुः पुत्रम् इव शिष्यम् आचरति इत्यर्थे गुरुः शिष्यं पुत्रीयति इति प्रयोगः। अत्र या आचरणक्रिया वर्तते तस्याः कर्मत्वेन शिष्ये वर्तते अस्योपमानं पुत्रः एव । पुत्रस्य उपमानवाचित्वात् तद्वाचत् पुत्रशब्दात् क्यच्प्रत्ययो भवति । तद्वदेव राजा तम् इव आचरति एतम् इत्यस्मिन्नर्थे राजा एतं तद्यति इति प्रयोगः । एवमेव गुरुः एतम् इव आचरति भवन्तम् इत्यस्यां विवक्षायाम् राजा एतद्यति भवन्तम् इति प्रयोगे भवति ।

- अधिकरणवाचिनोऽपि ईदृशः प्रयोगो भवति । अधिकरणाच्चेति वक्तव्यम् इति वार्तिकमत्र प्रमाणम् । यथा भिक्षुः कुट्यां प्रासादीयति । तथैव बालः एतस्मिन् तद्यति इति प्रयोगो भवति । ईदृशस्थले प्रसङ्गवशादेव बोधः।

**काम्यच्** – काम्यच् (३.१.८) । इत्यनेन पाणिनिसूत्रेण एषितुरेवात्मसम्बन्धिनः सुबन्ताद् इच्छायामर्थे वा काम्यच् प्रत्ययो भवति ।यथा-देवदत्तःआत्मनःपुत्रम् इच्छति-पुत्रकाम्यति ।तथैव-देवदत्तः आत्मनः तम् इच्छति- तत्काम्यति ।देवदत्तः आत्मनः एतद् इच्छति- एतत्काम्यति । एवमेव अदःकाम्यति, इदङ्काम्यति, किङ्काम्यति इत्यादिप्रयोगाः भवन्ति ।

**क्यङ्** – कर्तुः क्यङ् सलोपश्च (पा ३.१.११) इत्यनेन पाणिनिसूत्रेण कर्तुः यदुपमानं तद्वाचकात् सुबन्तात् क्यङ् प्रत्ययो विधीयते । यथा-श्येन इव आचरति काकः- श्येनायते काकः । कृष्णः इव आचरति बालः - कृष्णायते बालः इत्येवं प्रयोगो भवति । एवमेव सः इव आचरति नटः – तद्यते नटः असौ इव आचरति नटी -अदोयते नटी । त्वम् इव आचरति देवदत्तः- त्वद्यते देवदत्तः । अहमिव आचरति सुरेशः – मद्यते सुरेशः । वयमिव आचरन्ति बालाः – अस्मद्यन्ते बालाः इत्येवं प्रयोगाः स्युः।

**क्विप् -** सर्वप्रातिपदिकेभ्यो क्विब्वा वक्त्यव्यः इत्यनेन वार्तिकेन विधीयते क्विब्प्रत्ययः यथा कृष्णः इव आचरति- कृष्णाति । सीता इव आचरति-सीताति ।तथैव एक इव आचरति – एकति । द्वि इव आचरति द्वयति । इत्येवं क्विपि रूपाणि प्रवर्तन्ते ।किञ्च सः इव आचरति- तदति । अहमिव आचरति – मदति । परन्तु केषाञ्चिन्मतेन हलन्तेभ्यः प्रातिपदिकेभ्यः आचारक्विप् नास्तीति अपि अस्ति कश्चन पक्षः । किञ्च अनुनासिकान्तेभ्यः प्रातिपादिकेभ्यः सति क्विपो विधाने उपधायाः दीर्घो भवति अनुनासिकस्य क्विझलोः क्ङिति इत्यनेन । यथा राजन् राजानति ।पथिन् – पथीनति । इदमिव आचरति – इदामति ।किमिव आचरति – कीमति । इति रूपे स्याताम् ।

**णिच् -** प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च इत्यनेन विधीयमानोऽयं णिच् बहुष्वर्थेषु दृश्यते । दर्शनं श्रवणं ग्रहणम् आख्यानं करणम् इत्यादयो धात्वर्थाः । णिचो दृष्ट्या प्रक्रियवैचित्र्यं ज्ञेयं स्यात् । अनेकाच् स्थले एकाच् स्थले च । अनेकाच् स्थले ।युवाम्/युष्मान् वा आचष्टे-युष्मयति/ते । आवाम् /अस्मान् वा आचष्टे-अस्मयति/ते।एतत्करोति-एतयति/ते । एकमाचष्टे-एकयति/ते । अदःकरोति-अदयति/ते । भवन्तम् आचष्टे-भवयति/ते (अनेकाच्त्वात् टिलोपः) । एकाच्स्थले । टिलोपो

 ISSN: 2320-740X

नास्ति। त्वम् आचष्टे-त्वादयति/ते 'अत उपधायाः' इति सूत्रेण वृद्धौ त्वाद् इ अ ति-त्वादयति इति सिद्ध्यति।तथैव यद् आचष्टे-यादयति /ते । मद् आचष्टे-मादयति /ते । तम् आचष्टे-तादयति/ते।किम् आचष्ट-कैमयति/ते ।

क्यच् काम्यच् क्यष् क्विप् इत्येतैः साध्यमाना धातवः परस्मिपदिन एव भवन्ति । शेषात्कर्तरि परस्मैपदम् इत्यनुशासनात् । क्यङ् णिङ् अनयोःङित्वात् अनुदात्तङित आत्मनेपदम् इत्यनुशाशनादात्मनेपदम् । णिचः णिचश्च इत्यनुशासनेन उभयपदितास्ति । इत्येवं त्यदादीनाश्रित्य निर्मितानां नामधातूनां पदनिर्णयविषयः । क्यष् ईयङ् णिङ् इत्येषां त्यदादिगणदृष्ट्या अप्रसक्तत्वात्सम्प्रति चर्चा न विहिता ।

रोचकाःकेचन विषयाः-अहम् आत्मनःमाम् इच्छामि मद्यामि।मद्यामि मद्यावः मद्यामः।वयम् आत्मनःअस्मान् इच्छामः अस्मद्यामः।अस्मद्यामि अस्मद्यावः अस्मद्यामः । त्वम् आत्मनःत्वाम् इच्छसि त्वद्यसि । त्वद्यसि त्वद्यथः त्वद्यथ । यूयम् आत्मनः युष्मान् इच्छथ।युष्यद्यसि युष्मद्यथः युष्मद्यथ।एवमेव क्यङि मघे मघावहे मघामहे।त्वघे त्वघावहे त्वघामहे।अस्मघे अस्मघावहे अस्मघामहे।युष्मघे युष्मद्यावहे युष्मघामहे । काम्यचि मत्काम्यामि मत्काम्यावः मत्काम्यामः ।त्वत्काम्यसि त्वत्काम्यथः त्वकाम्यथ । णिचि मादयामि/मादये मादयावः/मादयावहे मादयामः/मादयामहे ।इत्यादिप्रयोगाः व्यवहारेणैव निरूपयितुं शक्याः ।

| | त्यद् | तद् | एतद् | यद् | किम् | इदम् | अदस् | एक | द्वि | अस्मद् | मत्(आदेशः) | युष्मद् | त्वत् (आदेशः) | भवतु |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| क्यच् | त्यद्यति | तद्यति | एतद्यति | यद्यति | . | . | अदस्यति | एकीयति | द्वियति | अस्मद्यति | मद्यति | युष्मद्यति | त्वद्यति | भवद्यति |
| सुगागम+ क्यच् लालसायम्) | त्यत्स्यति | तत्स्यति | एतत्स्यति | यत्स्यति | . | . | अदस्स्यति | एकस्यति | द्विस्यति | अस्मत्स्यति | मत्स्यति | युष्मत्स्यति | त्वत्स्यति | भवत्स्यति |
| असुगणम + क्यच् (लालसायम्) | त्यदस्यति | तदस्यति | एतदस्यति | यदस्यति | . | . | अदसस्यति | एकास्यति | द्व्यस्यति | अस्मदस्यति | मदस्यति | युष्मदस्यति | त्वदस्यति | भवदस्यति |
| काम्यच् | त्यत्काम्यति | तत्काम्यति | एतत्काम्यति | यत्काम्यति | किंकाम्यति | इदंकाम्यति | अदःकाम्यति | एककाम्यति | द्विकाम्यति | अस्मत्काम्यति | मत्काम्यति | युष्मत्काम्यति | त्वत्काम्यति | भवत्काम्यति |
| क्यङ् | त्यद्यते | तद्यते | एतद्यते | यद्यते | किम्यते | इदम्यते | अदोयते | एकयते | द्वियते | अस्मद्यते | मद्यते | युष्मद्यते | त्वद्यते | भवद्यते |
| क्विप् | | | | | | | | एकति | द्वयति | | | | | |
| णिच् | त्यादयति/ते | तादयति/ते | एतयति/ते | यादयति/ते | कैमयति/ते | इदयति/ते | अदयति/ते | एकयति/ते | द्वाययति/ते | अस्मयति/ते | मादयति/ते | युष्मयति/ते | त्वादयति/ते | भवयति/ते |

इमे समेऽपि प्रयोगाः विस्मयमेव जनयन्ति । प्राचीनकाव्येषु दृश्येरन्निति नास्ति अमीषाम् उपयोगाधिक्यं व्यवहारकाल एव । किञ्च महाभाष्येऽपि केचन ईदृशप्रयोगाः दृश्यन्ते तेन स्पष्टता जन्यते यदिमे पूर्वं प्रयोगपथे

आसन्निति । एतादृशप्रयोगाणां निरूपणपाटवं प्राप्येत अस्माभिः ।तद्यति ईदृशस्य प्रत्येकमपि पदस्य दश लकाराः शतरि वर्तमाने भविष्यति च रूपाणि यकि रूपाणि..... अनन्ताः प्रयोगाः नवा । विस्मयावहः प्रयोगलोकः ।

**********

# भामहपण्डितराजजगन्नाथयोः काव्यलक्षणविचारः

सौरभदुबे

**शोधच्छात्रः, व्याकरणविभागः**

भामहस्य काव्यालङ्कारात् परम्परातः समुद्धृतं काव्यलक्षणम्- **'शब्दार्थौ सहितौ काव्यमि'१** ति पण्डितराजजगन्नाथस्य रसगङ्गाधरनामके ग्रन्थे प्रोक्तम्- **'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'**ति च विदितचरमेव । अत्र प्रश्नोऽयं समुदेति यत्- भामहः- **'शब्दार्थौ काव्यम्'** पण्डितराजश्च- **'शब्दः काव्यम्'** इति स्वीकरोति। तदा कथमेतयोः काव्यलक्षणे विचारः सम्भाव्यते? वस्तुतः काव्यलक्षणमुताहो तस्यासधारणधर्मत्वं सर्वेषामेवाचार्याणां मते समानमेव स्यादित्यावश्यकम्, तत्स्वरूपे तावद्भवतु नाम मतवैभिन्न्यम् । कोशकारा अपि लक्षणशब्दे स्वरूपशब्दे च पृथगर्थं प्रतिपादयन्ति।यथामरकोशकारः-**'चिह्नं लक्ष्म च लक्षणम्'** इति । **'संसिद्धिः प्रकृतिः स्वरूपम्'** । **'प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः'** इत्येवं प्रतिपादयति।गङ्गाधरकारः लक्षणस्य लक्षणं सुस्पष्टं दर्शयति – **'तदितरभेदबुद्धौ साधनम्'** । इत्युक्तेः काव्येतरवस्तुज्ञानस्य यत् कारणं वर्तते तदेव लक्षणमिति तन्मते।आचार्या अपि तथ्यमिदं ज्ञात्वैव काव्यस्य लक्षणं स्वरूपं च प्रतिपादयन्ति।काव्यप्रकाशस्य टीकाकारःभट्टवामनाचार्यः लक्षणस्वरूपशब्दौ समानार्थे जग्राह – **'स्वरूपम्-स्वं लक्ष्यपदार्थो रूप्यते लक्ष्यते(इतरव्यावृत्ततया ज्ञायते) अनेनेति व्युत्पत्त्या स्वरूपं लक्षणमित्यर्थः। इतरभेदकमिति यावत्** । यथा काव्यप्रकाशे मम्टाचार्यः **'विलकक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणं कविकर्म'** इत्यत्र विलक्षणशब्दं कण्ठतः प्रयुज्य 'लोकोत्तरत्वमिति काव्यवैलक्षण्यं प्रतिपादयति, किन्तु **"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"** इत्यस्याव्यवहितप्राक् तत्स्वरूपमाह इति लिखति। "लोकोत्तराह्लादत्वमेव" काव्यस्य लक्षणं प्रायेण सर्वैरेवाचार्यैः प्रत्यपादि । भामहात् पण्डितराजं यावत् शब्दर्थौ, शब्दः, वाक्यं, पदावली, उक्तिर्वा भवतु नाम काव्यस्वरूपम्, किन्तु काव्यस्य लक्षणं लोकोत्तराह्लादकत्वमेव स्वीकृतमस्ति ।

भामहस्य यत् सुप्रचलितं काव्यलक्षणं 'शब्दार्थौ सहितौ काव्यम' इति विद्यते, अत्र काव्यचिह्नं स्पष्टतया न् सङ्केतितम् । सहिताविति पदेन "विशिष्टौ" पुनश्च विशिष्टावित्यनेन वक्रतादिविशिष्टौ "अलङ्कारादिविशिष्टौ" वेति कल्पना द्रविणप्रणामयते । भामहस्य काव्यालङ्कारे वस्तुतः "शब्दार्थौ सहितौ काव्यम्" इति पङ्क्तिः शब्दालङ्कारार्थलङ्कारयोः एकतरस्यैव महत्त्वं अभ्युपगताम् अचार्याणां पारस्परिकविवादस्य शमनाय लिखितेति काव्यालङ्कारस्य


ISSN: 2320-740X

हिन्दीभाष्यकृताचार्येण दैवेन्द्रनाथशर्मणा प्रमाणितमेव । “शब्दर्थौ सहितौ काव्यम्” इतोऽव्यवहितप्राक् लिखितः कारिकास्तथ्यमिदं पुषणन्ति-

रूपकादिरलङ्कारस्तथान्यैर्बहुधोदितः । न कान्तमपि निर्भूषं विभाति वनिताननम् ॥
रूपकादिमलङ्कारं बाह्यमाचक्षते परे। सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् ॥
तदेतदाहुःसौशब्द्यं नार्थव्युत्पत्तिरीदृशी। शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः ॥
शब्दर्थौ सहितौ काव्यम्.........॥

काव्यालङ्कारस्य प्रथमे परिच्छेदे काव्यदोषनिरूपणात् (का.३७)। प्राग् यावद्विवेचनं भामहस्य काव्यलक्षणस्य काव्यभेदस्य काव्यस्वरूपस्य चावधारणां व्यनक्ति। तस्य वक्रतां प्रति विशेषाग्रहो दृश्यते । तथ्यमिदम्- युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते ।

अपुष्टार्थमवक्रोतिप्रसन्नमृजुकोमलम्। भिन्नं ज्ञेयमिवेदन्तु केवलं श्रुतिपेशलम् ॥
अलङ्कारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम्। गौडीयमपि साधीयो वैदर्भमिति नान्यथा ॥
न नितान्तादिमात्रेण जायते चारुता गिराम्। वक्राभिधेया शब्दोक्तिरिष्टा वाचामलङ्कृतिः ॥

**“वक्राभिधेयेति”** चरमपङ्क्तिः भामहस्य काव्यलक्षणं नात्र सन्देहावसरः । **‘लोकोत्तरत्वं’** काव्यलक्ष्म पूर्वं प्रतिपादितं तर्हि लक्षणेऽस्मिन् **‘वक्र’** शब्देन को लाभः ? अथ च पण्डितराजेन **‘रमणीय’** शब्दस्य प्रयोगः अकारि तत्रापि लोकोत्तरशब्दो न प्रायुजि । अतः सर्वसम्मतं लोकोत्तरत्वं, भामहपण्डितराजयोः काव्यलक्षणे च संवादो नाम सिद्ध्येत् ? एतत्समाधातुमनयोराचार्ययोर्वचनान्येव प्रमाणरूपेण प्रस्तूयन्ते ।

अतिशयोक्तिनिरूपणे भामहो वक्ति-

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम् । मन्यन्तेऽतिशयोक्तिं तामलङ्कारतया यथा ॥
इत्येवमादिरुदिता गुणातिशययोगतः। सर्वैवातिशयोक्तिस्तु तर्कयेत्तां यथागमम् ॥
सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते। यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥

अतिशयोक्तेर्महत्त्वम् आनदवर्धनाचार्योऽपि स्वीकरोति-

**प्रथमं तावदतिशयोक्तिगर्भता सर्वालङ्कारेषु शक्यक्रिया ।**
**कृतैव च सा महाकविभिः कामपि काव्यच्छायां पुष्यतीति ॥**

विशेषालङ्कारस्य निरूपणे मम्मटाचार्योऽपि लिखति-

**सर्वत्र य एवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते । तां विना प्रायेणालङ्कारत्वायोगात् ॥**

उक्तैरुद्धरणैः सिद्धं यत् भामहो लोकातिक्रान्तगोचरोवचो वक्रोक्तिं मनुते ।

अन्यैराचार्यैरपि तन्महत्त्वं स्वीक्रियते । अतो भामहमतेऽपि **'लोकातिक्रान्तगोचरता'** काव्यलक्ष्म सिद्ध्यति । पण्डितराजस्य 'रमणीय'पदस्यार्थान्वेषणे प्रयासस्य आवश्यक्तैव नास्ति । यतो हि तेन **'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'** इत्यव्यवहितानन्तरं वृत्तौ **'रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता'** इति व्यलेखि।

एवं काव्यलक्षणे भामहेन प्रयुक्ते 'वक्र' शब्दे पण्डितराजेन च प्रयुक्ते 'रमणीय' शब्दे न कश्चिद्विरोधः।पुनश्च काव्यलक्षणपङ्क्त्योः क्रमोऽपि सदृश एव –

वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः। (भामहः)
रमणीयार्थप्रतिपादकः शब्दः काव्यम्।इति च । (पण्डितराजः)
वक्र+ अभिधेय+शब्द+ उक्तिः।
रमणीय+अर्थ+प्रतिपादकःशब्दः।

अतः पण्डितराजभामहयोः काव्यलक्षणे महान् संवादो दृश्यत इति वक्तुं शक्यत इति ॥

**********

# माहेश्वरसूत्रेषु सन्ध्यभावविचारः

सुखदेवभट्टः
**शोधच्छात्रः, व्याकरणविभागः**

पस्पशाह्निके "अथ किमर्थो वर्णानामुपदेश:" इति प्रश्नेन भाष्यकारा: सकृत् वर्णोपदेशस्य प्रयोजनं समाधानञ्च अवादिषुरेव, अत: पुन: द्वितीयाह्निके किमर्थः वर्णानां उपदेशविषये विचारोऽयं प्रवर्तते इति प्रश्नाशयः । तदाह - **"सर्ववर्णान् अविशेषेण विचार्य"** इति भाष्यम् - तन्नाम पस्पशाह्निके य: विचारः कृतो वर्तते, स: सम्भूय सर्वेषां वर्णानां मिलित्वा अविशेषेण कृत: अस्ति । अत्र तु प्रत्येकं वर्णस्य तत्तद्रूपेण विचार: विचार्यते इति विशेष:। विशेषज्ञानं प्रतिसामान्यज्ञानं कारणमिति कृत्वा विवृतत्वादिविचारो विशेषविचारः समान्यविचारस्य विशेषविचारहेतुत्वं दर्शयितुं 'विचार्य' इति ल्यबन्तशब्दः प्रयुक्त इति । कीदृशविशेषविचारः इति जिज्ञासायामाह – 'अकारस्य विवृतोपदेश आकरग्रहणार्थ:' इति । ननु 'अस्य च्वौ' इत्यादौ यथा स्वरूपेण अनुकार्येण वा अर्थवत्वाद् विभक्तिकार्यं दृश्यते तद्वद् अ इ उ ण् इत्यत्र शिवसूत्रे अकारादीनां विभक्तिकार्यं न दृश्यते तत्रापि विभक्तिकार्येण भवितव्यम् , तत्र कारणं किमिति चेद्

 ISSN: 2320-740X

उच्यते “यथा शाब्दबोधे-शब्दजन्यज्ञानविषये अर्थ: विषयतया भासते तद्वद् शब्दजन्यज्ञानविषये शब्दोऽपि विषयतासम्बन्धेन भासते । (अतैव शब्दोऽपि प्रातिपदिकार्थ: इति दीक्षितैः भूषणसारे कारिकायां न्यरूपि) तस्मात् शब्दस्वरूपोऽपि शब्दस्यार्थ: इति कृत्वा अर्थवत्वाद् आहोस्विद् “ अनुकार्य-अनुकरणयो:” भेद: इति पक्षे अनुकरणशब्दस्य अनुकार्यशब्दस्वरूपम् एव अर्थः भवतीति सुप्रसिद्धत्वात् अर्थवत्वात् “अर्थवद्धातुरप्रत्ययः प्रातिपदिकम्” इत्यनेन सूत्रेण प्रातिपदिकसंज्ञायां सत्याम् “ प्रत्यय परश्च” “ङ्याप्रातिपदिकात्” एतै: सूत्रै: प्रत्ययोत्पत्ति: स्यात् । तत्कस्मान्न भवतीति प्रश्नस्य उत्तरम्-प्रदीपकारेण इत्थमुक्तम्-“सतोऽप्यर्थस्याविवक्षितत्वाद् विभक्तीनाम्,अनुत्पत्ति:” इति भाव:। यद्यपि उपर्युक्ताभ्यां हेतुभ्याम् अत्र विभक्त्या भवितव्यम् । तथापि तादृशार्थस्य एतेषां सूत्राणाम् उपदेष्टा शिवेन अविवक्षां कृत्वा विभक्तिकार्यं न कृतम् इति भाव: ।

उपर्युक्तं मतं कैयटस्य तथा तदेव मतं समर्थयति अन्नंभट्टोऽपि । किन्तु नागेशभट्टानाम् आशय: किञ्चिद् विरुद्ध्यते तद्यथा स्वरूपस्य श्रोत्रगृहीतस्यैव शाब्दे भानोपत्तौ न तत्र शक्ति: कल्प्या । अयं भाव: शब्दस्य काश्चित् शक्ति: भवति । तया शक्त्या शब्द: अर्थं बोधयति,अत: अस्य पदस्य शक्ति: कुत्र इति ज्ञानवता एव शाब्दबोधो भवति न तु शक्तिज्ञानाभावतापि , किञ्च शक्ति: ज्ञानवता एव शब्दस्य श्रवणं भवतीति तु नास्ति । तत्पदस्य शक्तिज्ञानाभाववतामपि शब्दस्य श्रवणेन शब्दस्वरूपस्य भानं तु भवत्यैव अत: शब्दस्य स्वरूपज्ञानं प्रति श्रोत्रेन्द्रिय एव कारणं न तु शक्ति: । तस्मात् तत्र अर्थबोधनाय शक्ति: न कल्प्या इति भाव:, एवमेव अनुकार्यानुकरणयोरभेदविवक्षायां अनुकरणशब्दस्य अनुकार्यशब्दस्य अर्थः एव भवति न तु भिन्नार्थः परन्तु अर्थोऽयं सादृश्येन उपस्थाप्यते न तु वृत्या । अनुकार्यानुकरणशब्दयो: समानरूपत्वात् अनुकार्यशब्दस्य य:अर्थः स एव अनुकरणशब्दस्यापि अर्थः भवति । “अर्थवद्” सूत्रे तु वृत्त्यार्थबोधकत्वम् अर्थवत्वमिति निविष्टम् । अत: अत्र प्रातिपदिकसंज्ञाया: प्राप्तिरेव नास्ति । अत: विभक्त्याः प्राप्त्याभावे अन्नंभट्टकैयटाभ्यां य: अविवक्षया विभक्तिकार्यं न इति समाहितं तन्न युक्तं तत्प्राप्तेः अभावात् ।

किन्तु अनुकार्य-अनुकरणयो: भेदविवक्षायाम् अनुकरणत्वभङ्गाद् अथवा श्रोत्रत्वाद्वा न विभक्ति: इति तत्वम् इति भट्टनागेशः ।

किन्तु नागेशभट्टस्य अनुकरणत्वभङ्गात् न विभक्ति: इति समाधानं किञ्चिद् दुर्बलम् इतिवद् भाति । यतो हि यदि अनुकरणभङ्गान्न विभक्ति: इति पक्ष: सार्वत्रिक: स्यात् तर्हि “अस्तेर्भू” एवं “भुवो वुग्लुङ्” इत्यादिष्वपि विभक्तिकार्याणि न स्युः । अतो भेदपक्षे अविवक्षया एव विभक्तिकार्यं न इति युक्ततरं तथा च अन्नंभट्टकैयटयोऽपि अस्मिन् पक्षे एव तात्पर्यमिति सङ्गमयितुं शक्नुम:।तस्माद् विनिगन्नाभावात् क्व विभक्तिकार्याणि कर्तव्यानि क्व न इति सर्वत्रानुकरणभङ्गान्न विभक्तिरिति वक्तमशक्यत्वात् विरोधाच्च पक्षोऽयं न युक्तः ॥

**नागेशान्नंभट्टौ** - नन्वेवमपि अ इ उ ण् इत्यादौ सन्धौ सत्यां गुणायादेशयो: ‘अयुण्’ इति भवितव्यम् । तत्कस्मान्न भवतीति अत आह **‘वर्णोपदेशकालेऽजादिसंज्ञानामनिष्पादात्’** अर्थात् **‘आदिरन्त्येन सहेता’** इति सूत्रस्य

वर्णसमाम्नाये विद्यमानां वर्णोपदेशानन्तरभावित्वात् वर्णसमाम्नायोपशसमये प्रत्याहारविधायकशास्त्राभावात् तत्र तदप्रवृते । अतः तत्समये प्रत्याहारणामभावात् प्रत्याहारसञ्ज्ञानामनिष्पतौ प्रत्याहरसञ्ज्ञाधीनगुणादिकं शास्त्रं न प्रवर्तते इत्यर्थ इति कैयटः । अतः उपजीव्यविरोधान्न सन्धिकार्यमिति यावत्, अतः आक्षरसमाम्नायकानाम् उपदेशसमये तत्तद् सन्धिविधायकशास्त्राणां शक्तिग्रहाभावत् तेषां नात्र प्रवृतिः इति प्रदीपकारस्य हार्दम् । तन्न इति नागेशान्नंभट्टौ- यद्यपि वर्णोपदेशसमये तत्तद् सन्धिविधायकशास्त्राणां शक्तिग्रहो नासीत्, तथापि कृते वर्णोपदेशे इत्सञ्ज्ञायां प्रत्याहारे च निष्पन्ने प्रवर्तमानानां गुणादीनाम् उपेन्द्रः इत्यादौ तटस्थ इवोद्देश्यतावच्छेदकाक्रान्ते वर्णोपदेशादावपि प्रवृतेर्दुर्वारत्वात्, अन्यथा तुल्यन्यायेन **'तुल्यास्य प्रयत्नम्'** इत्यादावपि सवर्णदीर्घःन स्यादिति भावः । अतः तदर्थमत्र सौत्रत्वाद् संहितायाः अविवक्षणाद्वा सन्ध्यभावः इति नागेशान्नंभट्टौ, ननु सौत्रत्वाद् अत्र सन्धिकार्याणि न भवन्तीति उच्यते चेदपि संहितायाः अविवक्षणादिति पक्षस्तु न युज्यते । तत्र कारणम् –

**संहितैक पदे नित्या, नित्या धातूपसर्गयोः। नित्या समासे वाक्ये तु सा विवक्षाम् अपेक्षते ॥**

उक्तरीत्या सुपोऽभावेनावाक्यत्वाद्वाक्यीया अविवक्षा कथमत्र भवितुमहर्ति ? तदाह- परिनिष्ठितत्वेन सुबन्तपदतुल्यपरिनिष्ठितसमूहस्यापि वाक्यत्वेन ग्रहणेनादेषादिति ॥

किञ्च कैयटेन यदुक्तम् "उपजीव्यविरोधान्नसन्धिकार्यमिति" तदपि न संङ्गच्छते, तत्र उपजीव्यविरोधाभावाभावात् तदित्थम् "आदिरन्त्येन सहेता" इति सूत्रबोधिता शक्तिः-अकारादि-चात्तसमुदायघटकत्वावच्छिन्ने इति रुपेण शक्तिग्राहो भवति, न तु अविकृततादृशसमुदायघटकत्वावच्छिन्ने, अथवा अकारदिचान्तसमुदायघटकबोध्यत्वावच्छिन्ने वा शक्तिग्रहोऽस्ति, अतः एतादृशरूपेणशक्तग्रहे अविकृतत्वमुपजीव्यमेव नास्तीति, यद्यत्र अविकृतेषु शक्तिग्रहमुपजीव्य विकृतेषु शक्तिग्राहकत्वे स विरोधः स्यादिति । प्रकृते उपजीव्यविरोधाभावेन सन्निपातपरिभाषायाः अप्रवृत्तेरिति भावः, तस्मात् कैयटेन यः सन्निपातविरोधः दर्शितः सःअयुक्तः एवेति न च सन्धौ सति घटकत्वसन्देहःस्यादत आह- सन्धिकार्यमिति नेति । तदपि न **व्याख्यानाद् विशेषप्रतिपत्तिःन हि सन्देहादक्षणमिति** तस्मादत्र उक्तरीत्या संहितायाविवक्षणान्न सन्धिकार्यमिति नागेशान्नभट्टाविति ।

किञ्च भाष्यव्याख्यानकारेषु सर्वोतमत्वेन विद्वत्समाजे प्रतिष्ठितः कैयटः, यस्य विद्वत्समुदाये भाष्यकारवत् स्थानमस्ति सः एनम् लघुविषयमपि न जानाति वा ? यदत्र सन्निपातविरोधः नास्ति,सन्निपातविरोधाबावात् सन्निपातविरोधेन न सन्धिः इति समाधानम् अयुक्तमेव तथापि उपजीव्यविरोधान्न सन्धिरिति वदता कैयटस्य हार्दं किमिति ?

तथा च प्रकृते 'शक्तिग्रहे अविकृतत्वमिति' अंशः वाच्यकोटौ निवेशनीयः, तथा सति **'आदिरन्त्येन'** इति सूत्रस्य शक्तिग्रह इत्थं स्यादिति **'अविकृतत्वरूपविशेषणविशिष्टाकारादिवर्णरूपविशेष्यरूपस्य एतादृशस्य अकारादि चान्तसमुदायघटकत्वावच्छिन्ने शक्तिः'** इत्थं शक्तेः अङ्गीकारात् अविकृतेषु शक्तिग्रहमुपजीव्य विकृतेषु ग्राहकत्वे

 ISSN: 2320-740X

उपजीव्यविरोधः स्पष्ट एव वर्तते । तस्मात् कैयटेन यत्प्रतिपादितं तद् सम्यगेव । न च सन्निपातपरिभाषा अनित्या अतः विरोधे सत्यपि 'सन्धिकार्याणि' भवेदेव, तस्या अनित्यताया फलानि भाष्यकृता परिगणितानि, परिगणनेषु अस्य अनन्तर्भावात् न तस्या अनित्यत्वं परिकल्पयितुं शक्यम् । अतः यद्यत्र अविकृतत्वरूपविशेषणं भाष्यसम्मतं तर्हि कैयटेन यद्व्याख्यातं तद् युक्तमेव इति किन्तु तथाविधभाष्यस्य संकोचे मानभाव इति अन्ये व्याख्यानकारः ॥ तस्मादत्र कः निर्णयः इति तु सुधीभिरेव ज्ञेयः ॥

**********

# वास्तुशास्त्रम्

गणेशकृष्णभट्टः

**शोधच्छात्रः, ज्यौतिषविभागः**

अस्माकं पूर्वजाः ऋषिमुनयः आश्रयार्थम् आवासार्थञ्च गृहादीनाम् आवश्यकतां तथा अनिवार्यताञ्च विशेषरूपेण ज्ञात्वा कांश्चन सिद्धान्तान् प्रतिपादितवन्तः । ते च सिद्धान्ताः कालान्तरे वास्तुशास्त्रत्वेन निरूपिताः । तैरुक्ताः नानाविधसिद्धान्ताः वास्तुशास्त्रेऽन्तर्भाविताश्च । वास्तुशास्त्रमित्येतत् ज्योतिषशास्त्रे एवान्तर्भूतं भवति । तत्रापि त्रिषु स्कन्धेषु अन्यतमे संहितास्कन्धे वास्तुविषयः विस्तररूपेण निरूपितः वर्तते ।

वास्तुशास्त्रे गृहनिर्माणोपयोगिभुवः चयनादारभ्य गृहनिर्माणपर्यन्तं विविधा आयामाः, नियमाः, सिद्धान्ताः, निर्देशाश्च समावेशिताः । आदौ तावत् शास्त्रस्यास्य जन्म वेदकाले यज्ञभूमिचयनार्थं तथा वेदीनिर्माणार्थं चाभवदित्युच्यते । कालान्तरे सर्वजनोपयोगिरूपेण लोकाय परिचितम् । परन्त्वेतदपि ज्ञातव्यमेव यत् यज्ञादीनां पूर्वमपि मानवानामावासस्य आश्रयस्य च कल्पना जातैवासीत् । पुनश्च मानवः वासभूमिनिश्चयार्थं चिन्तनमकरोत् । वायुपुराणे तथा वास्तुशास्त्रीयसमराङ्गणसूत्रधारग्रन्थस्य सहदेवाधिकारे आशयोऽयं सुन्दरतया निरूपितः ।

भारतस्योत्तरादिचतसृष्वपि दिक्षु वास्तुग्रन्थानामुपलब्धिः वर्तत एव । अनेनैव सिद्ध्यति यत् सम्पूर्णभारते वास्तुशास्त्रीयाणां सिद्धान्तानां प्रसारः प्रचारश्चासीदिति । वस्तुतः सांस्कृतिकभारतस्य गृहदेवालयादिविविधालयानां विकासे शास्त्रस्यास्य महत्त्वपूर्णा भूमिका अस्त्येव । भारत एव न, सम्पूर्णे विश्वे प्राप्तनानावशेषाणामवलोकनेन शास्त्रस्यास्य फलश्रुतेरनुभवो जायते ।

ऋग्वेदे ऋषयः देवानां स्तुतिकरणपुरस्सरं गीतान्यप्यरचयन् । एवमेव जीवनीयावश्यकतानां पूर्तये अभिलाषाणां सुन्दरं चित्रणं कृतम् । एष्वेव 'वास्तोष्पति' इत्यस्य प्रकल्पना कृता । स एव वास्तोष्पतिरालयस्य

वास्तुमण्डलं वा वास्तुशास्त्रीयवास्तुपुरुषनिवेशस्य वा बीजभूतावधारणं भवति । सः वास्तोष्पतिः शिवस्य पुत्र इत्यपि श्रूयते । तस्मात् शिव एव वास्तुशास्त्रस्य मूलप्रवर्तकः । विश्वकर्मवास्तुशास्त्रे उच्यते यत् –

**यदुक्तं शम्भुना पूर्वं वास्तुशास्त्रं पुरातनम् ।**
**पराशरः प्राह बृहद्रथाय बृहद्रथः प्राह च विश्वकर्मणे ।**
**स विश्वकर्मा जगतः हिताय प्रोवाच शास्त्रं बहुभेदयुक्तम् ।**
**वास्तुशास्त्रं प्रवक्ष्यामि लोकानां हितकाम्यया......।** इत्यादि ।

अर्थात् आदौ शिवः पराशराय वास्तुविचारानकथयत् । पराशरः प्रथमतया बृहद्रथाय तथा बृहद्रथः विश्वकर्मणे चोपादिशदिति ।

साम्प्रदायिकमान्यतानां विकासेन सहापि तदा तदा हरिः शास्त्रस्यास्य प्रवर्तकः, ब्रह्मा प्रवर्तकः इत्याद्यभिप्रायाः श्रूयन्त एव सन्ति । वायुगरुडाग्निब्रह्माण्डस्कन्दब्रह्मवैवर्तादिषु पुराणेषु प्रवर्तकस्य विषये सङ्केतः उपलभ्यत इति विदुषामभिप्रायः । तस्मात् पुराणेष्वपि वास्तुसम्बद्धा विचारा उपलभ्यन्ते । यथा ’सर्ववास्तुषु शस्यते’, ’सर्ववास्तूनां शस्यते’, इत्यादिभिः वाक्यैः तच्चावगम्यते । इत्थं वास्तुविचारा बहुपूर्वकालादेव वर्तन्त इति ज्ञायते ।

वास्तुशास्त्रस्य प्रसारः प्रचारश्च प्रधानतया अधिकतया च दक्षिणभारत एव दरीदृश्यते । यतोहि दक्षिणभारते बृहद्गात्रयुक्तविमानगृहानां गोपुरयुक्तप्रासादानाञ्च विकासविस्तारवशात् तेषां दर्शनवशाच्च वास्तुशास्त्रीयसिद्धान्तानां लोकप्रियत्वं सम्बभूव । तत्कारणेनैव दक्षिणभारते बहवः वास्तुविचारीयाः ग्रन्थाः समुपलभ्यन्ते । यथा – मयमतम्, मयदीपिका, काश्यपशिल्पम्, मानसारम्, ईशानशिवगुरु(गुरुदेव)पद्धतिः, शिल्परत्नम्, अगस्त्यवास्तुशास्त्रम्, शिल्पकौमुदी, तन्त्रसमुच्चयम्, विश्वकर्मवास्तुशास्त्रम्, कूपप्रश्नम्, वास्तुतन्त्रम्, मनुष्यालचन्द्रिका, देवालयचन्द्रिका, शिल्पचन्द्रिका इत्यादयः प्रमुखा वास्तुशास्त्रीया ग्रन्थाः समुपलभ्यते ।

वास्तुशास्त्रस्य तत्रापि गृहनिर्माणस्य प्रयोजनमुच्यते । यथा –

**स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं जन्तूनामयनं सुखास्पदमिदं शीताम्बुघर्मापहम् ।**
**वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः ॥**[1]

अर्थात् स्त्रीपुत्रादीनां भोग-सुख-धर्म-अर्थ-कामादयः गृहनिर्माणादेव प्राप्यन्ते । प्राणिभ्यः सुखस्य स्थानं वाय्वातपादिभ्यः निवृत्तिश्चानेनैव भवति । वास्तुशास्त्रोक्तरीत्या गृहनिर्माणं यः करोति तस्मै वापी-देवगृहादीनां निर्माणस्य पुण्यं लभ्यते । अत एव विश्वकर्मादिभिः वास्तुशास्त्रविशारदैः सर्वप्रथमं गृहनिर्माणस्य निर्देशनमकारि । तथैव –

**परगेहकृतास्सर्वाः श्रौतस्मार्तक्रियाश्शुभाः । निष्फलाः स्युर्यतस्तासां भूमीशः फलमश्नुते ॥**[1]

[1] बृहद्वास्तुमाला १-०४


ISSN: 2320-740X

स्वगृहं विना अन्यस्य गृहे स्थित्वा कृतं यत्किमपि कार्यं तन्नाम श्रौतस्मार्तादिसर्वविधशुभकार्यं निष्फलं भवति । यतो हि तत्सर्वमपि फलं गृहस्वामिनाम् एव प्राप्यते । उच्यते च चाणक्येन – **'परसदननिविष्टः को लघुत्त्वं न याति'** इति ।

साम्प्रतिककाले लोके वास्तुशास्त्रस्य प्राधान्यमावश्यकता च यथा वर्तते तथैव तत्सम्बद्धग्रन्थानामध्ययनम्, परिचयः, अनुष्ठानप्रसारादयोऽपि प्रधाना भवन्ति । यतोहि लोके मनुष्यालयदेवालयादीनां निर्माणे पौराणिकमाधुनिकं वा वास्तुविधानं प्रत्यक्षरूपेणाश्रयन्त्येव । यथा गृहनिर्माणसमये देवाताप्रकोष्ठपाकशालाशयनगृहवित्तस्थानादीन् ज्ञातुं तथा देवालयनिर्माणकाले गर्भगृहस्यौन्नत्यादिपरिमाणानि, पाणिपीठस्य स्वरूपम्, आलयस्याच्छादनार्थमपेक्षितस्य द्वारध्वजस्तम्भादीनां निर्माणार्थमुपयुक्तस्य वृक्षस्य चयनं तत्स्वरूपञ्च वृक्षशिल्पादयश्च वास्तुशास्त्रवशादेव ज्ञायन्त इति । तस्माद्वास्तुशास्त्रस्याध्ययनमतीवावश्यकम् । एवं लोकस्य सामन्यस्थितिगतौ वास्तुशास्त्रं प्राधान्यं भजत्येव । एतादृश्या दिशया वास्तुशास्त्रीयग्रन्थानामध्ययनमध्यापनं च करणीयमेव इत्युक्त्वा अत्रैव समाप्यते ।

**********

# लग्नानयनम्

नागपति हेगडे

**शोधच्छात्रः, ज्यौतिषविभागः**

सहृदयहृदयाकाशे समुदेतीयं प्रश्नतारा किन्नाम लग्नमिति? अभीष्टकाले पूर्वक्षितिजे यो राशिः लगति तल्लग्नमित्युच्यते । अस्य उदयलग्नमित्यपरं नामधेयम्।यो राशि: पश्चिमक्षितिजे लगति तदस्तलग्नमिति कथ्यते। तथा च ऊर्ध्वयाम्योत्तरे मध्यलग्नम् अधोयाम्योत्तरवृत्ते चतुर्लग्नञ्च भवति । पूर्वम् उदयलग्नानयनार्थं प्रयास: । सूर्योदयानन्तरम् अभीष्टकाले लग्नं साधनीयं चेत् तत्कालिकार्क: अयनांशैः सहित: कार्य: ।

तस्य भोग्यांशा: स्वदेशीयस्वराश्युदयासुभि: गुण्याः त्रिंशता भाज्या: तदा भोग्यकाल: आयाति । यदि त्रिंशदंशा: राश्युदयासुभि: उद्यन्ते तदा भोग्यांशा: कतिभिरित्येव त्रैराशिकम् । इष्टासुसङ्गात् भोग्यासून् तथा यावन्त: राश्युदयासव: शोध्यन्ते तान् सर्वान् संशोधयेत् । यो राशि: न शोध्यते तस्य राशे: उदयासुभि: त्रिंशत् गुणं शेषं विभजेत् । तदा हि लभ्यते अंशादिकं फलम् । ते अंशाद्या: अशुध्दराशे: पूर्वस्थितमेषादिराशिसङ्ख्याभि: सहिता: अयनांशै: विवर्जिताश्च कार्या: । तदा इष्टकाले पूर्वक्षितिजे समुदेष्यत् स्फुटं लग्नं भवति । सूर्योदयकाले सूर्य: एव लग्नं भवति । यथा यथा उदयात् वर्धते तथा तथा क्रान्तिमण्डलस्य उत्तरोत्तरा: भागा: पूर्वक्षितिजं समायान्ति । अत एव

1 बृहद्वास्तुमाला १-०७

भास्करेण उक्तम्-

**यत्र लग्नमपमण्डलं कुजे तद्गृहाद्यमिह लग्नमुच्यते ।**
**प्राचि पश्चिमकुजेस्तिलग्नकं मध्यलग्नमिति दक्षिणोत्तरे ॥**

क्रान्तिवृत्तस्य अर्धमेव क्षितिजात् ऊर्ध्वं परिदृश्यते । यो राशि: समुदेति तस्मात् सप्तमो राशि: अस्तं गच्छति । अत एव तत्कालसूर्यस्य षड्राशिं संयोज्य तस्य राशे: भोग्यकालं कृत्वा रात्रिघटिभि: रात्रौ लग्नसाधनं सुकरं शीघ्रञ्च भवति । एवमेव तत्कालसूर्यस्य भुक्तकालात् उदयात् पूर्वकालिकं लग्नानयनं सुशकम् । इत्थमत्र प्रतिपादिते लग्नसाधने अस्त्यत्र प्रश्नत्रयस्य अवकाश: । तथाहि वस्तुतस्तु उदयकालिक सूर्यस्य अभीष्टकालस्य च मध्ये इष्टलग्नानयनप्रसङ्ग: मया तु सर्वत्र तत्कालसूर्यस्य प्रस्ताव:: कृत: । किमर्थम् इति प्रश्न: जायते ज्योतिषशास्त्रे लब्धप्रवेशानां समेषाम् अयं तु कालस्य नाक्षत्रिकरणाय प्रयास: । ये राश्युदयासव: वर्तन्ते ते नाक्षत्रा: । आस्माकीनस्तु काल: सावन: । सजात्योरेव खलु शोधनं योजनं वा कर्तुं योज्यते । सावनकालेन नाक्षत्रोदयासव: कथं शोधितुं शक्यन्ते। अत: सावनकालस्य नाक्षत्रिकरणाय य: संस्कार: स: रवे: तात्कालिकीकरणेन सम्पन्नो भवति । यदस्माकं समीपे नाक्षत्रम् एव काल: वर्तते । तदा अर्कतात्कालिकीकरणस्य आवश्यकता एव नास्ति ।

द्वितीय: प्रश्न: राशिमानं नाम किमिति । क्रान्तिवृत्तस्य द्वादशतमो भाग: एव एको राशि: । एते क्षेत्रविभागेन सर्वे समाना: । अस्माभि: कालगणनं नाडिवृत्ते क्रियते । षष्टिघटिकासु द्वादशराशय: समुद्यन्ति । अत: एव राश्युदये पञ्चघटिका: इति बालैरपि ज्ञायते । परम् एवं न । एवं स्यात् यदा नाडीवृत्तक्रान्तिवृत्तयो: समत्वम् उत वा समानान्तरत्वम् । किन्तु नाडीवुत्ते क्रान्तिवृत्तं परमकान्त्यन्तरे सम्पातेन वर्तते । अत: समभाजकप्रदेशेऽपि सर्वे राशय: ते समानकालेन नोद्यन्ति । क्रान्तिवृत्ते ये तिर्यक् स्थिता: राशय: ते महता कालेन क्षितिजे समुद्यन्ति । अक्षांशराशिषु इतोऽप्यधिकं तिर्यगूर्ध्वस्थितित्वं क्रान्तिवृत्तस्य सम्भवति । अत: प्रतिदेशभिन्नं मेषादिराश्युदयमानं भवति । तच्च चरवशात् साध्यते ।

तृतीय: प्रश्न: अयनांशस्य योजनवियोजनविषये एष: अयनचलनविषय: । क्रान्ति सम्पातस्थाने एव शून्यो: भवति । ज्यादिकं सर्वं सायनबिन्दो: सकाशादेव भवति । अत: नाडीवृत्तक्रान्तिवृत्तयो: सम्पातबिन्दुं विहाय गोलविषयकं सर्वं गणितम् असमीचीनमेव । अत एव उक्तम् –

**“तत्संस्कृतात् गृहात् क्रान्तिच्छाया चरदलादिकम् ।“** इति । एवं लग्नानयनम् । एवमेव नतकालात् लङ्खोदयात् च मध्यलग्नानयनम् । ताभ्यां द्वादशभावसन्धिस्फुटादीन् विधाय यत् फलप्रवचनं क्रियते तत् सत्यमेव भवति नानृतम् ।

**"तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयन्त्रसंविदिते । होरार्थे च सुरूढे नादेष्टुरिति वन्ध्या ॥”** इति भुजमुध्दृत्य उपसञ्जिहीर्षामि मामकीनं लेखनम् ।

 ISSN: 2320-740X

# अधिकारः

गोविन्द गोपालकृष्ण हेगडे
**शोधच्छात्रः, साहित्यविभागः**

मीमांसा नाम वेदार्थविचारः । स च वेदार्थनिर्णयार्थः ।तस्य च प्रयोजनं यथावदेव साङ्गप्रधानस्यानुष्ठानद्वारा स्वर्गादिप्राप्तिरेव । तत्र च द्वादशाध्यायात्मकपूर्वमीमांसायां षष्ठे अध्याये अधिकारविमर्शः कृतः । धर्मप्रमाणान्तर्गत अज्ञातार्थज्ञापकवेदभागरूपविधेः उत्पत्तिविनियोगप्रयोगाधि-कारिविधिभेदेन चतुर्धा विभागः कृतः । तत्र अधिकारविधिर्नाम फलस्वाम्यबोधको विधिः अधिकारविधिः इति । तत्रादौ अधिकारो नाम कः इति विचारे फलभोक्तृसमानाधिकरणं कर्तृत्वम् । यदि फलभोक्तृत्वमेव अधिकारः तर्हि श्राद्धादौ पितृणामधिकारः स्यात् । पितृतृप्त्युद्देशेन श्राद्धं क्रियते । तथा च पितरि श्राद्धफलभोक्तृत्वमस्ति । किन्तु कर्तृत्वं नास्ति । कर्तृत्वं तु पुत्रे वर्तते । अतः फलभोक्तृत्वस्य अधिकारत्वे श्राद्धादौ पितरि अतिव्याप्तिः स्यात् । तन्निवारणाय लक्षणे कर्तृत्वरूपदळनिवेशः कृतः । पितरि फलभोक्तृत्वेऽपि तत्समानाधिकरणकर्तृत्वाभावात् नातिव्याप्तिः । यदि कर्तृत्वं अधिकारः तर्हि ऋत्विक्षु अतिव्याप्तिः स्यात् । अतः फलभोक्तृत्वसमानाधिकरणान्त दळनिवेशः । ऋत्विक्षु कर्तृत्वेऽपि फलभोक्तृत्वसमानाधिकरण कर्तृत्वाभावात् नातिव्याप्तिः । एवं सत्यपि जातेष्ट्यादौ पितरि अधिकारो न स्यात् । फलभोक्तृत्वाभावात् । अतः अधिकारश्च ईदृशो वक्तव्यः, प्रवृत्तिप्रयोजकफलेच्छासमानाधि-करणकर्तृत्वम् इति । जातेष्ट्यादौ पितरि **“मम पुत्रस्य ब्रह्मवर्चसादि फलं भवतु”** इत्याकारकप्रवृत्तिप्रयोजकफलेच्छासमानाधिकरण कर्तृत्वस्य सत्त्वात् पितुः अधिकारः भवति । एवं चेत् पुनः ऋत्विक्षु अतिव्याप्तिः स्यात् । ऋत्विजां यागक्रियायां या प्रवृत्तिः सा “मम यजमानस्य स्वर्गादि फलं भवतु” इत्याकारिका प्रवृत्तिप्रयोजिका इच्छा, तत्समानाधिकरणकर्तृत्वम् ऋत्विक्षु इत्यतः अतिव्याप्तिः इति चेत्,न ऋत्विजां या प्रवृत्तिः, सा दक्षिणाप्राप्तिरूप इच्छा प्रयोज्या । अतः सा प्रवृत्तिः फलसमानाधिकरणा न भवतीत्यतः ऋत्विक्षु नातिव्याप्तिः । तथा च प्रवृत्तिप्रयोजकफलेच्छासमानाधिकरण- कर्तृत्वम् अधिकारः इति । अधिकारबोधको विधिः अधिकारविधिः । अधिकारश्च फलस्वाम्यम् । तथा च फलस्वाम्यबोधको विधिः अधिकारविधिः । यथा **“दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत”**[1] दर्शपूर्णमासयोः स्वर्गफलसाधनत्वं बोध्यते । अतः फलस्वाम्यबोधकत्वात् अयम् अधिकारविधिः । एवम् अधिकारविधिस्वरूपे निरूपिते अधिकारिविशेषणानि कानि इति विचारे, अध्ययनविधिसिद्धा विद्या, आधानसिद्धा अग्निमत्ता, सामर्थ्यं च । अध्ययनेन अर्थज्ञानं सम्पाद्य क्रत्वनुष्ठाने सत्येव फलोत्पत्तिनियमात् अध्ययनविधिसिद्धा विद्या अधिकारिविशेषणम् । एवम् अग्निसाध्यक्रतुषु अग्न्यपेक्षत्वात् आधानसिद्धाग्निमतः एव यागादौ अधिकारः । एवम्

[1] तैत्तिरीय संहिता

ISSN: 2320-740X

अङ्गप्रधानसहितस्यैव फलकरणत्वात् तत्करणसमर्थ एव क्रतौ अधिकारी इत्यतः सामर्थ्यस्यापि अधिकारिविशेषणत्वम् । अधिकारिविशेषणत्रयस्य निरूपितत्वात् न स्त्रीशूद्राणां यागादौ नास्त्यधिकारः । स्त्रीणां तावत् स्वातन्त्र्येणाधिकाराभावेऽपि दम्पत्योः सहाधिकारः । शूद्राणां तु अधिकारिविशेषणाभावात् यागादौ नास्त्यधिकारः ।

**********

# मल्लिनाथः

सूर्यहेब्बारः

**शोधच्छात्रः, साहित्यविभागः**

**विद्वानेव विजानाति विद्वज्जनपरिश्रमम् ।**
**न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ॥**

इत्युक्तदिशा काव्यकरणे महाकविभिः कृतः परिश्रमः सामान्यैः ज्ञातुं न शक्यते । काव्येषु कवीनाम् आशयः अवगन्तव्यश्चेत् सोपज्ञव्याख्यानानि अपेक्षन्त एव । तत्र काव्यव्याख्याकर्तृषु मूर्धन्यस्थानं भजते महामहोपाध्यायः कोलाचलमल्लिनाथसूरिः । मल्लिनाथः पञ्चानां महाकाव्यानां मेघदूतस्य च व्याख्यानम् अकरोत् । संस्कृतवाङ्मये बहुषु महाकाव्येषु सत्स्वपि, महाकाव्यानि पञ्च एव इति बहूनां भ्रमः वर्तते । तस्य कारणं मल्लिनाथः पञ्चानामेव महाकाव्यानां व्याख्यानम् अकरोत् इति । अनेनैव मल्लिनाथस्य व्याख्यानस्य प्रागल्भ्यं ज्ञायते । मल्लिनाथस्य व्याख्यानस्य नामानि इत्थं वर्तन्ते-

**रघुवंशम्, कुमारसंभवम्, मेघदूतम् – सञ्जीविनी**
**किरातार्जुनीयम् – घण्टापथः**
**शिशुपालवधम् – सर्वङ्कषा**
**नैषधीयचरितम् – जीवातुः**

मल्लिनाथव्याख्यानेषु इत्येवम् अक्षिपातेन तस्य वैदुष्यस्य परिचयः प्राप्तुं शक्यः न तु तत्प्रशंसया । कालिदासस्य अभिप्रायाणां लोकमुखे प्रदर्शनं मल्लिनाथेन सुष्ठु विहितम् ।

**“कालिदासगिरां सारं कालिदासः सरस्वती । चतुर्मुखोऽथवा साक्षाद्विदुर्नान्ये तु मादृशाः” ॥**

इत्युक्त्वापि मल्लिनाथः कालिदासमहाकवेः स्वारस्यं रमणीयतया प्रतिपादयति । मल्लिनाथः सकलशास्त्रविद् आसीदिति तस्य व्याख्यानावलोकनेन ज्ञायते ।

**“इहान्वयमुखेनैव सर्वं व्याख्यायते मया । नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते” ॥**

 ISSN: 2320-740X

इत्युक्वा मल्लिनाथः सर्वास्वपि व्याख्यासु अमुं नियमं पालयति । प्रायेण महाकवीनां सर्वेषु विशिष्टेषु वाक्येषु, पदेषु च पाणिनिसम्मतिं ससूत्रं दर्शयति । न केवलं व्याकरणे अपि तु वेदे पुराणेषु शास्त्रेषु च अस्य महती गतिः द्रष्टुं शक्या । तस्य कानिचन उदाहरणानि दिङ्मात्रं प्रदर्श्यन्ते ।

**"तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा । पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा" ॥**

इत्येतस्य रघुवंशश्लोकस्य व्याख्यानावसरे मल्लिनाथः वेदपङ्क्तीः उद्धरति । तद्यथा – **यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसः दक्षिणया दाक्षिण्यं नामर्त्विजो दक्षिणत्वप्रापकत्वमं ते दक्षन्ते दक्षिणां प्रतिगृह्य** इति ।

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये । जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥**

इति रघुवंशस्य मङ्गलश्लोकव्याख्यानावसरे शिवपार्वत्योः उपमेयत्वस्य, वागर्थयोरुपमानस्य च कल्पमानायां पुराणमुखेन औचित्यं दर्शयति । यथा –

**शब्दजातमशेषं तु धत्ते शर्वस्य वल्लभा । अर्थजातं यदखिलं धत्ते मुग्धेन्दुशेखरः ॥** इति ॥

**वायुपुराणसंहिताबलेन पार्वतीपरमेश्वरयोरात्तदर्शनाद्** । इति ।

गजशास्त्रस्य यथा –

**प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः । असूययैव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥**

इत्यस्य रघुवंशश्लोकस्य व्याख्यानावसरे मदजलोद्भवस्थलानि **कटात् कराभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिः इति पालकाप्ये** इति ग्रन्थप्रामाण्यं प्रदर्शयति । सामुद्रिकाशास्त्रस्य यथा –

**अधो विधानात् कमलप्रवालयोश्शिरस्सु दानादखिलक्षमाभुजाम् ।**
**पुरेदमूर्ध्वं भवितेति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया ॥**

इत्यस्य नैषधीयचरितपद्यस्य व्याख्याने **ऊर्ध्वरेखाङ्कितपदः सर्वोत्कर्षं भजेत् पुमान् इति सामुद्रिकाः** इति कथनेन शास्त्रसम्मतिं प्रस्तौति । सङ्गीतस्य यथा –

**यः पूरयन् कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन ।**
**उद्गास्यतामिच्छति किन्नराणां तानप्रदायित्वमिवोपगन्तुम् ॥**

इति कुमारसम्भवश्लोकव्याख्याने

उक्तम् च नारदेन –

**षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः ।**
**न तु गान्धारनामानं स लभ्यो देवयोनिभिः ॥**

**इति किन्नराणां देवगायकानां तानप्रदायित्वम् । तानो नाम स्वरान्तरप्रवर्तको रागस्थितप्रवृत्त्यादिहेतुरंशापरनामा वंशवाद्यसाध्यः प्रधानभूतः स्वरविशेषः, तानस्वंशस्वरो मतः इत्यभिनवगुप्तः । गाता यं यं स्वरं गच्छेत्तं तं वंशेन तानयेत् इति भरतः"** इति बहूनि प्रमाणानि प्रदर्शयति । एवं मल्लिनाथस्य पाण्डित्यं ज्यौतिषमीमांसादिष्वपि शास्त्रेष्वपि

दरीदृश्यते । न केवलं शास्त्रपाण्डित्ये अपि तु कविहृदयज्ञानेऽपि मल्लिनाथः अद्वितीयः । उदाहरणं यथा –

**विधाय रक्षां परितः परेतरानशङ्किताकारमुपैति शङ्कितः ।**
**क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ॥**

इत्यस्य किरातार्जुनीयश्लोकस्य व्याख्याने **प्रीतिदानैरेवास्य कृतज्ञत्वं प्रकाश्यते, न तु वाङ्मात्रेणेत्यर्थः । कृतज्ञे राजन्यनुजीविनोऽनुरज्यन्तेऽनुरक्ताश्च रक्षन्तीति भावः** इति कवेराशयं स्पष्टीकरोति । एवं मल्लिनाथः काव्यव्याख्यातृषु मूर्धन्यं स्थानं भजते ।

**********

# तुङ्गाष्टकम्

योगिता दि. छत्रे
**आचार्यद्वितीयवर्षम्**

यस्याः पूतजलेन मार्जितपदा श्रीशारदा राजते
यस्या मङ्गलदर्शनेन भजतां पापं सुपुण्यायते ।
यस्याः स्निग्धसहिष्णुनिर्मलतटे भोग्यातपत्रायते
सा तुङ्गा भवतु प्रवृद्धदुरितप्रध्वंसिनी निम्नगा ॥१॥

उद्विग्नं परितापपीडनवशात् स्वच्छन्दवर्त्मानुगं
चेतो विप्लववेष्टितं यदि भवेद् भ्रान्तिक्लमेनावृतम् ।
तुङ्गानन्दतटे विहङ्गमसहितोत्तुङ्गमोदस्थले
यादृच्छ्याच्छमितं प्रशान्तहृदयं सर्वेङ्गितं प्राप्नुयात् ॥२॥

आदौ बाल्यगतं गृहस्मरणजं दुःखं यया प्रेक्षितम्
पश्चादालिगणान्वितं तु गमनं तत्तीरके सौख्यदम् ।
यस्यां मत्स्यगणा मनोज्ञवलनैर्विस्मारयन्ति क्रमं
सा चूडामणिवद्विभाति नगरे तुङ्गा हि शृङ्गे गिरौ ॥३॥

मातस्ते करुणाधुनीप्रवहणात् वैक्लव्यनिर्वारकात्
प्रत्यर्थी परिवर्तते सखितया मात्सर्यनाशात् चिरम् ।

 ISSN: 2320-740X

तृष्णासंशमनात् पिपासितजनान् पासीति पापक्षमा
वन्दे त्वां सुरनिम्नगासमनदीं तुङ्गे सरिन्नायिकाम् ॥४॥

कश्चिद्दत्तमनाः करोति विहितं सन्ध्यादि कार्यं तटे
कश्चिन्मीनमनांसि रम्यचलनात् उत्सह्य जिज्ञासते ।
कश्चित्पूज्यगुरू प्रतीक्ष्य चरणौ सप्रश्रयं वीक्षते
तुङ्गायां रमणीयवारिभवने सर्वं नवं भासते ॥५॥

श्रीमच्छङ्करपादधूलिकणिका यस्याः प्रवाहे शुभे
राजन्ते प्रचुरास्समस्तजगतः प्रज्ञानदास्सर्वदा ।
यस्यास्तोयनिधौ सभक्ति विहितं स्नानं वहत्येव शं
सा तुङ्गा सुधियां विबोधनकरी श्रेयांसि पुष्णातु नः ॥६॥

दीपानां विमले सुहृत्परिवृते शुद्धे प्रभापर्वणि
तुङ्गां हाटकशाटिकां धरति यन्नेत्रस्य पर्वान्तरम् ।
नानारत्नविभूषिता तटगता दीपोत्सवे भारती
प्रज्ञानं कुरुते प्रगाढतिमिरं वाग्देवता सूदते ॥७॥

तुङ्गानाम नरस्य पुण्यजननी वात्सल्यराशिशिवाः
तुङ्गा दुःखनिवारिका सुतहिता प्रेमामृतस्यन्दिनी ।
या सद्यो जनसम्भ्रमेण शुचितः कालुष्यमेवागता
सा पुत्रोत्थितकल्मषाणि सहते माता कुमाता न हि ॥८॥

**********

# सौन्दर्यपरिशीलनम्

पि. वीर सुब्रह्मण्यकुमारः
**आचार्यद्वितीयवर्षम्**

अस्माकं भारते प्रसिद्धेषु पुण्यक्षेत्रेषु अन्यतममस्ति 'तिरुमलाक्षेत्रम्' । एतत् क्षेत्रम् आन्ध्रराज्ये वर्तते । तिरुमलगिरौ विद्यमानः अधिष्ठानदेवः श्रीवेङ्कटेश्वरः कलियुगे साक्षात् श्रीमहाविष्णोरवतार एव । यदि वयं

श्रीवेङ्कटेश्वरस्वामिनः दर्शनार्थं तिरुमलाक्षेत्रं गच्छामः अन्नमाचार्यस्य सङ्कीर्तनानि अश्रुत्वा ततः आगन्तुमेव न शक्नुमः । तस्य गीतानि तावत् प्रसिद्धानि वर्तन्ते । सः साक्षात् श्रीमहाविष्णोः खड्गायुधस्य 'नन्दकस्य' अवतारस्वरूप एव इति मन्यते । अपि च सः 'आन्ध्र-पदकवितापितामहः' इति रूपेणापि प्रसिद्धिं गतः ।

अन्नमाचार्यस्य जीवनकालः 15 शताब्दः आसीत् । अन्नमाचार्यः समग्रभारते प्रथमसङ्गीतविद्वान् आसीत् । अयं 'संकीर्तनैः' श्रीवेङ्कटेश्वरस्य स्तुतिं कृतवान् । अयमेव कर्नाटकसङ्गीतस्य 'प्रथमकृतिकारः' अपि आसीत् । पुरन्दरदासादयः अन्यकर्नाटकसंङ्गीतकाराः अस्य अनन्तरकालीना एव वर्तन्ते । एतेन निर्मितकीर्तनारूप सङ्गीतम् अधुना अपि दक्षिणभारते सर्वैः सङ्गीतकलाकारैरुपयुज्यमानं वर्तते ।

न केवलम् आन्ध्रदेशीयतेलुगुभाषायां, अपि तु संस्कृतभाषायां अपि अन्नमाचार्येण सङ्कीर्तनानि विरचितानि । संस्कृतभाषायां विद्यमानानि कानिचन प्रसिद्धानि उदाहरणानि भवन्ति एते -

- देवदेवं भजे दिव्यप्रभावं रावणासुरवैरिरणपुङ्गवं राजवरशेखरं रविकुलसुधाकरम्
- भावयामि गोपालबालं मनस्सेवितम् मनस्सेवितं तत्पदं चिन्तयेहं सदा
- माधव केशव मधुसूदन विष्णु श्रीधर पदनखं चिन्तयामि यूयम्
- राजीवनेत्राय राघवाय नमः सौजन्यनिलयाय जानकीशाय
- वन्दे वासुदेवं श्रीपतिम् बृन्दारकाधीशवन्दितं पादाब्जम्
- वन्देऽहं जगद्वल्लभं दुर्लभं मन्दरधरं गुरुं माधवं भूधवम्
- नारायण ते नमो नमो भव नारदसन्नुत नमो नमो

अन्नमाचार्येण श्रीवेङ्कटेशम् अधिकृत्य 32,000 सङ्कीर्तनानि विरचितानि वर्तन्ते । तस्य अधुना 12,000 कीर्तनानि एव लभ्यन्ते । अन्नमाचार्येणैव 'सङ्कीर्तनलक्षण'ग्रन्थोऽपि कृतो वर्तते । अयं षोडशे वयस्येव सम्पूर्ण भक्तिभावनेन वाग्गेयकार (a person who can compose lyrics, music and sing) रूपेण प्रसिद्धिं गतः ।

षोडशे वयसि सञ्जाता एका घटना अन्नमाचार्यस्य जीवनपरिवर्तनमकरोत् इति ज्ञातुं 1997तमे वर्षे के.राघवेन्द्रावुमहोदयेन तेलुगुभाषायां निर्मितस्य अत्यन्तप्रसिद्धस्य चलचित्रस्य 'अन्नमय्य' इत्यस्य कथा प्रदर्श्यते।

चलनचित्रस्य कथा एवम् अस्ति–

एकस्मिन् सन्दर्भे माता लक्ष्मीः श्रीमहाविष्णुं प्रति एवमपृच्छत् 'तेलुगुभाषायां भगवन्नामसङ्कीर्तनकर्तारः नानेके सन्ति । एतद्विषये भवता किं चिन्तितमस्ति' इति । एतस्य प्रश्नस्य समाधानरूपेण सन्तानहीनदम्पत्योः कृते वररूपेण च स्वामिना प्रेषितः स्वाऽयुधविशेषः 'नन्दकः' इति नामकः खड्ग एव अन्नमय्यनामको बालकरूपेण 'ताळपाक' नामकग्रामे जन्म प्राप्नोति । सः गच्छता कालेन यदा यौवनं प्राप्नोति तदा मातुलस्य पुत्र्यौ तिम्मक्का-अक्कलम्मे दृष्ट्वा


ISSN: 2320-740X

अन्नमाचार्यः तयोः अनुरागं प्राप्नोति । तस्य अन्नमाचार्यस्य मनसि ते एव अत्यन्तसौन्दर्यवत्यौ वर्तेते इति भावना आसीत् ।

**(दृश्यवर्णनम् - अन्नमय्यः पुष्पैर्निर्मितम् एकं छत्रं हस्ते धरन् तस्य सख्योः कृते छायां प्रसारयन् तयोः अभिमुखं वहन् वक्रगतिं गच्छन् दृश्यते । अग्रे पठन्तु तेषां सम्भाषणम् / संवादं च ...)**

तिम्मक्का - सखे, किमर्थं भवतः वक्रगमनम् ?

अन्नमय्यः - एकं क्षणमपि भवत्योः सौन्दर्यम् अदृष्ट्वा भवितुम् अहं न इच्छामि ।

अक्कलम्मा - सखे, पतिष्यति (सावधानेन चलतु) !

अन्नमय्यः - मया पूर्वमेव भवत्योः मोहे पतितोऽस्मि खलु ?

**(वैकुण्ठात् एतत् दृश्यं पश्यन्ती लक्ष्मीर्महाविष्णुम् उद्दिश्य एवं पृच्छति ...)**

लक्ष्मीः – अन्नमय्य ! एवं करोति चेत् दैवसम्बद्धगीतरचना भविष्यति वा ? एतादृश लोककल्याणमपि भविष्यति वा ?

महाविष्णुः - कामस्य अनुभवं विना मुक्तिर्नजायते । सः तन्मार्गे एव वर्तते । अधुना केवलं तस्य मार्गपरिवर्तनमेव करणीयं वर्तते ।

**(एवम् उक्त्वा महाविष्णुः परिव्राजकरूपं धृत्वा भूलोकम् आगच्छति ।**
**महाविष्णुरन्नमय्यस्य पृष्ठतो पद्भ्याम् आगच्छन् अन्नमय्यं स्पृशति । अन्नमय्यः, वक्रगत्या चलन् वर्तते सः, पुष्पैर्निर्मितछत्रसहितः पतति । )**

अन्नमय्यः - मम मार्गावरोधनं कुर्वन्नस्ति, भवान् कः ?

महाविष्णुः - अपमार्गे गच्छन्तं जनं सव्यमार्गे को वा प्रेरयति इति कालान्तरेण भवानेव स्वयम् अवगमिष्यति । परन्तु भवतो विषये वदतु । किम् एतत् पुष्पैर्निर्मितं छत्रम् , किम् एतत् कोमलाङ्गिन्योः सेवनम् ? भवता नित्याग्निहोत्रस्य कृते अपि तिलतर्पणं दत्तमस्ति किम् ?

अन्नमय्यः - नैव भोः ! (नार्यौ दर्शयन्) एनयोः सौन्दर्याग्निकुण्डे एव अस्मि । एतयोः सर्वाङ्गचुम्बनेन स्तोत्रेण च मया प्रतिदिनं नित्याग्निहोत्रकार्यं क्रियमाणं वर्तते ननु ?

**(एतादृशम् अन्नमय्यस्य वचनं श्रुत्वा महाविष्णुरेकं दीर्घं विनिश्वासं करोति ।)**

अन्नमय्यः - एतावत् श्रुत्वा एव निःश्वसन्नस्ति वा ?

कौमुदीवृष्टिपाते विलासडोलाजनितविनिश्वासैः भरितसौन्दर्यऽराधना, अधरसागरमन्थनम् आलिङ्गनानां सङ्ग्रामः, (किञ्चित् चित्रस्वरेण) 'यदि तद्रहस्यमपि ते वदामि शृणोति चेत् ...', सन्न्यासाय अपि सन्न्यासं दास्यति भवान् !

महाविष्णुः - एतावता लौकिकसौन्दर्यं दृष्ट्वा एव भवान् उन्मत्तो जातः । किं वा भविष्यति यदि भवान् इतोऽपि अधिकं सौन्दर्यं पश्यति चेत् ?

अन्नमय्यः - (सख्यौ प्रदर्शयन् ...) एतदपेक्षया अधिकं सौन्दर्यम् असम्भवमेव !

महाविष्णुः - यदि उपलभ्यते चेत् भवान् किं करिष्यति इति अहं पृच्छन् अस्मि ।

अन्नमय्यः - अहं वदन् अस्मि, तर्कयितुमपि असाध्यमेव !

महाविष्णुः - (काकुस्वरेण) यदि अस्ति चेत् भवान् किं करिष्यति ?

अन्नमय्यः - यदि भावान् एतयोर्सौन्दर्यापेक्षया अधिकं सुखं दास्यति ... तत् सुखम् अनन्तं नित्यं वा ? ... तत् सुखं मम हृदयं वितनोति ?मम चित्तचोरकं सौन्दर्यं वर्तते किम् ? न, तादृशं सौन्दर्यं न भवत्येव भोः ।

महाविष्णुः - (पुनः पृच्छति) यदि लब्धम् चेत् भवान् किं करिष्यति ?

अन्नमय्यः - तर्हि सौन्दर्यस्य दासोऽहं भविष्यामि ।

महाविष्णुः - तर्हि मया सह आगच्छ, प्रदर्शयामि ।

अन्नमय्यः - तर्हि पश्यामि ।

**(महाविष्णुः अन्नमय्यम् एकं मन्दिरं प्रति नयति ।)**

अन्नमय्यः - (मार्गे आलयगोपुरे विद्यमाननग्नशिलाप्रतिमां प्रदर्शयन्) पश्यतु भोः ... एताः दृष्ट्वा रसिको भवति वा ?

महाविष्णुः - सकल सृष्टिकारकक्रियाः पश्यन् अस्मि ! सृष्टौ निमग्नौ मम पितरौ तत्र पश्यन् अस्मि !

**(तौ मन्दिरस्य अन्तः गच्छन्तौ । महाविष्णुः तं मन्दिरस्य मध्यभागे स्थितां देवमूर्तिं प्रति नयति ।)**

महाविष्णुना दत्तदिव्यचक्षुषा देवस्य निजरूपदर्शनं प्राप्य, आनन्दपरवशेन अन्नमय्यः मूर्च्छां प्राप्य देवतामूर्तेः पादसमीपे पतति । महाविष्णुः ततः अन्तर्धानं प्राप्तवान् ।

वैद्यशुश्रूषाफलेनापि बहूनि दिनानि यावत् मूर्च्छायाः विमुक्तिं न प्राप्नोति अन्नमय्यः । एकस्मिन् दिने “प्रभो प्रभो” इति दैवम् उद्दिश्य उच्चैः आक्रन्दनं कुर्वन् उत्थानं करोति अन्नमय्यः ।

माता - “वत्स, किं जातम्” इति पृष्टे सति अन्नमय्यः एवं रागयुक्तं गानम् आरभत ।

मया स्वप्नदर्शनं प्राप्तम्, अधुना एव मया ज्ञानोदयः जातः ।
स्वप्ने सर्वलोकविधाता श्रीवेङ्कटेश्वरः मया दृष्टः ।
अतिशयेन विराजमानः शेषाद्रिपर्वतः मया दृष्टः ।
अतुल्यमानशक्तियुक्तशिखराणि मया दृष्टानि ।
शतकोटिसूर्यसमप्रभः देवः मया दृष्टः ।
चतुर्भुजमहाविष्णोः दर्शने झटिति स्वप्नात् उत्थानं कृतम् मया ।
सुलभेतरशङ्खचक्रयोः दर्शनं पार्श्वद्वये मया प्राप्तम् ।
असमानः अभयहस्तः मया दृष्टः ।


ISSN: 2320-740X

श्रीवेङ्कटाचलाधिपं साक्षात् द्रष्टुं मया योग्यता प्राप्ता । हरिरूपगुरुं प्राप्तवान्, तदा अहम् उत्थानं कृतवान् ।

एतादृश्याः घटनायाः आरभ्य अन्नमय्यः सर्वदा दैवचिन्तनेनैव कालं यापयन् 95 वयःपर्यन्तम् आजीवनं यावत् गीतानि रचितवान् । तैरुत्तरकाले रचितानि गीतानि नैतिक - धार्मिकविषयकानि प्रतिफलन्ति । तालपत्रेषु लिखितानि सर्वाणि सङ्कीर्तनानि राजा सालुवनरसिंहः अन्नमाचार्यस्य पुत्रः च अनन्तरकाले ताम्रपत्रेषु पुनर्लिखित्वा लोकार्पणं कृतवन्तौ ।

कर्णाटकसङ्गीतविद्वांसः सर्वेऽपि अन्नमाचार्यस्य गीतगायनं कृत्वा एव यशस्विनोऽभवन् ।

**********

# अविस्मरणीयाः अद्वैताचार्याः

सानुकुमारपतिः

**आचार्यद्वितीयवर्षम्**

आस्तिकदर्शनेषु अन्यतमं स्थानं भजते मीमांसादर्शनम् । तस्मिन् मीमांसादर्शने पूर्वोत्तरभेदेन द्वौ भागौ भवतः । तत्रत्यम् उत्तरमीमांसादर्शनमेव वेदान्त इति नाम्ना अभिधीयते। तत्र अद्वैतवेदान्तशास्त्रस्य एव वेदान्तपदवाच्यत्वम् अङ्गीक्रियते । यतो हि अद्वैतं ब्रह्म एव सर्ववेदान्तेषु प्रतिपाद्यं भवति। वेदान्तशास्त्रस्य परिचयस्तु अद्यत्वे शङ्कराचार्याणां नाम्नैव तनोति । न केवलं शङ्कराचार्याः अपि तु अन्येऽपि बहवः आचार्याः वेदान्तार्थान् सर्वानपि स्वग्रन्थैः सर्वसमक्षं सुष्ठु उपपादितवन्तः । शङ्कराचार्यादपि च बहोः कालात् पूर्वं नैके विद्वांसः यथा वेदान्ततत्वं विज्ञाय ब्रह्मतत्वं प्रतिपादयामासुः, तथा तदनु अपि वेदान्तमर्मज्ञाः बहवः अद्वैतं ब्रह्मलक्षणं, तत्प्रमाणानि च उपपादितवन्तः । एतादृशानां ब्रह्मविदां वेदान्तीनां बहूनां विषये अस्माकम् अनेकेषां सम्यग्धीर्नास्ति इत्यतः गुरूणां तेषां विषये किञ्चिद् विज्ञाप्यते लेखेऽस्मिन्- वेदान्तसम्प्रदाये व्यासशङ्करयोरेव अधिकमाहात्म्यमस्ति इत्यतः तौ आदौ आलोच्येते । तेषां च माहात्म्यं वर्ण्यते--

**शङ्करं शङ्कराचार्यं केशवं बादरायणम् । सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनःपुनः। इति ॥**

अर्थात् भगवतः शिवस्यैव अपरं रूपं शङ्कराचार्यं तथा केशवरूपं कृष्णं बादरायणं पुनःपुनः वन्दे इति।

**शङ्कराचार्यः-** परम्पराप्राप्ते वेदान्तसम्प्रदाये अद्वैतसिद्धान्तव्याख्यातारूपेण श्रीमतः शंकराचार्यस्य नाम आदौ ग्रहणीयं वर्तते । उपनिषदादिप्रस्थानत्रयेऽपि तस्य भाष्यं सुप्रसिद्धमेव । न केवलं भारते अपि तु समग्रे भूभारते वेदान्तत्वज्ञरूपेण सः ख्यातः अस्ति । आगमनिगमशास्त्रयोः सः निष्णातः समभवत् । उपासनविषये अयं शङ्कराचार्यः आगममार्गमेव स्वीचकार। अस्य दक्षिणामूर्तिस्तोत्रस्य व्याख्यावसरे तच्छिश्षेण सुरेश्वराचार्येणापि आगमानुरागः प्रदर्शितः । ज्ञानोपासने

उभयमपि तत्तदधिकारिणां कृते उपदिष्टवान् एषः । ‘श्रीविद्यार्णवः’ इत्यप्रसिद्धे ग्रन्थे अनेन प्रदर्शितं ज्ञानोपासनामार्गभेदमङ्गीकृत्य गुरुपरम्पराविषये वर्णितं वर्तते ।

**व्यासः-** भगवान् व्यास एव उत्तरमीमांसाशास्त्रस्य सूत्रकारः । अष्टादशपुराणानां रचयिता कृष्णद्वैपायननाम्ना ज्ञातः व्यास एव बादरायणव्यास इति । ब्रह्मसूत्रकर्ता व्यासः महाभारतकर्तुः व्यासाद् अभिन्न इति च साम्प्रदायिकाः । अस्य कालनिर्णयः यद्यपि कष्टकरः तथापि 400 AD इति अनुमातुं शक्यते । शारीरकमीमांसायाः वेदान्तमीमांसायाः वा प्रवर्तकः स एव इति । ‘सिद्धान्तदर्शनम्’ इत्यपि अपरः कश्चन ग्रन्थ एतेषामेव ।

**गोविन्दभगवत्पादः-** सिद्धः महात्मा गोविन्दभगवत्पादः शङ्कराचार्यस्यापि गुरुरासीदिति विज्ञेयमस्माभिः । ‘रसहृदय’-नामकग्रन्थस्य कर्ता रसेश्वरसम्प्रदायान्तर्भुक्तः अयं रसायनप्रक्रियायां सिद्धिं अलभत् ।

**गौडपादः-** गोविन्दाचार्यस्य गुरुः, आचार्यशङ्करस्यापि परमगुरुः गौडपादः ‘वेदान्तशिरोमणिः’ इति नाम्ना ख्यातः आसीत् । एषः गौडपादः माण्डुक्यकारिकायाः व्याख्याता इति समेऽपि जानीमः । श्रीविद्याविषयकं ‘श्रीविद्यारत्नसूत्रमिति’ ग्रन्थस्य तथा ‘सुभगोदयस्तुतिः’ इति स्तोत्रस्यापि कर्ता अयमेव ।

तथा अन्येषां बहूनाम् आचार्याणां नामानि अपि श्रूयन्ते । यथा--- काशकृत्स्नः, कार्ष्णाजिनिः, आश्मरथ्यः, औडुलोमिः, जैमिनिः, वादरिः, आत्रेयः, भर्तृप्रपञ्चः, ब्रह्मनन्दी, टङ्कः, भारुचिः, उपवर्षः, बोधायनः, भर्तृहरिः, सुन्दरपाण्ड्यः, द्रमिडाचार्यः, ब्रह्मद्त्तः इत्येते प्रमुखाः ।

**ब्रह्मनन्दी-** आचार्यः मधुसूदनसरस्वती संक्षेपशारीरकस्य 3।217तमश्लोकटीकायाम् अस्य नाम स्मृतवान् । छान्दोग्योपनिषदः वाक्यकाररूपेण अस्य प्रसिद्धिः आसीदिति ज्ञायते ।

**टङ्कः-** नैके इतिहासविदः मन्यन्ते यत् ब्रह्मनन्दी तथा टङ्कः समान एव, न तु भिन्नः कश्चन इति। रामानुजभाष्योक्तदिशा टङ्कः वैष्णवधर्मावलम्बी आसीदिति वक्तुं शक्यते ।

**भारुचिः-** प्राचीनाचार्येषु वेदान्तविद्वत्सु भारुचिः धर्मशास्त्रोपरि पण्डितः आसीत् । विष्णुकृते धर्मसूत्रे अनेन टीकापि विरचिता। क्रीस्तीयनवमशतके च अस्य जन्म इति ज्ञायते ।

**उपवर्षः-** वृत्तिकाररूपेणैव अस्य प्रसिद्धिरासीद् पुरा। शाङ्करशाबरभाष्ययोः नामोल्लेखः अस्ति अस्य । यथा “शब्द इति चेन्नातःप्रभवात् प्रत्यक्षानुमानाभ्याम्” इति सूत्रस्य भाष्ये “वर्णा एव तु शब्दः इति भगवान् उपवर्षः” । एवं शाबरभाष्येऽपि “गकारौकारविसर्जनीया इति भगवान् उपवर्षः” इत्येवं दृश्यते। मरर्षिपाणिनेः गुरुरपि एषः उपवर्षाचार्यः ।

**भर्तृमित्रः-** ऐतिहासिकाः सर्वेऽपि प्रायः भर्तृमित्रस्य नाम जानन्ति इति मन्ये । जयन्तकृत-न्यायमञ्जर्यां तथा वैष्णवदिक्पालस्य यामुनमुनेः ‘सिद्धित्रयम्’ इति ग्रन्थे अस्योल्लेखः अस्ति। कुमारिलभट्टः अपि श्लोकवार्तिके एनं


ISSN: 2320-740X

स्मरन्ति ।

**बोधायनः-** ब्रह्मसूत्रवृत्तिकारत्वेन अस्याचार्यस्य नाम स्मर्यते । 'कृतकोटि' इति वृत्तिग्रन्थः अनेन विरचितः । रामानुजाचार्यः अपि वेदान्तभाष्ये क्वचिद् अस्य वृत्तिवचनम् उद्धरति इति दृश्यते ।

**भर्तृहरिः-** स्फोटवादनिरुपकः शब्दब्रह्मवादी अयं यद्यपि वैयाकरणः, तथापि वेदान्ते एतस्य महती गतिरासीत् । अयम् अवैदिकः इति भामतीकारः वाचस्पतिमिश्रः कथयति । किन्तु प्रत्यक्स्वरूपाचार्यः चित्सुखीभाष्यस्य टीकायां नयनप्रसादिन्याम् एतं 'ब्रह्मवित्प्रकाण्ड' इति नाम्ना ध्यायन्ति । धातुसमीक्षा इति पुस्तकमेषः एव प्रकाशितवान् यद् इदानीं नैव लभ्यते ।

**सुन्दरपाण्ड्यः-** सुन्दरपाण्ड्यचार्यस्य कारिकात्रयं ब्रह्मसूत्रभाष्ये(1.1.4) द्वितीयवर्णकान्ते आचार्यशंकरपादेन उल्लिखितं वर्तते । परन्तु ताः कारिकाः कुत्रोपलभ्यन्ते इति न ज्ञायते ।

**द्रमिडाचार्य/द्रविडाचार्यः-** उपनिषद्भाष्यकर्तृषु प्राचीनेषु द्रमिडाचार्यः अन्यतमः । शङ्ककराचार्योऽपि वृहदारण्यकोपनिषदः कण्डिकाभाष्ये एनं 'सम्प्रदायविद्' इति आख्यायते । एतेन कथिताः सुललितकथाः विभिन्नभाष्येषु उद्धरन्ति नैके आचार्याः । श्रीभाष्ये "द्रमिडभाष्यकारश्च देवतासायुज्यात्" तथा "भाष्यकृता व्याख्यातं च......." इत्यादिवाक्येन अस्य प्रशस्तिः सम्पादिता वर्तते ।

**ब्रह्मदत्तः-** एषोऽपि वेदान्ती एव। ब्रह्मसूत्रोपरि अनेन विरचितं भाष्यमस्ति इति श्रूयते । एतस्य मते केवलं ब्रह्मैव नित्यः, सत्यपदार्थः, जीवप्रपञ्चादयस्तु अनित्याः इति । ते ब्रह्मणः उत्पद्यन्ते विलयन्ति च । वेदान्तदेशिकाचार्योऽपि तत्वमुक्तकलापस्य टीकायाम् एतन्मतं वर्णयन्ति ।

**कतञ्जलिः-** गौडपादस्य गुरुः  अयमाचार्यः अन्तराले स्थित्वा स्वच्छात्रान् अध्यापयति स्म इति जनश्रुतिः । व्यासपुत्र-शुकदेवस्यापि शिष्यः एषः इत्यपि श्रूयते ।

**पद्मपादाचार्यः-** व्यासकृतस्य ब्रह्मसूत्रस्य शाङ्करभाष्योपरि रचितायाः पञ्चपादिकायाः रचयिता पद्मपादाचार्यः शंकरभगवत्पादस्यैव अन्तेवासी आसीत् । प्रपञ्चसारग्रन्थस्य टीकां रचयन्नपि पद्मपादाचार्यः प्रसिद्धिम् अवाप्नोत् इति विदितम् ।

**मण्डनमिश्रः-** शङ्करप्राग्युगे वैयाकरण-पूर्वमीमांसाप्रभावेन प्रभाविताद्वैतवादस्य विशिष्टाचार्यः मण्डनमिश्रः । सः अनन्तरं भगवत्पादस्य शङ्करस्य शिष्यत्वं प्राप्य सुरेश्वराचार्य इति नाम्ना शाङ्करमतं सर्वत्र प्रचारयामास । बृहदारण्यकभाष्यवार्तिकं, तैत्तिरीयभाष्यवार्तिकं, पञ्चीकरणवार्तिकं, नैष्कर्णसिद्धिः इत्यादयः  प्रामाणिकग्रन्थाः ततः तेन विरचिताः । गृहस्थाश्रमे आचार्यः मण्डनमिश्रः कुमारिलभट्टस्य शिष्यः, सम्बन्धीश्च बभूव इति ख्यातिः ।

**तोटकाचार्यः-** शङ्करभगवत्पादशिष्येष्वन्यतमोऽयं तोटकाचार्यः उदङ्कापरनामा-शिलादपुत्र इति शङ्करविजयात् ज्ञायते । तोटकवृत्तघटितग्रन्थप्रणयितृत्वेन अयं तोटकनाम्नाऽपि ख्यातः सञ्जातः । श्रुतिसारसमुद्धरणमिति एतेन विरचितः प्रकरणग्रन्थः गुरुशिष्यकथाश्रवणपद्धत्या अद्वैतसिद्धान्तान् प्रदर्शयन् 179 संख्याकैः पद्यैः समलङ्कृतः अस्ति ।

**हस्तामलकाचार्यः-** पूर्वमीमांसापण्डितस्य प्रभाकरस्य पुत्रोऽयं हस्तामलकः उत्तरमीमांसायां गतिम् अलभत । भगवतः शङ्काराचार्यस्य साक्षाद् शिष्यः आसीत् अयं हस्तामलकाचार्यः । अनुभववेदान्तप्रकरणम्, विवेकमञ्जरी इत्याख्यौ अस्य ग्रन्थसम्पदौ ।

**वाचस्पतिमिश्रः-** शाङ्करभाष्योपरि भामतीनाम्नीं टीकां विरच्य वाचस्पतिमिश्रः लोकप्रसिद्धिम् अलभत् । महान् विद्वान् आचार्यः वाचस्पतिमिश्र सर्वेष्वपि शास्त्रेषु अप्रतिहतगतिमान् आसीत्। तस्य शास्त्रज्ञानमभिलक्ष्य एव सः सर्वतन्त्रस्वतन्त्रः इति वक्तुं पारयामः ।

**अप्पयदीक्षितः-** प्रधानतया साहित्यिकः अप्पयदीक्षितः साहित्ये बहून्यपि प्रामाण्यपुस्तकानि विरच्य स्वबुद्धिशुद्ध्यर्थं अद्वैतशास्त्रे गतिं कामयामास पितुः सकाशं गत्वा । पित्रा अद्वैतशास्त्रे पाठिते सति अद्वैतप्रपञ्चात् विज्ञातञ्चार्थं अप्पयदीक्षितः सिद्धान्तलेशसंग्रहाख्ये प्रामाण्ये ग्रन्थे सुष्ठु प्रतिपादितयामासः ।

**मधुसूदनसरस्वती-** कमलजनयन इत्येवं नाम्ना साक्षाद् ज्ञानस्वरूपः मधुसूदनाचार्यः ख्यातः आसीत् । बङ्गीयः विश्वेश्वरसरस्वतीमहाराजः एनं मधुसूदनसरस्वती इत्यभिधानेन भूषयामास । एतस्याचार्यस्य पाण्डित्यविषये एका गाथा श्रूयते—

**वेत्ति पारं सरस्वत्याः मधुसूदनसरस्वती। मधुसूदनसरस्वत्याः पारं वेत्ति सरस्वती। इति ॥**

बङ्गदेशे स्वज्ञानप्रभया रत्नमिव भाति स्म एते । प्रसिद्धनैयायिकः गदाधरभट्टाचार्योऽपि अस्य गुणग्राही आसीत् । अद्वैतसिद्धिः, अद्वैतरत्नरक्षणम्, वेदान्तकल्पलतिका, सिद्धान्तबिन्दुः इत्याद्याः एतेषां कृतयः ।

**सर्वज्ञात्ममुणिः-** कामकोटिपीठाधिष्ठाता विद्वद्मणिः सर्वज्ञात्ममुणिः देवेश्वराचार्यस्य शिष्यः आसीत् । समन्वयाविरोधसाधनफलाख्यैश्चतुर्विधाध्यायैः सनन्वितः संक्षेपशारीरकम् इति कश्चन प्रकरणग्रन्थः एतेन विरचितः । तथा पञ्चप्रक्रिया, प्रमाणलक्षणम्, इत्यादीनाम् अपि ग्रन्थानां कर्ता अयं सर्वज्ञात्मामुणिः वेदान्तवाङ्मये सुप्रसिद्ध एव ।

**आनन्दबोधाचार्यः-** आत्मावासशिष्यः,विमुक्तात्मशिष्यः वा एषः आनन्दबोधाचार्यः अद्वैतशास्त्रे महान् पण्डितः आसीत् । न्यायमकरन्दः, न्यायदीपावलिः, प्रमाणमाला इत्यादिग्रन्थानां प्रणेता भवति एषः आचार्यः । नैयायिकाभिमतान् खण्डनपुरःसरं वाचस्पतिमिश्र-मण्डनमिश्रादीनां मतं समर्थयति एषः स्वग्रन्थेषु ।

**श्रीहर्षः-** कान्यकुब्जदेशवासी अयं श्रीहर्षः श्रीहीरपण्डित-मामल्लदेव्योः पुत्रः आसीत् । चिन्तामणिमन्त्रजपेन सिद्धिं


ISSN: 2320-740X

वाग्वैभवं च सम्प्राप्य मूलतः साहित्यिकः भूत्वाऽपि एषः अद्वैतशास्त्रस्य यशः वर्धयामास । खण्डनखण्डखाद्यम् इति असामान्यो ग्रन्थः अस्यैव कृतिः । तत्र शून्यवादिमतं नैयायिकमतं च खण्डयन् अद्वैतमतं स्फुटयति श्रीहर्षः ।

**अनुभूतिस्वरूपाचार्यः-** न्यायवेदान्तव्याकरणशास्त्रेषु निष्णातोऽयं आनन्दगिरि-प्रज्ञानानन्द-नरेन्द्रनगर्याणां गुरुरासीत् । इष्टसिद्धिविवरणम्, प्रकटार्थविवरणम्, गौडपादीयभाष्यटीप्पणी इत्यादीनि अमूल्यपुस्तकानि प्रणिनाय ।

**चित्सुखाचार्यः-** ज्ञानघनाचार्यस्य शिष्योऽयं ज्ञानोत्तमः चित्सुखाचार्यः । आनन्दगिरे दीक्षागुरुः, शुद्धानन्दस्य च गुरुः एषः। अधिकरणमञ्जरी, अधिकरणसङ्गतिः, खण्डनभावप्रकाशिका, तत्वप्रदीपिका, भावद्योतनिका, वेदान्तसिद्धान्त-कारिकमञ्जरी, न्यायमकनन्दटीका इत्यादयः बहवः ग्रन्था एतेन विरचिताः ।

**विद्यारण्यः-** सन्यासग्रहणात् प्राग् माधवाचार्यनाम्ना प्रसिद्धः अयं विद्यारण्यमुणिः शृङ्गगिरिमठाधीशः आसीत् इति शृङ्गगिरिगुरुपरम्परादर्शनेन ज्ञायते । पञ्चदशी, विद्यारत्नदीपिका, जीवन्मुक्तिविवेकः, अपरोक्षानुभूतिदीपिका, उपनिषत्कारिका इत्यादयः अद्वैतवेदान्तशास्त्रस्य परमोपाकारविधायकाः ग्रन्थाः एतेन सरलया शैल्या विरचिताः सन्ति ।

अद्वैतवेदान्तशास्त्रे एवं बहवोऽपि विद्वांशः स्वकृतिभिः बहुभिः रत्नसमग्रन्थमणिभिः अद्वैतप्रपञ्चं वर्धयामासुः । ते च अनितरसाधारणकृतयः अद्यत्वे अनेके न प्राप्यन्ते । ये च विद्वांशः अद्यापि अस्माभि ज्ञातुं शक्याः, तेषां विषये स्वप्रयत्नेन इतोऽपि ज्ञानं लब्ध्वा फलभाजः भवेम । तेषां याश्च कृतयः अस्माभिः ज्ञानराशिरूपेण ग्रहीतुं शक्याः, ताः वयम् आस्वादयामः । ये अद्वैतपरकाः ग्रन्थाः च न प्राप्यन्ते अस्मिन् काले, तेषां च प्राप्तये अनुसन्धित्सवः भवामो वयमिति । गुरुपरम्परादीनां ज्ञानेन च तदानीन्तनकालपठनपाठनशैलीरपि ज्ञातुं शक्नुमः । तेन अस्माकं अल्पधीरपि दूरिभविष्यति इति मन्ये ।

एवमत्र उपपादितानां शंकराचार्यांणां गुरुपरम्परायाः दशनामीसम्प्रदायः इति नाम्नापि प्रसिद्धिरस्ति । तत्र—
नारायणं पद्मभवं वशिष्ठं शक्तिं च तत्पुत्रपरासरं च । व्यासं शुकं गौडपादं महान्तं, गोविन्दयोगीन्द्रमथास्य शिष्यम् ॥
श्रीमच्छाङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम् । तं त्रोटकं वार्तिककारमन्यानस्मद्गुरुन् सन्तनमानतोस्मि ॥

इत्यादिमङ्गलमन्त्रैः तेषां गुरुपरम्परा अस्माभिः किञ्चिद् ज्ञातुं शक्या । सा च परम्परा इदानीमपि भारतीतीर्थक्रमेण अविच्छिन्ना अस्ति इति । एतादृशाज्ञातविषया अग्रेऽपि अस्माभिरेव अनुसन्धानं कृत्वा जनसमक्षं स्थापयितुं शक्यन्ते । तदैव एतेषाम् अविस्मरणीयानां ब्रह्मविदां ज्ञानेन धन्याः भवेयम् इति शम् ।

**********

# श्रीगदाधरभट्टाचार्यः

रोझीं बन्चोर्
**आचार्यद्वितीयवर्षम्**

अयं श्रीगदाधरभट्टाचार्यो न्यायशास्त्रस्य महान् विद्वानासीत् । श्रीजीवाचार्यस्याऽत्मजः सन् बङ्गदेशनिवासी चापि श्रूयते । तथाऽयं श्रीभट्टाचार्यो बङ्गदेशीयोऽपि रेन्द्रकुलोत्पन्नः, पवनामण्डलान्तर्गत-'पक्ष्मीपाश'-नामक ग्रामनिवासी च श्रूयते । केचन 'बोगडा' इति अस्य जनिन्देहां वदन्ति ।

श्रीभट्टाचार्यः नवद्वीपे हरिरामतर्कवागीशस्य सान्निध्यमवाप्य समस्तमपि न्यायशास्त्रमधीतवान् । अत एव प्रकाण्डनैयायिकोऽभूत् ।

अस्य जनिकालं सप्तदश ( १७वीं ) शताब्द्या मध्यकालं वदन्ति मनीषिणः । केचन विद्वांसः १६५० ईसबीयकालीनमेनं प्रवदन्ति ।

श्रीहरिरामतर्कवागीशस्य स्वर्गगमनानन्तरं युवावस्थायामेव तस्मिन्नेव स्थानेऽध्यापनकार्यार्थमस्य नियुक्तिर्जाता । परन्त्वस्य महानुभावस्याऽध्यापनकार्यतः छात्राः सर्वथाऽसन्तुष्टिं गतास्तेऽध्येतुमेव नहि कामयन्ते स्म ।

अतोऽयं महानुभावो विद्वान् स्वीयाध्यापनस्य सम्पुष्टिं कर्तुकामोऽरण्ये प्रान्तरे वापि गत्वा तत्र लता-वृक्षादीन् सम्बोध्य पदार्थोपदेशमध्यापनदृष्ट्याऽहर्निशमनिशं विहितवान् आसीत् । तथा न्यायशास्त्रीयेषु कठिनस्थलेषु शास्त्रार्थरूपेण तैरेव लतावृक्षादिभिः सह विचारचर्चामपि विदधानः आसीत् । गच्छन्तः समागच्छन्तश्च छात्रा अध्यापकाश्च तदीयान् विचारान् अध्यापनञ्च शृण्वन्त आसन् । ततश्च ते सर्वेऽपि न्यायशास्त्रपदार्थानां सद्रूपतां विज्ञाय पुनरस्याऽध्यापनकार्यतः सर्वथा समाकृष्टाः सन्तोऽस्य पार्श्वेऽध्येतुं समागतवन्तः । इत्थञ्चाऽयं महानुभावः शतशोऽन्तेवासिनोऽध्यापयामास ।

महान् विद्वान् श्रीभट्टाचार्यश्चलन्, भ्रमन्, पुरीषमुत्सृजन्, स्नानं प्रकुर्वन् सर्वदैव काले पदार्थं चिन्तयन्नेवाऽहर्निशमासीत् ।

अस्य महानुभवस्य विषये चास्त्येका किम्बदन्ती यदेकदाऽस्याऽऽत्मजाया विवाहः समुपस्थितो जातः । वरसहिता वरयात्रिणोऽपि समागताः । गोधूलिनामकं वैवाहिकं लग्नमपि समाप्तिमगमत् । परन्त्वयं विद्वान् शौचाऽऽलयस्थाने सन्तिष्ठमानः पदार्थमनुचिन्तयत् शास्त्रपङ्क्तिं वा विचारयन्नेव सर्वमपि लग्नकालं व्यतीतवान् । छात्राश्च सर्वेऽपीतस्ततो गुरुवरं समन्वेष्टुकामाः परिभ्रमन्ति स्म ।


ISSN: 2320-740X

गुरुवरा इतो गता इति जनैः कथ्यमाने छात्रास्तस्यामेव दिशि गतवन्तः । कियद् दूरमेव गतास्ते छात्राः किं पश्यन्ति यत् गुरवः कस्मिंश्चिदेकान्तस्थाने वृक्षास्याऽधस्ताच्च सन्ति सन्तिष्ठमानाः, पुरीषञ्चोत्सृजन्ति ।

छात्रा अपि दर्शनानन्तरमेव दूरतः प्रोच्चारयन्ति-भो गुरवः ! लग्नकालस्तु समाप्तिं गतवान् । गुरवो वदन्ति यत् – 'लग्नकालस्तु पुनरप्यागमिष्यति, परन्तु षड्भिर्मासैश्चिन्तनविषयतां गतेयं पक्तिंस्त्वद्यैव ( इदानीमेव ) स्मृतिविषयतां गतेति महान् हर्षप्रकर्षः' । इति ।

इमे च दार्शनिकाः विद्वांसो वीतरागास्तपोधनाः बहिर्मुखतां गताःसन्तोऽन्तर्मुखवृत्तिमापन्नाः स्वीयं जीवनं पदार्थचिन्तनपुरःसरं यापयामासुः । एतैः लिखिता ग्रन्थाः निम्ननिर्दिष्टाः । तथाहि-

१. तत्त्वचिन्तामणौ - आलोकटीका ।

२. न्यायकुसुमाञ्जलौ - टीका ।

३. आत्मतत्त्वविवेकदीधितेः टीका ।

४. तत्त्वचिन्तामणौ – दीधितिप्रकाशिका ।

५. मुक्तावल्यां – टीका ।

६. दुर्गासप्तशती – टीका ।

७. ब्रह्मनिर्णयः ।

८. इतोऽतिरिक्ताः सन्ति चतुःषष्टिसंख्याकाः शक्तिवादादयो वादग्रन्था अपि । तथाहि –

१ प्रामाण्यवादः – ज्ञानगतप्रामाण्यविचारप्रधानग्रन्थः ।

२ व्यत्पत्तिवादः – विभक्त्यर्थनिर्णयप्रधानग्रन्थः ।

३ शक्तिवादः – पद-पदार्थयोः शक्तिनिर्णयपरग्रन्थः ।

इमे च प्रागुक्ता वादादयो दश वादान्ता ग्रन्थाः सन्ति अतीवप्रसिद्धिं प्राप्ताः ग्रन्थाः । अस्य सम्बन्धे चास्तीयमुक्तिः

"यो गौतमीयं भुवि षोडशात्मकं , वादैश्चतुःषष्टिमितं समन्वितम् ।
चकार तं तार्किकचक्रवर्तिनं , गदाधरं गण्यगुणं न वेत्ति कः" ॥

--संस्कृतसाहित्येतिहासः ।

अनेन पद्यात्मकेन श्लोकेन श्रीगदधरभट्टाचार्यविनिर्मिताः सन्ति वादान्ताः चतु षष्टि ( ६४ ) संख्याकाः ग्रन्था इति । 'काव्यप्रकाश'-ग्रन्थे रहस्यमप्यस्ति श्रीगदाधरलिखितो ग्रन्थ इति ।

एवं कारणतावादः , मुक्तिवादः , विषयतावादः , सादृश्यवादः , अवच्छेदवादः , पर्याप्तिवादः, आख्यातवादः, नञर्थवादः , स्मृतिसंस्कारवादः , कारकवादः , इत्यादयो वादाः सन्ति ।

 

# वैयाकरणानां काव्यतत्त्वज्ञानां च मते ध्वनिपदार्थः

मोहित जोशी
**आचार्यप्रथमवर्षम्**

यद्यपि संस्कृतवाङ्मये बहूनि शास्त्राणि मानवजीवनस्य मार्गदर्शकानि वर्तन्त एव । तथापि एकस्य शास्त्रस्य तत्त्वानि शास्त्रान्तरस्य तत्त्वेभ्यो भिद्यन्ते । तेषु ध्वनिविचारोऽपि अन्यतमः ।

काव्यशास्त्रदृष्ट्या ध्वनिः व्यञ्जनावृत्त्यधीनः । किन्तु सर्वाणि शास्त्राणि व्यञ्जनावृत्तिं नाङ्गीकुर्वन्ति । न्याय-मीमांसादिशास्त्रेषु व्यञ्जनावृत्तेरङ्गीकारः नास्ति । किन्तु वैयाकरणाः व्यञ्जनामङ्गीकुर्वन्ति । तस्य कारणं तु व्याकरणशास्त्रे वर्तमानः स्फोटवादः, यः साहित्यशास्त्रस्य ध्वनितत्त्वस्य मूलमित्यङ्गीक्रियते । अत एव ध्वनितत्त्वप्रवर्तकत्वेन प्रथितानन्दवर्धनेन **'बुधैर्वैयाकरणैः'** इति सगौरवमुक्तम् । तदनन्तरं तस्यानुयायिनो मम्मटादयोऽपि ध्वनितत्त्वं स्वाभिप्रायानुसारं न्यरूपयन् ।

यः अर्थबोधकस्फोटः एवं तस्य आश्रयभूतः शब्दः अत्र अनयोः द्वयोः व्यङ्ग्यव्यञ्जकभावः सम्बन्धः । अर्थात् 'शब्दः' स्फोटं सूचयति एवं स्फोटः अर्थप्रतीतिं कारयति । सः स्फोटरूपपदार्थः शब्देन सूच्यते इति निष्कर्षः । तदर्थं तद्व्यञ्जकशब्दः वैयाकरणैः ध्वनिः इति नाम्ना व्यवह्रियते । अधुना उत्तमकाव्यं दृश्यते चेत् – अत्र वाच्यार्थस्य गौणरूपस्थानं दत्तमस्ति इत्युक्ते न्यग्भावितमस्ति । एवं व्यङ्ग्यार्थस्य प्राधान्यं प्रतिपाद्यते प्रधानभूतव्यङ्ग्यार्थं प्रतिपादयितुं काव्योक्तशब्दार्थयुगलसमूहः स्वीक्रियते । अतः प्रधानभूतव्यङ्ग्यार्थस्य अभिव्यक्तौ उत्तमकाव्यस्य शब्दार्थस्य व्याकरणशास्त्रशब्देन सह समानता दृश्यते । तदर्थम् आलङ्कारिकैः वैयाकरणानां स्फोटरूपवादं स्वीकृत्य उत्तमकाव्यरूपस्य शब्दार्थयुगलस्य ध्वनिः इति संज्ञा कथिता । एतदतिरिच्य व्यङ्ग्यार्थः एव व्यञ्जनाव्यापारार्थेऽपि ध्वनिशब्दस्य व्यवहारः अलङ्कारशास्त्रे कृतोऽस्ति ।

ध्वनिशब्दस्य व्युत्पत्तिः इत्थं प्रदर्शिता –

१. ध्वनति प्रकाशयति व्यङ्ग्यम् इति ध्वनिः – काव्यम् ।
२. ध्वन्यते व्यज्यते शब्दार्थाभ्याम् इति ध्वनिः – व्यङ्ग्यार्थः ।
३. ध्वन्यते व्यज्यते व्यङ्ग्यं येन इति ध्वनिः – व्यञ्जनाव्यापारः ।

एवं काव्यस्य ध्वनिपदार्थः वैयाकरणानां ध्वनिपदार्थात्भिन्नः इति । वैयाकरणैः केवलं शब्दः ध्वनिः इत्युच्यते । परन्तु आलङ्कारिकैः यः ध्वनिः उच्यते सः शब्दार्थसमूहः । एतादृशं व्यङ्ग्यव्यञ्जकक्षमशब्दार्थयुगलं ध्वन्यालोककारेण शब्दार्थरूपम् अङ्गीकृतमस्ति ।

 ISSN: 2320-740X

**सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन । यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ॥**[1]

तैः महाकविभिः प्रयुक्तं यत् शब्दार्थात्सत्क्रियमाणं काव्यमेव ध्वनिकाव्यम् इति ।

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ । व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥**[2]

ध्वन्यालोककारेण या कारिका निर्दिष्टा, तस्याः कारिकायाः अनुवादः मम्मटभट्टेन स्वस्य काव्यप्रकाशे इत्थं प्रतिपादितम् –

**इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः**

ध्वनिरूपस्फोटस्य परिचयः –

वैयाकरणानां यः स्फोटः (शब्दः) अस्ति सः पाणिनीयव्याकरणस्य मुख्याधारभूतः अस्ति । केषाञ्चन वर्णानाम् उच्चारणात् यः अर्थः उपस्थितः भवति, सः अर्थः वर्णानां भवितुं नार्हति । एवं यदि वर्णाः अर्थबोधकाः भवन्तीति उच्यते चेत्तत्र एवं विचार्यते यत् प्रत्येकस्माद्वर्णात् अर्थबोधः भवति उत वर्णसमूहात् अर्थबोधः जायते । यदि प्रत्येकवर्णात् अर्थबोधः भवति चेत् 'घट' इत्यत्र केवलं 'घ' इत्येकवर्णोच्चारणेनापि कम्बुग्रीवादिमद्रूपार्थस्य बोधे, अन्येषाम् उच्चारणं व्यर्थं स्यात् । परन्तु एवं भवितुं नार्हति तस्मात् पक्षोऽयमस्वीकार्यः । एवमेव वर्णसमूहात् अपि अर्थबोधः नैव सम्भवति । किमर्थमिति चेत् एककालिकवर्णानां समूहः न सम्भवति । कुतः इति चेत् यथा अभियुक्तवचनम् अस्ति **"योग्यविभुस्वोत्तरविभुं नाशयति"** अतः घकारस्य उच्चारणसमये घकारः तिष्ठति चेदपि अकारटकारयोः उच्चारणसमये घकारो नष्टो भवति, अतः नष्टस्य घकारस्य बोधजनकत्वं कथं वा भवेत् । समूहः तु समकालिकवर्णानामेव भवति । एवं प्रकारेण वर्णैः अर्थबोधः न सम्भवत्येव । अतः अर्थबोधार्थम् अन्यत् किमपि कारणं कल्प्यं भवति । स च स्फोटात्मकः इति वैयाकरणाः । एवञ्च अर्थापत्तिप्रमाणेन यद् ज्ञायते स एव स्फोटः वर्णात्मकतया सावयवेन अस्ति तेषाम् अनित्यत्त्वम्, परन्तु स्फोटात्मकशब्दः निरवयवः इत्यतः अस्ति अस्य नित्यत्त्वम् ।

वैयाकरणैः "अर्थप्रत्यायकनित्यत्वमेव स्फोटः इति यदुच्यते तस्य कारणद्वयम् ।

१. स्फुट्यते असौ इति स्फोटः स च वर्णैः अभिव्यज्यते अतः सः अर्थात्मकः स्फोटः ।
२. स्फुटति अर्थः यस्मात् सः शब्दात्मकः स्फोटः ।

एवंप्रकारेण वैयाकरणैः स्फोटरूपशब्दस्य व्युत्पत्तिद्वयं प्रतिपाद्य तस्य सङ्गतिः इत्थं प्रदर्शिता । एकं तु वर्णैः अपरं तु अर्थेन इति । स्फोटः यैः वर्णैः व्यज्यते ते वर्णाः ध्वनिः इति नाम्ना उच्यन्ते इति भर्तृहरिणोक्तम् – ध्वनति स्फोटं व्यनक्ति इति ध्वनिः ।

---

[1] ध्व. लो. १/८

[2] ध्व. लो. १/१३

माधवाचार्यः सर्वदर्शनसङ्ग्रहे स्फोटस्य लक्षणम् एवमाह –

**वर्णातिरिक्तः वर्णाभिव्यङ्ग्यः अर्थप्रत्यायकः नित्यः शब्दः स्फोटः इति**

इदं नित्यं निरवयवस्फोटतत्त्वं वेदान्तस्य 'ब्रह्मतत्त्वात्' अभिन्नम् अस्ति । एवं जगतः एतदेव कारणमस्ति इति भर्तृहरिणोक्तम् –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥**[1]

**'शब्द इति चेत्'**[2] इत्यादिसूत्रस्य भाष्यकारेण भगवत्पादाचार्यशङ्करेण 'वर्णा एव तु शब्दः' इति कथितवतः भगवतः उपवर्षस्य पक्षं स्वीकृत्य स्फोटस्य खण्डनं कृतम् ।

मीमांसकैः भामहाद्यालङ्कारिकैः च वैयाकरणानां कल्पितस्फोटवादः तिरस्कृतः । भामहः भणति –

**"शपथैरपि चादेयं वचो न स्फोटवादिनाम् । नभःकुसुममस्तीति श्रद्दध्यात् कः सचेतनः"॥**[3]

**"इयन्त ईदृशा वर्णा ईदृगर्थाभिधायिनः । व्यवहाराय लोकस्य प्रागित्थं समयः कृतः"॥**

**स कूटस्थोऽनपायी च नादादन्यश्च कथ्यते । मन्दाः साङ्केतिकानर्थान् मन्यन्ते पारमार्थिकान्"॥**[4]

यथा – स्तम्भभित्तिभूमीः अतिरिच्य अन्यत् गृहं पृथक् वस्तु नास्ति तद्वदेव वर्णात् अतिरिच्य स्फोटात्मक शब्दस्य सम्भावना नास्त्येव ।

**"न चापि समुदायिभ्यः समुदायोऽतिरिच्यते । दारुभित्तिभुवोऽतीत्य किमन्यत् सद्म विद्यते"॥**

**"तस्मात् कूटस्थ इत्येषा शाब्दी वः कल्पना वृथा"।** [5]

**अनुशीलितग्रन्थसूची –**

१. काव्यप्रकाशः २. ध्वन्यालोकः ३. वाक्यपदीयम्

**********

[1] वा.प.१/१

[2] ब्र.सू.१/३/२८

[3] भामह. ६/१२

[4] भामह. ३/१३,१४

[5] भामह. ६/१०,११


ISSN: 2320-740X

# पञ्चमवेदः

वेङ्कटेशः जि.
**शिक्षाशास्त्रिद्वितीयवर्षम्**

आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम् । आहार्यं चन्द्रतारादि तं वन्दे सात्त्विकं शिवम् ॥

भारतदेशस्य संस्कृतवाङ्मयस्य च कीर्तिसौधस्य आधारस्तम्भा इव चत्वारः भरतनामानः कीर्तिशेषाः दृश्यन्ते । तेषु प्रथमः अभिज्ञानशाकुन्तलनाटकस्थः दुष्यन्तपुत्रः भरतः । द्वितीयः बाहुबलिसहोदरः भरतः । तृतीयः आदिकाव्ये रामायणनायकस्य श्रीरामस्य अनुजः भरतः । चतुर्थस्तु नाट्यशास्त्रस्य रचयिता भरतमुनिः । एवं चतुर्णाम् भरतानां जन्मभूमिः कर्मभूमिश्च अतः अयं देशः वर्तते भारतम् इति भारतस्य वैशिष्ट्यमिदम् । तथैव भरतमुनिना प्रणीतं भारतीयं नाट्यशास्त्रं नाट्यवेदः इति पञ्चमवेदत्वेन परिगण्यते ।

भारते प्रागैतिहासिके च काले नाट्यवेदः द्वादशसहस्रश्लोकात्मकः बृहद्ग्रन्थः आसीदिति श्रूयते । क्रिस्तशकात् पूर्वस्मिन् सहस्राब्दे भरतमुनिना पुरातननाट्यवेदात् सारमुद्धृत्य षट्सहस्रैः श्लोकैः षट्त्रिंशदध्यायैः च नाट्यशास्त्रं निबद्धम् । नाट्यशास्त्रमिदं न केवलं रङ्गकर्मनिर्देशने प्रवृत्तम्, नृत्यगीतवाद्यसाहित्यादीनां कलामूलानां सर्वशास्त्राणामपि महोपकारकमस्ति । अस्य नाट्यवेदस्य सृष्टिविषये काचित् कथा प्रसिद्धा – भरतमहामुनिः एकदा ब्रह्मणः मानसपुत्रैः सन्दृष्टः । तैः मानसपुत्रैः वेदसमानस्य नाट्यशास्त्रस्य रचनायाः कारणं किम् ? इति पृष्टः भरतमुनिः। सः स्वयम् अवोचत् यत् – पूर्वं कृतयुगसमनन्तरं त्रेतायुगस्याऽऽरम्भे कालक्रमेण लोकः कामक्रोधलोभेर्ष्यादीनाम् आधिक्यात् देवमानवानाम्, गन्धर्वाणाम्, यक्षानाम्, राक्षसानाम्, महासर्पाणाञ्च अधर्मपराणि कर्माणि पूरितानि आसन् । तदा देवेन्द्रेण सह सर्वे सुराः ब्रह्मणि निवेदनं कृतवन्तः यत् कामक्रोधलोभेर्ष्यादीनां विनाशाय कश्चन उपायः करणीयः इति । तदर्थं ब्रह्मदेवः सर्वान् नियन्त्रयितुं सर्वेषां प्रियस्य मनोरञ्जनमयस्य, विनोदमयस्य, गाम्भीर्यमयस्य च नाट्यवेदस्य सृष्टिः अनिवार्या इति चिन्तयामास । सुराणां प्रार्थनया सृष्टिकर्ता चतुर्मुखब्रह्मा नाट्यवेदं सृष्टवान् । यथा ऋग्वेदतः वाक् (पाठ्यांशविषयः), सामवेदतः सङ्गीतम्, यजुर्वेदतः अभिनयम्, अथर्वणवेदतः रसस्यांशञ्च स्वीकृत्य, पञ्चमवेदं तन्नाम नाट्यवेदं सृष्टवान् । तदनन्तरं देवेन्द्राय सूचितवान् यत् अस्य वेदस्य रक्षणार्थं योग्याय इदं देयम् इति । तदा देवेन्द्रः अस्य वेदस्य रक्षणाय सुरगन्धर्वादयः नैव शक्ताः । भूलोके विद्यमानाः सुशिक्षिताः, कठिनपरिश्रमिणः, व्रतेषु सिद्धपुरुषाः, निरन्तराभ्यासपटवः ऋषिमुनयः एव एतस्य वेदस्य संरक्षणार्थं योग्याः इति प्रत्युत्तरति ।

तदा ब्रह्मा दिव्यदृष्ट्या ज्ञात्वा इत्थमभणत् यत् - भरतनामकं मुनिं स्वस्य शतशः पुत्रैः सह लोककल्याणाय स्वकर्मणि निरतं दृष्ट्वा स एव अस्य वेदस्य संरक्षणाय योग्यः इति । प्रायः तेनैव कारणेन नाट्यवेदः भरतस्य नाट्यशास्त्रम् इति प्रसिद्धम् इति मे मतिः।

भगवान् भरतमुनिः भरतनाट्यनामकं शास्त्रं तस्य शतसङ्ख्यकान् पुत्रान् पाठयति । ततः भारती–सात्त्वती–आरभटी– इति वृत्तित्रयस्य नाट्यशास्त्रे प्रयोगम् आरब्धवान् । अत्र भारती नाम वाचिकविषयकः पाठः । सात्त्वती नाम सत्त्वयुतमिति (सात्त्विकाभिनयः) । आरभटी नाम आरभटसहितं नाट्यम् इत्यर्थः । ब्रह्मणः आदेशानुसारं शिवताण्डवतः कैशिकीवृत्तिं प्रयोगार्थम् आरब्धवानिति । एतां वृत्तिं केवलं पुरुषैः निर्वोढुं नैव शक्यत्वात् नाट्यालङ्कारचतुराः चतुर्विंशतिः नाट्याप्सरसा ब्रह्मा नियोजयामास । तदनन्तरं स्वातिऋषिः तस्य शिष्यैः सह वाद्ये साहाय्यमाचरति ।

नाट्यवेदस्य रचनकालः स्पष्टतया नैव ज्ञायते, परन्तु पाणिनेः अष्टाध्यायीग्रन्थे “पाराशर्यनिलालिभ्यां भिक्षुनट”सूत्रयोः ॥४-३-११०॥ नटसूत्रत्वेन उपनिबद्धः प्राचीनः ग्रन्थः आसीदिति ऊहितुं शक्यते । तत्सूत्रयोः आधारेणैव भरतमुनिना पाणिनेः आर्वाचीने काले “नाट्यशास्त्रम्” रचितमिति निश्चेतुं शक्यते । पाणिनेः कालस्तु क्रिस्तपूर्वं सप्तमं शतकम् इति विदुषां मतम् । अतः भरतमुनेः कालः क्रिस्तपूर्वं पञ्चमं शतकम् इति अनुमातुं शक्नुमः।

नाट्यवेदः नाट्यस्वरूपं नाट्यलक्षणञ्च बोधियति । तत्पश्चात् केचन नाट्यशास्त्रमधिकृत्य स्वमतानुसारं स्वस्वग्रन्थेषु स्वाभिप्रायान् प्रकटीकृतवन्तः । यथा – धनञ्जयनामकः पण्डितः दशरूपकं नामक ग्रन्थे रूपकाणां परिचयं कृतवान् । तत्र एषः अवोचत् यत् कथा पौराणिकादिषु प्रसिद्धा वा भवेत्, कविकल्पिता वा भवेदिति । नाट्ये चतुर्विधाः अभिनयाः उक्ताः । यथा – यः अभिनयः हस्तपादनेत्रादिभिः क्रियते सः आङ्गिकाभिनयः, सम्भाषणादियुक्तः अभिनयः वाचिकाभिनयः, वेषभूषाणां साहाय्येन क्रियमाणः अभिनयः आहार्याभिनयः, गात्रकम्पनेन शरीरदृढतया (नर्तने शरीरश्रान्तः यथा भवेत्) क्रियमाणः अभिनयः सात्त्विकाभिनयश्चेति । एवं रीत्या नटाः नानाविधैः अभिनयैः नवरसान् उत्पादयन्ति । भारतीये नाट्ये विविधप्रकारकाः नाट्यनृत्यादयाः समुत्पन्नाः यथा – कर्नाटकान्ध्रतमिलनाडुप्रदेशेषु – भरतनाट्यं शास्त्रीयं भजते । केरलप्रान्तेषु – कथक्कलिनाम्ना पुरुषप्रधाननृत्यम् प्रसिद्धमस्ति । तथैव केरलप्रान्ते मोहिनि अट्टम् इति लास्यप्राधान्यं नृत्यम् तत्रत्याः स्त्रियः अभिनयन्ति । आन्ध्रप्रदेशे कूचिपुडिनामकं नृत्यम् प्रसिद्धिं गतमस्ति । उत्तरभारते कथक्नामकं नृत्यं प्राधान्यतया (लक्ष्मणपुरी) लखनौ, जयपुरम्, मध्यप्रदेशः, बिहारेषु प्रसिद्धतां वहति । मणिपुरप्रान्तेषु “मणिपुरि” नामकं नृत्यम् आधिक्येन प्रदर्शितं भवति । ओडिशाप्रान्तेषु ओडिस्सीनृत्यम् इति सुप्रसिद्धं वर्तते ।

**********


ISSN: 2320-740X

# शिक्षा

आदित्य एच्. जि.
**शिक्षाशास्त्रिप्रथमवर्षम्**

शिक्षा नाम जीवने शुभाशुभभावबोधिनी, पुण्यापुण्यविवेचनी, सदाचारस्य संचारयित्री च । एतया शिक्षयैव सुधियो विश्वहितं, देश समाजहितं च चिकीर्षन्ति । सत्कर्म विधित्सन्ति, दुष्कर्म जिहीर्षन्ति, आत्मानं च मुमुक्षन्ते ।

**का नाम शिक्षा ?**

'शिक्ष विद्योपादाने' धातोः निष्पन्नः 'शिक्षा' इति शब्दः । शिक्षते अनया सा एव शिक्षा । अधिगमः ज्ञानप्राप्तिर्वा शिक्षेति । शिक्षा शब्दस्य कः सम्प्रत्ययः इति चेत् वक्तुं शक्यते यत् ल्याटिन् भाषायाः 'Educatiom' इति शब्दात् निष्पन्नः 'Education' इति आङ्ग्लभाषायां शिक्षायाः अनुवादः । केचन मन्यते 'Educare' इति अथवा 'educere' इति शब्दाद्वा 'शिक्षा' शब्दस्योत्पत्तिः जाता ।

E+duce' E- अन्तःकरणं, duco = अग्रसारणम् । अतः अन्तःकरणे याः शक्तयः विराजन्ते तासां शक्तीनां विकासः तदैव शिक्षा इति ।

शिक्षायाः परिभाषा –

- मानवान्तर्निहितपरिपूर्णतायाः अभिव्यक्तिरेव शिक्षा इति – Swami vivekananda.
- स्वस्थे शरीरे स्वस्थमनसः निर्माणमेव शिक्षा इति –Aristotle.
- बालकस्य आन्तरिकविकास एव शिक्षा इति –Rousseau.
- परिपूर्णजीवनमेव शिक्षा –Harbert spencer.
- मानवस्य देहात्ममनोभ्यः उत्तमोत्तमस्य सर्वतोमुखेन बहिरानयनमेव शिक्षा –Mahatma gandhi.

शिक्षायाः कार्याणि -

शिक्षायाः अनेकानि कार्याणि सन्ति, तेषु चतुर्विधकारणानि प्रमुखरूपेण गण्यन्ते । तानि यथा-

- सामान्यकार्याणि – जन्मजातशक्तीनां विकासः, व्यक्तित्वस्य सर्वाङ्गीणविकासः, प्रौढजीवनस्य कृते तत्परता, संस्कृतिसभ्यतायाः संरक्षणं, चरित्रविकासश्च ।

- मानवीयकार्याणि-मूलप्रवृत्तीनां नियन्त्रणं परिशोधनं, वैयक्तिकावश्यकतायाः पूर्तिः, कालस्य सदुपयोगः, व्यावसायिककुशलतायाःविकासः, आध्यात्मिकविकासः ।
- राष्ट्रियकार्याणि–लोकतन्त्रात्मकविकासः, व्यक्तिमत्त्वस्य विकासः, कर्तव्यपालनभावनायाः विकासः, जीवनयापनविकासः, व्यावसायिककौशलस्याभिव्यक्तिः, नेतृत्वस्य कृते कौशलं, राष्ट्रियभावनायाः विकासः, राष्ट्रियैकतायाः भावनात्मक- एकताया अभिवृद्धिः, अनुशासनस्यस्थापना चेति ।
- सामाजिककार्याणि– सामूहिकभावनायाः विकासः, सामाजिक परम्पराणां परिपालनं, शाश्वतमूल्यानां संरक्षणं, नवीनविचाराणां स्वीकृतिः, नवीनपरिवर्तनस्य कृते नेतृत्वनिर्माणमिति ।

अस्माकं जन्मतः मृत्युपर्यन्तं शिक्षा विद्यार्जनं भवति । अतः शिक्षा (विद्या) कदापि न नश्यति । मनुष्यः मरणपर्यन्तं विद्यायाः अर्थी, शिक्षायाः अर्थी शिक्षार्थी भवति । यथा शिक्षार्जनं करोति तथा मानवस्य जीवनम् भवति । शिक्षायाः अर्थी सदैव मानवेषु पटुः पटुतरः भवति ।

अनैकयन्त्रतान्त्रिकमाध्यमेनापि शिक्षा प्राप्तुं शक्यते । यथा गणकयन्त्रादिद्वारा शिक्षार्जनं भविष्यति । यथा शिक्षां प्राप्नुमः तथैव समाजस्य निर्माणं भविष्यति । अतः शिक्षा सदैव पालनीया- "विद्या विनयेन शोभते" ।

**********

# जातिशक्तिवादविमर्शः

नवीनः के. आर्

**शास्त्रितृतीयवर्षम्**

गवादिपदानां जातावेव शक्तिरिति मीमांसकाः । जातिविशिष्टव्यक्तौ शक्तिरिति नैयायिकाः । तत्र मीमांसकानां पक्षः – यदि जातिविशिष्टव्यक्तौ शक्तिः स्वीक्रियते तदानीं जातौ अपि शक्तिस्वीकारापेक्षा अस्त्येव नागृहीतविशेषणबुद्धिः विशिष्टेषूपजायते इति न्यायात् । यया बुद्ध्या विशेषणम् अविषयीकृतं सा बुद्धिः विशिष्टविषयिणी न भवतीत्यर्थः । इत्थं जातिविशिष्टे शक्तिस्वीकारेऽपि जातौ शक्तिः निराकर्तुं न शक्यते, अतः लाघवेन जातौ एव शक्तिः स्वीक्रियते । पुनश्च विशेष्यं नाभिधागच्छेत् क्षीणशक्तिर्विशेषणे इति न्यायेन शक्तिः विशेषणं प्राप्य क्षीणसामर्थ्या भवति, अतः सा शक्तिः विशेष्यं न प्राप्नोतीति जातिविशिष्टे शक्तिस्वीकारः एव अयुक्तः । एवमेव जातिविशिष्टे शक्तिस्वीकारे व्यक्तेः नानात्वात् एकघटव्यक्तौ शक्तिग्रहेण घटान्तरव्यक्तौ अपि बोधोत्पत्त्या व्यभिचारप्रसङ्गः । यदि सकलव्यक्तिषु अपि जातिः गृह्यते इत्युच्यते तदा व्यक्तेः आनन्त्यात् शक्तेरपि आनन्त्यप्रसङ्गः । इत्थं नैयायिकमते दोषद्वयम् ।

 ISSN: 2320-740X

**जातिशक्तिवादे दूषणम्**

मीमांसकैः जातौ एव शक्तिः इति कथ्यते, परन्तु व्यक्तिं विना जातिभानस्य असम्भवात् कथं शाब्दबोधे व्यक्तिभानम् इति चेत् , तत्र केचन जातिभासकसामग्र्या एव व्यक्तिभानमपि भवति इति कथयन्ति । एतन्निरस्तं, यतः पदजन्यपदार्थोपस्थितेः शाब्दबोधं प्रति हेतुत्वात् व्यक्तौ शक्तिस्वीकारं विना व्यक्तिभानस्य असम्भवात् । न च व्यक्तिभानं लक्षणया इति वाच्यम् । अन्वयानुपपत्तेः लक्षणाबीजत्वात् 'गामानय' इत्यादौ गोत्वजात्या साकम् आनयनकर्मत्वस्य अनन्वयात् गोपदस्य गवि लक्षणास्वीकारेऽपि गौरस्ति इत्यत्र गोत्वजातेः अस्तित्वेन साकम् अन्वयसम्भवात् अन्वयानुपपत्तिरूपलक्षणाबीजस्याभावेन लक्षणास्वीकारस्य अशक्यत्वात् व्यक्तिभानं न सम्भवति इति मीमांसकमते अस्वारस्यम् ।

**विशिष्टशक्तिवादे उक्तदोषाणां परिहारः**

व्यक्तिभेदात् शक्तेः आनन्त्यम् इत्युक्तम्, परन्तु नानाव्यक्तिषु नानाशक्तयः न स्वीक्रियन्ते, अपि तु ईश्वरेच्छारूपा एका एव शक्तिः सकलव्यक्तौ स्वीक्रियते । न च अननुगमः इति वाच्यम् । गोत्वादेरेव अनुगमकत्वात् । तथा च सकलगोव्यक्तीनां गोत्वेन एकरूपेण अनुगमे सति व्यक्तेः शक्तिज्ञाननिष्ठकारणतायाम् अवच्छेदकत्वम् एवम् उपपद्यते – गोत्वावच्छिन्नविषयकशाब्दबोधं प्रति गोत्वावच्छिन्नविशेष्यकशक्तिज्ञानत्वेन हेतुत्वात् गोत्वेन रूपेण सर्वासां गोव्यक्तीनां शक्तिज्ञाने विषयत्वात् विषयविधया गोव्यक्तीनाम् अवच्छेदकत्वसम्भवात् गोव्यक्तीनां शाब्दबोधे भानं सम्भवति इत्यर्थः । तद्विषयकशाब्दबोधसामान्ये पदजन्योपस्थितेः हेतुत्वात् शाब्दबोधे व्यक्तौ शक्तिस्वीकारं विना व्यक्तिभानं न सम्भवति इति । अत्र मीमांसकानाम् आक्षेपः पदादनुपस्थितस्य पदार्थद्वयसंसर्गस्य शाब्दबोधे भानात् एतादृशकार्यकारणभावः एव अयुक्तः इति । परन्तु यदि एवं पदादनुपस्थितस्यापि शाब्दबोधे भानम् अङ्गीक्रियते तदा घटपदात् पटादेरपि बोधापत्तिः स्यात् इति चेत् घटविशेष्यकघटत्वप्रकारकशाब्दबोधं प्रति घटत्वविशेष्यकशक्तिज्ञानं कारणम् इति कार्यकारणभावस्वीकारेण घटपदशक्तिज्ञानरहितस्य घटत्वविषयकबोधापत्तिः कर्तुं न शक्यते इति । अतः दूषणान्तरमुच्यते – मीमांसकमते कीदृशः शक्तिग्रहः स्वीक्रियते ? यदि सः शक्तिग्रहः "गौः शक्या" इत्याकारकः तदा शक्तिग्रहे व्यक्तेरेव उल्लेखात् व्यक्तौ शक्तिः अङ्गीकृता स्यात् । यदि "गोत्वं शक्यम्" इति शक्तिग्रहः तदा तत्प्रकारकशाब्दबोधं तत्प्रकारकस्मरणं च प्रति तत्प्रकारकशक्तिज्ञानं कारणम् इति समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं च प्रति हेतुत्वस्वीकारेण ईदृशशक्तिग्रहे गोत्वस्य विशेष्यतया गोत्वत्वस्य च प्रकारतया भानात् गोत्वत्वप्रकारकगोत्वविशेष्यकस्मरणं शाब्दबोधश्च स्यात्, न तु गोत्वप्रकारकगोविशेष्यकस्मरणं शाब्दबोधश्च स्यात् । तदा उच्यते प्रथमपक्षे "गौः शक्या" इत्याकारकशक्तिग्रहस्य शाब्दबोधहेतुत्वेऽपि तस्य भ्रमत्वाङ्गीकारात् न व्यक्तौ शक्तिसिद्धिः इति चेत् प्राभाकरमते सर्वं ज्ञानं यथार्थम् इति स्वीकारेण अस्यापि प्रमात्वमेव सम्भवति । पुनः "गोत्वं शक्यम्" इत्याकारकशक्तिज्ञानस्य गोत्वप्रकारकत्वाभावात् गोत्वप्रकारकस्मरणं शाब्दबोधश्च न स्यात् । तत्र समाधत्ते मीमांसकः -

गोपदं गोत्वे शक्तम् इत्याकारकगोपदविशेष्यकशक्तिज्ञानमेव गोत्वविशिष्टगोविशेष्यकशाब्दबोधे हेतुः इति । एतादृशशक्तिज्ञाने शक्त्यंशे निरूपितत्वसम्बन्धेन गोत्वप्रकारकत्वम् अस्तीति गोत्वप्रकारकशाब्दबोधस्य न अनुपपत्तिः इति चेत् गोपदं गोत्वे शक्तम् इति शक्तिज्ञाने गोत्वगोपदयोरेव शक्तिरूपसम्बन्धः भासते, अतः गोत्वस्यैव स्मरणं सम्भवति न तु व्यक्तेः इति गोविशेष्यकस्मरणानुपपत्तेः तादवस्थ्यम् । मीमांसकैः शक्तिग्रहे यदंशे गोत्वादिप्रकारकत्वं शाब्दबोधस्यापि तदंशे गोत्वादिप्रकारकत्वम् इति सिद्धन्तितत्वात् "गोपदं गोत्वे शक्तम्" इत्याकारकशक्तिग्रहे शक्त्यंशे गोत्वप्रकारकत्वात् शाब्दबोधेऽपि शक्त्यंशे गोत्वप्रकारकत्वं स्यात् न तु गोव्यक्त्यंशे गोत्वप्रकारकत्वम् इति एतादृशशक्तिज्ञानेन गोविशेष्यकगोत्वप्रकारकशाब्दबोधानुपपत्तिः वारयितुं न शक्यते इति । तत्रोच्यते कार्यत्वाद्युपाधिप्रकारकशाब्दबोधस्थले एव एतादृश समानप्रकारकत्वमङ्गीकृतम् । जातिप्रकारकशाब्दबोधस्थले तु एवं नियमः नास्तीति । अतः दूषणान्तरमाह – यदि "गोपदं गोत्वे शक्तम्" इत्याकारकशक्तिग्रहः तदानीं गोत्वत्वं शक्यतावच्छेदकं वाच्यम् । "गोत्वं गोपदशक्यम्" इत्याकारकशक्तिग्रहस्यापि गोत्वत्वावच्छिन्नगोत्वविषयकतायाः स्वीकारः आवश्यकः इति । गोत्वत्वं च गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम्, तथा च सकलगोव्यक्तीनां शक्यतावच्छेदककोटिप्रवेशे गौरवम् । न च "गोत्वं गोपदशक्यम्" इत्याकारकशक्तिग्रहः गोत्वंशे गोत्वत्वानवगाहि निर्धर्मितावच्छेदकक एव अस्तु, "गोपदं गोत्वे शक्तम्" इत्याकारकशक्तिग्रहोऽपि गोत्वंशे गोत्वत्वाप्रकारक एव भवतु इति वाच्यम् । यदि शक्तिग्रहः निर्धर्मितावच्छेदकः इति अङ्गीक्रियते तदा निर्धर्मितावच्छेदककशक्तिग्रहस्य बाधबुद्ध्यप्रतिबन्धकत्वात् शाब्दबोधाहेतुत्वाच्च अस्य कारणत्वं न स्यात्, एतादृशप्रमायाः विषयसाधकत्वात् शक्यतावच्छेदकसिद्धिः इति । न च गोत्वत्वस्य अवच्छेदकत्वांशे भ्रमः इति वाच्यम् । एवं प्रतीतेः अपि कारणतावच्छेदकत्वाद्यंशे भ्रमत्वस्य वक्तुं शक्यतया कारणत्वावच्छेदकस्य सिद्धिरेव न स्यात् । पुनः गोत्वत्वं शक्यतावच्छेदकम् इति नाङ्गीक्रियते चेदपि गोत्वं गोपदशक्यम् इत्याकारकस्य गोत्वत्वावच्छिन्नगोत्वविशेष्यकशक्तिज्ञानस्य, गोपदं गोत्वे शक्तम् इत्याकारकस्य गोत्वत्वावच्छिन्नगोत्वप्रकारकशक्तिज्ञानस्य कारणत्वाङ्गीकारात् गवेतरासमवेतत्वादिघटितगोत्वत्वादेः धर्मितावच्छेदकप्रकारतावच्छेदकतात्मकसकलगोविषयतायाः कारणतावच्छेदककोटिप्रवेशप्रयुक्तगौरवं दुर्वारमेव इति ।

**नैयायिकसिद्धान्तः**

"व्यक्त्याकृतिजातयस्तु पदार्थः" इति न्यायसूत्रानुसारं गवादिपदानां गोत्वादिजातिसास्नाद्याकारोभयविशिष्टगोव्यक्तौ शक्तिः इति लभ्यते । तथा च गवादिपदानां जातौ, आकृतौ एतदुभयविशिष्टव्यक्तौ च शक्तिः इति । तत्र शक्यतावच्छेदकं तु गोत्वादिजातेरेव न तु अवयवसंस्थानरूपायाः आकृतेः । यतः शक्ये यद् वर्तते तदेव शक्यतावच्छेदकं गोत्वं गवि समवायेन अस्तीत्यतः तस्य शक्यतावच्छेदकत्वं सिद्ध्यति, परन्तु आकृतिः नाम अवयवसंस्थानं, अवयवसंस्थानञ्च अवयवसंयोगः, अवयवसंयोगस्तु समवायेन अवयवेषु एव वर्तते न तु आकृतौ इति तस्य शक्यतावच्छेदकत्वं नास्ति । स्वाश्रयवृत्तित्वरूपसामानाधिकरण्यसम्बन्धेन आकृतेः गोवृत्तित्वात् शक्यतावच्छेदकत्वम् अङ्गीक्रियताम् इति चेत् उक्तपरंपरासम्बन्धस्य शक्यतावच्छेदकसम्बन्धत्वकल्पने गौरवम् इति । जात्याकृतिव्यक्तीनां

 ISSN: 2320-740X

परस्परपरित्यागेन परस्परस्य बोधाभावात् जात्याकृतिव्यक्तिषु तिसृष्वपि एकैव शक्तिः इति प्राचीनाः, एतद्बोधनायैव जात्याकृतिव्यक्तयस्तु पदार्थः इति सूत्रे एकवचनं प्रयुक्तम् अन्यथा शक्तिभेदे पदार्थाः इति बहुवचनमेव स्यादिति ।

नव्यास्तु अवयवसंयोगरूपसंस्थानानुपस्थितावपि गवादिपदात् गोत्वादिप्रकारेण गवादिविषयकशाब्दबोधोत्पत्तेः दृश्यमानत्वात् गवादिपदानां जातिविशिष्टव्यक्तौ एव शक्तिः इति कथयन्ति । संस्थाने तु पृथगेव शक्तिः इति । सूत्रोक्तं 'पदार्थः' इत्येकवचनं तु जातिव्यक्त्योः एकशक्तिलाभाय इति ।

**वाच्यार्थनानात्वम्**

गुणशब्दाः केचित् स्वजात्यवच्छिन्नं गुणमभिधाय तावत्येव विरमन्ति । केचिद् गुणमभिधाय द्रव्यमाक्षिपन्ति, तत्सामानाधिकरण्यप्रयोगदर्शनात् यथा शुक्लादिपदम् । क्रियाशब्दाश्च द्विधा भवन्ति । केचित् कर्तरि, कर्मणि, करणे वा प्रयुज्यन्ते यथा – पाचकः, गतः, व्याकरणम् इत्यादिपदानि । केचित् भावमात्रवचना वा यथा श्रुतिरिति पदम् । आकाशादिशब्दानां किञ्चिदवच्छिन्नबोधकत्वं नास्तीति ।

**********

# रूपविषये आधुनिकमतम्

अनिरुद्धः

**शास्त्रितृतीयवर्षम्**

तेजः कश्चन विद्युत् - कान्तीय - तरङ्गः, जलतरङ्गवत् तरङ्गरूपेण प्रवहति । अर्थात् उपरि-अधः उपरि-अधः गच्छदेव भवति । तादृशक्रियायाः मानमेव," तरङ्गान्तरम् " (wavelength) इत्युच्यते । यथा चित्रे दर्शितं वर्तते ।




तेजसः मूलं किञ्चित् भवति । सूर्यः, विद्युद्दीपः इत्यादि । ततः निर्गतं तेजः अन्यान्यतरङ्गान्तरीयं भवति । तच्च तेजः, घटादीन् विषयान् प्राप्नोति । तत्र तेजसि कश्चित् व्यत्ययः भवति । तादृशव्यत्ययं प्रति घटादिविषयानां तेजसः

स्वीकार – प्रतिफलनहेतुः कश्चन भौतिकः गुणः एव कारणम् ( Absorption and Reflection ) । यद्यद् तरङ्गान्तरीयं तेजः, घटादिना स्वीक्रियते, तदतिरिच्य सर्वतरङ्गान्तरीयतेजः , प्रतिफलितं भवति । ततः प्रतिफलितं भूत्वा, यदा अस्माकं नयनपटलं प्राप्नोति, तदा अस्माकं चाक्षुषज्ञानकारणीभूता व्यवस्था या वर्तते , सा , तत् तेजः , तरङ्गान्तरभेदेन विविधवर्णत्वेन गृह्णाति । अर्थात् , अस्माकं नयनपटलादारभ्य मस्तिष्कपर्यन्तं या चाक्षुषज्ञानजननव्यवस्था वर्तते , सा वर्णरूपेण तेजः अवगम्यति । नीलघटेन नीलतेजः विहाय, अन्यस्य सर्वतरङ्गान्तरीयस्य तेजसः स्वीकारः क्रियते, नीलतेजः त्यज्यते । हरितपर्णम् हरिततरङ्गान्तरीयतेजः त्यक्त्वा , अन्यत् स्वीकरोति । वस्तुना सर्वतरङ्गान्तरीयतेजसः त्यागः क्रियते चेत्, शुक्लरूपम् । अर्थात् सर्वाणि तरङ्गान्तराणि समानरूपेण भवन्ति चेत्, शुक्लरूपं भासते । यदि नीलादितरङ्गान्तरम् किञ्चिदधिकसङ्ख्याकं वर्तते चेत्, शुक्लरूपे नीलादिरूपस्य प्रभावः ( blueish white , yellowish white इत्यादि ) दृश्यते । वस्तु यदि सर्वेषां तरङ्गान्तराणां स्वीकारं करोति , अर्थात् तेन वस्तुना , केषामपि वर्णानां त्यागः न क्रियते चेत् कृष्णवर्णः भासते । आधुनिकैः सर्वेषां वर्णानां अभाव एव , कृष्णरूपमिति अङ्गीक्रियते । यदि अनेकतरङ्गान्तरीयतेजसां स्वीकारः , अन्यानां तेजसां प्रतिफलनं भवति चेत् , अर्थात् केषाञ्चिदेव तरङ्गान्तराणां सत्वम् अस्ति चेत् , कपिशादि-मिश्रवर्णानां ज्ञानं भवन्ति । सूर्यादागच्छन् आलोकः इन्द्रधनुषि दृश्यमानैः सर्वैः वर्णैः युक्तं भवति । अर्थात् शुक्लतेजसि सर्वाणि रूपाणि भवन्ति । तथैव कृष्णरूपं सर्वेषां रूपाणाम् अभावः इति स्वीक्रियते । तत्र किञ्चित् प्रमाणं वर्तते ; पट्टक / अश्रग इति यदुच्यते ( prism ), तस्मिन् यदि शुक्लतेजः प्रविशति , तदा तरङ्गन्तरानुसारं तेषां वक्रीभवनं भविष्यति । तदा तस्मिन् तेजसि विद्यमानानि सर्वाणि रूपाणि दृश्यन्ते ।




अत एव कश्चित् पटः सूर्यस्य आलोके रक्तरूपेण भासमानः वर्तते चेत्, सः पटः, रक्तरूपं त्यजति, अन्यान् वर्णान् स्वीकरोति इत्यर्थः । अत्र किञ्चित् स्वारस्यं वर्तते ; कश्चन कृतकः नील-आलोकः तमेव पटं प्राप्नोति चेत्, पटः कृष्णरूपेण भासते, न तु रक्तरूपेण । यतः तस्य पटस्य रक्तरूपमात्रप्रतिफलनगुणः वर्तते, अन्यान् वर्णान् सः न त्यजति । किन्तु नीलालोकः यदा तादृशपटेन साकं संयोगं प्राप्नोति, तदा आलोके रक्तरूपस्य अभावात्, रक्तवर्णत्यागः तेन पटेन न सम्भवति । तथैव अन्यवर्णानाम् त्यागे तस्य सामर्थ्यं नास्ति इत्यतः, सर्वेषां वर्णानाम् अभावात् पटः कृष्णरूपेण भासते ।


ISSN: 2320-740X




किन्तु अस्माकं चाक्षुषज्ञानव्यवस्थया सीमिततरङ्गान्तरीयं तेजः वर्णरूपेण गृह्णाति । तदपेक्षया अपि न्यून-अधिक-तरङ्गान्तरीयतेजांसि भवन्ति । यथा उपरितनचित्रे दर्शितम् । अस्माभिः गृहणयोग्यं अधिकतमतरङ्गान्तरं , अर्थात् रूपं, भवति रक्तरूपम् । ततोऽपि अधिकतरङ्गान्तरीयं भवति infra-red । अस्य शाखचित्रणम् ( thermal imaging ) इत्यादौ उपयोगः भवति । ततोपि अधिकतरङ्गान्तरीयं भवति microwave इत्याख्यं तेजः । अस्य विद्युत्-चुल्ली ( micro-oven ) इत्यादौ उपयोगः भवति । ततोपि अधिकतरङ्गान्तरीयं भवति radio wave, यत् दूरदर्शनादिषु सङ्केतमाध्यमरूपेण उपयुज्यते । infrared, micro wave, radio wave इत्येषां ग्रहणं अस्माभिः क्रियते, किन्तु वर्णरूपेण न । infrared इत्यादिना औष्ण्यं तु अस्माभिः अनुभूयते एव ।

तथैव अस्माभिः गृहणयोग्यं न्यूनतमतरङ्गान्तरं, अर्थात् रूपं भवति violet. तदपेक्षया अपि न्यून-तरङ्गान्तरीयं भवति, ultra violet. अस्य अर्बुदरोगस्य चिकित्सायां उपयोगः भवति । ततोपि न्यून-तरङ्गान्तरीयो भवति x ray किरणः । अस्य body scaning मध्ये उपयोगः प्रसिद्ध एव । ततोपि न्यून-तरङ्गान्तरीयो भवति gamma किरणः । तस्यापि अर्बुदरोगस्य चिकित्सायां, वैद्यकीय-उपकरणानां शुद्धौ च उपयोगः भवति । केषाञ्चनप्राणिनां infrared इत्यस्य ग्रहणं वर्णरूपेणैव भवति । यथा मीन-मशकादीनाम् । infra red वदेव ultra violet इत्यस्यापि ग्रहणं कैश्चित् प्राणिभिः क्रियते । बहूनां पक्षिणां मक्षिकानां च ultraviolet इत्यस्य ज्ञानं भवति । स्वर्णमीनम् (Golden fish ) इत्यस्य infrared, ultraviolet, इत्यनयोः उभयोः ग्रहणं सम्भवति इति श्रूयते ।अस्माकं प्राणिनां च प्रत्यक्षे भेदस्तु महान् वर्तते । यतः तेषां रूपग्रहणव्यवस्था अन्या, अस्माकं, अर्थात् मनुष्याणाम् अन्या भवति । अतः वस्तु एकं चेदपि, प्रत्यक्षं भिन्नं भवति ।



पुष्पविषयकं पक्षिप्रत्यक्षम् - मनुष्यप्रत्यक्षम्



मयूरपङ्खविषयकं मनुष्यप्रत्यक्षम् – मयूरप्रत्यक्षम्




पुष्पविषयकं  मनुष्यप्रत्यक्षम् – मधुमक्षिकायाः प्रत्यक्षम्

 ISSN: 2320-740X



मूषिकविषयकं उरगस्य प्रत्यक्षम् - मनुष्यप्रत्यक्षम्



श्वानविषयकं मनुष्यप्रत्यक्षम् – श्वानप्रत्यक्षम् ।

**********

# महर्षिः अणिमाण्डव्यः

देवीकृष्णा. एन्.

**शास्त्रितृतीयर्षम्**

एकदा माण्डव्यो नाम कश्चन ब्राह्मणः आसीत् । सः सत्यवान् तपस्वी धर्मज्ञश्च आसीत् । सः कठिनतपः आचरेयमिति मनसि निश्चित्य आश्रमात् बहिः विद्यमानस्य कस्यचन वृक्षस्य अधः योगनिष्ठः सन् मौनव्रतेन बहुवर्षाणि यावत् ध्यानमग्नो भूत्वा तपश्चकार ।

तदा केचन चोराः चौर्यसम्पादितानि आभरणधनादीनि गृहीत्वा आश्रमसमीपम् आगताः। तान् अन्विष्य राजभटाः अपि तत्रैव समागताः। राजभटाः आश्रमे न प्रविशन्ति इति मत्वा चोराः आश्रमं प्रविश्य आत्मानं निलीय स्थितवन्तः। किन्तु भटाः आश्रममागत्य चोराणां विषये माण्डव्यं पृष्टवन्तः। किन्तु मौनव्रतधारी माण्डव्यः किमपि नोक्तवान् । भटाः आश्रमान्तं गत्वा अन्विष्य तान् चोरान् समगृह्णन् । आभरणानि धनानि चोराश्च आश्रमे एव लब्धं इत्यतः सः माण्डव्यः एतेषां चोराणां गुरुः इति विचिन्त्य भटाः तमपि गृहीत्वा राज्ञः समीपं गताः। पृष्टस्य एकस्यापि प्रश्नस्य उत्तरं न दत्तवानित्यतः माण्डव्यस्यापि शूलारोहणं भवत्विति दण्डः राज्ञा आज्ञापितः । भटाः राजाज्ञां पालयित्वा तं माण्डव्यमपि शूले आरोपितवन्तः।

शूलारूढः अपि जीवन् एव सः ध्याननिरतः असीत् । स्वस्य तपोबलेन अन्यान् महर्षीन् तत्र आहूतवान्। ते महर्षिणः रात्रौ पक्षिरूपं धृत्वा आगत्य माण्डव्यस्य स्थितिं दृष्ट्वा करुणाम् अनुभूतवन्तः। एतत् सर्वं भटाः दृष्ट्वा राज्ञः समीपं निवेदितवन्तः। राजा झटित्येव मन्त्रिपुरोहितैः साकं माण्डव्यस्य समीपम् आगत्य अञ्जलिबद्धः स्तोत्रादिकं कृत्वा कृतापराधस्य क्षमां याचितवान् । तदा महर्षिः माण्डव्यः उक्तवान् “मम कृते अहमेव अपराधी नान्यः” इति । अनन्तरं शूलावरोहणाय प्रयत्नः कृतः अपि शूलात् तस्य मुक्तिः न जाता । अतः शरीरात् बहिः दृश्यमानान् शूलभागान् कर्तयित्वा तस्य मोचनम् अकुर्वन्। शूलाग्रभागः अणिः तस्मिन् अवशिष्टः इति सः “अणिमाण्डव्यः” इति प्रथितःअभवत् । सः महत्तरं तपः कृत्वा उत्तमलोकं प्राप्तवान् । सशरीरो भूत्वा सकललोकसञ्चारणसामर्थ्यञ्च प्राप्तवान् ।

अनन्तरं “मया कः अपराधः कृतः” इति जिज्ञासा तस्य आगता । तत् ज्ञातुं यमधर्मस्य समीपं स्वतपोबलेन गत्वा “ मया किं पापम् आचरितम् इति एतादृशशूलयातनां प्रतिदिनम् अनुभवन् अस्मि “ इति पृष्टवान्। तदा यमः उक्तवान् “हे महर्षे! भवान् पुरा पतङ्गान् दण्डैः पीडितवान् आसीत् , तस्मादेव एवं जातम्। मानवाः यथा अत्यल्पं दानं कृत्वा अपि महत् फलं प्राप्नुवन्ति तथैव पापम् अत्यल्पं चेदपि तस्य शतगुणं दुःखं प्राप्नुवन्ति “ इति। तस्य तु एतादृशदोषः आचरितः इति स्मरणे नागतः इत्यतः कदा कुत्र एवं मया आचरितमिति यमं सः पृष्टवान् । तदा बाल्ये वयसि एवं कृतं इति उक्तवान्। तदनीं महर्षिः उक्तवान् “ द्वादशवर्षपर्यन्तं यत्किमपि क्रियते तत् पापं न भवति । यतः तस्मिन् वयसि कार्याकार्यविवेकः न भवति । तस्मात् अद्य अहं नूतननियमं करोमि यत् चतुर्दशवर्षपर्यन्तं बालकाः यान् अपराधान् कुर्वन्ति ते अपराधः इति न परिगण्यन्ते। अतः तदनन्तरं यद्यत् पापं क्रियते तस्यैव दण्डः दीयते “ इति। यमोऽपि तं नियमम् अङ्गीकृतवान्।

बाल्ये वयसि कृतस्य अपराधस्य यः कठिनदण्डः यमेन दत्तः सः अनुचितः इति ज्ञात्वा महर्षिः यमं उक्तवान् यत् अविवेकी भूत्वा अल्पापराधस्य निरन्तरयातनरूपं कठिनदण्डं ब्राह्मणाय विहितवान् इत्यतः कस्याश्चित् शूद्रस्त्रियाः गर्भे भवतः मानवजन्म भवतु इति शापं दत्तवान् । ब्रह्मास्त्रस्य लक्ष्यं व्यतिचलति चेदपि तपस्विनां शापः कदापि मिथ्या न भवति । अग्रे यमधर्मः विदुरजन्म प्राप्तवान् । सः यमावतारः इत्यतः तस्मिन् सकलाः अपि विद्याः पूरिताः आसन्। सः धर्मस्य अपरः अवतारः आसीत् ।

 ISSN: 2320-740X

# देवर्षिर्नारदः

चिन्मयभट्टः
**शास्त्रितृतीयवर्षम्**

“नारद” इति शब्दश्रवणमात्रेण अस्माकं मनसि वीणाधारिणः नारायणस्मरणपूर्वकं लोकत्रये सञ्चरतः कस्यचित् ऋषेः चित्रं मनसि आयाति। अनेकेषां पौराणिकवृत्तान्तानां घटनायां कारणीभूतं इमं नारदं "कलहप्रियः" इत्येव मन्यन्ते बहवः। देवताकार्येषु साहाय्यमाचरन् जगतो हिताय विहितश्रमः एषः नारदः देवर्षिः। भगवद्गीतायां श्रीकृष्णः स्वस्य विभूतिविस्तारवर्णनावसरे उक्तवान् "देवर्षीणां च नारदः इति" अतो नारदः भगवतः अंशभूत एव ।

नारदः ब्रह्मणः मानसपुत्रेषु अन्यतमः। नारम् अज्ञानं द्यति खण्डयति इति नारदः।

**गायन्नारायणकथां सर्वलोकभयापहाम्**
**नारदो नाशयन्नेति नृणामज्ञानजं तमः।**

भागवतपुराणे नारदस्य पूर्ववृत्तान्तः इत्थं श्रूयते। नारदः पूर्वस्मिन् जन्मनि वेदाध्ययनसम्पन्नस्य कस्यचित् ब्राह्मणस्य गृहे परिचर्यां कुर्वत्याः दास्याः पुत्रः आसीत् । एकदा वर्षकाले कतिपयसन्यासिनः चातुर्मास्यव्रतानुष्ठानाय तस्य ब्राह्मणस्य गृहे उषितवन्तः। तेषां सन्यासिनां सेवार्थं नियुक्तः एषः बालः श्रद्धापूर्वकं सेवां कृतवान्। तदा ते सन्यसिनः सन्तुष्टा अभवन्। प्रतिदिनं सन्यासिभिः आचर्यमाणं कृष्णकथागायनं पारायणं च श्रावं श्रावं बालस्य मनसि भगवद्भक्तिबीजमुत्पद्य अङ्कुरितम् अभवत् । सन्यासिनां वेदान्तचर्चामपि बालः सश्रद्धं श्रुणोति स्म। ततः सन्यासिनः तस्मिन् बाले दयापराः भूत्वा तस्मै श्रद्धाविनयान्विताय बालाय मन्त्रोपदेशान् कृतवन्तः।

सन्यासिनां निर्गमनानन्तरं कदाचित् तस्य बालस्य माता सर्पेण दष्टा सती मृता अभवत् । ततः एकाकी बालः गृहं परित्यज्य अरण्यं गत्वा ध्यानयोगेन परमात्मानं साक्षात्कृतवान् । स एव दासीपुत्रः भगवद्भक्तिमाहात्म्येन आगामिजन्मनि देवर्षिः नारदः अभवत् ।

आदिकवये वाल्मीकये रामायणं बोधितवानपि नारदः। नारदः मन्त्रद्रष्टा अपि। ऋग्वेदे अथर्ववेदे च नारदऋषेः नाम्ना केचन मन्त्राः उपलभ्यन्ते । छान्दोग्योपनिषदि सनत्कुमारस्य शिष्यः भूत्वा नारदः भूमविद्यां प्राप्य विद्यामिमां लोके प्रसारितवान्। सङ्गीतप्रधान सामवेदः नारदस्य परमप्रियः आसीत् । तेन नाम्ना सङ्गीतमकरन्द इति ग्रन्थोऽपि वर्तते । नारदभक्तिसूत्रमिति एषः अद्भुतः भक्तिग्रन्थः । तत्र ८४ श्लोकाः सन्ति । “नारदपरिव्राजकोपनिषत्” सन्यासस्य विषये प्रतिपादयति।नारदस्मृतिः इति ग्रन्थः सहस्राधिकश्लोकैः उपेतः वर्तते । नारदपुराणम् इति महापुराणम् अपि वर्तते।नारदपञ्चरात्रं इत्यपि ग्रन्थः अनेन महर्षिणा रचितः इति श्रूयते । नारदशिक्षा इति ग्रन्थः वर्णोच्चारणादिविषयं

प्रतिपादयति । इत्थं भगवद्भक्ति-सेवा-ज्ञानेषु अग्रगण्यं महर्षिनारदं वयं सर्वदा प्रणमामः, संस्मरामः,अनुसरामः ।

**********

# वीररसः

शरण्यः पि,

**शास्त्रितृतीयवर्षम्**

काव्यम् आनन्दानुभूतिसाधनम् । आनन्दानुभूतिश्च रसास्वादनादेव।रसास्वादनादेव आनन्दावाप्तिः । सः रसः कीदृशः ? तस्य निष्पत्तिः कथमिति भरतमुनिः नाट्यशास्त्रे भणति-

**विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः ॥** इति ।

तस्य रसस्य नवभेदाश्च प्रोक्ताः साहित्यदर्पणे विश्वनाथेन-

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।**
**बीभत्सोऽद्भुत शान्ताश्च काव्ये नाट्यरसास्स्मृताः ॥**

एवं तेषां रसानां स्थायिभावाः-

**रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।**
**जुगुप्साविस्मयशमाः स्थायीभावाः प्रकीर्तिताः ॥**

तत्र प्रत्येकरसस्यापि स्थायिभावदेवतावर्णश्च निर्दिष्टः । तेषु अन्यतमः कश्चन श्रेष्ठतमः रसः वर्तते वीररसः । साहित्यदर्पणे वीररसस्य लक्षणमित्थमुक्तम्-

**उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ।**
**महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ॥**
**आलम्बनविभावस्तु विजेतव्यादयो मताः ।**
**विजेतव्यादिचेष्टाद्यास्तस्योद्धीपनरूपिणः ॥**
**अनुभावस्तु तत्र स्युः सहायान्वेषणादयः ।**
**सञ्चारिणस्तु धृतिमतिगर्वस्मृतिमतितर्करोमाञ्चाः**
**स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात् ॥**

अस्य वीररसस्य स्थायिभावः उत्साहः, एवमेव महेन्द्रः अस्य देवता, महेन्द्रस्य वर्णः हेम वर्णः, अतः वीरस्यापि स एव । विजेतव्यः, धर्मः पालनीयः, दुस्थितिः इत्यादयः आलम्बनविभावाः ।

 ISSN: 2320-740X

एवं विजेतव्यादीनां प्रतिपक्षप्रभृतीनां चेष्टाद्याः क्रियाः, धर्मशास्त्राध्ययनं पुनः दीनस्य कातरोक्त्यादयः उद्दीपनविभावाः । युद्धवीरे सहायान्वेषणादयः, दानवीरे त्यक्तवित्तसङ्ग्रहादयः दयावीरे शान्तिवचनादयः, धर्मवीरे यागानुष्ठानादयः अनुभावाः भवन्ति । एवमेव धृतिमतिगर्वस्मृतिमतितर्करोमाञ्चाः अस्य रसस्य सञ्चारिभावाः । एतैः विभावानुभावसञ्चारिस्थायिभावैः वीरनामकः रसः निष्पद्यते । तस्य वीररसस्य भेदाः दानवीरः, धर्मवीरः, युद्धवीरः, दयावीरश्च । तत्र दानवीरः यथा महवीरचरिते द्वितीयाङ्के रामस्य परशुरामप्रशंसनम्-

**उत्पत्तिर्जमदग्नितः स भगवान् देवःपिनाकी गुरु-**
**र्वीर्यं यत्तु न तद्गिरां पथि ननु व्यक्तं हि तत्कर्मभिः ।**
**त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः**
**सत्यब्रह्मतपोनिधेर्भगवतः किं किं न लोकोत्तरम् ॥**

अत्र तृतीयपङ्क्तौ वीररसः दृश्यते । परशुरामस्य त्यागे उत्साहः स्थायिभावः । सम्प्रदानभूतब्राह्मणैः आलम्बनविभावैः सत्त्वादिव्यवसायिभिः उद्दीपनविभावैः सर्वस्वत्यागादिभिः अनुभावैः हर्षधृत्यादिभिः सञ्चारिभावैः दानवीररसत्वं प्राप्नोति ।

धर्मवीरः युधिष्ठिरः यथा-

**राज्यं च वसु देहश्च भार्याभ्रात्सुताश्च ये ।**
**यच्च लोके ममायत्तं तद् धर्माय सदोद्यतम् ॥**

अस्यार्थः इत्थं वर्तते - राज्यम्, वसु, देहः, भार्या द्रौपदी भ्रातरः भीमसेनादयः यच्च मदधीनम् उद्यानाधिकं विद्यते, तत्सर्वं मया धर्माय उद्यतम्, त्यागादवुपयुक्तमित्यर्थः । अत्र युधिष्ठिरस्य वैदिककर्मण्युत्साहः स्थायिभावः, धर्मालम्बनविभावः, स्वजनकादिश्रुतिरुद्दीपनविभावः, एतादृशोक्तिरनुभावः, हर्षधृत्यादयः व्यभिचारिभावः अङ्गाङ्गिभावं प्राप्तैः समुदायैरास्वाद्यमानः सामाजिकानां धर्मवीररसतामापद्यते । युद्धवीरः बालरामायणे श्रीरामचन्द्रः दशाननं प्रति कथयति-

**भो लङ्केश्वर दीयतां जनकजा रामः स्वयं याचते**
**कोऽयं ते मतिविभ्रमः स्मरनयं नाद्यापि किञ्चिद्गतं ।**
**नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः**
**पत्री नैष सहिष्यते मम धनुर्ज्याबन्ध बन्धूकृतः ॥**

रामः रावणाय वदति भो लङ्केश्वर मम पत्नीं सीतां ददतु,नो चेत् भवन्तं मारयामि इति । अत्र रावणःआलम्बनविभावः,सीतापहरणमुद्दीपनविभावः, एतादृशोक्तिरनुभावः, गम्यगर्व्यादयः सञ्चारिभावाः । एवं परस्परमिलितः समुदायैरास्वाद्यमानः श्रीरामस्य युद्धोत्साहः स्थायिभावः सामाजिकानां युद्धवीररसतामापद्यते ।

नागानन्दनाटके गरुडेन भक्ष्यमाणं नागं परित्रातुं गरुडं प्रति जीमूतवाहनस्योक्तिः-

**शिरामुखैः स्यन्दत एव रक्तामद्यापि देहे मम मांसमस्ति ।**

**तृप्तिं न पश्यामि तवापि तावत् किं भक्ष्यणत्वं विरतो गरुत्मन् ॥**

हे गरुत्मन्! शिरामुखैः तव रक्तं स्यन्दत एव,अधुनापि मम देहे मांसमस्ति । तवापि तावत् तृप्तिं न पश्यामि।एवं त्वं कथं भक्षणविरतः इति आशयः । अत्र नागः आलम्बनविभावः, कातरोक्तिरुद्दीपनविभावः, धृत्यादयश्च व्यभिचारिभावाः, एभिः परस्परमिलितैः समुदायैरास्वाद्यमानः जीमूतवाहनस्य कपोतरूपधारिधर्मात्मकपरदुःखप्रहारणोत्साहः स्थायिभावः सामाजिकानां रसतामेति । एवं प्रकारेण वीररसः सहृदयैः आस्वाद्यते ।

**********

# अमरकोशस्य वैशिष्ट्यम्

गिरीशभट्टः

**शास्त्रिद्वितीयवर्षम्**

इह खलु नानाप्राणिमति जगति प्राणिनां बहुविधाः प्रवृत्तयः दृश्यन्ते ननु । तेषां शुभाः अशुभाः चेष्टाः तदीयां मानसीमवस्थां सूचयन्ति संस्कृतामसंस्कृतां वा । देहभृतां हि क्रियाः भावप्रेरिताः भवन्ति । भावाश्च अन्तःकरणोद्भवाः । भावोत्थानानन्तरं बुद्ध्या तर्कवितर्काश्रयेण कृत्याकृत्यरूपेण चिन्तनं सहजबुद्ध्या वा अन्तःप्रेरणया वा " **अनुविद्धमिदं ज्ञानं सर्वं शब्देन भासते** " इतिवत् शब्दरूपं प्राप्नोति । शब्दतः एव सकलस्यापि ब्रह्माण्डस्योद्भवाः । श्रूयते " **यतो वा इमानि भूतनि जायन्ते** " इति । सर्वे सर्वार्थवाचका इति निगदद्भिः शब्दब्रह्मोपासकैरपि जोगुष्टमेतत् –

**इदमन्धतमं कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥** इति ।

लोके तावत् मुक्तिरूपं शाश्वतसुखं साधयितुकामाः अनन्यगतिकाः श्रुतिस्मृत्यादि सच्छास्त्रज्ञानमेव अवलम्बन्ते । तत् ज्ञानञ्च प्रकृतिप्रत्ययतत्तदर्थबोधकस्वरादिसम्प्रापकव्या-करणज्ञानायत्तं तथैव शब्दार्थलिङ्गादिबोधक-समस्तव्यवहारकारणभूतसत्कोशज्ञानादीनाम् ।

साक्षात्कृतशब्दबृह्मणः महर्षयः हस्तामलकवत् शब्दब्रह्म दृष्ट्वा सारस्वतप्रपञ्चं वर्धयामासुः । तेनैव कारणेन तत्त्वार्थज्ञाने क्लेशमात्रमपि न सञ्जातम् । तादृशमहर्षिपुङ्गवेषु अमरकोशकर्तृ अमरसिंहस्य नाम सुविख्यातमस्ति ।

प्रतिकाण्डमन्ते च इत्यमरसिंहकृतौ नामलिङ्गानुशासने इति ग्रन्थकारोक्त्या नामलिङ्गानुशासनमिति एवं च त्रिकाण्डकोशः, देवकोशः, अमरकोशः इत्यादि नामन्तराणि विद्यन्ते इति सुविज्ञायते । एतादृशसार्थकनामधेयैः


ISSN: 2320-740X

आहूयमानोऽयं ग्रन्थः सर्वेषां मतिमचूचुरदित्युच्यते । अस्य ग्रन्थस्यादौ विघ्नविघाताय ग्रन्थकर्त्रा कृतं मङ्गलं तु सम्पत्प्रदममृतप्रदञ्च । तत्तु –

**यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः । सेव्यतामक्षयो धीराः स श्रियै चामृताय च ॥** इति ।

**" तद्विज्ञानार्थं स गुरुमेव अभिगच्छेत् "** इतिवत् यस्य ज्ञानकरुणासमुद्रस्य निर्मलादिगुणाः सन्ति सः श्रियै अमृताय च सेव्यतामित्युवाच । अस्मिन् लोके यस्य कस्यापि एकस्य देवस्य नाम अनुक्त्वा केवलपरब्रह्मस्वरूपं तमभितुष्टाव ।

एवञ्च **" समाहृत्यान्यतन्त्राणि सङ्क्षिप्तैः प्रतिसंस्कृतैः"** इत्युक्त्या अस्य कोशस्य संरचनायाम् अन्यानि शास्त्राणि मयाऽऽश्रितानि इति वदतः अमरसिंहस्य विधेयत्वस्य प्रकटनं भवति । तथैव अन्यानि शास्त्राणि उररीकृत्य सम्पूर्णनामलिङ्गानुशासनं मया व्यरचि, इत्युक्त्या तस्याभिमानस्य प्रकटनं भवति । सारस्वतप्रपञ्चेऽस्मिन् निन्दास्तुतिव्याजेन यत् **" अमरसिंहस्तु पापीयान् सर्वं भाष्यम् अचूचुरत्"** इति । अनेन ज्ञायते यत् सारस्वतप्रपञ्चं वर्धयितुम् अस्य कोशस्य दायित्वं महदस्तीति ।

अन्येषु प्रचुरतमेषु कोशग्रन्थेषु सत्सु अमरकोशस्य एव बाहुल्यं वर्तते । अस्य कारणान्यनेकानि । केषुचित् कोशग्रन्थेषु केवलपर्यायपदशब्दाः , केषुचित् कोशेषु केवलनानार्थशब्दाः उल्लिखिताः । परन्तु अमरकोशे पर्यायशब्दैः सह नानार्थशब्दाः , विशेष्यनिघ्नाः श्ब्दाः , अव्ययसङ्कीर्णवर्गादयः उदीर्णाः ।

विद्यमानेषु त्रिकाण्डेषु प्रतिकाण्डमपि अनेकवर्गरीत्या विभक्तम् । अध्येतॄणां कृते विषयविभागः अत्यवश्यं भवति इति कारणतः अन्त्यव्यञ्जनानुगुण्यं शब्दसंयोजनं दृश्यते । शब्दोपासकानां शब्दलिङ्गज्ञानेन विना वाक्यविधौ दुःसाध्यत्वात् , अत्र यथा शब्दज्ञानं भवति तथैव अस्य संरचनं कृतमस्ति । अत्र त्रिषु इत्यनेन शब्दाः त्रिषु लिङ्गेषु सन्तीति , द्वयोः इत्यनेन शब्दाः स्त्रीलिङ्गपुल्लिङ्गयोः सन्तीति , लिङ्गनिषेधेन शब्दाः तस्मिन् लिङ्गे न सन्तीति अवधार्यम् । एवमेव अस्मिन् कोशे शब्दानां लिङ्गविज्ञानार्थं द्वन्द्वसमासो वा एकशेषो वा सङ्करो वा न दृश्यते । एवञ्च यदा शब्दसमासशास्त्रे पूर्वापरसूत्रेषु तुल्यबलविरोधो भवति तदा परं शास्त्रं प्रधानं भवति तथैव अस्मिन् नामलिङ्गानुशासनेऽपि यदा तुल्यबलविरोधो भवति तदा परं वाक्यं प्रबलमिति ज्ञातव्यम् । उदारणार्थम् – नयतीति नीः , लुनातीति लूः इत्यत्र **" स्त्रियामीदूद्विरामैकाच् "** इत्यनेन स्त्रीलिङ्गमिति वा **" कृतः कर्तर्यसंज्ञायाम् "** इत्यनेन विशेष्यनिघ्नो वा इति सन्देहे जाते **" कृतः कर्तर्यसंज्ञायाम् "** इति वाक्यमेव प्रबलं भूत्वा अयं शब्दः विशेष्यनिघ्नः इति सुष्ठु ज्ञायते । पुनरेकं वैशिष्ट्यं यत् अत्र सामन्यजनैः दैनन्दिनव्यवहारार्थं प्रयुज्यमानाः शब्दाः तत्र तत्र दरीदृश्यन्ते । यतो हि स्नात्वा कालकः (स्नानं कृत्वापि मलिनः), गुलगुधाकृत्य (कष्टं दत्त्वा), गेहेविचितिन् (गृहे स्थित्वा रन्ध्रान्वेषी) इत्यादिशब्दाः सामान्यतः अव्युत्पन्ना इव कोशे विराजन्ते ।

प्राचीनकोशग्रन्थेषु सत्स्वपि यावत्यः व्याख्याः एतस्य ग्रन्थस्य जाताः न तावत्यः व्याख्याः ग्रन्थस्य कस्यचिदपि । शब्दकल्पद्रुमः, अमरभारती इत्यादिग्रन्थैः एवमवगन्तुं शक्यते यत् अमरकोशस्य त्रिंशदधिकव्याख्याः विलसन्ति इति । तासु व्याख्याप्रदीपः, बुधमनोहरा, मुग्धबोधः, रामाश्रमी इत्यादयः । प्राचिनैः विद्वद्वर्यैः रचितास्वप्यनेक-व्याख्यासु बह्व्यः अनुपलब्धाः । उपलभ्यमानासु रामास्श्रमीव्याख्या सुधैव शङ्कासमाधानखण्डनमण्डन - सदसद्विलोचनपाठान्तरादिकथनपूर्वकं सूत्रवार्तिकोणादिसूत्रादिद्वारेण धातुप्रत्ययादिनिर्देशपुरस्सरं परिपूर्णतया समस्तव्याख्यानां मकुटमणीयमानया रामाश्रमीव्याख्यया विद्वज्जनाभिमतोऽयं कोशः सर्वैरादरणीय एव इत्युक्तौ नास्ति संशयलेशः ।

**प्रयोगव्युत्पत्तौ प्रतिपदविशेषार्थकथने प्रसत्तौ गाम्भीर्ये रसवति च काव्यार्थरचने ।**
**अगम्यायामन्यैर्दिशि परिणतावर्थवचसोः मतं चेदस्माकं कविरमरसिंहो विजयते ॥**

**********

# गीतायाः महत्वम्

त्रिदला ई. जि.
**शास्त्रिद्वितीयवर्षम्**

समग्रेस्मिन् विश्वे अस्माकं भारतदेशः किञ्चित् विशिष्टं स्थानं वहति । भारतीयानां जीवनशैली, संस्कृतिः, आचारः - विचारः सर्वमपि अन्यदेशीयानामपेक्षया भिन्नमेव वर्तते । भारतस्य संस्कृतिः अन्यराष्ट्रस्य संस्कृतेः अपेक्षया अतिप्राचीना विशिष्टा च वर्तते । इयं संस्कृतिरेव भारतस्य प्रतिष्ठायाः मुख्यं कारणम् । अतः एव उच्यते “भारतस्य प्रतिष्ठे द्वे संस्कृतं , संस्कृतिस्तथा” इति । अस्याः संस्कृतेः औन्नत्ये बहूनि मुख्यानि कारणानि वर्तन्ते । तत्र अस्माकं भारतस्य हिन्दूनाञ्च प्रमुखः,श्रेष्ठः,पवित्रञ्च ग्रन्थः “श्रीमद्भगवद्गीता” मुख्यं कारणं भजते ; “यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत्क्वचित्” इति वाक्यमेव गीतायाः महत्वं द्योतयितुं पर्याप्तं भवति । अन्यत्र जगति यद्यदस्ति तत्सर्वं गीतायामपि वर्तते, यद्यद् गीतायां विद्यते तत्सर्वं बहिः कुत्रापि न विद्यते । महाभारतस्य युद्धकाले भीष्मपर्वणि यदा अर्जुनः दुःखेन युद्धं कर्तुं नाङ्गीकरोति । तदानीं श्रीकृष्णेन अर्जुनस्य कृते यत् यत् उपदिष्टं तत्सर्वं अष्टादशाध्यायात्मके अस्मिन् पवित्र ग्रन्थे विस्तरेण प्रोक्तम् अस्ति ।

| | | |
|---|---|---|
| १. अर्जुनविषादयोगः | ३. कर्मयोगः | ५. कर्मसंन्यासयोगः |
| २. साङ्ख्ययोगः | ४. ज्ञानकर्मसंन्यासयोगः | ६. आत्मसंयमयोगः |

 ISSN: 2320-740X

| | | |
|---|---|---|
| ७. ज्ञानविज्ञानयोगः | ११. विश्वरूपदर्शनयोगः | १५. पुरुषोत्तमप्राप्तियोगः |
| ८. अक्षरब्रह्मयोगः | १२. भक्तियोगः | १६. दैवासुरसम्पद्विभागयोगः |
| ९. राजविद्याराजगुह्ययोगः | १३. क्षेत्रक्षेत्रज्ञविभागयोगः | १७. श्रद्धात्रयविभागयोगः |
| १०. विभूतियोगः | १४. गुणत्रयविभागयोगः | १८. मोक्षसंन्यासयोगः |

इति गीतायाः अष्टादश-अध्यायानां नामानि ।

अर्जुनविषादयोगो नाम प्रथमाध्याये युद्धक्षेत्रे उभयत्र अपि स्वजनाः एव वर्तन्ते । अतः "न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च" "गाण्डीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते" इत्यादिभिः वाक्यैः तस्य विक्लवं प्रदर्शयति । तदनन्तरं द्वितीयाध्यायः श्रीकृष्णस्य उपदेशेन प्रारभ्यते । "क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप" नाम मनसि विद्यमानं कल्मषं दूरीकृत्य युद्धं करोतु इति कथयति । "नासतो विद्यते भावो नाभावो विद्यते सतः"

**"हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्षसे महीम् । तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः" ॥**

इत्यादिभिः वाक्यैः अर्जुनं बोधनेन प्रेरयति ।

कर्मयोगे कीदृशं कर्म कर्तव्यम् ? किं कर्म न कर्तव्यम् ? कर्मणः भेदाः के ? इत्यादिविचाराः विषदीकृताः । ज्ञानकर्मस्न्यासयोगः कश्चन प्रमुखः अध्यायः ।

**"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्" ॥**

दुष्टानां नाशार्थं शिष्टानां रक्षणार्थं युगे युगे सम्भवामि इति श्रीकृष्णः अवोचत् । पुनः "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन", "श्रद्धावाँल्लभते ज्ञानम्" इत्यादिना कर्मणः तथा ज्ञानस्य च आवश्यकतां बोधयति । कर्मसंन्यासयोगे संन्यासस्य प्रामुख्यम्, एवं षष्ठे आत्मा कीदृशः ? परमात्मनः प्रापणं कथमित्यादिविचाराः उद्बोधिताः ।

एवमेव सप्तमे ज्ञानस्य विज्ञानस्य विषये, अष्टमे ब्रह्मणः अध्यात्मस्य च विषयाः अर्जुनाय स्पष्टीकृताः । नवमेऽध्याये ज्ञानमेव सर्वासां विद्यानां राजा, ज्ञानमेव "प्रत्यक्षावगमं धर्म्यं ससुखं कर्तुमव्ययम्" इति ज्ञानस्य प्रामुख्यं बोधयति । पुनः दशमे-

**बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः । सुखं दुःखं भवो भावो भयं चाभयमेव च ॥**
**अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवन्ति भावा भूतानां मत्त एव पृथग्विधाः ॥**

इत्येवं सर्वस्यापि कर्ता अहं, सर्वस्मिन्नपि अहमस्मि, अतः मम वचनं श्रृणु इति ज्ञापयति । एवमेव एकादशाध्याये श्रीकृष्णस्य विश्वरूपदर्शनं भवति । तस्य दर्शनेन अर्जुनः आश्चर्यचकितो जायते । पुनः द्वादशे भक्तेः विचाराः

कृष्णेन गदिताः । चतुर्दशे सत्वं, राजः, तम इति गुणत्रयं, ते गुणाः कथं कुत्र भवन्तीति अर्जुनाय कथयामास । ततः पञ्चदशे

**"ममैवांशो जीवलोके जीवभूतः सनातनः । मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति" ॥**

इत्यादिभिर्वचनैः पुरुषोत्तमः कीदृशः ? इति विषदीकरोति । तदनन्तरं षोडशे दैवीसम्पत् कीदृशी ?, असुरसम्पत् कीदृशी ?, इति तेषां लक्षणं प्रकटयति । सप्तदशे श्रद्धात्रयं भवति । अनन्तरं सात्विक-राजस-तामस-आहाराः, दानं च उद्बोधयति । अन्तिमे अष्टादशे अध्याये

**"मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे" ॥**
इत्यादिभिः वचनैः भवता किं किं कर्तव्यम् इति बोधयति । तच्छ्रुत्वा अर्जुनः युद्धाय सिद्धः भवति ।

इत्येवं गीतायाः मख्याः विषयाः किन्तु अस्यां गीतायां श्रीकृष्णस्य प्रत्येकं वचनमपि , अस्माकं कृते सन्देशः एव । यदि वयं तानि वचनानि जीवने सम्यक् पालयामः , तर्हि निश्चयेन मोक्षः प्राप्यते ।

**********

# श्रीमद्भगवद्गीतायां भक्तियोगः

हितेशभट्टः
**शास्त्रिद्वितीयवर्षम्**

**"सर्वश्रुतिशिरोरत्ननीराजितपदाम्बुजम् । वेदान्ताम्बुजसूर्याभं श्रीगुरुं शरणं व्रजेत्"॥**

भक्तियोगो गीताज्ञानस्य अमृतफलम् अस्ति । भक्तिं विना साधकस्य साधनारूपम् आचरणम् अपूर्णमेव तिष्ठति । देवदुर्लभस्य विराड्रूपिणः श्रीकृष्णस्य साक्षात्कारो न वेदेन, न तपस्यया, न दानेन, च चेज्यया विधातुं शक्यते अपि तु अनन्यभक्त्यैव सः सम्भवति । अनयैव जीवः ईश्वरं प्रत्यक्षं द्रष्टुं क्षमते, तत्त्वतो ज्ञातुं शक्नोति, भगवता सह ऐक्यभावमपि लब्धुं क्षमते। अनन्यभक्तितत्त्वस्य स्वरूपम् श्रीमद्भगवद्गीतायामेवं प्रकारेण निरूपितम्-

**"मत्कर्मकृद् मत्परमो मद्भक्तः सङ्गवर्जितः। निर्वैरः सर्वभूतेषु यः स मामेति पाण्डवः॥" (११-५५)**

यज्ञ-दान-तपःप्रभृतीनि सर्वाणि कर्तव्यकर्माणि भगवद्रूपाणि मत्वा, साधनरतः भगवन्तमेव परमाश्रयमिति मत्वा, तत्प्राप्त्यर्थं सततं प्रयत्नशीलः भक्तियोगस्य अनुष्ठाता, अनासक्तः, सर्वप्राणिषु शत्रुभावरहितो जनो मे भक्तोऽस्ति ।


ISSN: 2320-740X

भक्तस्य साधनस्वरूपमेव भक्तिरस्ति । भगवत्प्राप्तिरेव भक्तेः फलं विद्यते । श्रीमद्भगवद्गीता लोककल्याणाय सगुण-सकाम-भक्तिमार्गाणाम् उपदेशं प्रददाति। भक्तिः उपासनापद्धतिम् अवलम्ब्य प्रवर्तिताऽस्ति ।

गीतायां भक्तियोगे भक्तस्य महत्त्वं सर्वोपरि निर्धारितम् अस्ति । भक्ताश्चतुर्विधाः प्रतिपादिताः सन्ति- आर्तभक्ताः, जिज्ञासुभक्ताः, अर्थार्थिनो भक्ताः, ज्ञानिनो भक्ताः। एषु चतुर्षु ज्ञानिनां श्रेष्ठता प्रतिपादिताऽस्ति । ज्ञानी भक्तो भगवत आत्मस्वरूपो भवति। यथोक्तम्-"तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते"। एवं श्रीमद्भगवद्गीता विविधमार्गेषु समन्वयं प्रदर्श्य, साधनमार्गं सुगमं सुलभं च करोति ।

गीतोक्तमतानुसारेण कर्म-ज्ञान-ध्यान-भक्तिमार्गाः एकस्यैव ईश्वरस्य प्राप्त्युपायाः सन्ति । अध्यात्मसाधकः एषां मार्गाणां यथेच्छम् उपयोगं कर्तुं शक्नोति । गीतायां साधनमार्गस्य प्रारम्भो निष्कामकर्मणा अनन्यशरणागतिभावेन च भवति। निष्कामकर्मणोऽनुष्ठानेन, नियमपूर्वकं ध्यानयोगस्य अभ्यासेन साधको ब्रह्मभावं प्राप्नोति। तस्य चेतसि समत्वभावना जागर्ति । एषैव ब्राह्मी स्थितिः गीतायां प्रतिपादिता ।

यदा ब्राह्मी स्थितिः समुदिता भवति, तदा साधकः उत्कृष्टां भक्तिं लभते । भक्तेरुदयानन्तरमेव परमज्ञानस्य अधिकारी भवति । परमज्ञानेनैव भगवतः स्वभावं स्वरूपं विभूतिगुणांश्च यथार्थतो जानाति । परमज्ञानस्यैव फलम् ईश्वरोपलब्धिरस्ति। ईश्वरोपलब्धये प्रपत्तिरावश्यकी अस्ति। प्रपत्तिमार्गोऽन्यमार्गाणां नैसर्गिकं पर्यवसानमस्ति। गीतायाः गुह्यं ज्ञानमिदमेवास्ति। उक्तञ्च-

"मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥"

वस्तुतो ज्ञानकर्मणोरुभयोः समन्वयः भक्तौ दृश्यते । भक्त एव यथार्थतः ज्ञानी कर्मयोगी च भवितुं शक्यते। स्वयं भगवता श्रीकृष्णेनोक्तं शास्त्रज्ञानस्य, प्रत्यक्षदर्शनस्य, भगवदैक्यस्य च प्राप्तिरनन्यभक्त्यैव सम्भवति । सात्त्विकीं श्रद्धां दैवीं सम्पत्तिं च विना अनन्या भक्तिर्नैव जायते । अतो भगवद्भक्त्यै अभय-सत्त्वशुद्ध्यादि-सद्गुणानाम् उपार्जनं नितान्तम् आवश्यकमस्ति । इमेऽपि सद्गुणाः सात्त्विकश्रद्धयैव उद्भवन्ति, अतो दैवीसम्पत्तिं लब्ध्वा कर्मज्ञानयोश्च तदुपयोगं विधाय, अनन्या भक्तिरेव आचरणीयेति गीतायाः सन्देशोऽस्ति ।

भक्तिज्ञानयोर्मध्ये आन्तरिकविरोधो न मन्तव्यः। यतो हि यावत् ज्ञानं न भविष्यति तावत् भक्तिः कुतः सम्भवति? ज्ञानेनैव ईश्वरानुरागः समुदेति । भक्तिं विना ज्ञानमपि नीरसं वर्तते, ज्ञानं विना च भक्तिः नेत्रहीनेवास्ति । उभयोः परस्परं सम्बन्धोऽस्ति। अतः ज्ञानसम्पन्न एव जनः यथार्थभक्तो भवति । यश्च भक्तोऽस्ति, सः न कदापि ज्ञानमुपेक्षते । ज्ञानी अपि भक्तेरुपेक्षां कर्तुं न क्षमते ।

**********

# अष्टावक्रः

क्षमा कामत् के.
शास्त्रिद्वितीयवर्षम्

अष्टावक्रः कहोडमहर्षेः पुत्रः आसीत् । कहोडमहर्षिश्च जितेन्द्रियः, गुरुशुश्रूषापरायणश्च आसीत् । तस्य कहोडस्य सद्गुणान् दृष्ट्वा भृषं सन्तुष्टः गुरुः उद्दालकः स्वपुत्रीं सुजातां कहोडाय पत्नीत्वेन समर्पयति । कालक्रमेण सुजाता गर्भिणी जाता ।

कस्मिंश्चित् दिने गर्भस्थः शिशुः पितुः विद्याध्ययने दोषं विज्ञाय हसितवान् । अनेन क्रुद्धः कहोडः "तव देहस्य अष्टसु भागेषु वक्रता भवतु !" इति तं शशाप । तस्मादेव कारणात् सः शिशुः अष्टावक्रः इत्येव प्रसिद्धिङ्गतः ।

पुत्रस्य जन्मप्राप्तेः प्रागेव कहोडः जनकस्य आस्थाने वन्दिः इत्याख्महापण्डितेन सह वादविवादार्थं गतवान् । तत्र जयं प्राप्तवान् वंदिः कहोडं जले क्षिप्तवान् । अतः पुत्रः पितृविषये न ज्ञातवान् एव । अष्टावक्रः उद्दालकमेव "पिता" इति सम्बोधयन्, तस्मात् सर्वविधशिक्षणं प्राप्तवान् ।

एकस्मिन् दिने सः उद्दालकस्य अङ्के समारुह्य शास्त्रार्थपाठं श्रृण्वन् आसीत् । उद्दालकस्य पुत्रः श्वेतकेतुः एतत् सोढुं न शक्तवान् । सः कोपेन, "अष्टावक्र ! मम पितुः अङ्के अहमेव उपविशामि, त्वम् उत्थाय गच्छ" इति हस्तं गृहीत्वा तम् उत्थापितवान् । अष्टावक्रः रुदन् अम्बायाः निकटम् आगत्य, " अम्ब , मम पिता कुत्र ?" इति पृच्छन् , घटितवृत्तान्तं सर्वमपि श्रावितवान् । दुःखिता सुजाता पुत्राय स्वपतेः वृत्तान्तं यथावत् अकथयत् ।

द्वादशवर्षीयाष्टावक्रस्य मनसि पितुः पराजयस्य प्रतीकारः करणीय एव इति तीव्रेच्छा उत्पन्ना । अष्टावक्र मातुलं श्वेतकेतुं प्रति अवदत् यत्- "जनकराजस्य आस्थानम् आश्चर्यकरवस्तुभिः सुशोभितम् इति श्रूयते, तत्र गन्तुमिच्छामि । त्वमपि आगच्छसि चेत् आवामुभौ तत्र गत्वा विदुषां वाग्वादान् च श्रुत्वा ज्ञानवर्धनं कुर्वः । राजभोजने भागं गृहीत्वा सन्तोषं प्राप्नुयावः" इति । श्वेतकेतुरपि अङ्गीकृतवान् । उभावपि जनकस्य राजधानीं मिथिलां प्रति प्रस्थितवन्तौ ।

यदा एतौ जनकस्य यज्ञशालायाः महाद्वारं प्राप्तवन्तौ, तदा तत्र महाराजः आगतः । सेवकाः सर्वाः प्रजानपसर्तुं आदिष्टवन्तः । तदा अष्टावक्रः राजानम्, " महाराज ! अन्धपङ्गुस्त्रीवृद्धप्रभृतिभ्यः आदौ मार्गः कल्पनीयः । गौरवदृष्ट्या महाराजाय मार्गः कल्पनीयः इति तु सत्यमेव, किन्तु यदि ब्राह्मणः तत्र समागतः वर्तते तर्हि राज्ञा एव ब्राह्मणाय मार्गः कल्पनीयः " । बालकस्य वाणीं श्रुत्वा सन्तुष्टः सन् राजा, "ब्राह्मणेषु को वा ज्येष्ठः, को वा कनिष्ठः ? ते सर्वे अग्निसमानाः । देवेन्द्रोऽपि तेभ्यः ब्राह्मणेभ्यः गौरवं प्रददाति । एनं मार्गं त्वत्कृते एव आदौ कल्पयामि" इति अकथयत् । "आवां भवतां यज्ञं द्रष्टुमागतौ । किन्तु एते सेवकाः अस्माकं कृते आगन्तुमनुमतिं न यच्छन्ति । तदा सः द्वारपालकः

 ISSN: 2320-740X

“अस्यां सभायां बालकानां कृते प्रवेशो नास्ति । ज्ञानवृद्धानां वयोवृद्धानामेव अत्र प्रवेशार्थमवकाशः इति वन्दिपण्डितस्य आदेशो वर्तते” इत्युवाच । तदा अष्टावक्रः प्रोवाच, “आवाम् नियमानुसारेण व्रतानुष्ठानादीनि आचरितवन्तौ । जितेन्द्रियतागुरुशुश्रूषाभ्यां वेदाभ्यासमपि कृतवन्तौ । ज्ञानयोगेऽपि अस्ति आवयोः प्रवीणता । लोके कोऽपि पुरुषः केवलया शरीरवृद्ध्या वयोवृद्ध्या वा महान् न भवति ज्ञानेनैव भवति । अत एव अहं वन्दिना सह वादार्थमेव अत्र समागतोऽस्मि” इति । तदा राजा उक्तवान् , “वंदिपण्डितम् अद्यपर्यन्तं वेदवेदाङ्गपारङ्गतविद्वांस एव पराजयोन्मुखं कर्तुं न शक्तवन्तः । त्वं तु बालकः, एवं मा कुरु” इति । तदा अष्टावक्रः, “महाराज ! अहं ब्रह्माद्वैतस्य विचारान् वंदिना सह तर्कयितुमागतः । अहमस्य अहङ्कारं शमयामि । राजा आश्चर्यचकितस्सन् एनं परीक्षितुमेकं प्रश्नं पृष्टवान् – “ त्रिंशत् अंशान्, द्वादशविभागान्, चतुर्विंशतिपर्वाणि, षष्ट्याधिकत्रिंशत्पर्वाणि आश्रितम् एकमेवाद्वितीयं वस्तु किं ?”

“एकवर्षस्य कालमानः, एवं शरीरस्थानि सहस्रचक्राणि” इति उत्तरितवान् अष्टावक्रः ।

पुनः राजा पृष्टवान् – “कः प्राणीः निद्रावस्थायामपि चक्षुः न निमीलति ? जन्म प्राप्तवानपि सन् कः न चलति ? कस्य हृदयं नास्ति ? वेगवशादेव वृद्धिं कः प्राप्नोति ?” इति ।

तस्य उत्तरमष्टावक्रः एवं वदति – “मत्स्यः निद्रावस्थायामपि चक्षुषी न निमीलति । अण्डः न चलति । पाषाणस्य नास्ति हृदयम् । नद्याः प्रवाहः वेगवशात् वर्धते । वेदान्तादिशास्त्रोक्तरीत्या यदि पश्यामः, चिद्रूपपरमात्मा निद्रावस्थायामपि जीवात्मसु जागर्ति । ब्रह्माण्डः, निश्चलः । यस्य शरीरमेव नास्ति तस्य हृदयमसंभवम् । नदीरूपचित्तं योगिषु समाधिं प्रति वेगात् धावति” इति ।

एतावत् श्रुत्वा प्रसन्नस्सन् राजा अन्तःप्रवेशार्थमनुमतिं दत्तवान् । सभायां यदा सः प्रविष्टवान्, तदा सर्वेऽपि तस्य वक्रदेहं दृष्ट्वा उपहासं कृतवन्तः । अथापि धैर्येण सः गत्वा वंदिना सह वादार्थमुपविष्टवान् । ’एकम्’ इति सङ्ख्यामधिकृत्य वाक्यार्थः आरब्धः । एकमिति सङ्ख्यायाः विषये वन्दिना उक्तम् । द्वौ इति सङ्ख्यायाः विशेषः अष्टावक्रेण वर्णितः । एवमेव द्वादशसङ्ख्याः विचाराः समाप्ताः । त्रयोदशसङ्ख्यायाः विषये वक्तुं वन्दिः आरब्धवान् । शुक्लपक्षस्य त्रयोदशी विशिष्टा वर्तते, प्रपञ्चे त्रयोदशद्वीपाः वर्तन्ते इति अभिप्रायेण श्लोकस्य पादद्वयं रचितवान् । किन्तु अग्रे तस्मै किमपि न स्फुरितम् । तदा अष्टावक्रः तस्य श्लोकस्य पूर्तिं कृतवान् । “त्रयोदशदिनानि यावत् दैत्यः महाविष्णुना सह युद्धं कृतवान् सः , वेदे विद्यमानस्य अतिजगतीति छन्दसः प्रतिपादं वर्तन्ते त्रयोदश वर्णाः” इति । एतच्छ्रुत्वा वंदिः स्वपराजयमङ्गीकृतवान् । राज्ञाऽपि सः अष्टावक्रः अभिनन्दितः । अष्टावक्रः राजानं प्रार्थितवान् – “एषः वन्दिः पराजितप्रतिस्पर्धालून् सर्वानपि जले निक्षिप्तवान् अस्ति । अतः अद्य एषः अपि प्रक्षेप्तव्यः” इति । तदा वन्दिः कथयति यत् ‘अहं वरुणदेवस्य पुत्रः अस्मि । एतान् विदुषः जले निक्षिप्य , जलद्वारा वरुणयागार्थं प्रेषयामि स्म’ इति । तावदभ्यन्तरे वरुणयागेन प्रसन्नाः ब्राह्मणाः तत्र प्रत्यक्षभूता भवन्ति । तेषु अन्यतमः कहोडः अस्य पिता । तं अष्टावक्रं दृष्ट्वा सः अतिसन्तुष्टः जातः । सः पित्रा सह आश्रमं प्रत्यागतवान् । एतान् दृष्ट्वा सुजातायाः सन्तोषस्य तु सीमा एव नासीत् ।

कहोडः आश्रमस्य पार्श्वे विद्यमानायां नद्यां स्नात्वा आगच्छत्विति अष्टावक्रमादिष्टवान् । एवं तस्यां नद्यां स्नानानन्तरमष्टावक्रस्य देहे विद्यमानवक्रताः सर्वा अपि अपगताः । ततः प्रभृति तस्याः नद्याः नाम सुमङ्गा इत्यभूत् । अग्रे गत्वा सः अद्वैतवेदान्ते बहून् ग्रन्थान् लिलेख , प्रसिद्धिं च गतः ।

**********

# प्रकृतिर्मरणं शरीरिणाम्

चण्डीप्रसादः

**शास्त्रिद्वितीयवर्षम्**

प्रकृतिः नाम स्वभावः । शरीरधारिणां जनानां मरणं स्वाभाविकम् अस्ति इति भावः । अत्र मरणं नाम शरीरनाशः । आत्मना शरीरेण सह संयोगः जीवनं कथ्यते । आत्मशरीरयोर्वियोगः मरणम् इत्याशयः । आत्मा जराजन्ममरणादिरहितो भवति । किन्तु शरीरं नश्वरम् अस्ति । आत्मा नित्यः व्यापकः अविनाशी च अस्ति । आत्मा अजः कथ्यते । शरीरं तु उत्पन्नं भवति । यद् उत्पद्यते तत् नश्यति एव । शरीरम् उत्पद्यते अतः शरीरं नश्यति ।

अस्मिन् संसारे केवलम् आत्मा अविकारी भवति । आत्मव्यतिरिक्तः सर्वः विकारी परिवर्तनशीलो वा भवति । शरीरं तु आत्मव्यतरिक्तम् अस्ति । अतः अस्य शरीरस्य मरणमेव स्वभावो भवति । शरीरे त्रयः गुणाः विद्यन्ते, रजोगुणः, सत्त्वगुणः, तमोगुणश्चेति । एषां गुणानां मोक्षात् पूर्वं कदापि नाशो न भवति । एतेषां गुणानां केवलम् आविर्भावः तिरोभावो भवति । एते गुणाः सर्वेषां शरीराणां परिवर्तनस्य कारणानि भवन्ति । परिवर्तनं नाम नाशः ।

अस्माकं जीवने शरीरस्य तिस्रः गतयः सन्ति, बाल्यावस्था, युवावस्था, वृद्धावस्था , चेति युवावस्थायां बाल्यावस्थायाः शरीरस्य सर्वथा नाशो भवति । वृद्धावस्थायां युवावस्थायाः शरीरस्य नाशो भवति । एवं वृद्धावस्थायाः अनन्तरं देहान्तरप्राप्तिर्भवति । यथा मनुष्यः जीर्णानि वस्त्राणि विहाय नवीनानि वस्त्राणि धारयति, तथैव अयं जीवात्मा एकं शरीरं विहाय अपरं शरीरं धारयति । यदा अयं जीवात्मा शरीरं त्यजति तदा तस्य शरीरिणो मृत्युर्भवति इति कथ्यते । यदा अयं जीवात्मा अपरं धारयति, तदा तस्य शरीरिणो जन्म भवति इति एवं लोके प्रसिद्धिः अस्ति । दृश्यते अस्माभिः लोके यत् ये नराः जन्म लभन्ते ते अवश्यमेव म्रियन्ते । प्रकृतेः तिस्रः अवस्था विदिताः सन्ति, उत्पत्तिः, स्थितिः नाशश्चेति । इमाः अवस्थाः न केवलं चेतनेषु अपि तु अचेतनेषु अपि सञ्जाताः सन्ति इति अनुभूयते सर्वैरस्माभिः। एताः प्रकृतेः अवस्थाः वृक्षादिषु लतादिषु च दृश्यन्ते । वृक्षाः प्रथमम् उत्पद्यन्ते । किञ्चित्कालं तेषां स्थितिर्भवति । तदनन्तरं तेषां विनाशो भवति ।

 ISSN: 2320-740X

शरीरं त्रिविधम् उच्यते । स्थूलशरीरं, सूक्ष्मशरीरं, कारणशरीरं चेति । एतेषु शरीरेषु स्थूलशरीरस्यैव विनाशो भवति । सूक्ष्मशरीरं कारणशरीरं च न क्षीयेते । यावत् मनुष्याणां मोक्षो न भवति, तावत् सूक्ष्मशरीरं कारणशरीरं च विद्यते । सूक्ष्मशरीरम् आश्रित्य जीवात्मा तिष्ठति । मरणकाले स्थूलशरीरनाशानन्तरं सूक्ष्मशरीरं तस्माद् बहिर्निर्गच्छति । तेन सूक्ष्मशरीरेण सह जीवात्मापि बहिर्निर्गत्य अपरं स्थूलं शरीरं धारयति । किन्तु यदा नियमध्यानधारणादिभिः आत्मज्ञानं भवति तदा जीवः मूक्तो भवति । मुक्तावस्थायां कारणशरीरस्यापि सद्यः विनाशो भवति । कारणशरीरं तु अविद्यामूलकम् अस्ति । ज्ञानोदयात् अज्ञानस्य नाशो भवति । अतः सिद्ध्यति अनेन यत् यावत् मनुष्याणां मुक्तिर्न भवति, तावत् शरीरिणां मरणं स्वभावतः भवति । उक्तं च अस्मिन् विषये भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायाम् ।

**देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा । तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥ (२/३)**

**********

# महर्षिवाल्मीकिः

दुर्गा श्रीवत्सा

**शास्त्रिप्रथमवर्षम्**

वाल्मीकिमहर्षिः "रामायणम्" इत्याख्यकाव्यात् विश्वविख्यातः सञ्जातः। वयं जानीमः यत् अनेके महर्षयः शास्त्रज्ञाः तत्त्वज्ञानिनश्च बभूवुः, तेषु अन्यतमः वाल्मीकि-ऋषिः **"रसऋषिः"** इत्येव सुप्रसिद्धः।

प्राचेतसः इति वाल्मीकिमुनेः नाम आसीत् । अनेन अयं वाल्मीकिः प्रचेतोमुनेः पुत्रः अथवा तद्वंशीय इति ज्ञायते। तस्य नाम प्राचेतसः इति । स च प्रथमकविरिति भोजस्य चम्पूरामायणे विवृतमस्ति ।

प्रजापतिदशके प्रचेतोमुनिरन्यतम आसीत्। प्रजानां सृष्ट्यर्थं ब्रह्मणा नियुक्ता मुनयः प्रजापतय इति कथ्यन्ते । ते च मरीचि-अत्रि-अङ्गीरस-पुलस्त्य-पुल-क्रतु-प्रचेतस-वसिष्ठ-भृगु-नारदा इति मनुस्मृतौ उक्ताः । 'प्रकृष्टश्चेतनोऽस्यास्ती'ति "प्रचेतसः" इति विग्रहात् उत्तमचैतन्यवान् इत्यर्थः ज्ञायते । तादृशवंशे प्राप्तजन्मा वाल्मीकिमुनिः काव्यरचयितृत्वेन कविलोके राराज्यते ।

वाल्मीकिमहर्षिविषये श्रीमद्रामायणकाव्ये एव विचारः प्राप्यते । महाभारतस्य रचयिता यथा व्यासमुनिः तथा श्रीमद्रामायणस्य वाल्मीकिमुनिः । श्रीमद्रामायणकाव्यरचनायाः आरम्भे एका कथा भवति ।

तपस्वी वेदाध्ययनतत्परश्च नारदमुनिरेकदा वाल्मीकेराश्रमं प्रजगाम । वाल्मीकिरत्यन्तादरेण तमाहूतवान् । अस्मिन् लोके कः पुरुषः धर्मज्ञः, कृतज्ञः, सत्यवान्, वीरः, दृढसङ्कल्पश्च विद्यते? सदाचारी भूत्वा सकलजीवराशीनां शुभं

ISSN: 2320-740X 

कामयते । कः विद्वान्, कार्यदक्षः, सुन्दरः, जितक्रोधः, असूयारहितश्च ? को युद्धे सिद्धो भवति चेद् देवता अपि बिभ्यति ? तादृशपुरुषः क इति वक्तुं भवन्त एव समर्थाः इति वाल्मीकिः पप्रच्छ । तदा त्रिलोकज्ञः नारदमुनिरत्यन्तसन्तुष्टः सन् 'हे मुने भवदुक्तगुणाः एकस्मिन् एव दुर्लभाः । तथापि तादृश एकोऽस्ति । तस्मिन् विषये शृणु' इत्यवोचद् ।

इक्ष्वाकुवंशे एकः प्रसिद्धः राजा आसीत् । तस्य नाम श्रीरामः। स अत्यन्तं पराक्रमी शान्तः, धीरः, जितेन्द्रियः तथैव भवदुक्तगुणाः सर्वे अपि तस्मिन् सन्ति इत्येवमवर्णयन्नारदः। तस्य वर्णनं सविस्तरमुवाच वाल्मीकिमहर्षिस्तेनोल्लिखिते रामायणग्रन्थे । सः दशरथमहाराजस्य ज्येष्ठपुत्रः। स चतुर्विंशतिः वर्षाणि यावदरण्यं गत्वा तत्रस्थऋषीणां पीडकान् नाशयित्वा लङ्काधिपतिं रावणं च मारयित्वा लोकस्य देवतानां च कृते उपकारमकरोत् इति श्रीमद्रामायणकथां वाल्मीकिरवोचद् । नारदः एवमुक्त्वा देवलोकमगच्छत् । तदनन्तरं वाल्मीकिः आश्रमस्य पार्श्वे प्रवहन्त्याः नद्याः समीपे स्नानादिक्रियानुष्ठानार्थं गतः । तमसानदीं दृष्ट्वा सहजकवेर्वाल्मीकेः मनः तुष्टम् आसीत् । तमसानद्या जलं सत्पुरुषाणां मन इव अस्तीति व्याख्यातं कविना । परितः दृश्यमानवनसौन्दर्यं कञ्चित्कालं यावत् वीक्षमाणः नदीतीरे एव आसीत् । यदा मुनिः तत्रत्यसौन्दर्यमनुभवति स्म, तदा कस्मिंश्चिद् वृक्षे विद्यमानक्रौञ्चयुगलं मुनिना दृष्टम् । तदैव कश्चन व्याधः तद्युगले पुरुषपक्षिणम् अमार्षीत् । मुनेः विरुद्धः सन् सः पापनिश्चयी, वैरनिलयश्च बभूव । मुनेः पुरत एव सः पक्षी रक्तसिक्तः सन् अमृत । स्त्रीपक्षिणी करुणस्वरेण आक्रन्दनमकरोत् । अत्यन्ताल्पसमये एव परिवर्तितमिमं वृत्तान्तं दृष्ट्वा मुनिः दुःखितः सञ्जातः । पक्षिणः आक्रन्दनं श्रुत्वा क्रुद्धः सन् मुनिः – 'हे व्याध ! एतादृशदुष्टकार्यं भवता आचरितमिति हेतोः भवान् शाश्वतस्थानानि न प्राप्नुयात्' इति शशाप ।

तदनन्तरं वाल्मीकिमुनेः मनसि पौनःपुण्येन एषः वृत्तान्तः एव स्मरणे आगतः आसीत् । तद्विषयकचिन्तायामेव वाल्मीकिस्तस्य शिष्याय 'पादबद्धम् , समाक्षरैः सहितम् , वीणादिवाद्यानां लये बद्धं च इदं शापवाक्यं मम मुखात् निस्सृतम् । मया उच्चरितं छन्दोबद्धवाक्यं श्लोकरूपेणैव प्रसिद्धं भवतु' इत्युवाच ।

तदनन्तरं सः आश्रमे यथापूर्वं यदा ध्यानपुराणश्रवणादिषु मग्नः आसीत् , तदा ब्रह्मदेवः तत्र समागतः । तदा वाल्मीकिः आश्चर्यमनुभवन् अतिथिं स्वागतीकृत्य बद्धाञ्जलिः अभूत् । तदा वाल्मीकेः मनसि पुनः तद्वृत्तान्तः स्मरणे आगतः । सः किमिति शापं ददौ इति सस्मार । तस्य मनोगतं विज्ञाय 'हे मुने! मम इच्छावशादेव भवन्मुखात् छन्दोबद्धवाक्यं निस्सृतम् । अस्मिन् छन्दसि एव भगवतः श्रीरामचन्द्रस्य सम्पूर्णचरितं रचयतु । सर्वविधसङ्घटनानां प्रत्यक्षं भवतः भवति इति वाचमुक्त्वा सः प्रस्थितः । परमात्मनः करुणया वाल्मीकिः दोषरहितम् , वर्णविन्यासयुक्तम्, काव्यगुणोपेतं सम्पूर्णरामायणं विरचय्य अमरो बभूव ।

स्वरचितकाव्ये एव वाल्मिकिः एकः भागः सञ्जातः । वाल्मीकिः स्ववृत्तान्तं रामाय अवोचदिति आनन्दरामायणे एवं विवृतमस्ति – श्रीरामः भरद्वाजमुनेराश्रमं गत्वा चित्रकूटमागतः । तत्रैव वाल्मीकेः आश्रमः व्यराजत । वाल्मीकिः तौ दृष्ट्वा ससन्तोषम् आश्रमे स्वागतीकृत्य, अतिथिसत्कारम् अकार्षीत् । तदनन्तरं वाल्मीकिः स्ववृत्तान्तं श्रीरामायोवाच ।


ISSN: 2320-740X

वाल्मीकिः आदौ व्याधः आसीत् । तस्य परिवारेण सह वसति स्म । तेषां जीवननिर्वाहार्थं चोरैः मिलित्वा चौर्यं करोति स्म । सर्वदा धनुर्बाणादीन् गृहीत्वा अरण्ये अटति स्म । एकदा शोभमानाः सप्तर्षयः अरण्यमागताः । तेषां सकाशे विद्यमानानां वस्तूनां चौर्यं करोमि इति चिन्तयित्वा 'तिष्ठन्तु' इति तेषां पुरतः गतवान् । 'किमर्थमागच्छन्नस्ति भवान्' इति तमप्राक्षुः ऋषयः । "तेषां समीपे विद्यमानानि वस्तूनि स्वीकर्तुमागतवान् । तेनैव मम, एवं मम कुटुम्बस्य च पालनम् पोषणञ्च भवति' इति अवोचद्वाल्मीकिः ।" भवतामस्मिन् पापकर्मणि ते भागिनः भवन्ति वा इति पृष्ट्वा आगच्छ' इति वाल्मीकिमवोचन् । वाल्मीकिना गत्वा पृष्टे सति 'अस्माकं रक्षणं भवतः कर्तव्यम् । तेन तदर्थं क्रियमाणकार्यस्य पुण्यमथवा पापं, तत्र भवानेव तत्फलभाग्भवति' इत्यवोचद्भार्या । शुद्धान्तकरणो भूत्वा वाल्मीकिः 'अस्मात् पापसमुद्रात् मां रक्षन्तु' इत्यपृच्छत् । तदा ते मुनयः भवतां नामवैपरीत्यं कृत्वा 'मरा' इति, यावत् ते पुनः प्रत्यायास्यन्ति तावत्पर्यन्तं जपं करोतु इत्युक्तवन्तः ।

तैरुक्तरीत्या एकाग्रतया जपमाचरितवान् । तथा निश्चलतया बहुकालं स्थित्वा जपाचरणकारणात् ममोपरि वल्मीकः अजायत । तस्मात् वल्मीकात् बहिः आगन्तुमुक्तवन्तः । तस्मात् बहिरागमनानन्तरं मह्यं **"वाल्मीकिः"** इति नाम अदुः । एवं वाल्मीकिः तस्य पूर्ववृत्तान्तं रामायावोचत् ।

रामायणस्य उत्तरकाण्डेऽपि वाल्मीकेः कथा अस्ति । एकदा श्रीरामः सीतां वने त्यक्त्वा आगन्तुं लक्ष्मणमादिशति । आज्ञानुसारं लक्ष्मणः सीतादेवीं वाल्मीकेः आश्रमसमीपे विद्यमानवने त्यक्त्वा समागच्छति । दीनां गर्भिणीं रामविरहात् दुःखितां च सीतां वाल्मीकिः पश्यति । ततः सीतादेवीं तेषामाश्रमं प्रत्यागन्तुमाह्वयति। तत्रैव लव-कुशयोः जन्म भवति । तयोः जातकर्म-नामकरणादिसंस्कारान् वाल्मीकिरेव अकार्षीत् । तयोः सकलविद्यां बोधयति । तेन विरचितां रामयणकथां गीतरूपेण पाठयति ।

श्रीरामः अश्वमेधयागं कर्तुं विनिश्चित्य, अश्वमेकं दिग्विजयार्थं प्रेषयति । अयञ्च अश्वः एकवर्षं यावत् सर्वत्र अटित्वा आगच्छेदिति अश्वमेधयागे विद्यमानो विधिः । यदि तद्देशीयाः राजानः अश्वं बध्नन्ति, तदा अश्वेन सहागतसैन्येन योद्धव्याः इति नियमः । एवम् अटन् अश्वः वाल्मीक्याश्रमसमीपे गच्छति । लवः तमश्वम् अभान्त्सीत् । श्रीरामस्य सैन्येन लव-कुशौ युद्धमकार्ष्टाम् । तदनन्तरं वाल्मीकिः श्रीरामाय लव-कुशयोः परिचयं कृत्वा, तौ श्रीरामाय अर्पयति ।

एवं वाल्मीकेः जीवनं रामायणेन सह स्थित्वा रामचरितस्य अमरत्वसाधने यशस्वी वर्तते ।

**********

ISSN: 2320-740X

# वेदान्ते सृष्टिक्रमः

लोकनाथपण्डा

**शास्त्रिप्रथमवर्षम्**

तत्र सृष्ट्यारम्भकाले परमात्मा सृज्यमाणप्रपञ्चवैचित्र्यहेतुप्राणिकर्म कर्मसहकृतः अपरिमिताचिच्छक्तिविशिष्टमायासहितः, नामरूपात्मकं समस्तं प्रपञ्चमादौ बुद्धवाकलय्येदमेवं करिष्यामि, इदमेवं करिष्यामि, इत्यादिसङ्कल्पम् अकरोत् । "तदैक्षत बहुस्यां प्रजायेय" (छा.उ. २-३) । "सोऽकामयत बहुस्यां प्रजायेय" (तै.उ.१-२-६) । इति ।

"तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः, आकाशाद्वायुः, वायोरग्निरग्नेरापः, अद्भ्यः पृथिवी" इत्यादिश्रुत्यनन्तरे आदौ आकाशस्य सृष्टिः श्रूयते । तस्मादाकाशादीनि भूतानि अपञ्चीकृतानि तन्मात्रपदप्रतिपाद्यानि जायन्ते । तत्र आकाशस्य गुणः शब्दः । शब्दस्पर्शौ वायोः । तेजसस्तु शब्दस्पर्शरूपाणि । अपां तु शब्दस्पर्शरूपरसाः । शब्दस्पर्शरूपरसगन्धाः पृथिव्याः भवन्ति । वाक् – पाणि – पाद – पायु – उपस्थाख्यानि कर्मेंद्रियाणि आकाशादिभूतानां व्यस्तेभ्यः रजोंऽशेभ्यः क्रमेण पृथक् पृथक् जायन्ते । तथा रजोगुणप्रधानादाकाशाद्वाक् , रजोंऽशप्रधानात् वायोः पाणिः , रजोंऽशप्रधानात् अग्नेः पादः , रजोंऽशप्रधानात् जलात् पायुः , रजोंऽशप्रधानायाः पृथिव्याः उपस्था च जायन्ते । सत्त्वरजस्तमसां त्रिगुणानां सत्त्वेऽपि रजोंऽशस्याधिक्ये कर्मेन्दियाणि जायन्ते ।

तत्र प्राणापानव्यानोदानसमानाख्याः पञ्च वायवः भवन्ति । तेषु ऊर्द्ध्वगमनशीलो नासाग्रस्थायी वायुः प्राणः । अधोगमनशीलः मलापनयनव्यापारेण वायुः अपानः । सर्वतः गमनवानखिलशरीरवर्तिवायुः व्यानः । ऊर्ध्वगमनवान् उत्क्रमणशीलकण्ठस्थानवर्ती वायुः उदानः । शरीरमध्यगतः अन्नपानादिसमीकरणकरः नाभिदेशस्थः वायुः समानः । उक्तञ्च –

**"हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले । उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥"** इति ।

केचित् वदन्ति नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः अन्येऽपि पञ्च वायवः सन्तीति परिगणिताः । ते ते वायवः कथमत्र न गणिताः इति चेन्न । तेषां वायूनां प्राणादिषु पञ्चसु अन्तर्भावात् न ते पृथगालोचनीयाः । एते प्राणादयः आकाशस्य रजोंऽशेभ्यः मिलितेभ्यः जायन्ते । इदं च प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत् प्राणमयकोशो भवति । प्राणमयकोशे प्राणस्य प्रचुरत्वात् प्राणमयत्वम् । आत्मनः आच्छादकत्वात् चास्य कोशत्वं सङ्गच्छते । रजोगुणः क्रियात्मको भवति । तस्मात् तज्जन्यं वायुपञ्चकम् अथवा प्राणादिपञ्चकं क्रियास्वरूपं भवति वायुपञ्चकस्य वा प्राणादिपञ्चकस्य क्रियात्मकत्वमस्माभिः दृष्टम् । अतः प्राणादिपञ्चकस्य रजोंऽशकार्यत्वं निश्चीयते ।

 ISSN: 2320-740X

एतेषु विज्ञानमयमनोमयप्राणमयेषु कोशेषु त्रिषु ज्ञानशक्तिमान् कर्तृरूपः विज्ञानमयकोशो भवति । इच्छाशक्तिमान् करणरूपः मनोमयकोशो भवति । कार्यरूपः क्रियाशक्तिमान् प्राणमयकोशो भवति । एतेषां कर्तृकरणक्रियारूपत्वेन योग्यतां दृष्ट्वा विभागः कृतः । अनेन ज्ञानेन्द्रियसहितः बुद्धिरूपः कर्ता मनोज्ञानेन्द्रियरूपकरणसाहाय्येन प्राणादिपञ्चके कर्मेन्द्रियपञ्चके च क्रियामुत्पादयति । एतत् कोशत्रयं मिलित्वा सूक्ष्मशरीरमुत्पादयति ।

**सूक्ष्मशरीरनिरूपणम्**

अत्रापि चराचरप्राणिमात्रस्य यावन्ति सन्ति सूक्ष्मशरीराणि तेषाम् एकबुद्धिविषयतया वनवद् जलराशिवद्वा समष्टिः । अनेकबुद्धिविषयतया जलवत् वनगतवृक्षवद्वा व्यष्टिरपि भवति । सूक्ष्मशरीरमिदं समष्ट्युपहित-सर्वप्राणिलिङ्गशरीरेषु पुष्पेषु सूत्रमिवानुगतत्वात् ज्ञानेच्छाक्रियाशक्तिमत् कोशत्रयोपाधिसहितत्वात् च हिरण्यगर्भः सूत्रात्मा प्राणश्चेति कथ्यते । अस्य हिरण्यगर्भस्य सूत्रात्मकस्य इयं समष्टिः स्थूलप्रपञ्चापक्षेया सूक्ष्मत्वात् सूक्ष्मशरीरम् । विज्ञानमयमनोमयप्राणमयकोशत्रयं विराड्रूपेणानुभूतस्थूलप्रपञ्चविषयकजगद्वासनामयत्वात् स्वप्नः । अतः स्वप्नत्वात् सूक्ष्मत्वाच्चैव स्थूलशरीरलयस्थानमिति च कथ्यते ।

सूक्ष्मशरीराणि लिङ्गशरीराणीत्यपि कथ्यन्ते । तेषु सप्तदशावयवाः सन्ति । लिङ्ग्यते ज्ञाप्यते प्रत्यगात्मसद्भावः एभिरिति लिङ्गानि , तानि शरीराणि लिङ्गशरीराणि । ते चावयवाः ज्ञानेन्द्रियपञ्चकम् , बुद्धिमनसी , कर्मेन्द्रियपञ्चकम् , वायुपञ्चकं चेति । तत्र पञ्चज्ञानेन्द्रियाणि श्रोत्र – त्वक् – चक्षुः – जिह्वा – घ्राणाख्यानि । एतानि ज्ञानेन्द्रियाणि क्रमेण आकाशस्य सात्त्विकांशात् श्रोत्रम् , वायोः सात्त्विकांशात् त्वक् , तेजसः सात्त्विकांशात् चक्षुः , जलस्य सात्त्विकांशात् जिह्वा , पृथिव्याः सात्त्विकांशात् घ्राणञ्च पृथक् पृथक् व्यस्तेभ्यः एकैकस्मात् न तु मिलितेभ्यः उत्पद्यन्ते ।

निश्चयात्मकान्तःकरणवृत्तिः बुद्धिः इत्युच्यते । मनः सङ्कल्पविकल्पात्मकान्तःकरणवृत्तिः । सङ्कल्पात् विपर्ययः विकल्पः । अनेन संशयात्मकान्तःकरणवृत्तिः मनः इति सिद्धम् । अनयोः बुद्धिमनसोः चित्ताहङ्कारयोः अर्न्तभावः । स्मरणात्मकान्तःकरणवृत्तिः चित्तम् । तस्य चित्तस्य बुद्धावन्तर्भावः । अभिमानात्मकान्तःकरणवृत्तिः अहङ्कारः । तस्य अहङ्कारस्य मनसि अर्न्तभावः । एते बुद्धिमनश्चिताहङ्काराः मिलितेभ्यः आकाशवायुतेजोजल-पृथिवीगतसात्त्विकांशेभ्यः उत्पद्यन्ते । एतेषां प्रकाशात्मकत्वात् सात्त्विकांशकार्यत्वम् । श्रोत्रादिभिः ज्ञानेन्द्रियैः सहिता बुद्धिः विज्ञानमयकोशो भवति । अयं विज्ञानमयकोशः कर्तृत्व – भोक्तृत्व – सुखित्व – दुःखित्वादिभिः इहलोकपरलोकगामी भवति । अयमेव व्यावहारिकः जीवः भवति । यतः सत्त्वगुणप्रधानम् अतः सत्त्वगुणांशेभ्यः जातम् । मनः श्रोत्रादिज्ञानेन्द्रियैरेव सहितं सत् मनोमयकोशो भवति ।

कर्मसाधनानि इन्द्रियाणि कर्मेन्द्रियाणि भवन्ति । तानि च अत्रापि समष्टिरूपस्य विज्ञानमयादिकोशत्रयस्य तदवच्छिन्नसूत्रात्मनश्च एवं व्यष्टिरूपस्य विज्ञानमयादिकोशत्रयस्य तदवच्छिन्नचैतन्यस्य चेतनस्य च वनवृक्षयोश्च

तदवच्छिन्नाकाशयोरिव जलाशयजलयोरिव तद्गतप्रतिबिम्बाकाशयोरिव वा भेदः । इत्थम् अपञ्चीकृतपञ्चभूतेभ्यः सूक्ष्मशरीरं जायते ।

**स्थूलभूतनिरूपणम्**

अपञ्चीकृतपञ्चभूतेभ्यः सूक्ष्मप्रपञ्चस्योत्पत्तिरस्माभिः वर्णिता । अधुना पञ्चीकृतपञ्चमहाभूतेभ्यः स्थूलप्रपञ्चस्योत्पत्तिक्रमः निरूप्यते । पञ्चीकृतानि भूतानि स्थूलभूतानि उच्यन्ते ।

**स्थूलप्रपञ्चस्योत्पत्तिः**

पञ्चीकृतेभ्यः एतेभ्यः पञ्चभूतेभ्यः भूर्भुवःस्वर्महर्जनस्तपःसत्यमिति उपर्युपरि विद्यमानानाम् - अतलवितलसुतलरसातलतलातलमहातलपातालनामकानां क्रमशः अधोऽधो विद्यमानानां योजनया चतुर्दशलोकानां ब्रह्माण्डस्य तदनन्तरवर्तिचतुर्विधस्थूलशरीराणाम् , तेभ्यः उचितानामन्नानां पानीयानामन्येषां लेह्यादीनामुत्पत्तिर्भवति । चतुर्विधस्थूलशरीराणि तु जरायुजम् , अण्डजम् , उद्भिजम् , स्वेदजं चेति । तत्र जरायुभ्यो जाताः जरायुजाः , मनुष्यपशुप्रभृतयः । जरायुर्नाम तत् चर्म यस्मिन् गर्भस्थशिशुः बद्धो भवति । अण्डेभ्यः जाताः अण्डजाः , पक्षिपन्नगादयः । भूमिम् उद्भिद्य जाताः उद्भिजाः , तृण – कक्ष – गुल्म – वृक्षादयः । स्वेदेभ्यः जाताः स्वेदजाः , यूकमशकादयः । अत्र स्वेदशब्दः न केवलं घर्मोदकपरः , किन्तु स्वभिन्नतासम्पादकजलपरः , तेन जलसम्पृक्ते भूभागेऽपि मशकादीनां जन्म सम्भवति ।

**स्थूलप्रपञ्चनिरूपणम्**

अत्रापि चतुर्विधं स्थूलशरीरमिदं शरीरमिति एकबुद्धिविषयतया वनवत् जलाशयवद्वा समष्टिः । देवदत्तशरीरं यज्ञदत्तशरीरमिति अनेकबुद्धिविषयतया वृक्षवत् जलवद्वा व्यष्टिरपि भवति ।

स्थूलशरीरसमष्ट्युपहितं चैतन्यं वैश्वानरः विराट् इति चोच्यते । विश्वे नराः अस्य इत्यस्मिन्नर्थे विश्वशब्दः सर्वशब्दस्य पर्यायवाचको भवति । अनेन सर्वनराभिमानित्वात् वैश्वानर इति । विविधं राजमानत्वाद्विराट् इति । पूर्णत्वात् पुरूष इति चोच्यते ।

एतेषां चतुर्विधशरीराणां सा व्यष्टिः तत्तद् शरीरव्यक्तिः तदुपहितं चैतन्यं विश्वम् इत्युच्यते । सूक्ष्मशरीराभिमानं परित्यज्य स्थूलशरीरेषु प्रविश्य तत्तद्स्थूलशरीरेषु सर्वेषु “अहमस्मि” इत्यभिमानित्वात् । सर्वशब्दस्य पर्यायतया विश्वेति नाम लभ्यते ।

अस्य विश्वस्यैषा व्यष्टिः स्थूलशरीरम् । अन्नविकारत्वादेव हेतोः अन्नमयकोशः । स्थूलभोगायतनत्वात् जाग्रदित्यप्युच्यते ।

जाग्रदवस्थायामेतौ विश्ववैश्वानरौ दिङ्नियन्त्रितेन श्रोत्रेण शब्दम् , वायुनियन्त्रितेन त्वगिन्द्रियेण स्पर्शम्,

सूर्यनियन्त्रितेन नेत्रेण रूपम् , वरुणनियन्त्रितेन रसनेन्द्रियद्वारा रसम् , अश्विनीभिः नियन्त्रितेन घ्राणेन गन्धम्, अग्निनियन्त्रितेन वागिन्द्रियेण वचनम् , इन्द्रनियन्त्रितेन पाणिना ग्रहणम् , उपेन्द्रनियन्त्रितेन पादेन गमनम्, यमनियन्त्रितेन पायुना त्यागम् , प्रजापतिनियन्त्रितेनोपस्थेन्द्रियेणानन्दम् , चन्द्रनियन्त्रितेनान्तरिन्द्रियेन मनसः सङ्कल्पम् , चतुर्मुखेन ब्रह्मणा नियन्त्रितेनान्तरिन्द्रियेण बुद्धियुक्तेन निश्चम्, शङ्करनियन्त्रितेनान्तरिन्द्रियेणाहङ्कारेण अहङ्स्कारम् , विष्णुनियन्त्रितेन चित्तेन च स्थूलविषयम् अनुभवतः - "जागरितस्थानो बहिष्प्रज्ञः" इति श्रुतेः । एवं पञ्चीकृतेभ्यः पञ्चमहाभूतेभ्यः स्थूलभूतानां तत्प्रपञ्चस्य चोत्पत्तिः भवति ।

**********

# परिभाषेन्दुशेखरे "असिद्धं बहिरङ्गमन्तरङ्गे"

महेशबाध्वारः

**शास्त्रिप्रथमवर्षम्**

अत्र मुख्यांशाः –

- परिभाषायाः अवतरणम् ।
- परनित्याभ्याम् अन्तरङ्गस्य बलवत्त्वे उदाहरणम् ।
- अन्तरङ्गबहिरङ्गपदार्थनिर्वचनम् ।

अस्य परिभाषेन्दुशेखरस्य कर्ता अस्ति महावैयाकरणः नागेशभट्टः । अत्र ग्रन्थे त्रयस्त्रिंशदुत्तरैकशतं परिभाषाः विचारिताः । तत्र इतः पूर्वम् एकोनपञ्चाशत् परिभाषाः व्याख्याताः, एषा परिभाषा अस्ति पञ्चाशत्तमा । अस्याः परिभाषायाः शास्त्रे महान् उपयोगः अस्ति । बहुषु स्थलेषु महाभाष्यादिषु अस्याः परिभाषायाः विचाराः सन्ति ।

परनित्यान्तरङ्गापवादानाम् उत्तरोत्तरम् बलीयः इति वैयाकरणानां सिद्धान्तः । अष्टाध्याय्यां पठितेषु सूत्रेषु पूर्वसूत्रापेक्षया परसूत्रं प्रबलं सति बोधयति "विप्रतिषेधे परं कार्यम्" इति सूत्रम् । तत्र विप्रतिषेधो नाम तुल्यबलविरोधः , तुल्यबलविरोधे सति परं कार्यं भवतीति बोधयति इदं सूत्रम् । तदनन्तरं परशास्त्रापेक्षया नित्यशास्त्रस्य प्राबल्यमपि कृतप्रसङ्गत्वात् बोध्यते । प्रकृते पूर्वसूत्रापेक्षया परसूत्रस्य प्राबल्यस्य किमुदाहरणमिति दृश्यते चेत् "वृक्षेभ्यः" इति वृक्षशब्दस्य चतुर्थी बहुवचने (वृक्ष+भ्यस्) इत्यवस्थायाम् "सुपि च" इति सूत्रेण दीर्घः प्राप्नोति "बहुवचने झल्येत्" इति सूत्रेण एत्वञ्च प्राप्नोति । "सुपि च" इति सूत्रात् पूर्वं सूत्रमस्ति "बहुवचने झल्येत्" इति सूत्रम् । अनयोः द्वयोः सूत्रयोः विभिन्नेषु स्थलेषु चारितार्थ्यमस्ति, तादृशयोः द्वयोः सूत्रयोः अत्र प्राप्तिः इदानीम् "विप्रतिषेधे परं कार्यम्" सूत्रं

ISSN: 2320-740X 

पूर्वसूत्रापेक्षया “सुपि च” इति सूत्रापेक्षया परसूत्रं “बहुवचने झल्येत्” इति सूत्रं प्रबलं भवति इति बोधयति । तेन अत्र “बहुवचने झल्येत्” अनेन एत्वे (वृक्षेभ्यः) इति रूपं सिद्ध्यति । एवमेव रामाः इत्यत्रापि रामशब्दस्य प्रथमाबहुवचने जस्प्रत्यये (राम+जस्) इति स्थिते जकारस्य “चुटू” इत्यनेन इत्संज्ञा भवति (राम+अस्) इति स्थिते “अतो गुणे” सूत्रेण पररूपं प्राप्नोति, “प्रथमयोः पूर्वसवर्णः” अनेन पूर्वसवर्णदीर्घश्च प्राप्नोति तदानीम् “विप्रतिषेधे परं कार्यम्” इति परं कार्यं “प्रथमयोः पूर्वसवर्णः” इत्यनेन पूर्वसवर्णदीर्घः भवति तेन (रामाः) इति रूपं सिद्ध्यति ।

तदनन्तरं परशास्त्रापेक्षया नित्यशास्त्रस्य प्राबल्यं वर्तते । तस्य उदाहरणं भवति “तुदति” । तत्र नित्यशास्त्रस्य कुतः प्राबल्यं भवति इति चेत् “कृताकृतप्रसङ्गित्वात्” इति शास्त्रकारैः निर्णयः कृतः । तस्य उदाहरणं ’तुदति’ इत्यत्र ’तुद् धातोः’ कर्तरि लटि प्रथमपुरुषैकवचने तिप् प्रत्यये अयं धातुः तुदादिगणे पाठात् शविकरणप्रत्ययं प्राप्नोति, तिप्प्रत्ययं निमित्तीकृत्य “पुगन्तलघूपधस्य च” अनेन गुणश्च प्राप्नोति । तत्र पुगन्तेति गुणे कृते अपि “तुदादिभ्यो शः” इत्यनेन श-विकरणप्रत्ययः प्राप्नोति, शप्रत्यये कृते तु शप्रत्ययस्य “सार्वधातुकमपित्” इत्यनेन अपित् सार्वधातुकं ङित्वात् गुणः न प्राप्नोति “क्ङिति च” निषेधात् । अतः कृताकृतप्रसङ्गित्वरूपं नित्यत्वं शप्रत्ययस्य अस्ति । अतः शप्रत्यये सति (तुदति) इति रूपं भवति ।

परशास्त्रापेक्षया नित्यशास्त्रं प्रबलमिति पूर्वमुक्तम् । इदानीम् परशास्त्रापेक्षया अन्तरङ्गशास्त्रं प्रबलमिति उच्यते । तत्र इदानीम् “असिद्धं बहिरङ्गमन्तरङ्गे” इति परिभाषायाः विचारसन्दर्भे तत्र आदौ अवतरणग्रन्थे “नित्यादप्यन्तरङ्गं बलीयः अन्तरङ्गे बहिरङ्गस्य असिद्धत्वम्” इति मूलकाराणां पङ्क्तिः अस्ति । तत्र नित्यादपि इति अपिशब्दात् अत्र परशास्त्रापेक्षयापि अन्तरङ्गशास्त्रस्य प्राबल्यं वर्तते इति मन्तव्यम् । अत्र परशास्त्रापेक्षया अन्तरङ्गशास्त्रस्य प्राबल्ये किमुदाहरणमिति चेत् – “उभये देवमनुष्याः” इति अस्य उदाहरणं भवति । तत्र उभये इत्यत्र उभयशब्दस्य प्रथमाविभक्तौ बहुवचने जस् प्रत्यये (उभय+जस्) इत्यवस्थायाम् “प्रथमचरमतयाल्पार्थकतिपयनेमाश्च” इति सूत्रेण जसि विकल्पे सर्वनामसञ्ज्ञा उक्ता । अतः विकल्पेन अत्र सर्वनामसंज्ञा प्राप्नोति, “सर्वादिनि सर्वनामानि” इति सूत्रेण अस्य सर्वादिगणे पाठात् उभयशब्दस्य सर्वनामसंज्ञा नित्यं प्राप्नोति । तदानीं विकल्पेन संज्ञाविधायकं सूत्रम् “प्रथमचरमतयाल्पार्धकतिपयनेमाश्च” इति सूत्रं परम् अस्ति । अतः परत्वात् अत्र विकल्पेन सर्वनामसंज्ञा प्राप्नोति, परन्तु परत्वेन प्राप्तायाः संज्ञायाः अत्र जस्निमित्तकत्वेन बहिरङ्गं भवति । तदपेक्षया विभक्तिरित्यपेक्षत्वेन “सर्वादीनि सर्वनामानि” इति सूत्रेण विधीयमाना नित्या संज्ञा अन्तरङ्गा भवति । अतः अन्तरङ्गत्वात् अत्र नित्यैव सर्वनामसंज्ञा भवति । अतः “उभये देवमनुष्याः” इत्येव रूपं भवति, उभयाः देवमनुष्याः इति रूपं तु न भवति । एवं नित्यशास्त्रापेक्षया अन्तरङ्गशास्त्रस्य प्राबल्यम् अनया परिभाषया बोध्यते । तस्य उदाहरणमस्ति- “ग्रामणिनी कुले” । ग्रामणि इति शब्दः इदानीमत्र नपुंसकलिङ्गे अस्ति । तस्य प्रथमाद्विवचने (ग्रामणी औ) इति स्थिते “नपुंसकाच्च” इत्यनेन शी भावे (ग्रामणि ई) इति स्थिते, सम्प्रति “ह्रस्वो नपुंसके प्रातिपदिकस्य” इत्यनेन ह्रस्वः प्राप्नोति “इकोऽचि विभक्तौ” इत्यनेन नुमागमश्च प्राप्नोति । “ह्रस्वो नपुंसके प्रातिपदिकस्य” इत्यनेन ह्रस्वः नुमागमे सति न

 ISSN: 2320-740X

